VĀSIṢṬHA-GRANTHA-MĀLĀ 2.1

Die Laghu-Version des Yogavāsiṣṭha

(Mokṣopāya)

Ed. Peter Thomi. Text

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

Vorbemerkungen zur Edition

Der edierte Text orientiert sich primär an der Handschrift *Fraser Sansk. 6* der Bodleian Library, Oxford [Hs.]. Sie stammt vermutlich aus dem 15. Jhdt.[1] und ist möglicherweise die älteste noch fast vollständig erhaltene *Yogavāsiṣṭha*-Handschrift;[2] als Werktitel verwendet sie *Mokṣopāya*.

Zusätzlicher Text[3] (mit A etc. numeriert) und abweichende Lesarten der mit dem Titel *Laghu-Yogavāsiṣṭha* – zusammen mit den Kommentaren *Vāsiṣṭhacandrikā* (zu Prakaraṇa 1–3) und *Saṃsāratariṇi* (zu Prakaraṇa 4–6) – seit dem 19. Jhdt. gedruckt vorliegenden Version[4] [LN] sind ohne weitere Kennzeichnung im Apparat zitiert.[5] Ebenfalls im Apparat zu finden sind manuskriptspezifische Lesarten (wo der Text der LN-Lesart folgt) und Zusätze, ferner Emendationen[6] und sonstige Bemerkungen zum Text; Eigentümlichkeiten der Orthographie und eindeutige blosse Schreibfehler der Handschrift (recht zahlreich!)[7] werden in der Regel nicht festgehalten. Die Sarga-Numerierung ist durchgehend[8] und die Versnumerierung – sowohl gegenüber der Handschrift als auch LN – z. T. neu angelegt.

1 Vgl. A. B. Keith (*Catalogue of Sanskrit Manuscripts in the Bodleian Library*, App. to Vol. 1, Oxford 1909, Nr. 840 [unglücklicherweise mit „Yogavāsiṣṭhasāra“ betitelt]).

2 Sie umfasst noch 280 Blätter, das letzte (wohl kaum mehr) fehlt. Die Schrift entspricht der Jaina-Nāgarī, wobei aber die inlautenden Vokale *e ai o au* beliebig auch wie beim Devanāgarī-System gebildet werden. Auf dem drittletzten Blatt (Fol. 278 v) tritt Handwechsel ein. Eine dritte Hand ist auf Fol. 269–277 zu erkennen; es handelt sich hier offensichtlich um Blätter, die verlorengegangene ersetzen (erkenntlich am Übergreifen der fremden Schrift auf den oberen Rand von Fol. 278 r). – Zur Prakaraṇa-Einteilug: Das Mumukṣuvyavahāra-prakaraṇa wird als *sarga* bezeichnet (siehe S. 27) und leitet hier noch das Utpatti-prakaraṇa ein. – Die einzelnen Kapitel sind (bis auf die beiden ersten) nicht numeriert.

3 LN repräsentiert eine leicht erweiterte Laghu-Version des *Yogavāsiṣṭha*. (Sie ist es, die der Bṛhad-Version zugrunde zu liegen scheint.)

4 In zwei Auflagen: Die erste von 1888 (siehe verso), mit manuskriptähnlichem Layout (inkl. noch fehlenden Worttrennungen), markiert gewissermassen das Ende der traditionellen Textüberlieferung des YV in seiner kürzeren Fassung. Laut Kolophon basiert sie auf zwei zusammengeführten Textzeugen. Der Druck erfolgte auf sehr unbeständigem, bei heutiger Benutzung zerbröckelndem Papier, so dass wohl über kurz oder lang keine Exemplare mehr greifbar sein werden. – Die zweite (revidierte) Auflage von 1937 in moderner Buchform: *Laghuyogavāsiṣṭaḥ* [sic] *Vāsiṣṭhacandrikā-vyākhyā-sahitaḥ* [...] (ebenfalls Nirnaya-Sagar-Press Bombay; Nachdruck: Delhi 1985), wurde von Lakṣmaṇ Śāstrī Paṇśīkar betreut, der zuvor schon eine Ausgabe des Bṛhad-YV [BN] mit verschiedenen Auflagen veranstaltet hatte.

5 Diese beziehen sich primär auf die 1. Aufl.

6 Mit der Lesart weiterer Quellen sich deckende sind mit Sternchen gekennzeichnet. Zu diesen Quellen gehören die publiziert vorliegenden B-Versionen (siehe BN und BŚ) sowie die folgenden L-Handschriften (die erste und letzte vertritt die LN-Version mit den beiden Kommentaren): Berlin (Staatsbibliothek) Chambers 571 [= LVb]; Leipzig (Universitätsbibl.) A. 902 [= Lf]; London (India Office Library) San Ms Eggeling 2424 (I. O. 2120) [= Ld] & 2425 (I. O. 1342) [= Le]; Paris (Bibliothèque Nationale) Sanscrit 939 [= LVa]; ferner, Sarga 44 betreffend, RC.

7 An erster Stelle wäre etwa die oft mangel- bzw. fehlerhafte Visarga-Setzung zu nennen.

8 Die prakaraṇabezogene Numerierung der Sarga ist offensichtlich eine Spezialität der 2. Auflage von LN (in Anlehnung an B).

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

Abkürzungen

B	*Bṛhad-Yogavāsiṣṭha* (bzw. die Bṛhad-Version des *Yogavāsiṣṭha*)
BhG	*Bhagavadgītā*
BHS	F. Edgerton: *Buddhist Hybrid Sanskrit*, vol. 2: Dictionary, New Haven 1953.
BN	*The Yogavāsiṣṭha of Vālmīki with the Commentary Vāsiṣṭhamahārāmāyaṇa-tātparyaprakāśa*, Bombay ^{3}1937 (Nirnaya-Sagar Press). (1. Aufl. 1911.)
BŚ	Die sog. Śāradā-Rezension des *Bṛhad-Yogavāsiṣṭha*. Nach: *Sanskrit-Texts of Kashmir*, vol. 8–9 (Yoga-Vāsiṣṭha), reprod. by L. Chandra, New Delhi 1984 [= Śata-Piṭaka Series, 334–335]; *Bhāskarakaṇṭhas Mokṣopāya-Ṭīkā*, hgg. von W. Slaje (u. a.), ab 1993 (Graz, Aachen, Halle).
DPL	E. Conze: *Materials for a Dictionary of the Prajñāpāramitā Literature*. Tokyo 1967.
Hs.	Oxford, Bodleian Library: Ms. Fraser Sansk. 6 (siehe Vorbemerkungen).
ISpr	O. Böhtlingk: *Indische Sprüche*, 2. Aufl. Theil 1–3, St. Petersburg 1870–1873.
L	*Laghu-Yogavāsiṣṭha* (bzw. die Laghu-Version des *Yogavāsiṣṭha*)
Lfr.	Lesart fraglich
Ld–f	Siehe umseitig Fn. 6. (Wie Hs. Zeugen der kürzeren Version von L.)
LN	[*Laghuyogavāsiṣṭha*, Bombay 1888 (Nirnaya-Sagar Press).] Kolophon: **अयं लघुयोग-वासिष्ठाख्योऽतीव दुर्लभोऽप्रसिद्धश्च ग्रंथो महदायासेन श्रीमत्रिलोकरामजिस्वामिभ्यः संपाद्य श्रीमज्जयकृष्णजीवनराममहाराजनिकटवर्त्यन्यत्पुस्तकमप्यानीय तत्संयोजनेन पंडितद्वारा संशो-ध्य श्रीमत्पीतांबरमहाराज, शरीफसालेमहंमद् एतदुभाभ्यां कृतसूचनातः मुंम्बय्यां निर्णयसाग-राख्यमुद्रणयंत्रालयाधिपतिना स्वकीये मुद्रणयंत्रे स्थूलाक्षरैर्मुद्रयित्वा प्रसिद्धिं नीतः ॥ शकाब्दाः १८१० संवत् १९४४.** (Zur 2. Aufl. siehe umseitig Fn. 4.)
LVa–b	Siehe umseitig Fn. 6. (Wie LN Zeugen der längeren Version von L.)
m. c.	*metri causa*
R	*The Vālmīki-Rāmāyaṇa*, critical ed. vol. 1, Baroda 1959.
RC	*Rāmacarita of Abhinanda*, critically ed. with an introd. by K. S. Rāmaswāmī Śāstrī Śiromaṇi, Baroda 1930 [= Gaekwad's Oriental Series, 44]
ST	*Saṃsārataraṇi* (Kommentar zur zweiten Hälfte – Sthitiprakaraṇa bis Nirvāṇa-prakaraṇa – von L, endet mit Sarga 42; nach LN.)
VC	*Vāsiṣṭhacandrikā* (Kommentar zur ersten Hälfte – Vairāgyaprakaraṇa bis Ende Utpattiprakaraṇa – von L; nach LN.)
VGM	Vāsiṣṭha-Grantha-Mālā
VT	*Vāsiṣṭhamahārāmāyaṇa-Tātparyaprakāśa* (nach BN)
YV	*Yogavāsiṣṭha*

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

YOGAVĀSIṢṬHA

(MOKṢOPĀYA)

Laghu-Version

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

Vairāgyaprakaraṇa
Sarga 1: Vairāgyotpattipratipādana *7*
Sarga 2: Jagadbodhaprakāśa *11*

Utpattiprakaraṇa
Sarga 3: Mumukṣuvyavahāraprakaraṇa *19*
Sarga 4: Utpattiprakaraṇārthanirdeśa *27*
Sarga 5: Līlopākhyāna *32*
Sarga 6: Karkaṭīrākṣasīsūcyupākhyāna *45*
Sarga 7: Aindavopākhyāna *51*
Sarga 8: Kṛtrimendropākhyāna *53*
Sarga 9: Cittopākhyāna *54*
Sarga 10: Bālakākhyāyikā *57*
Sarga 11: Śambarikopākhyāna *58*
Sarga 12 [anāmakaḥ sargaḥ] *62*

Sthitiprakaraṇa
Sarga 13: Bhārgavopākhyāna *69*
Sarga 14: Dāmādyupākhyāna *73*
Sarga 15: Bhīmādyupākhyāna *77*
Sarga 16: Dāśūrākhyāyikā *79*
Sarga 17 [anāmakaḥ sargaḥ] *90*

Upaśamaprakaraṇa
Sarga 18: Janakopākhyāna *92*
Sarga 19: Puṇyapāvanopākhyāna *95*
Sarga 20: Balyupākhyāna *99*
Sarga 21: Prahrādacarita *102*
Sarga 22: Gādhivṛttānta *108*
Sarga 23: Uddālakopākhyāna *112*
Sarga 24: Suraghūpākhyāna *119*
Sarga 25: Bhāsavilāsasaṃvāda *123*
Sarga 26: Vītahavyopākhyāna *124*
Sarga 27 [anāmakaḥ sargaḥ] *131*

Nirvāṇaprakaraṇa
Sarga 28: Bhuśuṇḍopākhyāna *137*
Sarga 29: Pūjopākhyāna *148*
Sarga 30: Bilvanidarśana *154*
Sarga 31: Śilākhyāyikā *155*
Sarga 32: Arjunopākhyāna *156*
Sarga 33: Svapnaśatarudriya *157*
Sarga 34: Vetālākhyāyikā *160*
Sarga 35: Bhagīratopākhyāna *162*
Sarga 36: Śikhidhvajopākhyāna *164*
Sarga 37: Kacopākhyāna *191*
Sarga 38: Mithyāpuruṣopākhyāna *193*
Sarga 39: Vratatraya *194*
Sarga 40: Ikṣvākubodhana *196*
Sarga 41: Mṛgavyādhīya *201*
Sarga 42: [anāmakaḥ sargaḥ] *203*

[Die drei zusätzlichen Sarga bei LN:]
Sarga 43: Śāstragrahaṇaphalanirdeśa *209*
Sarga 44: Bharadvājānuśāsana *210*
Sarga 45: Śrīvasiṣṭharāmacandrasaṃvāda *213*

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

[अथ मोक्षोपायः]

दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः । यो विभात्येव भासात्मा तस्मै सर्वात्म
ने नमः ॥ १ ॥ अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः । नात्यन्ततज्ज्ञो ना
तज्ज्ञः सोऽस्मिञ्शास्त्रेऽधिकारवान् ॥ २ ॥ गुरुमासीनमेकान्ते वाल्मीकिं सर्वदर्शि
नम् । पप्रच्छ प्रणतो भूत्वा भरद्वाजो मृदुस्वरम् ॥ ३ ॥ भगवञ्ज्ञातुमिच्छामि कथं सं
सारसंकटे । रामो व्यवहृतो ह्यस्मिन्कारुण्याद्ब्रूहि मे गुरो ॥ ४ ॥ वाल्मीकिरुवाच ॥
साधु वत्स भरद्वाज योग्योऽसि कथयामि ते । श्रुतेन येन संमोहमलंदूरे करिष्यसि
॥ ५ ॥ भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् । अपुनःस्मरणं साधो मन्ये विस्म
रणं वरम् ॥ ६ ॥ दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् । संपन्नं चेत्तदुत्पन्ना
परा निर्वाणनिर्वृतिः ॥ ७ ॥ अन्यथा शास्त्रगर्तेषु लुठतां भविनामिह । भवत्यकृत्रि
माज्ञानां कल्पैरपि न निर्वृतिः ॥ ८ ॥ अशेषेण परित्यागो वासनाया य उत्तमः ।
मोक्ष इत्युच्यते सद्भिः स एव विमलक्रमः ॥ ९ ॥ वासना द्विविधा प्रोक्ता शुद्धा च
मलिना तथा । मलिना जन्मनो हेतुः शुद्धा जन्मविनाशिनी ॥ १० ॥ अज्ञानसुघना
कारा घनाहंकारशासिनी । पुनर्जन्मकरी प्रोक्ता वासना मलिना बुधैः ॥ ११ ॥ पुन
र्जन्मान्तरत्यक्ता स्थिता संभ्रष्टबीजवत् । देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति सोच्यते ॥
१२ ॥ ये शुद्धवासना भूयो न जन्मानर्थभाजनम् । ज्ञातज्ञेयास्त उच्यन्ते जीवन्मुक्ता
महाधियः ॥ १३ ॥ जीवन्मुक्तपदं प्राप्तो यथा रामो महामनाः । तत्तेऽहं शृणु वक्ष्या
मि जरामरणशान्तये ॥ १४ ॥ विद्यागृहाद्विनिष्क्रम्य रामो राजीवलोचनः । दिव
सान्यनयद्गेहे लीलाभिरकुतो भयम् ॥ १५ ॥ अथ गच्छति काले तु रामस्य गुणशा
लिनः । तीर्थपुण्याश्रमश्रेणीर्द्रष्टुमुत्कण्ठितं मनः ॥ १६ ॥ राघवश्चिन्तयित्वैवमुपेत्य
चरणौ पितुः ॥ हंसः पद्माविव नवौ जग्राह नरकेसरी ॥ १७ ॥ श्रीराम उवाच ॥
तीर्थानि देवसद्मानि वनान्यायतनानि च । द्रष्टुमुत्कण्ठितं तावन्ममेदं तात मान
सम् ॥ १८ ॥ तदेतामर्थितां पूर्वां सफलीकर्तुमर्हसि । न सोऽस्ति भुवने तात त्वया
योऽर्थी न मानितः ॥ १९ ॥ इति संप्रार्थितो राजा वसिष्ठेन समं तदा । विचार्यामु
ञ्चदेवैनं रामं प्रथममर्थिनम् ॥ २० ॥ शुभे नक्षत्रदिवसे भ्रातृभिः सह राघवः । निर
गात्स्वगृहात्तस्मात्तीर्थयात्रार्थमुद्यतः ॥ २१ ॥ अथारभ्य स्वकात्तस्मात्क्रमात्कौशलम
ण्डलात् । स्नानदानजपध्यानपूर्वकं स ददर्श ह ॥ २२ ॥ नदीस्तीर्थाणि पुण्यानि व

Die Hs. beginnt den Text mit ॐ **नमः परमात्मने**, LN (Mūla) mit ॐ **श्रीरामाय नमः** – 1.1 c: **विभात्यव०** – 2 c: **नात्यन्तमज्ञो नो तज्ज्ञः** – 5–8: Die Hs. ist z. T. zerstört. – 8 b: **लुण्ठतां भवतामिह** – 9 b: **वासनानां** – 11 b: **०शालिनी** d: **मलिना वासना बुधैः** – 12 a: **पुनर्जन्मांकुरांस्त्यक्त्वा** c/d: Lies **ज्ञातज्ञेयैः** (vgl. 13c) d: **चोच्याते** – 15 c: **दिवसाननय०** d: **०भयः** – 17 d: **नखकेसरौ** – 18 Ohne **श्री०** c: **द्रष्टुमुत्कंठितं नाथ** – 19 b: **सफलांकर्तु०** c: **नाथ** – 21 b: **भ्रातृभ्यां** – 22 b: **कोशल०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

नान्यायतनानि च । जङ्गलानि दिनान्तेषु तटान्यब्धिमहीभृताम् ॥ २३ ॥ अमर
किंनरमानवमानितः समवलोक्य महीमखिलामिमाम् । उपययौ स्वगृहं रघुनन्दनो
विहृतदिक् शिवलोकमिवेश्वरः ॥ २४ ॥ लाजपुष्पाञ्जलिव्रातैर्विकीर्णैः पुरवासिभिः ।
प्रविवेश पुरं श्रीमाञ्जयन्तो विष्टपं यथा ॥ २५ ॥ उवास स सुखं गेहे ततःप्रभृति
राघवः । वर्णयन्विविधाकारान्देशाचारानितस्ततः ॥ २६ ॥ प्रातरुत्थाय रामोऽसौ
कृत्वा संध्यां यथाविधि । सभासंस्थं ददर्शेन्द्रसमं स्वपितरं तदा ॥ २७ ॥ कताभिः
सुविचित्राभिः स वसिष्ठादिभिः सह । स्थित्वा दिनचतुर्भागं ज्ञानगर्भाभिरावृतः ॥
२८ ॥ जगाम पित्रनुज्ञातो महत्या सेनया वृतः । वराहमहिषाकीर्णं वनमाखेटकेच्छ
या ॥ २९ ॥ तत आगत्य सदने कृत्वा स्नानादिकं क्रमम् । समित्रबान्धवो भुक्त्वा
निनाय ससुहृन्निशम् ॥ ३० ॥ एवं दिनसमाचारो भ्रातृभिः सह राघवः । आगत्य
तीर्थयात्रायाः समुवास पितुर्गृहे ॥ ३१ ॥ नृपतिसंव्यवहारमनोज्ञया स्वजनचेतसि
चन्द्रिकयानया । परिनिनाय दिनानि स चेष्टया श्रुतिसुधारसपेशलयानघ ॥ ३२
॥ अथोनषोडशे वर्षे वर्तमानो रघूद्वहः । जगामानुदिनं कार्श्यं शरदीवामलं सरः ॥
३३ ॥ क्रमादस्य विशालाख्यं पाण्डुतां मुखमाददे । पाकफुल्लदलं शुक्लं म्लायमानमि
वाम्बुजम् ॥ ३४ ॥ कपोलतलसंलीनपाणिपद्मासनस्थितः । चिन्तापरवशस्तूष्णीम
व्यापारो बभूव ह ॥ ३५ ॥ कृशाङ्गश्चिन्तया युक्तः खेदी परमदुर्मनाः । नोवाच कस्य
चित्किंचिल्लिपिकर्मार्पितोपमः ॥ ३६ ॥ खेदात्परिजनेनासौ प्रार्थ्यमानः पुनःपुनः ।
चकाराह्निकमाचारं परिम्लानमुखाम्बुजः ॥ ३७ ॥ का ते पुत्र घना चिन्तेत्येवं दश
रथे नृपे । पृच्छति स्निग्धया वाचा कृत्वोत्सङ्गे पुनःपुनः ॥ ३८ ॥ न किंचित्तात मे
दुःखमित्युक्त्वा पितुरङ्कतः । रामो राजीवपत्राक्षस्तूष्णीमेवाभ्यतिष्ठत ॥ ३९ ॥ एत
स्मिन्नेव काले तु विश्वामित्र इति श्रुतः । महर्षिरभ्यगाद्द्रष्टुं तमयोध्यानराधिपम् ॥
४० ॥ तं दृष्ट्वा शालिनं लक्ष्म्या निवेद्य स्वर्णविष्टरम् । प्रहृष्टवदनो राजा स्वयमर्घ्यं
न्यवेदयत् ॥ ४१ ॥ उपविष्टाय तस्मै स विश्वामित्राय धीमते । पाद्यमर्घ्यं च गाश्चैव
भूयो भूयो न्यवेदयत् ॥ ४२ ॥ अर्चयित्वा च विधिवद्विश्वामित्रमभाषत । प्राञ्जलिः
प्रयतो वाक्यमिदं प्रीतिमना नृपः ॥ ४३ ॥ अशङ्कितोपनीतेन भास्वता दर्शनेन ते ।
साधो स्वनुगृहीताः स्मो रविणेवाम्बुजाङ्कुराः ॥ ४४ ॥ यदनादि यदक्षुण्णं यदपाय
विवर्जितम् । तदानन्दसुखं प्राप्तमद्य त्वद्दर्शनान्मुने ॥ ४५ ॥ यथा मृतस्य संप्राप्तिर्य
था वर्षमवर्षिके । यथान्दस्येक्षणप्राप्तिर्भवदागमनं तथा ॥ ४६ ॥ यथा हर्षो नभोग

23 c: Lies **दिगन्तेषु**; **जांगलानि वनांतेषु** – 24 (Drutavilambita) – 25 b: **विकीर्णः पुरवासिनाम्** – 28 d: Hs. **०गर्ताभि०** – 29 a: **पित्रानुज्ञातो** – 30 a: **सदनं** b: **क्रमात्** d: **निशाम्** – 31 b: **भ्रातृभ्या** (sic) – 32 (Drutavilambita) b: **सुजन०** c: **च** (für **स**) d: **स्रुत०**; **०यानघः** – 34 a: **विशालाक्षं** c: Lies **पाके**; **पाकोत्फुल्ल०** d: **सालिमालमिवा०** – 35 a: **०पाणिः** – 36 a: **कृशाङ्गचि०** d: **०कर्मार्पितो यथा** – 39 b: **०रङ्कगः** d: **०मेव स्म तिष्ठति** – 40: R 1.536*, Z. 1–2. – 41: R 1.17.28. – 42: R 1.542*, Z. 1 u. 3. c: **गां चैव** – 43: R 1.542*, Z. 4–5. a: **तु** (für **च**) – 44 d: **०जाकराः** – 46 ab: R 1.17.33ab. b: **०मवर्षके**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्या मृतस्य पुनरागमात् । तथा त्वदागमाद्ब्रह्मन्स्वागतं ते महामुने ॥ ४७ ॥ कच्चि
त्तेऽभिमतः कामः किं च ते करवाण्यहम् । पात्रभूतोऽसि मे विप्र प्राप्तः परमधार्मि
कः ॥ ४८ ॥ गङ्गाजलाभिषेकेण यथा प्रीतिर्भवेन्मम । तथा त्वद्दर्शनात्प्रीतरन्तः
शीतयतीव माम् ॥ ४९ ॥ विगतेच्छाभयाक्रोधो वीतरागो निरामयः । इदमत्यद्भुतं
ब्रह्मन्यद्भवान्मामुपागतः ॥ ५० ॥ यत्कार्यं येन चार्थेन प्राप्तोऽसि मुनिपुंगव । कृत
मित्येव तद्विद्धि मान्योऽसि हि भृशं मम ॥ ५१ ॥ तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भु
तविस्तरम् । हृष्टरोमो महातेजा विश्वामित्रोऽप्यभाषत ॥ ५२ ॥ सदृशं राजशार्दूल
तवैवैतन्महीतले । महावंशप्रसूतस्य वसिष्ठवशवर्तिनः ॥ ५३ ॥ अहं नियममातिष्ठे
सिद्ध्यर्थं पुरुषर्षभ । तस्य विघ्नकरा घोरा राक्षसा मम संस्थिताः । त्रातुमर्हसि मामार्तं
शरणार्थिनमागतम् ॥ ५४ ॥ तवास्ति तनयः श्रीमान्दृप्तशार्दूलविक्रमः । महेन्द्रसदृ
शो वीर्ये रामो रक्षोविदारणः ॥ ५५ ॥ तं पुत्रं राजशार्दूल रामं सत्यपराक्रमम् । का
कपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ॥ ५६ ॥ शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेज
सा । राक्षसा येऽपकर्तारस्तेषां मूर्ध्नि विनिग्रहे ॥ ५७ ॥ न च पुत्रकृतस्नेहं कर्तुमर्हसि
पार्थिव । न तदस्ति जगत्यस्मिन्यन्न देयं महात्मनाम् ॥ ५८ ॥ हन्त ते प्रतिजानामि
हतांस्तान्विद्धि राक्षसान् । न ह्यस्मदादयः प्राज्ञाः संदिग्धेसंप्रवृत्तयः ॥ ५९ ॥ अहं
वेद महात्मानं रामं राजीवलोचनम् । वसिष्ठश्च महातेजा ये चान्ये दीर्घदर्शिनः ॥
६० ॥ यदि धर्मो महत्त्वं च यशस्ते मनसि स्थितम् । तन्मह्यं स्वमभिप्रेतमात्मजं दा
तुमर्हसि ॥ ६१ ॥ इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः । विरराम महातेजा वि
श्वामित्रो मुनीश्वरः ॥ ६२ ॥ तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम् । मुहूर्तमा
सीन्निश्चेष्टः सदैन्यं चेदमब्रवीत् ॥ ६३ ॥ ऊनषोडशवर्षोऽयं रामो राजीवलोचनः ।
न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ ६४ ॥ इयमक्षौहिणी पूर्णा यस्याः पति
रहं स्थितः । तया परिवृतो युद्धं दास्यामि पिशिताशिनाम् ॥ ६५ ॥ बालो रामस्त्व
नीकेषु न जानाति बलाबलम् । अन्तःपुरादृते दृष्टा नानेनान्यारिणावनिः ॥ ६६ ॥
नववर्षसहस्राणि मम जातानि कौशिक । दुःखेनोत्पादितास्त्वेते चत्वारः पुत्रका
मया ॥ ६७ ॥ प्रधानभूतस्तेष्वेषु रामः कमललोचनः । तं विनापि त्रयोऽप्येते धार
यन्ति न जीवितम् ॥ ६८ ॥ स एव रामो भवता नीयते राक्षसान्प्रति । यदि तत्पु

47: Vgl. zu ab: R 1.17.33f u. 1.545*, Z. 1–2; zu cd: R 1.17.33gh. a: Lies **नभो गत्वा** (vgl. 5.278) – 48: Vgl. R 1.548* u. 1.17.34cd. a: **कश्च ते परमः कामः** c: **तीर्थभूतोऽसि** – 49: Vgl. R 1.551*. d: Hs. **शीतयितीव** – 51: R 1.557*. – 52: R 1.18.1. a: **राजशार्दूल०** c: **हृष्टरोमा** d: **विश्वामित्रोऽभ्य०** – 53: Vgl. R 1.18.2. – 54 a–d: Vgl. R 1.18.4. – 55 d: Hs. **०विदारण** – 56: R 1.18.8. a: Lies **स्वं** (vgl. R) – 57: Vgl. R 1.18.9. d: **मूर्धविनिग्रहे** – 58 ab: R 1.18.13ab. a: **पुत्रकृतं स्नेहं** – 59 ab: R 1.18.13cd. – 60–61: Vgl. R 1.18.14–15, 17. – 62: Vgl. R 1.18.19. – 63–65: Vgl. R 1.19.1–3. – 66 ab: Vgl. R 1.19.7ab. d: **०नान्या रणावनिः** – 67: Vgl. R 1.19.10. b: **जातस्य** – 68 a: **०भूतस्तेष्वेको** c: **तं विनेह त्रयोऽप्यन्ये**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्रहीनं त्वं मृतमेवाशु विद्धि माम् ॥ ६९ ॥ अन्यच्च यदि ते विघ्नं करोति स हि राव
णः । ततो युद्धमशक्ताः स्मो वयं तस्य दुरात्मनः ॥ ७० ॥ काले काले पृथग्ब्रह्मन्भू
रिवीर्यविभूतयः । एतेष्वभ्युदयं यान्ति प्रलीयन्ते च कालतः ॥ ७१ ॥ अप्येतस्मि
न्वयं काले रावणादिषु शत्रुषु । न समर्थाः पुरः स्थातुं नियतेरेष निश्चयः ॥ ७२ ॥
अयमन्यतमः कालः पेलवीकृतसज्जनः । राघवोऽपि गतो दैन्यं यत्र वार्द्धक्यजर्जरः
॥ ७३ ॥ तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरम् । समन्युः कौशिको वाक्यं प्रत्यु
वाच महीपतिम् ॥ ७४ ॥ करिष्यामीति संश्रुत्य प्रवक्तुं हेतुमर्हसि । स भवान्केसरी
भूत्वा मृगतामभिवाञ्छसि ॥ ७५ ॥ यदि त्वमक्षमो राजन्गमिष्यामि यथागतम् ।
हीनप्रतिज्ञाकाकुत्स्थः सुखी भव सबान्धवः ॥ ७६ ॥ तस्मिन्कोपपरीते तु विश्वामित्रे
महात्मनि । चचाल वसुधा कृत्स्ना सुरांश्च भयमाविशत् ॥ ७७ ॥ क्रोधाभिभूतं वि
ज्ञाय विश्वामित्रं महामुनिम् । धृतिमान्सुव्रतो धीमान्वसिष्ठो वाक्यमब्रवीत् ॥ ७८
॥ इक्ष्वाकुवंशजातोऽपि स्वयं दशरथोऽपि सन् । न पालयति चेद्वाक्यं को ऽपरः पा
लयिष्यति ॥ ७९ ॥ युष्मदादिप्रणीतेन व्यवहारेण जन्तवः । मर्यादां न विमुञ्चन्ति
तां न हातुं त्वमर्हसि ॥ ८० ॥ गुप्तं पुरुषसिंहेन ज्वलनेनामृतं यथा । कृतास्त्रमकृतास्त्रं
वा नैनं शक्ष्यन्ति राक्षसाः ॥ ८१ ॥ वाल्मीकिरुवाच ॥ तथा वसिष्ठे ब्रुवति रामभृ
त्यजनान्नृपः । कथं कीदृक्स्थितो राम इति पप्रच्छ बुद्धिमान् ॥ ८२ ॥ रामभृत्या ऊ
चुः ॥ रामो राजीवपत्राक्षो यतः प्रभृति चागतः । सविप्रस्तीर्थयात्रायास्ततः प्रभृति
दुर्मनाः ॥ ८३ ॥ यत्नप्रार्थनयास्माकं निजव्यापारमाह्निकम् । सोऽयमाम्लानवदनं
करोति न करोति वा ॥ ८४ ॥ किं संपदा किं विपदा किं गेहेन किमीहितैः । सर्व
मेवासदित्युक्त्वा तूष्णीमेवावतिष्ठति ॥ ८५ ॥ वस्त्रपानाशनादानपराङ्मुखतया
तया । परिव्राड्धर्मिणं राजन्सोऽनुयाति तपस्विनम् ॥ ८६ ॥ नाभिमानमुपादत्ते
नाभिवाञ्छति राजताम् । नोदेति नास्तमायाति सुखदुःखानुवृत्तिषु ॥ ८७ ॥ गीत
मस्वरमायासपदसंप्राप्तिवर्जितैः । चेष्टितैरतिकारुण्याद्भूयो भूयः प्रगायति ॥ ८८ ॥
आपदामेकमावासमभिवाञ्छसि किं धनम् । अनुशिष्येति सर्वस्वमर्थिने संप्रयच्छति
॥ ८९ ॥ न विद्मः किं महाबाहो तस्य तादृशचेतसः । कुर्मः कमलपत्राक्षे गतिरत्र
हितो भवान् ॥ ९० ॥ ईदृशः स्यान्महासत्यः क इवास्मिन्महीतले । प्राकृते व्यवहारे

69 c/d: Hs. स्वंमृतएवाशु – 70 cd: Vgl. R 1.19.19cd. c: Hs. hat am Rand eine Korr., die auf युधि hindeutet; lies युधम० (Inf.)?; युधि न शक्ताः – 71 a: पृथग्भिन्ना c: भूतेष्वभ्युदयं – 72 a: अद्यास्मिंस्तु – 73 d: वार्धक० – 74–78: Vgl. R 1.20.1–5. – 75 b: प्रतिज्ञां हातुमिच्छसि d: Lies ०वाञ्छति? – 76 c: Lies ०प्रतिज्ञ०?; हीनप्रतिज्ञः काकुत्स्थ – 78 b: जगन्मित्रं d: Hs. hier und auch sonst meist वशिष्ठ० – 79 c: पालयसि – 81: Vgl. R 1.20.9. b: गरुडेनामृतं – 82: a = R 1.21.1a. c: कीदृक् कुतो – 84 c: ०वदनः – 85 d: तूष्णीमेकोऽवतिष्ठते – 86 b: तथा – 87 d: ०दुःखादिवृत्तिषु – 88 a: नीतमायुरनायास० b: Hs. ०पदं c/d: चेष्टितैरिति काकल्या भूयो – 89 d: ०मर्थिभ्यः – 90 a/b: महाबाहोस्तस्य c/d: ०पत्राक्ष गति० d: हि नो – 91 a: महासत्वः (sic) b: क इहा० d: नियोजयितुं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तं यो निवेशयितुं क्षमः ॥ ९१ ॥ विश्वामित्र उवाच ॥ एवं चेत्तन्महाप्राज्ञं भवन्तो
रघुनन्दनम् । इहानयन्तु त्वरितं हरिणं हरिणा इव ॥ ९२ ॥ मोहो रघुपतेरेष नाप
ज्ञ्यो नापि रोगतः । विवेकवैराग्यकृतो बोध एष महोदयः ॥ ९३ ॥ एतस्मिन्मार्जिते
युक्त्या मोहे स रघुनन्दनः । विश्रान्तिमेष्यति पदे तस्मिन्वयमिवोत्तमे ॥ ९४ ॥
निजां च प्राकृतामेतां व्यवहारपरंपराम् । परिपूर्णमना मान्य आचरिष्यत्यखण्डि
ताम् ॥ ९५ ॥ एवं मुनीन्द्रे ब्रुवति पितुः पादाभिवन्दनम् । कर्तुमभ्याजगामाशु
रामः कमललोचनः ॥ ९६ ॥ प्रथमं पितरं पश्चान्मुनी मान्यैकमानितौ । ततो विप्रां
स्ततो बन्धून्प्रणनाम ततो गुरून् ॥ ९७ ॥ जग्राह च ततो दृष्ट्या मनाङ्मूर्ध्ना ततो
गिरा । राजलोकेन विहितां तां प्रणामपरम्पराम् ॥ ९८ ॥ उत्सङ्गे पुत्र तिष्ठेति वद
त्येव महीपतौ । भूमौ परिजनास्तीर्णे चासने सन्निवेश्यते ॥ ९९ ॥ दशरथ उवाच
॥ पुत्र प्राप्तविवेकस्त्वं कल्याणानां च भाजनम् । जडवज्जीर्णया बुद्ध्या खेदायात्मा
न दीयते ॥ १०० ॥ वृद्धविप्रगुरुप्रोक्तं त्वादृशेनानुतिष्ठता । पदमासाद्यते पुण्यं न
मोहमनुधावता ॥ १०१ ॥ तावदेवापदो दूरे तिष्ठन्ति परिपेलवाः । यावदेव न मोह
स्य प्रसरः पुत्र दीयते ॥ १०२ ॥ वसिष्ठ उवाच ॥ राजपुत्र महाबाहो शूरस्त्वं विजि
तास्त्वया । दुरुच्छेदा दुरारम्भा अप्यमी विषमारयः ॥ १०३ ॥ किमतज्ज्ञ इवाज्ञानां
योग्ये व्यामोहसागरे । विनिमज्जसि कल्लोलबहुले जाम्बवर्त्मनि ॥ १०४ ॥ विश्वा
मित्र उवाच ॥ किंनिष्ठाः किं च ते केन कियता कारणेन ते । आधयः प्रविलुम्पन्ति
मनो गेहमिवाखवः ॥ १०५ ॥ यथाभिमतमाशु त्वं ब्रूहि प्राप्स्यसि चानघ । सर्वमेव
पुनर्येन भेत्स्यन्ति त्वां तु नाधयः ॥ १०६ ॥ इत्युक्तमस्य सुमते रघुवंशकेतुराकर्ण्य
वाक्यमुचितार्थविलासगर्भम् । तत्याज खेदमभिगर्जति वारिवाहे बर्ही यथा त्वनुमि
ताभिमतार्थसिद्धिः ॥ १०७ ॥ इति वाल्मीकीये मोक्षोपाये वैराग्यप्रकरणे वैराग्यो
त्पत्तिप्रतिपादनं नाम प्रथमः सर्गः ॥ [१] ॥ वाल्मीकिरुवाच ॥ इति पृष्टो मुनीन्द्रेण
समाश्वस्य स राघवः । उवाच वचनं चारुपरिपूर्णार्थमन्थरम् ॥ १ ॥ श्रीराम उवाच
॥ भगवन्भवता पृष्टो यथावदधुनाखिलम् । कथयाम्यहमज्ञोऽपि को लङ्घयति सद्व
चः ॥ २ ॥ अहं तावदयं जातो निजेऽस्मिन्मन्दिरे पितुः । क्रमेण वृद्धिः संप्राप्ता प्रा
प्तविद्यश्च संस्थितः ॥ ३ ॥ ततः सदाचारपरो भूत्वाहं मुनिनायक । विहृतस्तीर्थयात्रा
र्थमुर्वीमम्बुधिमेखलाम् ॥ ४ ॥ एतावता च कालेन संसारास्थामिमां हरन् । प्रादु

92 d: **त्वरिता** – 93 ab: **एष मोहो रघुपतेर्नापज्ञ्यो नापि रागतः** – 95 a: **प्राकृतामेव** – 96 c: **॰जगामाथ** – 99 b: **वदत्येवं** d: **स न्यविक्षत** – 100 d: **दीयताम्** – 101 c: **पदमारुह्यते** – 103 Die Hs. hat sonst meistens **श्रीवसिष्ठ उवाच** d: **विषयारयः** – 104 d: **जाड्यशालिनि** – 105 a: **के च** b: **कियंतः**; Hs. **करणेन** – 107 (Vasantatilakā) c: Hs. **॰मभिगर्जित॰** – Kolophon zu Sarga 1: **श्रीवाल्मीकीये**; **॰प्रतिपादनो** (auch Hs.) – 2.1 b: **समाश्वास्य च** – 2 Hs. ohne **श्रीराम उवाच ॥** – 3 c: **वृद्धिं संप्राप्तः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

भूर्तो मनसि मे विचारः सोऽयमीदृशः ॥ ५ ॥ किं नामेदं वद सुखं येयं संसारसं
सृतिः । जायते मृतये लोको म्रियते जननाय च ॥ ६ ॥ अस्थिराः सर्व एवेमे सच
राचरचेष्टिताः । आपदां पतयः पापा भावा विभवभूमयः ॥ ७ ॥ अयःशिलाकास
दृशः परस्परमसङ्गिनः । दृश्यन्ते केवलं भावा मनःकल्पनया स्वया ॥ ८ ॥ किं मे
राज्येन किं भोगैः कोऽहं किमिदमागतम् । यन्मिथ्यैवास्तु तन्मिथ्या कस्य नाम
किमागतम् ॥ ९ ॥ एवं विमृशतो ब्रह्मन्सर्वेष्वेव ततो मम । भावेष्वरतिरायाता पथि
कस्य मरुष्विव ॥ १० ॥ शाम्यतीदं कथं दुःखमिति तप्तोऽस्मि चिन्तया । जरद्वृक्ष
इवोग्रेण कोटरस्थेन वह्निना ॥ ११ ॥ संसारदुःखपाषाणनीरन्ध्रहृदयोऽप्यहम् । निज
लोकभयादेव गलद्बाष्पं न रोदिमि ॥ १२ ॥ चिन्तानिचयचक्राणि नानन्दाय धना
नि मे । सुप्रसूतकलत्राणि गृहाण्युग्रापदामिव ॥ १३ ॥ इयमस्मिन्स्थितोदारा संसारे
परिपेलवा । श्रीर्मुने परिमोहाय सापि नूनं न शर्मदा ॥ १४ ॥ गुणागुणविचारेण
विनैव किल पार्श्वगम् । राजप्रकृतिवन्मूढा दुरारूढावलम्बते ॥ १५ ॥ कर्मणा तेन ते
नैषा विस्तारमनुगच्छति । दोषाशीविषवेगस्य गोक्षीरं विरसायते ॥ १६ ॥ तावच्छी
तमृदुस्पर्शः पारक्ये च जने जनः । वात्ययेव हिमं यावच्छ्रिया न परुषीकृतः ॥ १७
॥ प्राज्ञाः शूराः कृतज्ञाश्च पेशला मृदवश्च ये । पांसुमुष्ट्येव मणयः श्रिया ते परुषीकृ
ताः ॥ १८ ॥ श्रीमानजननिन्द्यश्च शूरश्चाप्यविकत्थनः । समदृष्टिः प्रभुश्चेति दुर्लभाः
पुरुषास्त्रयः ॥ १९ ॥ मनोरमा कर्षति चित्तवृत्तिं कदर्थसाध्या क्षणभङ्गुरा च । व्या
लावलीगात्रविवृत्तदेहा सुप्तोत्थिता पुष्पलतेव लक्ष्मीः ॥ २० ॥ आयुः पल्लवकोणाग्र
लयाम्बुकणभङ्गुरम् । उन्मत्तमिव संत्यज्य यात्यकाण्डे शरीरकम् ॥ २१ ॥ विषया
शीविषासङ्गपरिजर्जरचेतसाम् । अप्रौढात्मविवेकानामायुरायासकारणम् ॥ २२ ॥
वयं परिमिताकारे परिनिष्ठितनिश्चयाः । संसाराभ्रतडित्पुञ्जे मुने नायुषि निर्वृताः ॥
२३ ॥ युज्यते वेष्टनं वायोराकाशस्य च खण्डनम् । ग्रन्थनं च तरंगानामास्था नायुषि
युज्यते ॥ २४ ॥ पेशलं शरदीवाभ्रमस्नेह इव दीपकः । तरंगक इवालोलं गतमेवोप
लक्ष्यते ॥ २५ ॥ अविश्रान्तमनाः शून्यमायुराततमीहिते । दुःखायैव विमूढाऽन्तर्ग
र्भमश्वतरी यथा ॥ २६ ॥ प्राप्यं संप्राप्यते येन भूयो येन न शोच्यते । पराया निर्वृतेः
स्थानं यत्तज्जीवितमुच्यते ॥ २७ ॥ तरवोऽपि हि जीवन्ति जीवन्ति मृगपक्षिणः । स
जीवति मनो यस्य मननेन न जीवति ॥ २८ ॥ जातास्त एव जगति जन्तवः साधु

Vor V 6 und nach einer Lücke von ca. vier Zeilen schiebt die Hs. vier separat mit 1–4 numerierte Verse ein (3 Śloka, 1 Śikhariṇī), die mit dem Kolophon **विद्याधरमंत्रिवाक्यं ॥** versehen sind; anschliessend werden ohne Zeilenwechsel, gleich vor V 6 und ohne Daṇḍa, die beiden letzten Silben von V 5 wiederholt: **दृशः** – 6 b: **०संस्थितिः** – 7 a: **एवैते** c: **सर्वापदां पदं पापा** – 8 a: **०शलाका०** c: **श्लिष्यंते** – 11 d: **कोटरस्थित०** – 12 b: **०हृदयो ह्यहम्** – 13 c: **संप्रसूत०** – 16 d: **यत्क्षीरं विसरायते** – 17 b: **परे स्वे वर्तते जनः** – 20 (Upajāti) d: **श्वभ्रोत्थिता** – 21 b: **०लवांबु०** – 23 a: **परिमिताकार०** – 25 a: **पेलवं** c: Lies **तरंगकमिवा०** * – 26 c: **विमूढोंऽत०** – 27 c: Lies **परस्या**? – 28 d: **मननेनैव**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

जीविताः । ये पुनर्न च जायन्ते शेषा जरठगर्दभाः ॥ २९ ॥ भारोऽविवेकिनः शास्त्रं
भारो ज्ञानं च रागिणाम् । अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः ॥ ३० ॥
रूपमायुर्मनो बुद्धिरहंकारस्थितेहितम् । भारो भारधरस्येव सर्वं दुःखाय दुर्धियः ॥ ३१
॥ दिनैः कतिपयैरेव परिज्ञाय गतादरम् । दुर्जनः सज्ञनेनेव यौवनेन वियुज्यते ॥
३२ ॥ स्थिरतया सुखभासितया सदा सततमुज्झितमुत्तमफल्गुवत् । जगति नास्ति
तथा गुणवर्जितं मरणभाजनमायुरिदं यथा ॥ ३३ ॥ मुधैवाभ्युत्थितो मोहो मुधैव
परिवर्धते । मिथ्यामयेन भीताः स्मो दुरहंकारवैरिणा ॥ ३४ ॥ अहंकारवशादापदहं
काराद्दुराधयः । अहंकारवशादीहा नाहंकारात्परो रिपुः ॥ ३५ ॥ तमहंकारमाश्रित्य
परमं चिरवैरिणम् । न भुञ्जे न पिबाम्यम्भः किमु भोगान्भुजे मुने ॥ ३६ ॥ अहंका
रवशादास्यं मया भुक्तं हृतं कृतम् । तत्तत्सर्वमवस्त्वेव वस्त्वहंकाररिक्तता ॥ ३७ ॥
ब्रह्मन्यावदहंकारवारिदः परिजृम्भते । तावद्विकासमायाति तृष्णाकुटजमञ्जरी ॥ ३८
॥ निरहंकारवृत्तेर्मे मौर्ख्याच्छोकेन सीदतः । यत्किंचिदुचितं ब्रह्मंस्तदाख्यातुमिहा
र्हसि ॥ ३९ ॥ सर्वापदां निलयमध्रुवमन्तरस्थमुन्मुक्तमुत्तमगुणेन न संश्रयामि । यत्ना
दहंकृतिपदं परितोऽतिदुःखं शेषेण मां समनुशाधि महानुभाव ॥ ४० ॥ दोषैर्जर्जतां
यातं सत्कार्यादार्यसेवितम् । वातान्तपिछलववच्चेतश्चलति चञ्चलम् ॥ ४१ ॥ इतश्चे
तश्च सुव्यग्रं व्यर्थमेवाभिधावति । दूराद्दूरतरं दीर्घं ग्रामे कौलेयको यथा ॥ ४२ ॥
न प्राप्नोति क्वचिर्किंचित्प्राप्तैरपि महाधनैः । नान्तः संपूर्णतामेति तरण्डकमिवाम्बु
भिः ॥ ४३ ॥ क्रूरेण जडतां यातस्तृष्णाभार्यानुगामिना । शवः कौलेयकेनेव ब्रह्मन्भु
क्तोऽस्मि चेतसा ॥ ४४ ॥ अवान्तरनिपाताय शून्ये वंभ्रमणाय च । तृणं चण्डानि
लेनेव दूरं नीतोऽस्मि चेतसा ॥ ४५ ॥ पातालाद्गच्छता पृथ्वीं पृथ्व्याः पातालगा
मिना । कूपकाष्ठं कुदाम्नेव वेष्टितोऽस्मि कुचेतसा ॥ ४६ ॥ मिथ्यैव स्फाररूपेण विचा
राद्विशरारुणा । बालो वैतालिकेनेव गृहीतो ऽस्मि कुचेतसा ॥ ४७ ॥ वह्नेरुष्णतरः
शैलादपि कष्टतरक्रमः । वज्रादपि दृढो ब्रह्मन्दुर्निग्रहमनोग्रहः ॥ ४८ ॥ अप्यब्धि
पानान्महतः सुमेरून्मूलनादपि । अपि वह्न्यवनात्सौधो विषमश्चित्तनिग्रहः ॥ ४९
॥ चित्तं कारणमर्थानां तस्मिन्सति जगत्त्रयम् । तस्मिन्क्षीणे जगत्क्षीणं तच्चिकित्स्यं
प्रयत्नतः ॥ ५० ॥ चित्तादिमानि सुखदुःखशतानि नूनमभ्यागतान्यगवरादिव कान
नानि । तस्मिन्विवेकवशिनस्तनुतां प्रयाते मन्ये मुनेर्निपुणमेव गलन्ति तानि ॥ ५१
॥ हार्दान्धकारशर्वर्या तृष्णयैव दुरन्तया । स्फुरन्ति चेतनाकाशे दोषकौशिकपङ्क्तयः

29 c: **पुनर्नेह** – 30 b: **रागिणः** – 31 b: **०कारः स्थिरेहितम्** c: **भारवहस्येव** – 32 c: Hs. **सजनेनेव**, lies **सुजनेनेव**? – 33 (Drutavilambita) a: **०भासितयानया** – 34 a: **मोहान्** b: **परिवर्तते** – 36 d: **भजे** – 37 a/b: **०वशाद्यद्यन्मया**; lies **०वशाद्दास्ये मया भुक्तं हुतं** (zu letzterem vgl. BN) – 40 (Vasantatilakā) a: Hs. **०मंतरास्था०** d: Hs. **महानुभाग** – 41 b: **०सेवितात्** c: Lies **०पिञ्ज०**; **वातांतः पिच्छ०** – 43 d: **करंडक०** – 45 a: Lies **अवाक्तर०** b: **वा भ्रमणाय**, lies **संभ्रमणाय** – 49 c: **वह्न्यशनात् साधो** – 51 (Vasantatilakā) c: **०वशतस्तनुतां** d: **मुने निपु०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ ५२ ॥ यां यामहमतीवास्थां संश्रयामि गुणश्रियम् । तां तां कृन्तति मे तृष्णा तन्त्रीमिव कुमूषिका ॥ ५३ ॥ गन्तुमास्पदमात्मीयमसमर्थधियो वयम् । तृष्णाजाले विमुह्यामो जाले शकुनयो यथा ॥ ५४ ॥ तृष्णाभिधानया तात दग्धोऽस्मि ज्वालय तथा । यथा दाहोपशमनमाशङ्के नामृतैरपि ॥ ५५ ॥ भीषयत्यपि धीरेहमन्धयत्यपि सेक्षणम् । खेदयत्यपि शान्तेहं तृष्णा कृष्णेव शर्वरी ॥ ५६ ॥ अनावर्जितचित्तापि सर्वमेवानुधावति । न चाप्नोति फलं किंचित्तृष्णा जीर्णेव कामिनी ॥ ५७ ॥ यन्न शक्नोति तत्रापि धत्ते ताण्डविनी गतिम् । नृत्यत्यानन्दरहितं तृष्णा जीर्णेव नर्तकी ॥ ५८ ॥ पदं करोत्यलङ्घ्येऽपि तृप्तापि फलमीहिते । चिरं तिष्ठति नैकत्र तृष्णा चपलमर्कटी ॥ ५९ ॥ क्षणमायाति पातालं क्षणं याति नभस्तलम् । क्षणं भ्रमति दिक्कुञ्जे तृष्णा हृत्पद्मषट्पदी ॥ ६० ॥ सर्वसंसारदुःखानां तृष्णैका दीर्घदुःखदा । अन्तःपुरस्थमपि या योजयत्यतिसंकते ॥ ६१ ॥ लोकोऽयमखिलं दुःखं चिन्तयोज्झितयोज्झति । तृष्णाविषूचिकामन्त्री चिन्तात्यागे हि गच्छति ॥ ६२ ॥ भोगार्थमङ्गनातृष्णा गम्भीरमपि मानसम् । उत्तानतां नयत्याशु सूर्यांशव इवाम्बुजम् ॥ ६३ ॥ नासिधारा न वज्रार्चिर्न तप्तायःकणार्चिषः । तथा तीक्ष्णा यथा ब्रह्मंस्तृष्णेयं हृदि संस्थिता ॥ ६४ ॥ अपि मेरूपमं प्राज्ञमपि शूरमपि स्थिरम् । तृणीकरोति तृष्णैषा निमेषेण नरोत्तमम् ॥ ६५ ॥ आर्द्रान्त्रतन्त्रीगहनो विकारी परितापवान् । कायः स्फुरति संसारे सोऽपि दुःखाय केवलम् ॥ ६६ ॥ स्तोकेनानन्दमायाति स्तोकेनायाति खेदताम् । नास्ति देहसमः शोच्यो नीचो गुणविवर्जितः ॥ ६७ ॥ कलेवरमहंकारगृहस्थस्य महागृहम् । लुठत्वभ्येतु वा स्थैर्यं किमनेन मुने मम ॥ ६८ ॥ पङ्क्तिबुद्धेन्द्रियपशुं वल्गत्तृष्णागृहाङ्गनम् । चित्तभक्तिकृतानन्दं नेष्टं देहगृहं मम ॥ ६९ ॥ किं श्रिया किं च राज्येन किं कायेन किमीहया । दिनैः कतिपयैरेव कालः सर्वं निकृन्तति ॥ ७० ॥ जिह्वामर्कटिकाक्रान्तवदनद्वारभीषणम् । दृष्टदन्तास्थिशकलं नेष्टं देहगृहं मम ॥ ७१ ॥ रक्तमांसमयस्यास्य सबाह्याभ्यन्तरं मुने । विनाशधर्मिणो ब्रूहि कैव कायस्य रम्यता ॥ ७२ ॥ जराकाले जरामेति मृतिकाले तथा मृतिम् । सममेवाविशेषज्ञः कायो भोगिदरिद्रयोः ॥ ७३ ॥ तडित्सु शरदभ्रेषु गन्धर्वनगरेषु च । स्थैर्यं येन विनिर्णीतं स विश्वसतु विग्रहे ॥ ७४ ॥ लब्ध्वापि तरलाकारे कार्यभारतरंगिणि । संसारसागरे जन्म बाल्यं तस्यापि केवलम् ॥ ७५ ॥ अशक्तिरापदस्तृष्णा मूकता मूढबुद्धिता । गृध्रता लोलता दैन्यं सर्वं बाल्ये प्रतिष्ठितम् ॥ ७६ ॥ मनः प्रकृत्यैव चलं बाल्यं चञ्चलतां चरम् ।

53 a: **यामहमवीतास्थं** (sic) b: Lies **०श्रियाम्*** – 58 a: **तांडविनीं** – 60 a: **पाताले** – 61 a: **०दोषाणां** – 62 c/d: **०मंत्रश्चिंतात्यागो हि कथ्यते** – 63 a: **रोगार्तिरंगना०** b: **मानवम्** – 64 a: **वज्राग्निर्न** – 65 d: **निमिषेण** – 66 b: Hs. **परिपातवान्** – 68 c: **लुंठत्व०** – 69 a: **०बद्धेंद्रिय०** b: **चलत्तृष्णा०** c: **चित्तभृत्य०** – 70: Nach 71. – 71 b: Hs. **०वचन०** – 72 c: **नाशैकधर्मिणो** – 75 d: **बाल्यं दुःखाय केवलम्** – 76 c: **गृध्नुता** – 77 b: **चंचलतापरम्** c: **संश्लिष्यतोस्तात**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तयोः संश्लिष्यतोस्त्राता क इवान्तः कुचापले ॥ ७७ ॥ स्त्रीलोचनैः स्वहृत्पुञ्जैर्ज्वालाजालैस्तरंगकैः । चापलं शिक्षितं ब्रह्मञ्शैशवाक्रान्तचेतसः ॥ ७८ ॥ स्तोकेन वशमायाति स्तोकेनैति विकारिताम् । अमेध्यय एव रमते बालः कौलेयको यथा ॥ ७९ ॥ संहृष्टो भुवने भोक्तुमिन्दुमादातुमम्बरात् । वाञ्छते येन मौर्ख्येण तत्सुखाय कथं भवेत् ॥ ८० ॥ शैशवे गुरुतो भीतिर्मातृतः पितृतस्तथा । जनतो ज्येष्ठबालच्च शैशवं भयमन्दिरम् ॥ ८१ ॥ सकलदोषदशाभिहताशयं भवनमत्यविवेकविलासिनः । इह न कस्यचिदेव महामुने भवति बाल्यमिदं परितुष्टये ॥ ८२ ॥ बाल्यानर्थमथ त्यक्त्वा पुमानभिहिताशयः । आरोहति निपाताय यौवनं संभ्रमेण तु ॥ ८३ ॥ स्वचित्तचलसंस्थेन नानासंभ्रमकारिणा । बलात्कामपिशाचेन विवशः परिभूयते ॥ ८४ ॥ विस्तीर्णापि प्रसन्नापि पावन्यपि हि यौवने । मतिः कलुषतामेति प्रावृषीव तरंगिणी ॥ ८५ ॥ शरीरमरुतापोत्थां युवतां मृगतृष्णिकाम् । मनोमृगाः प्रधावन्ति पतन्ति विषमावटे ॥ ८६ ॥ यदा यदा परां कोटिमधिरोहति यौवनम् । वल्गन्ति सज्वराः कामास्तदा नाशाय केवलम् ॥ ८७ ॥ ते वन्द्यास्ते महात्मानस्त एव पुरुषा भुवि । ये सुखेन समुत्तीर्णाः साधो यौवनसंकटात् ॥ ८८ ॥ विनयभूषितमार्यजनास्पदं करुणयोज्वलमावलितं गुणैः । इह हि दुर्लभमङ्ग सुयौवनं जगति काननमम्बरगं यथा ॥ ८९ ॥ मांसपाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे । स्नाय्वस्थिग्रन्थिशालिन्याः स्त्रियाः किमिव शोभनम् ॥ ९० ॥ त्वङ्मांसरक्तबाष्पाम्बु पृथक्कृत्वा विलोचनम् । समालोकय रम्यां चेत्किं मुधा परिमुह्यसि ॥ ९१ ॥ मेरुश्रृङ्गतटोल्लासिगङ्गाजलरयोपमाः । दृष्टा यस्मिन्मुने मुक्ता हारस्योल्लासशालिनः ॥ ९२ ॥ श्मशानेषु दिगन्तेषु स एषु ललनास्तनः । श्वभिरास्वाद्यते काले लघुपिण्ड इवान्धसः ॥ ९३ ॥ केशकज्जलसारिण्यो दुःस्वप्ना लोचनप्रियाः । दुष्कृताग्निशिखा नार्यो दहन्ति तृणवन्नरम् ॥ ९४ ॥ ज्वलतामतिदूरेऽपि सरसा अपि नीरसाः । स्त्रियो हि नरकाग्नीनामिन्धनं चारु दारुणम् ॥ ९५ ॥ कामनाम्ना किरातेन विस्तीर्णा मुग्धचेतसाम् । नार्यो नरविहंगानामङ्गबन्धनवागुराः ॥ ९६ ॥ जन्मपल्वलमत्स्यानां चित्तकर्दमचारिणाम् । पुंसां दुर्वासनारज्जौ नारी बिडिशपिण्डिका ॥ ९७ ॥ सर्वेषां दोषरत्नानां सुसमुद्गिकया तया । दुःखश्रृङ्खलया नित्यमलमस्तु मम स्त्रिया ॥ ९८ ॥ इतो मांसमितो रक्तमितोऽस्थीनीति वासरैः । ब्रह्मन्कतिपयैरेव याति स्त्री विशरारुताम् ॥ ९९ ॥ यस्य स्त्रीस्तस्य भोगेच्छा

78 a: Lies सुहृत्पुञ्जै०; स्त्रीलोचनैस्तडित्पुंजै० b: ०ज्वालामालै० – 79 b: स्तोकेनैव – 80 a–c: Hs. ist entstellt: संहृष्टो भवने तोकमिन्दुमादाय चाम्बरात् । वत्स ते येन मूर्षेण [lies मूर्खेण] – 82 (Drutavilambita) b: भवनमप्य० – 83 a: बाल्यावस्थामथ b: ०भिहता० – 84 a: Hs. स्वचित्ताचल०; स्वचित्तबिल० b: ०विभ्रममदायिना – 86 b: युवतामृग० c: प्रधावंतः d: विषयावटे – 87 b: ०मध्यारोहति – 89 (Drutavilambita) c: ०मङ्गलयौवनं – 91 c: रम्यं – 92 b: ०रयोपमा c: यस्मिन् स्तने d: ०शालिता – 93 b: स एव – 94 a: ०धारिण्यो b: दुःस्पर्शा d: ०न्नरान् – 96 b: विकीर्णा – 97 d: बडिश० – 98 b: ०कयानया – 99 d: विसरारु० – 100 a: स्त्री तस्य b: निस्त्रीकस्य

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

नस्त्रीकस्य क्व भोगभूः । स्त्रियं त्यक्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवेत् ॥ १००
॥ आपातमात्ररमणेषु दुरुत्तरेषु भोगेषु नाहमलिपक्षिविचञ्चलेषु । ब्रह्मन्रमे मरणरोग
जरादिभीत्या शाम्याम्यहं परमुपैमि पदं प्रयत्नात् ॥ १०१ ॥ अप्रयाति हि बालत्वं
बलात्पिबति यौवनम् । यौवनं च जरा पश्चात्पश्य कर्कशतां मिथः ॥ १०२ ॥ अना
यासकदर्थिन्या गृहीते जरया जने । पलाय्य गच्छति प्रज्ञा सपत्न्येव हिताङ्गना ॥
१०३ ॥ दासाः पुत्राः स्त्रियश्चैव बान्धवाः सुहृदस्तथा । हसन्त्युन्मत्तकमिव नरं वार्द्धु
ककम्पितम् ॥ १०४ ॥ दुःप्रेक्ष्यं जरठं दीनं हीनं गुणपराक्रमैः । गृध्रो वृक्षमिवादीर्घं
गर्धो ह्यभ्येति वार्द्धुकम् ॥ १०५ ॥ दैन्यदोषमयी दीर्घा हृदि दाहप्रदायिनी । सर्वाप
दामेकसखी वार्द्धुके वर्धते स्पृहा ॥ १०६ ॥ कर्तव्यं किं मया कष्टं परत्रेहातिदारु
णम् । अप्रतीकारयोग्यं हि वार्द्धुके वर्धते भयम् ॥ १०७ ॥ गर्धोऽभ्युदेति सोल्लास
मुपभोक्तुं न शक्यते । हृदयं दह्यते नूनं वार्द्धुके शक्तिदौःस्थ्यतः ॥ १०८ ॥ परिप
क्वमिवालोक्य जराक्षारांबुधौसरम् । शिरःकूष्माण्डकं भुङ्क्ते पुंसां कालः कलेवरम् ॥
१०९ ॥ मरणस्य मुने राज्ञो जरा धवलचामरा । आगच्छतोऽथ निर्याति ह्याधिव्या
धिपताकिनी ॥ ११० ॥ जरासुधालेपसिते शरीरान्तःपुरान्तरे । अशक्तिरर्तिरापच्च
तिष्ठन्ति सुखमङ्गनाः ॥ १११ ॥ किं तेन दुर्जीवितदुर्ग्रहेण जरां गतेनापि हि जीव्यते
यत् । जरा जगत्यामजिता जनानां सर्वेषणास्तात निराकरोति ॥ ११२ ॥ क्वचिद्वा
विद्यते तेषां संसारे सुखभावना । आखुस्तन्तुमिवाशेषां कालस्तामपि कृन्तति ॥
११३ ॥ न तदस्तीह यदयं कालः सकलघस्मरम् । ग्रसते न जगज्जातं महाब्धिमिव
वाडवः ॥ ११४ ॥ महान्तमपि नो देव परिपालयति क्षणम् । कालः कवलिताशेष
विश्वो विश्वात्मतां गतः ॥ ११५ ॥ ये रम्या ये शुभारम्भाः सुमेरुगुरवोऽपि ये ।
कालेन विनिगीर्णास्ते गरुडेनेव पन्नगाः ॥ ११६ ॥ तृणं पशु महेन्द्रं च सुमेरुं पर्णम
र्णवम् । आत्मंभरितया सर्वमात्मसात्कर्तुमुद्यतः ॥ ११७ ॥ कालोऽयं भूतमशकघुंघु
मानां प्रपातिनाम् । ब्रह्माण्डोदुम्बरौघानां बृहत्पादपतां गतः ॥ ११८ ॥ प्रेक्ष्याहर्वि
निमेषेण सूर्याक्ष्णा पाकवत्फलम् । लोकपालफलान्यत्ति जगज्जीर्णवनाश्रयः ॥ ११९
॥ गुणैरापूर्यते यैव लोकरत्नावली भृशम् । भूषार्थमिव वामाङ्गे कृत्वा भूयो निकृन्त
ति ॥ १२० ॥ जराजीर्णकुटीकीर्णान्निक्षिपत्युग्रकोटरे । क्रमेण गुणवल्लोकमणीन्मृ
त्युसमुद्गके ॥ १२१ ॥ अस्यैवाचरतो दीनैरुच्चैर्भूतमृगध्वजैः । आखेटकं जर्जरिते

101 (Vasantaitkā) a: **सुदुस्तरेषु** b: **०पक्षतिचंचलेषु** – 102 a: Lies **बालत्वे**?; **अपर्याप्तं हि बालत्वं** – 103 d: **सपत्न्येवाहता०** – 104 d, 105 d, 106 d, 107 d, 108 d: **वार्धक०** bzw. **वार्धके** – 107 b: **परत्रेत्यति०** – 108 d: **शक्तिदौःस्थ्येन** – 109 b: **०क्षारविदूसरम्** d: **किलेश्वरः** – 110 c: **आगच्छतोऽग्रे** – 111 (Upajāti) c: **अशक्तिरार्ति०** – 112 d: **तिरस्करोति** – 113 a: **येषां** c: **०वाशेषं** – 114 a: Hs. **गतहस्तीह** b: **०घस्मरः** – 115 a: **महतामपि नो देवः** – 116 b: Hs. **०गुरुवो** – 117 a: **पांशुं** – 118 b: Hs. **०घुंघुमान०** c: Hs. **ब्रह्माण्डोदम्बरौ०** – 119 d: **०वनादयम्** – 120: Nach 121. c: **तामङ्गे** – 121 a: **जगज्जीर्ण०** – 122 a/b: **दीनैर्मुग्धैर्भूतमृगव्रजैः** c/d: **जर्जरितैर्जग०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

जगज्जाङ्गलजालके ॥ १२२ ॥ एकदेशोल्लसच्चारुवडवानलपङ्कजा । क्रीडापुष्करिणी
रम्या कल्पकालमहार्णवः ॥ १२३ ॥ कटुतिक्ताम्लभूताद्यैः सदधिक्षीरसागरैः । तैरेव
तैः पर्युषितैर्जगद्भिः कल्यवर्तनम् ॥ १२४ ॥ चण्डी चतुरसंचारा सर्वमातृगणान्वि
ता । संसारवनविन्यस्ता व्याघ्री भूतौघघातिनी ॥ १२५ ॥ पृथ्वी करतले पृथ्वी पा
नपात्री रसान्विता । कमलोत्पलकल्हारलोलजालकमालिता ॥ १२६ ॥ विरावी विक
टास्फोटो नृसिंहो भुजपञ्जरे । सटाविकटपीनांसकान्तः क्रीडाशकुन्तकः ॥ १२७ ॥
अलाबुवीणामधुरशरद्व्योमामलच्छविः । देवः किल महाकालो लीलाकोकिलबालकः
॥ १२८ ॥ अजस्रं स्फूर्जिताकारोऽतीवदुःखशरावलिः । अभावनामकोदण्डः परिस्फु
रति सर्वतः ॥ १२९ ॥ कालरात्री स्वयं भूत्वा नृत्यते खे निजेच्छया । तस्या भूषणम
ङ्गेषु देवलोकनरावली ॥ १३० ॥ नरकाली च मञ्जीरमाला कलकलोज्ज्वला । प्रोता
दुःकृतसूत्रेण पातालचरणे स्थिता ॥ १३१ ॥ एकस्मिञ्श्रवणे दीर्घा हिमवानस्थिमुद्रि
का । अपरेऽपि महामेरुः कान्ता काञ्चनकर्णिका ॥ १३२ ॥ अत्रैव कुण्डले लोले च
न्द्रार्कौ गल्लमण्डले । लोकालोकाचलश्रेणी सर्वतः कटिमेखला ॥ १३३ ॥ पश्चात्प्रल
म्बविश्रान्तकौमारमृतबर्हिभिः । नेत्रत्रयबृहद्रन्ध्रभूरिझांकारभीषणैः ॥ १३४ ॥ लम्ब
लोलजटाचन्द्रविकीर्णहरमूर्धभिः । उच्चरच्चारुमन्दारगौरीकबरचामरैः ॥ १३५ ॥ उ
त्ताण्डवाचलाकारभैरवोदरतुम्बकैः । रणत्स्वसितचन्द्रेन्द्रदेहभिक्षाकपालकैः ॥ १३६
॥ शुष्कशारीरखट्वाङ्गभङ्गैरापूरिताम्बरम् । भीषयित्वात्मनात्मानं सर्वसंहारकारिणी
॥ १३७ ॥ विश्वरूपशरच्चक्रचारुपुष्करमालया । ताण्डवेषु विवल्गन्ती महाकल्पेषु रा
जते ॥ १३८ ॥ एतस्मिन्नेवमेतेषां कालादीनां महामुने । संसारे नास्ति कैवास्था मादृ
शानां भवत्विह ॥ १३९ ॥ शत्रवश्चेन्द्रियाण्येव सत्यं यातमसत्यताम् । प्रहरत्यात्मना
त्मानं मन एव मनोरिपुः ॥ १४० ॥ तप्यते केवलं साधो मतिराकुलितान्तरा । राग
रोगो विलसति विरागी विरलो जनः ॥ १४१ ॥ यत्नेन याति युवता दूरे स्वजनसंग
तिः । गतिर्न विद्यते काचित्क्वचिन्नोदेति सत्यता ॥ १४२ ॥ दिशोऽपि हि न दृश्य
न्ते देशोऽप्यन्योपदेशभाक् । शैला अपि विशीर्यन्ते कैवास्था मादृशे जने ॥ १४३ ॥
मनो विमुह्यतीवान्तर्मुदिता दूरता गता । नोज्ज्वला करुणोदेति दूरादायाति नीचता
॥ १४४ ॥ धीरताधीरतामेति पातोत्पातपरो जनः । सुलभो दुर्जनाश्लेषो दुर्लभः सत्स

124 c: **यैः** – 127 c: **०पीनांसः** – 128 a: **०मधुरः**; Hs. **अलांबु०** – 129 a: **अजस्र०** b: **वांतदुःख०** c: **०नामा** – 130 a: **कालरात्रिः** b: **नृत्यत्येष** c: **यस्या** d: **देवलोकांतरावलिः** – 132 c: **अपरे हि** – 133 b: **गंड०** – 134 b: Hs. **०धृत०** – 135 b: Hs. **०मौर्धभिः** – 136 c: **रणत्सशतरंध्रेंद्र०** – Hs. schiebt zw. 136 und 137 eine entstellte Doublette von 141cd ein: **अभावबोधिता भावा भावाते नोपपद्यते** – 137 a: c: **भीषयत्या०** – 138 a: **०शिरश्चक्र०** – 139 c: **संसारनाम्नि** – 140 a: **शत्रवस्त्विंद्रि०** – 140A: **वस्त्ववस्तुतया ज्ञातं दत्तं चित्तमहंकृतौ । अभाववेधिता भावा भावान्तो नोपलभ्यते ॥** (lies **भवान्तो**; vgl. BŚ, ferner VC: **भवान्त इति क्वचित्**) – 142 b: **सज्जन०**, lies **सुजन०** – 143: Nach 146. b: **०न्यापदेश०** d: Hs. **मंथरे**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मागमः ॥ १४५ ॥ आगमापायिनो भावा भावना भवबन्धिनी । नीयते केवलं क्वा
पि नित्यं भूतपरंपरा ॥ १४६ ॥ दानवा अपि दीर्यन्ते ध्रुवोऽप्यध्रुवजीवितः । अमरा
अपि मार्यन्ते कैवास्था मादृशे जने ॥ १४७ ॥ अत्राप्यवाच्यतत्त्वेन कुदासाज्ञानमू
र्तिना । भुवनानि विडम्ब्यन्ते केनचिद्भ्रमदायिना ॥ १४८ ॥ अद्योत्सवोऽयमृतुरेष
तथैहि यात्रा ते बान्धवाः सुखमिदं सविशेषभोगम् । इत्थं मुधैव कलयन्सुविकल्प
जालमालोलपेलवमतिर्गलतीव लोकः ॥ १४९ ॥ इतस्ततो दूरतरं विहृत्य प्रविश्य गेहं
दिवसावसाने । विवेकिलोकाश्रयसाधुवृत्तरिक्तेऽह्नि याते क उपैति निद्राम् ॥ १५०
॥ पुत्राश्च दाराश्च धनं च बुद्ध्या संकल्प्यते तात रसायनाभम् । सर्वं तु तन्नाम करो
त्यथान्ते यात्रातिरम्या विषमूर्छनैव ॥ १५१ ॥ विद्राविते शत्रुजने समग्रे समागताया
मभि तथ्यलक्ष्म्याम् । सेव्यन्त एतानि सुखानि यावत्तावत्समायाति कुतोऽपि मृत्युः
॥ १५२ ॥ इतोऽन्यतश्चोपगतस्तथैव समानसंकेतनिबद्धभावा । यात्रासमासङ्गसमा
नराणां कलत्रमित्रव्यवहारमाया ॥ १५३ ॥ कल्पाभिमानक्षणजीविनो हि कल्पौघसं
ख्याकलने विरञ्च्याः । अतः कलामालिनि कालजाले लघुत्वदीर्घत्वधियोऽप्यसत्याः
॥ १५४ ॥ जनः कामसक्तो बहुविधकलाचेष्टनपरः स तु स्वप्नेऽप्यस्मिञ्जगति सुलभो
नाद्यसुजनः । क्रिया दुःखासङ्गाद्विधुरविधुरा नूनमखिला न जाने नेतव्या कथमिव
दशा जीवितमयी ॥ १५५ ॥ दिवसास्ते महान्तस्ते संपदस्ताः क्रियाश्च ताः । सर्वं भूत
पथं यातं यामो वायमतः परम् ॥ १५६ ॥ ब्रह्मा विष्णुश्च रुद्रश्च सर्वा वा भूतजातयः ।
नाशमेवानुधावन्ति सलिलानीव चाम्भुधिम् ॥ १५७ ॥ आपदः क्षणमायान्ति संप
दः क्षणमेव च । क्षणं जन्माथ मरणं मुनेः किमिव लक्षणम् ॥ १५८ ॥ अशूरेण हतः
शूर एकेन बहवो हताः । प्राकृताः प्रभुतां याताः सर्वमावर्तते जगत् ॥ १५९ ॥ इति
मे दोषदावाग्निदग्धे सपदि चेतसि । प्रस्फुरन्ति न भोगाश्च मृगतृष्णासरस्स्वथ ॥ १६०
॥ नाभिनिन्दामि मरणं नाभिनिन्दामि जीवितम् । यथा तिष्ठामि तिष्ठामि तथैव वि
गतज्वरम् ॥ १६१ ॥ अद्य चेत्स्वस्थया बुद्ध्या मुनीन्द्र न चिकित्स्यते । भूयश्चित्तचिकि
त्सायास्तत्किलावसरः कुतः ॥ १६२ ॥ विषं विषयवैषम्यं न विषं विषमुच्यते । जन्मा

147 b: Hs. ०जीविभिः – 147A: अद्यतेऽसत्तया द्यौश्च भुवनं चापि भुज्यते । धरापि याति वैधुर्यं कैवास्था मादृशे जने ॥ B: शुष्यन्त्यपि समुद्राश्च शीर्यन्ते तारका अपि । सिद्धा अपि विनश्यन्ति कैवास्था मादृशे जने ॥ C: परमेष्ठ्यपि निष्ठावान्ह्रियते हरिरप्यजः । भवोऽप्यभावमायाति कैवास्था मादृशे जने ॥ D: कालोऽपि काल्यतेऽन्येन नियतिश्चापि नीयते । व्योमापि लीयतेऽनन्तं कैवास्था मादृशे जने ॥ – 148 a: अश्राव्यावा० b: दुर्दर्श०; Hs. कुदाशा० – 149 (Vasantatilakā) a: तथेह b: स विशेषभोगः d: ०र्गलतीह – 150–154 (Upajāti) – 151 b: प्रकल्प्यते d: यन्नातिरम्या – 152 b: ०मभितश्च लक्ष्म्याम् – 153 a: ०गतास्तथैव b: ०भावाः d: ०मायाः – 154 a: कल्पाभिधान० b: Hs. ०कलनं चिरत्वा – 155 (Śikhariṇī) a: विविध कुकला० – 156 c: स्मृतिपथं – 157 d: वाडवम् – 158 d: मुने किमिव न क्षणम् – 159 d: ०वर्त्यते – 160 श्रीराम उवाच ॥ a: Lies बोधदावाग्नि० d: ०सरःस्विव – 161 d: ०ज्वरः – 162 a: अथ चेत्स्वच्छया

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

न्तरघ्ना विषया एकदेशहरं विषम् ॥ १६३ ॥ न सुखानि न दुःखानि न मित्राणि न बान्धवाः । न जीवितं न मरणं बन्धाय ज्ञस्य चेतसा ॥ १६४ ॥ आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरं भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चलाः । लीला यौवनलालना तनुभृतामित्याकलय्याद्भुतं मुद्रेवाद्य मयार्पिता ननु दृढा चित्ते चिरं शान्तये ॥ १६५ ॥ नावस्थितिमुपायाति न च याति यथेप्सितम् । चिन्ता जीवेश्वरायत्ता कान्तेव प्रियसद्मनि ॥ १६६ ॥ अतोऽतुच्छमनायासमनुपाधि गतभ्रमम् । किं तत्स्थितिपदं साधो यत्र शङ्का न विद्यते ॥ १६७ ॥ कथं विषयवैराग्नौ पततापि न दह्यते । पावके पारदेनेव रसेन रसशालिना ॥ १६८ ॥ यस्मात्किल महाबाहो व्यवहारक्रियां विना । न स्थितिर्दग्धसंसारे विनाम्बु जलधाविव ॥ १६९ ॥ यथा जानासि भगवंस्तथा मोहनिवृत्तये । ब्रूहि मे साधवो येन नूनं निर्दुःखतां गताः ॥ १७० ॥ अथ वा तादृशी युक्तिर्यदि ब्रह्मन्न विद्यते । न वक्ति मम वा कश्चिद्विद्यमानामपि स्फुटम् ॥ १७१ ॥ स्वयं चैव न चाप्नोमि तां विश्रान्तिमनुत्तमाम् । तदहं त्यक्तसंदेहो निरहंकारतांव गतः ॥ १७२ ॥ न भोक्ष्ये न पिबाम्यम्बु नान्तः परिदधेऽम्बरम् । करोमि नाहव्यापारं स्नानदानाशनादिकम् ॥ १७३ ॥ न च तिष्ठामि कार्येषु संपत्स्वापद्दशासु च । न किंचिदभिवाञ्छामि देहत्यागादृते मुने ॥ १७४ ॥ केवलं विगताशङ्कं निर्ममो गतमत्सरः । मौनमेवाभितिष्ठामि लिपिकर्मस्विवार्पितः ॥ १७५ ॥ वाल्मीकिरुवाच ॥ इत्युक्तवानमलशान्तकलाभिरामो रामो महत्तरविवेकविकाशिचेताः । तूष्णीं बभूव पुरतो महतां घनानां केकारवश्रमवशादिव नीलकण्ठः ॥ १७६ ॥ इति मोक्षोपाये वैराग्यप्रकरणे जगद्बोधप्रकाशो नाम द्वितीयः सर्गः ॥ [२] ॥ इति वैराग्यप्रकरणम् ॥ ॥ वाल्मीकिरुवाच ॥ वदत्येवं महामोहविनिवृत्तिकरं वचः । रामे राजीवपत्राक्षे तस्मिन्राजकुमारके ॥ १ ॥ सर्वे बभूवुस्तत्रस्था विस्मयोत्फुल्ललोचनाः । भिन्नाम्बरा देहरुहैर्गिरेः श्रोतरि वोद्धुरैः ॥ २ ॥ अद्य तूष्णीं स्थितवति रामे राजविलोचने । साधुवादगिरा सार्धं सिद्धसार्थसमीरिता । वितानकसमा व्योम्नः पौष्पी वृष्टिः पपात ह ॥ ३ ॥ मुहूर्तस्य चतुर्भागाच्छान्ते कुसुमवर्षणे । इमान्सिद्धगणालापाञ्शुश्रुवुस्ते समागताः ॥ ४ ॥ आकल्पं शुद्धसेनासु भ्रमद्भिरभितो दिवम् । अपूर्वमिदमस्माभिः श्रुतं श्रुतिरसायनम् ॥ ५ ॥ उपशमामृतसुन्दरमादरादधिगतोत्तमतापदमेष यत् । कथि

163 d: **एकदेह०** – 164 d: **चेतसः** – 165 (Śārdūlavikrīḍita) a: **०विघट्टिताभ्र०**; **०लोलांबु०** c: Lies **०लालसा** (vgl. ISpr 4633; hier allerdings **लोला यौवनलालसास्त०**); **लोलो यौवनलालनाजलरयश्चेत्या०**; Hs. **०कलत्यद्भुतं**, lies **०कलय्य द्रुतं*** (vgl. ebd.) d: **मुद्रैवाद्य** – 166 c: **बुद्धिर्जीवेश्वरा०** – 167 c: **साधु** – 168 a: **कथं च धीरवर्याग्नौ** d: **वासनारसशालिना** – 173 b: **नातः**, lies **नाहं** (?; vgl. B) c: **नाहं** – 175 c: **०वाधितिष्ठामि** – 176 (Vasantatilakā) a: **०शीतकराभिरामो** – Kolophon zu Sarga 2: **श्रीमोक्षोपाये**; **जगद्दोष०**; Prakaraṇa-Kol. bei LN erst nach 3.71 (wobei die Verse 3.1–71 ein eigenes Kapitel ohne Titel bilden) – 1 c: Hs. **रामो ०पत्राक्षो** – 2 d: **०र्गिरः श्रोतुमिवोद्धुरैः** – 3 a: **अथ** d: **सिद्धसंघ०** – 5 a: **सिद्ध०** – 6 (Drutavilambita)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तवानुचितं रघुनन्दनः सपदि तेन वयं प्रतिबोधिताः ॥ ६ ॥ वाल्मीकिरुवाच ॥
पावनस्यास्य वचसः प्रोक्तस्य रघुकेतुना । निर्णयं श्रोतुमुचितं वक्ष्यमाणं महर्षिभिः
॥ ७ ॥ इत्युक्त्वा सा समस्तैव व्योमावासनिवासिनी । तां पपात सभां तत्र दिव्या
मुनिपरंपरा ॥ ८ ॥ अथास्यां सिद्धसेनायां पतन्त्यां नभसो रसात् । उत्तस्थौ मुनिसं
पूर्णा तदा दाशरथी सभा ॥ ९ ॥ वसिष्ठविश्वामित्रौ तान्पूजयामासतुः क्षणात् । वसि
ष्ठविश्वामित्रौ ते पूजयामासुरादरात् ॥ १० ॥ सर्वादरेण सिद्धौघं पूजयामास भूप
तिः । सिद्धौघो भूपतिं चैव कुशलप्रश्नवार्त्तया ॥ ११ ॥ वाचोभिः पुष्पवर्षेण साधु
वादेन चाभितः । रामं ते पूजयामासुः पुरः प्रणतमास्थितम् ॥ १२ ॥ मुनय ऊचुः
॥ अहो बत कुमारेण कल्याणगुणशालिनी । वागुक्ता परमोदारवैराग्यरसगर्भिणी ॥
१३ ॥ अस्मिन्नुद्दामदौरात्म्यदैवनिर्माणनिर्मिते । द्विजेन्द्रा दग्धसंसारे सारो ह्यत्यन्त
दुर्लभः ॥ १४ ॥ सकललोकचमत्कृतिकारिणोऽप्यभिमतं यदि राघवचेतसः । फल
ति नो तदिमे वयमेव हि स्फुटतरं मुनयो हतबुद्धयः ॥ १५ ॥ इति नादेन महता
वचस्युक्ते सभाजनैः । राममग्रगतं प्रीत्या विश्वामित्रोऽभ्यभाषत ॥ १६ ॥ न राघव
तवास्त्यन्यज्ज्ञेयं ज्ञानवतां वर । स्वयैव सूक्ष्मया बुद्ध्या सर्वं विज्ञातवानसि ॥ १७ ॥
भगवद्व्यासपुत्रस्य शुकस्येव मतिस्तव । विश्रान्तिमात्रमेवान्तर्ज्ञातज्ञेयाप्यपेक्षते ॥ १८
॥ श्रीराम उवाच ॥ भगवद्व्यासपुत्रस्य शुकस्य भगवन्कथम् । ज्ञेयेऽह्यादौ न विश्रान्तं
विश्रान्तं च धिया पुनः ॥ १९ ॥ विश्वामित्र उवाच ॥ आत्मोदन्तसमं राम वर्ण्य
मानमिदं मया । शृणु व्यासात्मजोदन्तं जन्मनामन्तकारणम् ॥ २० ॥ तस्य चि
न्तयतो लोकयात्रामलमिमां हृदि । तवेव किल संबुद्धेर्विवेक उदभूदयम् ॥ २१ ॥
तेनासौ स्वविवेकेन स्वयमेव महामनाः । विचार्य सुचिरं चारुर्यत्सत्यं तदवाप्तवान्
॥ २२ ॥ स्वयं प्राप्ते परे वस्तुन्यविश्रान्तमनाः स्थितः । इदं तु स्थितिविश्वासं नासा
वात्मन्युपाययौ ॥ २३ ॥ केवलं विररामास्य चेतो विगतचापलम् । भोगेभ्यो भूरि
भङ्गेभ्यो धाराढ्य इव चातकः ॥ २४ ॥ एकदा सोऽमलप्राज्ञो मेरावेकान्तसुस्थि
तम् । पप्रच्छ पितरं भक्त्या कृष्णद्वैपायनं मुनिम् ॥ २५ ॥ संसारडम्बरमिदं कथम
भ्युत्थितं मुने । कथं च प्रशमं याति कियत्कस्य कदेति च ॥ २६ ॥ इति पृष्टेन मुनि
ना व्यासेनाखिलमात्मजे । यथावदमलं प्रोक्तं वक्तव्यं विदितात्मना ॥ २७ ॥ अज्ञा
सिषं पूर्वमेतदहमित्यथ तत्पितुः । स शुकोऽशुभया बुद्ध्या न वाच्यं बह्वमन्यते ॥ २८

7: भरद्वाज उ० a: पावनस्याथ c: श्रोतुमिच्छामि d: महात्मभिः – 8: वाल्मीकिरुवाच ॥ – 9 b: रसाम्, lies रयात्* – 11 a: सिद्धौघान् c: सिद्धौघा – 13 c: परमोदारा – 14 c: Lies द्विजेन्द्रौ – 15 (Drutavilambita) – 16 b: महाजनैः, lies सभागतैः* – 17 विश्ववामित्र उवाच ॥ – 18 d: ०ज्ञेयेऽप्य०, lies ०ज्ञेयोऽप्य० – 19 c: ज्ञेयेऽप्यादौ, lies चेतोऽह्यादौ – 20 b: वक्ष्यमाण० – 21 b: ०यात्रामेवमिमां c: सद्बुद्धे० – 22 c/d: चारु य० – 23 c: इदं वस्त्विति विश्वासं – 24 a: Lies विररागास्य (विरराग als Perf. zu विरागयति; vgl. BHS) d: धाराभ्य (vgl. VC) – 25 a: ०प्रज्ञो b: ०कांतमास्थितम् – 26 a: संसाराडंबर० – 28 c: शुकः शुभया d: वाक्यं; बह्वमन्यत, lies बहु मन्यते

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ व्यासोऽपि भगवाञ्ज्ञात्वा पुत्राभिप्रायमीदृशम् । प्रत्युवाच पुनः पुत्रं नाहं जानामि तत्त्वतः ॥ २९ ॥ जनको नाम भूपालो विद्यते वसुधातले । यथावद्वेत्त्यसौ वेद्यं तस्मात्सर्वमवाप्स्यसि ॥ ३० ॥ पित्रेत्युक्तः शुकः प्रायात्सुमेरोर्वसुधातलम् । विदेहनगरीं प्राप जनकेनाभिपालिताम् ॥ ३१ ॥ आवेदितोऽसौ यार्ष्टीकैर्जनकाय महात्मने । द्वारि व्याससुतो राजञ्शुकोऽत्र स्थितवानिति ॥ ३२ ॥ जिज्ञासार्थं शुकस्यासावास्तामेवेत्यवज्ञया । उक्त्वा बभूव जनकस्तूष्णीं सप्तदिनान्यथ ॥ ३३ ॥ ततः प्रवेशयामास जनकः शुकमङ्गणम् । तत्राहानि स सप्तैव तथैवावसदुन्मनाः ॥ ३४ ॥ ततः प्रवेशयामास जनकोऽन्तःपुरं शुकम् । राजा न दृश्यते तावदिति सप्त दिनानि तम् ॥ ३५ ॥ तत्रोन्मदाभिः कान्ताभिर्भोजनैर्भोगसंचयैः । जनको लालयामास शुकं शशिनिभाननम् ॥ ३६ ॥ ते भोगास्तानि भोज्यानि व्यासपुत्रस्य तन्मनः । नाजह्रुर्मन्दपवना बद्धपीटमिवाचलम् ॥ ३७ ॥ केवलं सुसमः स्वच्छो मौनी मुदितमानसः । संपूर्ण इव शीतांशुरतिष्ठदमलः शुकः ॥ ३८ ॥ परिज्ञातस्वभावं तं शुकं स जनको नृपः । आनीय मुदितात्मानमवलोक्य ननाम ह ॥ ३९ ॥ निःशेषितजगत्कार्य प्राप्ताखिलमनोरथ । किमीहितं तवेत्याशु कृतस्वागतमाह तम् ॥ ४० ॥ शुक उवाच ॥ संसारडम्बरमिदं कथमभ्युत्थितम् गुरो । कथं प्रशममायाति यथावत्कथयाशु मे ॥ ४१ ॥ जनकेनेति पृष्टेन शुकस्य कथितं तदा । तदेव यत्पुरा प्रोक्तं तस्या पित्रा महात्मना ॥ ४२ ॥ शुक उवाच ॥ स्वयमेव मया पूर्वमेतज्ज्ञातं विवेकतः । एतदेव च पृष्टेन पित्रा मे समुदाहृतम् ॥ ४३ ॥ भवताप्येष एवार्थः कथितो वाग्विदां वर । एक एव च वाक्यार्थः शास्त्रेषु परिदृश्यते ॥ ४४ ॥ यथायं स्वविकल्पोत्थः स्वविकल्पपरिक्षयात् । क्षीयते दग्धसंसारो निःसार इति निश्चयः ॥ ४५ ॥ तत्किमेतन्महाबाहो सत्यं ब्रूहि ममाचलम् । त्वत्तो विश्राममाप्नोति चेतसा भ्रमता जगत् ॥ ४६ ॥ जनक उवाच ॥ नातः परतरः कश्चिन्निश्चयोऽस्त्यपरो मुने । स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतम् ॥ ४७ ॥ अव्युच्छिन्नचिदात्मैकः पुमानस्तीह नेतरत् । स संकल्पवशाद्बद्धो निःसंकल्पश्च मुच्यते ॥ ४८ ॥ तेन त्वया स्फुटं ज्ञातं ज्ञेयं यस्य महात्मनः । भोगेभ्यो ऽप्यरतिर्जाता दृश्याद्वा सकलादिह ॥ ४९ ॥ प्राप्तं प्राप्तव्यमखिलं भवता पूर्णचेतसा । दृश्ये न यतसि ब्रह्मन्मुक्तस्त्वं भ्रान्तिमुत्सृज ॥ ५० ॥ अनुशिष्टः स इत्येवं जनकेन महात्मना । विशश्राम शुकस्तूष्णीं स्वस्थे परमवस्तुनि ॥ ५१ ॥ वीतशोकभयायासो निरीहश्छिन्नसंशयः । जगाम शेखरं मेरोः समाध्यर्थमनिन्दितम् ॥ ५२ ॥ तत्र वर्षसहस्राणि निर्विकल्पसमाधिना । दश स्थित्वा शशामासावात्मन्यस्नेहदीपवत् ॥ ५३ ॥ व्यपगतकलनाकलङ्कशुद्धः स्वयममलात्मनि पावने

34 d: तथैवास स उन्मनाः – 37 a: दुःखानि c: ०पवनो; lies नाजह्रु० – 38 a: सुमनाः – 41 a: संसाराडंबर० – 42 विश्वामित्र उवाच ॥ d: तस्य – 44 c: एष एव – 46 d: Hs. ०माप्नोमि – 48 c: स्वसंकल्प० – 50 c: न दृश्ये – 51 a: Hs. इत्येष – 52 c: शिखरं d: Lies ०मनिन्दितः* – 54 (Puṣpitāgrā)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

पदेऽसौ । सलिलकण इवाम्बुधौ महात्मा विगलितवासनमेकतां जगाम ॥ ५४ ॥
विश्वामित्र उवाच ॥ तस्य व्यासतनूजस्य मलमात्रापमार्जनम् । यथोपयुक्तं ते राम
तावदेवोपयुज्यते ॥ ५५ ॥ ज्ञातज्ञेयस्य मनसो नूनमेतद्विलक्षणम् । न स्वदन्ते सम
ग्राणि भोगवृन्दानि यत्पुरः ॥ ५६ ॥ भोगभावनया याति बन्धो दार्ढ्यमवस्तुजः ।
तयोपशान्तया याति बन्धो जगति तानवम् ॥ ५७ ॥ वासनातानवं राम मोक्ष इत्यु
च्यते बुधैः । पदार्थवासनादार्ढ्यं बन्ध इत्यभिधीयते ॥ ५८ ॥ यशःप्रभृतिना यस्मै
हेतुनैव विना पुनः । भोगा इह न रोचन्ते स जीवन्मुक्त उच्यते ॥ ५९ ॥ रामो यदे
तज्जानति तदस्तीत्येव सन्मुखात् । आकर्ण्य चित्तं विश्रान्तिमाप्नोत्येव मुनीश्वरात् ॥
६० ॥ अत्रास्य चित्तविश्रान्त्यै राघवस्य महात्मनः । युक्तिं कथयतु श्रीमान्वसिष्ठो
भगवानयम् ॥ ६१ ॥ रघूणामेष सर्वेषां प्रभुः कुलगुरुः सदा । सर्वज्ञः सर्वसाक्षी च
त्रिकालामलदर्शनः ॥ ६२ ॥ वसिष्ठ भगवन्सर्वं कच्चित्स्मरसि यत्स्वयम् । आवयोर्वै
रशान्त्यर्थं श्रेयसे च महाधियाम् ॥ ६३ ॥ उपदिष्टं भगवता ज्ञानं पद्मभुवा मुहुः ।
तदेवोपदिशाद्य त्वं रामायान्ते निवासिने ॥ ६४ ॥ तज्ज्ञानं स च शास्त्रार्थस्तद्वैद
ग्ध्यमखण्डितम् । तच्छिष्याय विरक्ताय साधो यदुपदिश्यते ॥ ६५ ॥ अशिष्याया
विरक्ताय यत्किंचिदुपदिश्यते । तत्प्रयात्यपवित्रत्वं गोक्षीरं श्वदृताविव ॥ ६६ ॥ इत्यु
क्ते गाधिपुत्रेण व्यासनारदपूर्वकाः । मुनयस्ते तमेवार्थं साधुसाध्वित्यपजयन् ॥ ६७
॥ अथोवाच महातेजा राज्ञः पार्श्वे व्यवस्थितः । ब्रह्मेव ब्रह्मणः पुत्रो वसिष्ठो भगवा
न्मुनिः ॥ ६८ ॥ मुने यदादिशसि मे तदविघ्नं करोम्यहम् । कः समर्थः समर्थोऽपि
सतां लङ्घयितुं वचः ॥ ६९ ॥ स्मराम्यखण्डितं सर्वं संसारभ्रमशान्तये । निषधाद्रौ
पुरा प्रोक्तं यज्ज्ञानं पद्मयोनिना ॥ ७० ॥ वाल्मीकिरुवाच ॥ इति निगदितवानसौ
महात्मा परिकरबन्धगृहीतवक्तृतेजाः । अकथयदिदमन्यतोपशान्त्यै परमपदैकवि
बोधनं वसिष्ठः ॥ ७१ ॥ वसिष्ठ उवाच ॥ सर्वदा सर्वमेवेह संसारे रघुनन्दन । सम्य
क्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते ॥ ७२ ॥ उच्छास्त्रं शास्त्रितं चेति द्विविधं पौरुषं
स्मृतम् । तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् ॥ ७३ ॥ आबाल्यादलमभ्यस्तैः
शास्त्रसत्संमादिभिः । गुणैः पुरुषयत्नेन स्वार्थः संप्राप्यते हितः ॥ ७४ ॥ श्रीराम
उवाच ॥ प्राक्तनं वासनाजालं नियोजयति मां यथा । मुने तथैव तिष्ठामि कृपणः किं
करोम्यहम् ॥ ७५ ॥ श्रीवसिष्ठ उवाच ॥ अत एव हि हे राम श्रेयः प्राप्नोति शाश्व
तम् । स्वप्रयत्नोपनीतेन पौरुषेणैव नान्यथा ॥ ७६ ॥ द्विविधो वासनाव्यूहः शुभश्चै
वाशुभश्च ते । प्राक्तनो विद्यते राम द्वयोरेकतरोऽथ वा ॥ ७७ ॥ वासनौघेन शुद्धेन

56 b: Lies ०द्वि लक्षणम् * (vgl. VC) c: स्वादन्ते d: पुनः – 60 b: वस्त्वस्तीत्येव c: चित्त० d: मुनीश्वराः – 63 a: भगवन्पूर्वं d: महाधिया – 65 a: च स c: सुशिष्याय – 71 (Puṣpitāgrā) c: ०मज्ञतोपशांत्यै – Kolophon nach 71: इति श्रीवाल्मीकीये मोक्षोपाये वैराग्यप्रकरणे त्रितीयः सर्गः ॥ संपूर्णमिदं वैराग्यप्रक रणम् ॥ – Vor 72: ॐ श्रीरामाय नमः ॥ – 72 Mit श्री० – 75 c: तथैव तिष्ठामि मुने – 76 Ohne श्री० b: प्राप्नोषि

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तत्र चेदद्य नीयसे । तत्क्रमेणाशु केनैव पदं प्राप्स्यसि शाश्वतम् ॥ ७८ ॥ अथ चेद
शुभो भावस्त्वां योजयति संकटे । प्राक्तनस्तदसौ यत्नाज्जेतव्यो भवता स्वयम् ॥ ७९
॥ शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् । पौरुषेण प्रयत्नेन योजनीया शुभे
पथि ॥ ८० ॥ अशुभेषु समाविष्टं शुभेष्वेवावतारयेत् । स्वमनः पुरुषार्थेन बलेन बलि
नां वर ॥ ८१ ॥ अशुभाच्चालितं याति शुभं यस्मादपीतरत् । जन्तोश्चित्तं तु शिशुवत्त
स्मात्तच्चालयेद्बलात् ॥ ८२ ॥ समतासान्त्वनेनाशु न द्रागिति शनैः शनैः । पौरुषेण
प्रयत्नेन पालयेच्चित्तबालकम् ॥ ८३ ॥ द्रागभ्यासवशाद्याता यदा ते वासनोदयम् ।
तदाभ्यासस्य साफल्यं विद्धि त्वमरिवर्धन ॥ ८४ ॥ संदिग्धायामपि भृशं शुभामेव
समाहर । शुभायां वासनावृद्धौ तात दोषो न कश्चन ॥ ८५ ॥ अव्युत्पन्नमना याव
द्भवानज्ञाततत्पदः । गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर ॥ ८६ ॥ ततः पक्वकषा
येण नूनं विज्ञातवस्तुना । शुभोऽप्यसौ परित्याज्यो वासनौघो निराधिना ॥ ८७ ॥
यदतिसुभगमार्यसेवितं तच्छुभमनुसृत्य मनो ज्ञभावबुद्ध्या । अधिगमय पदं सदा वि
शोकं तदनु तदप्यवमुच्य साधु तिष्ठ ॥ ८८ ॥ वसिष्ठ उवाच ॥ अपुनर्ग्रहणायान्त
स्त्यक्त्वा संसारभावनाम् । संपूर्णौ शमसंतोषावादायोदारया धिया ॥ ८९ ॥ सपू
र्वापरवाक्यार्थविचारविषयाद्दृतम् । मनः समरसं कृत्वा सानुसंधानमात्मनि ॥ ९०
॥ शृणु राम पुरा प्रोक्तं ब्रह्मणा परमेष्ठिना । सर्वदुःखक्षयकरं परमाश्वासनं धियः ॥
९१ ॥ श्रीराम उवाच ॥ केनोक्तं कारणेनेदं ब्रह्मन्पूर्वं स्वयंभुवा । कथं च भवता प्रा
प्तमेतत्कथय मे प्रभो ॥ ९२ ॥ श्रीवसिष्ठ उवाच ॥ अस्त्यनन्तविलासात्मा सर्वगः
सर्वसंश्रयः । चिदाकाशोऽविनाशात्मा प्रदीपः सर्ववस्तुषु ॥ ९३ ॥ स्पन्दास्पन्दस
माकारात्ततो विष्णुरजायत । तस्यापि हृदयाम्भोजात्परमेष्ठी व्यजायत ॥ ९४ ॥
सोऽसृजत्सकलं सर्गं विकल्पौघं यथा मनः । एतस्मिन्भारते वर्षे नानाव्यसनसंकुलम्
॥ ९५ ॥ जनस्यैतस्य दुःखं च दृष्ट्वा सकललोककृत् । जगाम करुणामीशः पुत्रदुःखा
त्पिता यथा ॥ ९६ ॥ क एतेषां हताशानां दुःखस्यान्तो हतायुषाम् । स्यादिति क्षण
मेकाग्रश्चिन्तयामास भूतपः ॥ ९७ ॥ तपो दानं जपस्तीर्थं नात्यन्तं दुःखशान्तये ।
तत्तावद्दुःखमोक्षार्थं ज्ञानं प्रकथयाम्यहम् ॥ ९८ ॥ इति संचिन्त्य भगवान्ब्रह्मा कम
लसंस्थितः । मनसा परिसंकल्प्य मामुत्पादितवानिमम् ॥ ९९ ॥ कमण्डलुधरो नाथः
सकमण्डलुना मया । साक्षमालः साक्षमालं स प्रणम्याभिवादितः ॥ १०० ॥ एहि
पुत्रेति मामुक्त्वा स स्वाब्जस्योत्तरे दले । मां निवेश्य महाबाहो प्रोवाच भगवानजः ॥
१०१ ॥ मुहूर्तमात्रं ते पुत्र चेतो वानरचञ्चलम् । अज्ञानमभ्याविशतु बाष्पः सद्दर्पणं

78 b: **चेदपनीयसे** c: **तत्क्रमेण शुभेनैव** – 81 c: **स्वं मनः** – 82 b: **तस्माद०** – 83 d: **लालयेच्चि०** – 84 a: **प्रागभ्यासवशाज्जातो** b: **०नोदयः** d: **त्वमरिमर्दन** – 87 d: **निरोधिना** – 88 (Puṣpitāgrā) – 89 c/d: **०संतोषौ चादायो०** – 90 (Hs.: am Rand nachgetragen) a: **सुपूर्वा०** – 93 Ohne **श्री०** – 96 a: **स** – 97 d: **०श्चिंतयित्वा त्वतप्यत** – 100 c: **साक्षमालं स्थितः पद्मे** – 102 d: **सबाष्पं दर्पणं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यथा ॥ १०२ ॥ इति तेनाशु शप्तः सन्विचारसमनन्तरम् । अहं विस्मृतवान्सर्वं स्वरू
पममलं किल ॥ १०३ ॥ अथाहं दीनतामेत्य स्थितोऽसंबुद्धया धिया । दुःखशोकाभि
संतप्तो जातो जन इवाधमः ॥ १०४ ॥ अथाभ्यधात्स मां नाथ पुत्र किं दुःखवान
सि । दुःखोपघातं मां पृच्छ सुखी नित्यं भविष्यसि ॥ १०५ ॥ ततः पृष्टः स भगवा
न्मया संसारभेषजम् । कथं नाथ महादुखमयः संसार आगतः ॥ १०६ ॥ कथं च
क्षीयते नाथ ततस्तेन महात्मना । तज्ज्ञानं सुबहु प्रोक्तं यज्ज्ञात्वाहं सुखी स्थितः ॥
१०७ ॥ ततो विदितवेद्यं मां निजायां प्रकृतौ स्थितम् । स उवाच जगत्कर्ता वाक्यं
सकलकारणम् ॥ १०८ ॥ शापेनान्यपदं नीत्वा पृच्छकस्त्वं मया कृतः । पुत्रास्य
ज्ञानसारस्य समस्तजनसिद्धये । इदानीं शान्तशापस्त्वं बोधं परमुपागतः ॥ १०९ ॥
गच्छ वत्स महीपीठं जम्बूद्वीपान्तरस्थितम् । साधो भारतवर्षं त्वं लोकानुग्रहहेतुना
॥ ११० ॥ तत्र क्रियाकाण्डपरास्त्वया पुत्र महाधियः । उपदेश्याः क्रियाकाण्डक्र
मेण क्रमशालिना ॥ १११ ॥ विरक्तचित्ताश्च तथा महाप्राज्ञा विचारिणः । उपदेश्या
स्त्वया साधो ज्ञानेनानन्ददायिना ॥ ११२ ॥ इति तेन नियुक्तोऽहं पित्रा कमलज
न्मना । इह साधोऽवतिष्ठामि यावद्भूतपरंपरा ॥ ११३ ॥ कर्तव्यमस्ति न ममेह हि
किंचिदेव स्थातव्यमित्यभिमना भुवि संस्थितोऽस्मि । संशान्तया सततसुप्तधियैव
वृत्त्या कार्यं करोमि न च किंचिदहं करोमि ॥ ११४ ॥ श्रीवसिष्ठ उवाच ॥ अज्ञता
तन्यते पूर्वं वक्तुर्निर्णीय कार्यतः । यः करोति नरः प्रश्नं पृच्छकः स महामतिः ॥
११५ ॥ पूर्वापरसमाधानक्षमबुद्धावनिन्द्यते । पृष्टं प्राज्ञेन वक्तव्यं नाधमे पशुधर्मि
णि ॥ ११६ ॥ मोक्षद्वारे द्वारपालाश्चत्वारः परिकीर्तिताः । शमो विचारः संतोषश्चतु
र्थः साधुसंगमः ॥ ११७ ॥ एते सेव्याः प्रयत्नेन चत्वारो द्वौ त्रयोऽथ वा । द्वारमु
द्घातयन्त्येते मोक्षराजगृहे यथा ॥ ११८ ॥ एकं वा सर्वयत्नेन सर्वमुत्सृज्य संश्रयेत् ।
एकस्मिन्वशगे यान्ति चत्वारोऽपि वशं यतः ॥ ११९ ॥ शास्त्रैः सज्जनसंसर्गपूर्वकैः
सततोदितैः । आदौ संसारमुक्त्यर्थं प्रज्ञामेवाभिवर्धयेत् ॥ १२० ॥ दुःसहा राम सं
सारविषवेगविषूचिका । योगगारुडमन्त्रेण पावनेन प्रशाम्यति ॥ १२१ ॥ दुरन्तेयं
किल विषयविषूचिका यदि न चिकित्स्यते तदा तत्करोति यत्र शितासिशतपात
उत्पलताडनम् ॥ १२२ ॥ अग्निदाहो हिमावसेचनमङ्गावकर्तनं चन्दनचर्चा निरव
धिनाराचनिकरनिपातो निदाघविनोदनधारागृहशीत्कारवर्षं शिरच्छेदः सुखनिद्रा

103 b: **०न्विचारं** – 105 a: **०भ्ययात्स** – 109 a: **शापेनाज्ञपदं** – 110 a: **०पीठे** c: **०वर्षे** – 111 d: **शम शालिना** – 114: Vasantatilakā b: **०त्यतिमना** – 115 a: **अज्ञतानज्ञते**, lies **अज्ञतानज्ञता०** – 116 b: **०वनिर्दिंते** – 118 d: **मोक्षे राज०** – 120 b: **सतपोदमैः** – 122–124 (Prosa): Hs. ohne Numerierung. – 122: **विषयविषजविषूचिका**; nach **चिकित्स्यते** zusätzlich: **तन्नितरां नरकनगरनिकरफलानुबन्धिनी**; **तदै तत्करोति यत्र शिलाशितासिशतपातोत्पलताडनम्**; **शितासिशतपात**: **पात** fehlt bei der Hs. – 123: **निरव धिना एव नरकनिपातो**; **०शीकरवर्षं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मूकीकरणमाननमुद्राबाधिर्यं महानुपचयः ॥ १२३ ॥ तदेवं राम नावहेलया व्यवह
र्तव्यम् । एवं चावबोद्धव्यं यथाखिलशास्त्रविचाराद्बोधो भवतीत्याह ॥ १२४ ॥ स्वा
नुभूतेश्च शास्त्रस्य गुरोश्चैवैकवाक्यता । यस्याभ्यासेन तेनात्मा संततेनावलोक्यते ॥
१२५ ॥ किंचित्संस्कृतबुद्धीनां श्रुतं शास्त्रमिदं यथा । मौर्ख्यापहं तथा शास्त्रमन्यद
स्ति न किंचन ॥ १२६ ॥ वरं शरावहस्तस्य चण्डालागारवीथिषु । भिक्षार्थमटनं राम
न मौर्ख्यहतजीवितम् ॥ १२७ ॥ न धनान्युपकुर्वन्ति न मित्रा न च बान्धवाः ।
न हस्तपादचलनं न देशान्तरसंगमः ॥ १२८ ॥ न कायक्लेशवैधुर्यं न तीर्थायतनाश्र
यः । केवलं तन्मनोमात्रजयेनासाद्यते परम् ॥ १२९ ॥ मोक्षद्वारे द्वारपालानिमाञ्शृ
णु यथाक्रनम् । एषामेकतमासत्त्या मोक्षद्वारे प्रवेश्यते ॥ १३० ॥ यानि दुःखानि
या तृष्णा दुःसहा ये दुराधयः । तत्सर्वं शान्तचेतस्सु तमोऽर्केष्विव नश्यति ॥ १३१
॥ मातरीव परं यान्ति विषमाणि मृदूनि च । विश्वासमिह भूतानि सर्वाणि शमशा
लिनि ॥ १३२ ॥ न रसायनपानेन न लक्ष्म्यालिङ्गनेन च । तथा सुखमवाप्नोति शमे
नान्तर्यथा जनः ॥ १३३ ॥ श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा शुभाशुभम् । न
हृष्यति म्लायति यः स शान्त इति कथ्यते ॥ १३४ ॥ तुषारकरबिम्बोत्थं मनो यस्य
निराकुलम् । मरणोत्सवयुद्धेषु स शान्त इति कथ्यते ॥ १३५ ॥ तपस्विषु बहुज्ञेषु
याज्ञकेषु नृपेषु च । बलवत्सु गुणाढ्येषु शमवानेव राजते ॥ १३६ ॥ शममममृतमहा
र्यमार्यगुप्तं परमवलम्ब्य परं पदं प्रयाताः । रघुतनय यथा महानुभावाः क्रममनुपा
लय सिद्धये तमेव ॥ १३७ ॥ शास्त्रावबोधामलया धिया परमपूतया । कर्तव्यः का
रणज्ञेन विचारोऽनिशमात्मनः ॥ १३८ ॥ विचारात्तीक्ष्णतामेत्य धीः पश्यति परं
पदम् । दीर्घसंसाररोगस्य विचारो हि महौषधम् ॥ १३९ ॥ कोऽहं कस्य च संसार
इत्यापद्यपि धीमता । चिन्तनीयं प्रयत्नेन सप्रतीकारमात्मना ॥ १४० ॥ अनष्टमन्ध
कारेषु बहुतेजःस्वजिह्मितम् । पश्यत्यपि व्यवहितं विचारश्चारुलोचनम् ॥ १४१ ॥
कोऽहं कथमयं दोषः संसाराख्य उपागतः । न्यायेनेति परामर्शो विचार इति ख
थ्यते ॥ १४२ ॥ श्रीवसिष्ठ उवाच ॥ संतोषो हि परं श्रेयः संतोषः सुखमुच्यते । सं
तुष्टः परमभ्येति विश्राममरिमर्दन ॥ १४३ ॥ संतोषामृतपानेन ये शान्तास्तृप्तिमाग
ताः । भोगश्रीरतुला तेषामेषा प्रतिविषायते ॥ १४४ ॥ अवाप्तवाञ्छामुत्सृज्य संप्रा
प्ते समतां गतः । अदृष्टखेदाखेदो यः संतुष्टः स इहोच्यते ॥ १४५ ॥ आशावित्तस्य
विवशे चित्ते संतोषवर्जिते । म्लाने वक्त्रमिवादर्शे ज्ञानं न प्रतिबिम्बते ॥ १४६ ॥ ना
भिवाञ्छत्यसंप्राप्तं प्राप्तं भुङ्क्ते यथाक्रमम् । यश्च सौम्यसमाचारः संतुष्ट इति कथ्यते

124: **राम शास्त्रेणावहेलया**; nach **व्यवहर्तव्यम्** zusätzlich: **अवश्यमेवं विचारणीयम्**; **यथा किल शास्त्र॰**; nur **भवतीति** – 127 b: **चांडाला॰** d: **मौर्ख्यं हत॰** – 128 b: **न मित्राणि न बान्धवाः** – 129 b: **न तीर्थाय न जीवितम्** – 134 c: **ग्लायति** – 135 a: **॰बिंबाच्छं** – 136 b: **याजकेषु** – 137 (Puṣpitāgrā) – 143 Ohne **श्री॰** – 145 a: **अप्राप्त॰** – 146 a: **आशावैवश्य॰** d: **न ज्ञानं प्रतिबिंबति** – 147 c: **यस्तु**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ १४७ ॥ समतया मतया गुणशालिनां पुरुषराडिह यः समलंकृतः । तममलं प्रण
मन्ति नरोत्तमा अपि महामुनयो रघुनन्दन ॥ १४८ ॥ विशेषेण महाबाहो संसारो
त्तरणे नृणाम् । सर्वत्रोपकरोतीह साधुसाधुसमागमः ॥ १४९ ॥ शून्यमाकीर्णतामे
ति मृतिरप्युत्सवायते । आपत्संपदिवाभाति विद्वज्जनसमागमे ॥ १५० ॥ यः स्नातः
शीतसितया साधुसंगतिगङ्गया । किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः
॥ १५१ ॥ विच्छिन्नग्रन्थयस्तज्ज्ञाः साधवः सर्वसंमताः । सर्वोपायेन संसेव्यास्ते ह्यु
पाया भवाम्बुधौ ॥ १५२ ॥ चत्वार एते विमला उपाया भवभेदने । यैरभ्यस्तास्त
उत्तीर्णा मोहवारेर्भवार्णवात् ॥ १५३ ॥ त्वमेतयाखण्डितया गुणलक्ष्म्या समाश्रि
तः । मनोमोहहरं वाक्यं वक्ष्यमाणमिदं शृणु ॥ १५४ ॥ मोक्षोपायकथामेतां शृण्व
तामरिमर्दन । अनिच्छतामपि बलात्परो बोधः प्रवर्तते ॥ १५५ ॥ लोभमोहादयो
दोषास्तानवं यान्त्यलं धियः । मनः प्रसादमायाति शरदीवामलं सरः ॥ १५६ ॥ दै
न्यदारिद्र्यदोषाढ्या दृष्टयो दर्शितान्तराः । न निःकृन्तन्ति मर्माणि ससंनाहमिवेषवः
॥ १५७ ॥ हृदयं नावलुम्पन्ति भीमाः संसृतिभीतयः । साम्यं पदमुदेत्यन्तर्निर्मन्दर
इवार्णवः ॥ १५८ ॥ समुद्रस्येव गाम्भीर्यं स्थैर्यं मेरोरिव स्थिरम् । अन्तः शीतलता
चेन्दोरिवोदेति विचारिणः ॥ १५९ ॥ सच्छास्त्रसाधुवृत्तानामविरोधिनि कर्मणि ।
रमते धीर्यथाप्राप्ते साध्वीवान्तःपुराजिरे ॥ १६० ॥ सा जीवन्मुक्तता तस्य शनैः परि
णतिं गता । शान्ताशेषविशेषस्य भवत्यविषया गिराम् ॥ १६१ ॥ दृश्यते लोकसामा
न्यो यथाप्राप्तानुवृत्तिमान् । इष्टानिष्टफलप्राप्तौ हृदयेनापराजितः ॥ १६२ ॥ सुखास
नोपविष्टेन यथासंभवमश्नता । भोगजाल सदाचारविरुद्धेषु न तिष्ठता ॥ १६३ ॥ य
थाक्षणं यथादेशं प्रविचारयता सुखम् । यथासंभवसत्संगमिमं मोक्षकथाक्रमम् ॥
१६४ ॥ आसाद्यते महाज्ञानबोधः संसारशान्तिदः । न भूयो जायते येन योनियन्त्र
पीडनम् ॥ १६५ ॥ एतावत्यपि ये भीताः पापाभोगरसैः स्थिताः । स्वमातृविष्ठाकृम
यः कीर्तनीया न तेऽधमाः ॥ १६६ ॥ शास्त्रोपशमसौजन्यप्रज्ञातज्ज्ञसमागमैः । अन्त
रान्तरसंपन्नधर्मार्थोपार्जनक्रियः ॥ १६७ ॥ तावद्विचारयेत्प्राज्ञो यावद्विश्रान्तिमा
त्मनि । संप्रयात्यपुनर्नाशां शान्तिं तुर्यपदाभिधाम् ॥ १६८ ॥ तुर्यविश्रान्तियुक्तस्य
प्रतीपस्य भवार्णवात् । जीवतोऽजीवतश्चैव गृहस्थस्याथ वा यतेः ॥ १६९ ॥ न कृतेना
कृतेनार्थो न श्रुतिस्मृतिविभ्रमैः । निर्मन्दर इवाम्भोधिः संतिष्ठति यथास्थितिः ॥
१७० ॥ शृणु तावदिदानीं त्वं कथ्यमानमिदं मया । राघव ज्ञानविस्तारं बुद्धिसारा
न्तरान्तरम् ॥ १७१ ॥ युक्तियुक्तमुपादेयं वचनं बालकादपि । अन्यत्तृणमिव त्याज्य

148 (Drutavilambita) – 149 d: **साधुः साधु०** – 150 b: **मृत्युर०** – 151 b: **०संगम०** – 153 d: **मोहवारि०** – 157 a: Hs. **०दोषाद्या** b: Hs. **दृष्टव्यो** c: **निकृंतन्ति** – 158 c: **परमु०** – 159 b: **स्थितिः** – 160 a: **०वृत्तीना०** – 161 a: **०मुक्तिता** – 165 a/b: **महान्येन बोधः** – 166 b: **पापा भोगरसे** – 170 d: **स तिष्ठति यथास्थितम्** – 171 a: Hs. **मृत्यु** (für **शृणु**) – 172 c/d: Hs. **अन्यत्तृणवत्त्याज्यमभ्युक्तं**; d: **पद्मयोनिना**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मप्युक्तं पद्मजन्मना ॥ १७२ ॥ यैर्यैः काकुत्स्थ दृष्टान्तैस्त्वं मयेहावबोध्यसे । सर्वे स
कारणास्ते हि प्राप्यं तु सदाकारणम् ॥ १७३ ॥ ब्रह्मोपदेशदृष्टान्तो यस्तवेह हि कथ्य
ते । एकदेशसधर्मत्वं तत्रान्तः परिगृह्यते ॥ १७४ ॥ एवं सति निराकारे ब्रह्मण्याका
रवान्कथम् । दृष्टान्त इति नोद्यान्ति मूर्खा वैकल्पिकोक्तयः ॥ १७५ ॥ न कुतार्कि
कतामेत्य नाशनीया प्रबुद्धता । अनुभूत्यपलापान्तैरपवित्रैर्विकल्पितैः ॥ १७६ ॥ गु
णाः शमादयो ज्ञानाच्छमादिभ्यस्तथा ज्ञता । परस्परं विवर्धन्त एतेऽब्जसरसी इव ॥
१७७ ॥ न यावत्सुसमभ्यस्तौ ज्ञानसत्पुरुषक्रमौ । एकोऽपि नैकयोस्तावत्पुरुषस्येह
सिध्यति ॥ १७८ ॥ इदं यशस्यमायुष्यं पुरुषार्थफलप्रदम् । शृणु त्वं बुद्धिनैर्मल्याद्ध
लाद्यास्यसि सत्पदम् ॥ १७९ ॥ विदितवेद्यमिदं हि मनो मुनेर्विवशमेव हि याति परं
पदम् । यदवबुद्धमखण्डितविक्रमं तदवबोधदशां न जहाति हि ॥ १८० ॥ इति श्रीवा
ल्मीकीये मोक्षोपाये मुमुक्षुव्यवहारप्रकरणं नाम सर्गः ॥ [३] ॥ वसिष्ठ उवाच ॥ मुमु
क्षुव्यवहारोऽयं मया ते परकीर्तितः । अथेयं जागती श्रीमत्युत्पत्तिः परिकीर्त्यते ॥
१ ॥ अनुभूतेर्वेदनस्य प्रतिपत्तेर्यथाभिधम् । प्रत्यक्षमितिनामेह कृतं जीवः स एव नः
॥ २ ॥ स एव संवित्स पुमानहंताप्रत्ययात्मकः । स यथोदेति संविच्या सा पदार्थ
इति स्मृता ॥ ३ ॥ स संकल्पविकल्पोत्थैः कृतनानाक्रमो भ्रमैः । जगत्तया स्फुरत्य
म्बु तरंगादितया यथा ॥ ४ ॥ प्रागकारणमेवासौ सर्गादौ सर्गलीलया । स्फुरित्वा
कारणं भूतं प्रत्यक्षं स्वयमात्मनि ॥ ५ ॥ रूपालोकमनस्कारपदार्थव्याकुलं जगत् ।
विद्यते वेदनस्यान्तर्वातान्तः स्पन्दनं यथा ॥ ६ ॥ सर्वात्मवेदनं शुद्धं यथोदेति तदा
त्मकम् । भाति प्रसृतदिक्कालबाह्यान्तारूपदेहकम् ॥ ७ ॥ स सर्वात्मा यथा यत्र समु
ल्लासमुपागतः । तिष्ठत्याशु तथा तत्र तद्रूप इव राजते ॥ ८ ॥ अकारणकमेवातो ब्र
ह्मकल्पमिदं स्थितम् । प्रत्यक्षमेव निर्मातृ तस्यांशास्त्वनुमादयः ॥ ९ ॥ बन्धोऽयं दृश्य
सद्भावाद्दृश्याभावे न बन्धनम् । न संभवति दृश्यं तु यथेदं शृणु कथ्यते ॥ १० ॥ य
दिदं दृश्यते सर्वं जगत्स्थावरजङ्गमम् । तत्सुषुप्त इव स्वप्नः कल्पान्ते प्रविनश्यति ॥
११ ॥ ततः स्तिमितगम्भीरं नतेजो नतमस्ततम् । अनाख्यमनभिव्यक्तं सत्किंचिद
वशिष्यते ॥ १२ ॥ ऋतमात्मा परं ब्रह्म सत्यमित्यादिका बुधैः । कल्पिता व्यवहारा
र्थं तस्य संज्ञा महात्मनः ॥ १३ ॥ स तथाभूत एवात्मा स्वयमज्ञ इवोल्लसन् । जीवता
मुपयातीह भाविनामकदर्थ्यताम् ॥ १४ ॥ ततः स जीवशब्दार्थकलनाकुलतां गतः ।

174 c: ०सधर्मित्वं d: परिगृह्यताम् – 175 c: इह चोद्यतिं d: मूर्खं – 176 a: ननु तार्किक० – 177 d: द्वे पद्मसरसी – 178 c: नोऽनयोस्ताव० d: सिद्धिदः – 179 c: श्रुत्वा d: तत्पदम् – 180 (Drutavilambita) c: ०तमक्रमं – Kolophon zu Sarga 3 (Mūla): इति श्रीवासिष्ठविवरणे [!] वाल्मीकीये मोक्षोपाये मुमुक्षुव्यवहारप्रकरणं समाप्तम् ॥ – Vor 4.1: ॐ श्रीरामाय नमः ॥ (1. Aufl.) – 1 c/d: श्रीमदुत्पत्तिः – 3 c: यदोदेति – 4 a: ०विकल्पाद्यैः – 5 a: ०मेवाशु – 11 c : तत्सुषुप्ताविव – 14 b: स्वयमन्य c: ०यातीव d: ०कदर्थिताम् – 15 a: ०शब्दार्थः c: भूतात्मा d: ०भवत्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मनो भवति भौतात्मा मननान्मन्थरीभवन् ॥ १५ ॥ मनः संपद्यते नाम महतः परमात्मनः । सुस्थिरादस्थिराकारस्तरंग इव वारिधेः ॥ १६ ॥ तत्स्वयं स्वैरमेवाशु संकल्पयति नित्यशः । तेनेयमिन्द्रजालश्रीर्वितानेन वितन्यते ॥ १७ ॥ यथा कटकशब्दार्थः पृथक्त्वार्हो न काञ्चनात् । न हेम कटकात्तद्वज्जगच्छब्दार्थता परे ॥ १८ ॥ अरात्यै वासती तापनद्येव लहरी चला । मनसेहेन्द्रजालश्रीर्जगति प्रवितन्यते ॥ १९ ॥ अविद्या संसृतिर्बन्धो माया मोहो मलं तमः । कल्पितानीति नामानि यस्याः सकलवेदिभः ॥ २० ॥ बन्धस्य तावद्रूपं त्वं कथ्यमानमिदं शृणु । ततः स्वरूपं मोक्षस्य ज्ञास्यतीन्दुसमानन ॥ २१ ॥ द्रष्टुर्दृश्यत्वसंबन्धो बन्ध इत्यभिधीयते । द्रष्टा दृश्यवशाद्बद्धो दृश्याभावे विमुच्यते ॥ २२ ॥ जगत्त्वमहमित्यादिसर्गात्मा दृश्यमुच्यते । यावदेतत्संभवति तावन्मोक्षो न विद्यते ॥ २३ ॥ आनीलवल्लरीरूपं यथा पद्माक्षकोटरे । आस्ते कमलिनीबीजं तथा द्रष्टरि दृश्यधीः ॥ २४ ॥ यथाङ्कुरोऽन्तर्बीजस्य संस्थितो देशकालतः । तनोति भासुरं देहं तनोत्येवं हि दृश्यधीः ॥ २५ ॥ द्रव्यस्य हृद्येव चमत्कृतिर्यथा सदोदितास्त्यस्तमनोज्झितोदरे । द्रव्यस्य चिन्मात्रशरीरिणस्तथा स्वभावभूतास्त्युदरे जगत्स्थितिः ॥ २६ ॥ वसिष्ठ उवाच ॥ इदमाकाशजाख्यानं शृणु श्रवणभूषणम् । उत्पत्त्याख्यं प्रकरणं येन राघव बुध्यसे ॥ २७ ॥ अस्तीहाकाशजो नाम द्विजः परमधार्मिकः । ध्यानैकनिष्ठः सततं प्रजानां च हिते रतः ॥ २८ ॥ स चिरं जीवति यदा तदा मृत्युरचिन्तयत् । सर्वाण्येव क्रमेणाहं भूतान्यद्मि किलाक्षयः ॥ २९ ॥ एनमाकाशजं विप्रं न कस्माद्भक्षयाम्यहम् । अत्र मे कुण्ठिता शक्तिः खड्गधारा यथोपले ॥ ३० ॥ इति संचिन्त्य तं हन्तुमगच्छत्तत्पुरं तदा । त्यजन्त्युद्यममुद्युक्ता न स्वकर्मणि केचन ॥ ३१ ॥ ततस्तत्सदनं यावन्मृत्युः प्रविशति स्वयम् । तावदेनं दहत्यग्निः कल्पान्तज्वलनोपमः ॥ ३२ ॥ अग्निज्वालामहामालां विदार्यान्तर्गतो ह्यसौ । द्विजं दृष्ट्वा समादातुं हस्तेनैच्छत्प्रयत्नतः ॥ ३३ ॥ न चाशकत्पुरो द्रष्टुमपि हस्तशतैर्द्विजम् । बलवानप्यवष्टब्धुं संकल्पपुरुषं यथा ॥ ३४ ॥ अथागत्य यमं मृत्युरपृच्छत्संशयच्छिदम् । किमित्यहं न शक्नोमि भोक्तुमाकाशजं प्रभो ॥ ३५ ॥ यम उवाच ॥ मृत्यो न किंचिच्छक्तस्त्वमेको मारयितु बलात् । मारणीयस्य कर्माणि तत्कर्तॄणीति नेतरत् ॥ ३६ ॥ तस्मादेतस्य विप्रस्य मारणीयस्य यत्नतः । कर्माण्यन्विष्य तेषां त्वं सहायेनैनमत्स्यसि ॥ ३७ ॥ ततः स मृत्युर्बभ्राम तत्कर्मान्वेषणोद्यतः । मण्डलानि दिगन्तांश्च सरांसि सरितो दिशः ॥ ३८ ॥ एवं भूमण्डलं भ्रान्त्वा न कुतश्चित्स कानि

16 c/d: ०कारं तरंग – 17 c/d: ०श्रीर्जागती प्रवितन्यते – 19 a: असतैव सती c/d: मनसेवेंद्रजालश्रीर्जागती – 20 ab: अविद्या संसृतिर्मोहो बंधो माया मलं तमः d: तस्याः – 21 d: ज्ञास्यसींदु० – 22 a: द्रष्टुर्दृश्यस्य सत्तांग c: Hs. ०वशाद्बोधो – 24 a: Lies आलीन०* – 26 (unregelm. Vaṃśasthabila?) b: ०स्त्यस्तमयो० – 29 d: किलाव्ययः – 32 d: ०दहनोपमः – 34 a/b: दृष्टमपि – 35 a: स्वयं (für यमं) – 37 c: कर्माणि वीक्ष्य d: Lies साहाय्येनैन०*; Hs. ०मश्यसि – 38 b: ०णादृतः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

चित् । तान्याकाशजकर्माणि लब्धवान्मृत्युरुद्धतः ॥ ३९ ॥ समपृच्छदथागत्य यमं
सर्वार्थकोविदम् । परायणं हि प्रभवः संदेहेष्वनुजीविनाम् ॥ ४० ॥ आकाशजस्य
कर्माणि क्व स्थितानि वद प्रभो । धर्मराजोऽथ संचिन्त्य सुचिरं प्रोक्तवानिदम् ॥ ४१
॥ आकाशजस्य कर्माणि मृत्यो सन्ति न कानिचित् । एष ह्याकाशजो विप्रो जातः
खादेव केवलात् ॥ ४२ ॥ आकाशादेव यो जातः स व्योमैवामलं भवेत् । सहकारी
णि नो सन्ति कारणान्यस्य कानिचित् ॥ ४३ ॥ सहकारिकारणानामभावे यः प्रजा
यते । नासौ स्वकारणाद्भिन्नो भवतीत्यनभूयते ॥ ४४ ॥ एतदाक्रमणे मृत्यो तस्मान्मा
यत्नवान्भव । श्रुत्वैतद्विस्मितो मृत्युर्जगाम निजमन्दिरम् ॥ ४५ ॥ श्रीराम उवाच ॥
ब्रह्मैष कथितो देवस्त्वया मे प्रपितामहः । स्वयंभूरज ऐकात्म्यविज्ञानात्मेति मे मतिः
॥ ४६ ॥ श्रीवसिष्ठ उवाच ॥ एवमेतन्मया राम ब्रह्मैष कथितस्तव । विवादमकरो
न्मृत्युर्यमेनैतत्कृते पुरा ॥ ४७ ॥ मन्वन्तरे सर्वभक्षो यदा मृत्युर्हरन्प्रजाः । बलमेत्या
ब्जजाक्रन्तावारम्भमकरोत्स्वयम् ॥ ४८ ॥ तदैव धर्मराजेन यमेनाश्वनुशासितः ।
ब्रह्मा किल पराकाशवपुराक्रम्यते कथम् ॥ ४९ ॥ आकाशस्फुरदाकारः संकल्पपुरु
षो यथा । पृथ्व्यादिरहितो भाति स्वयंभूर्भासते तथा ॥ ५० ॥ चिद्व्योम केवलमना
द्यमनन्तमध्यं ब्रह्मेति भाति निजचित्तवशात्स्वयंभूः । आकारवानिव पुमानिव वस्तु
तस्तु वन्ध्यातनूज इव तस्य न चास्ति देहः ॥ ५१ ॥ श्रीराम उवाच ॥ आतिवाहिक
एकोऽस्ति देहोऽन्यश्चाधिभौतिकः । सर्वासां भूतजातीनां ब्रह्मणोऽस्त्येक एव किम्
॥ ५२ ॥ श्रीवसिष्ठ उवाच ॥ सर्वेषामिह देहौ द्वौ भूतानां कारणात्मनाम् । अजस्य
कारणासत्त्वादेक एवातिवाहिकः ॥ ५३ ॥ अन्येषां कारणं ब्रह्मप्रतिभासोत्थितं ज
गत् । अजस्य कारणं ब्रह्म तेनासावेकदेहवान् ॥ ५४ ॥ ब्रह्मा संकल्पपुरुषः पृथ्व्यादि
रहिताकृतिः । केवलं चित्तमात्रात्मा कारणं त्रिजगत्स्थितेः ॥ ५५ ॥ ब्रह्मणा तन्यते
विश्वं मनसैव स्वयंभुवा । मनोमयमतो विश्वं यन्नाम परिदृश्यते ॥ ५६ ॥ श्रीराम उ
वाच ॥ भगवन्मनसो रूपं कीदृशं वद मे स्फुटम् । यस्मात्तेनेयमखिला तन्यते दोष
मञ्जरी ॥ ५७ ॥ श्रीवसिष्ठ उवाच ॥ रामास्य मनसो रूपं न किंचिदपि दृश्यते । ना
ममात्रादृते व्योम्नो यथा शून्यजडाकृतेः ॥ ५८ ॥ न बाह्ये नापि हृदये सद्रूपं विद्यते
मनः । सर्वत्रैव स्थितं चैतद्विद्धि राम यथा नभः ॥ ५९ ॥ साधो यदेतदर्थस्य प्रति
भानं यथागतम् । सतो वाप्यसतो वापि तन्मनो विद्धि नेतरत् ॥ ६० ॥ यदर्थप्रति
भानं तन्मन इत्यभिधीयते । अन्यन्न किंचिदप्यस्ति मनो नाम कदाचन ॥ ६१ ॥
संकल्पनं मनो विद्धि संकल्पात्तन्न भिद्यते । यत्र संकल्पनं तत्र मनोऽस्तीत्यवगम्य

40 a: ०दुपागत्य b: धर्मं – 43 b: व्योमेवा० – 46 c: एकात्मा – 47 Ohne श्री० a: एवमेतन्महाभावो – 48 b: मृत्युरदन्प्रजाः – 49 b: यमेनाप्यनु० – 50 a: आकाशे – 51 (Vasantatilakā) a: केवलमनंतमनादि मध्यं d: तु नास्ति – 51A: आतिवाहिक एवासौ देहोऽस्त्यस्य स्वयंभुवः । न त्वाधिभौतिको राम देहोऽजस्यो पपद्यते ॥ – 52 a: एवास्ति b: ०न्यस्त्वाधि० – 53/58 Ohne श्री० – 59 c/d: ह्येतद्विद्धि – 60 a: यथैतद० b: प्रथां गतम् – 61 c: अन्यत्र

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ताम् । संकल्पमनसी भिन्ने न कदाचन केचन ॥ ६२ ॥ अविद्या संसृतिश्चित्तं मनो बन्धो मलं तमः । इति संकल्पजालस्य नामान्येतानि राघव ॥ ६३ ॥ संकल्पजाले गलिते स्वरूपमवशिष्यते । असंभवति सर्वस्मिन्दिक्छून्याकाशरूपिणि ॥ ६४ ॥ प्रकाश्ये यादृशं रूपं प्रकाशस्यामलं भवेत् । त्रिजगत्त्वमहं चेति दृश्येऽसत्तामुपागते । द्रष्टुः स्यात्केवलीभावस्तादृशो विमलात्मनः ॥ ६५ ॥ अनाप्ताखिलशैलादिप्रतिबिम्बे हि यादृशी । स्याद्दर्पणे दर्पणता केवलात्मस्वरूपिणी ॥ ६६ ॥ अहं त्वं जगदित्यादौ प्रशान्ते दृश्यसंभ्रमे । स्यात्तादृशी केवलता स्थिते द्रष्टर्यवीक्षणे ॥ ६७ ॥ मनो दृश्यमयं दोषं तनोतीमं क्षयात्मकम् । असदेव सदाकारं स्वप्नः स्वप्नान्तरं यथा ॥ ६८ ॥ स्फुरति वल्गति गच्छति याचते भ्रमति मज्जति संहरति स्वयम् । अपरतामुपयात्यपि केवलं चलति चञ्चलशक्तितया मनः ॥ ६९ ॥ श्रीवसिष्ठ उवाच ॥ महाप्रलयसंपत्तावसत्तां समुपागते । अशेषदृश्ये सर्गादौ शान्तमेवावशिष्यते ॥ ७० ॥ आस्तेऽनस्तमितो भास्वानजो देवो निरामयः । सर्वदा सर्वकृत्सर्वः परमात्मा महेश्वरः ॥ ७१ ॥ यतो वाचो निवर्तन्ते यो मुक्तैरवगम्यते । यस्य चात्मादिका संज्ञा कल्पिता न स्वभावजा ॥ ७२ ॥ यः पुमान्सांख्यदृष्टीनां ब्रह्म वेदान्तवादिनाम् । विज्ञानमात्रं विज्ञानविदामेकान्तनिर्मलम् ॥ ७३ ॥ यः शून्यवादिनां शून्यं भासको योऽर्कतेजसाम् । वक्ता भोक्ता ऋतं मन्ता द्रष्टा स्मर्ता सदैव यः ॥ ७४ ॥ सन्नप्यसज्जगति यो यो देहस्थोऽपि दूरगः । चित्प्रकाशो ह्ययं तस्मादालोक इव भास्वतः ॥ ७५ ॥ प्रकृतिर्व्रततिर्व्योम्नि जाता ब्रह्माण्डसत्फला । चित्तमूलेन्द्रियदला येन नृत्यति वायुना ॥ ७६ ॥ यश्चिन्मणिः प्रकचति प्रतिदेहसमुद्गके । यः प्लावयति संरब्ध पुर्यष्टकमितस्ततः ॥ ७७ ॥ शुद्धः संविन्मयत्वाद्यः खं भवेद्व्योमचिन्तया । पदार्थचिन्तयार्थत्वमवगच्छत्यधिष्ठितः ॥ ७८ ॥ आविर्भावतिरोभावमयास्त्रिभुवनोर्मयः । स्फुरन्त्यतितते यस्मिन्मराविव मरीचयः ॥ ७९ ॥ कुर्वन्नपीह जगतां महतामनन्तं वृन्दं न किंचन करोति कदाचनापि । आत्मन्यनस्तमयसंविदि निर्विकल्पो त्यक्तोदयस्थितिमतिः स्थित एक एव ॥ ८० ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते सर्वकर्माणि तस्मिन्दृष्टे परावरे ॥ ८१ ॥ श्रीराम उवाच ॥ इयतो दृश्यजालस्य ब्रह्माण्डस्य जगत्स्थितेः । मुने कथमसत्तास्ते क्व मेरुः सर्षपोदरे ॥ ८२ ॥ श्रीवसिष्ठ उवाच ॥ साधुसंगमसच्छास्त्रपरो भवसि राम चेत् । तद्दिनैरेव नो मासैः प्राप्नोषीमां परां धियम् ॥ ८३ ॥ सर्वेषामितिहासानामयं सार उदाहृतः । श्रुतेऽस्मिन्निर्मले यस्माज्जीवन्मुक्तत्वमक्ष

63 b: **बन्धो मनस्तमः** – 64 d: **०न्दिग्भूम्याकाश०**; lies **०रूपिणी** – 65 d: **ऽसत्त्वमुपागते** – 69 (Drutavilambita) – 70 Ohne **श्री०** – 72 c/d: **०दिकाः संज्ञाः**, **स्वभावजाः** – 73 b: **०वेदिनाम्** – 74 c: **वक्ता मंता ऋतं भोक्ता** – 75 b: **दूरतः** c/d: **यस्मादा०** – 76 a: **प्रकृतिव्रत०** – 78 d: **०मिव गच्छ०** – 80 (Vasantatilakā) c: **स्वात्मन्य०**, **निर्विकल्पे**; Hs. **०संसदि** – 81 c: **चास्य कर्माणि** (so die allgemein bekannte Lesart *Muṇḍaka-Up.* 2.2.8) – 82 a: **०जातस्य** c: **कथमसन्नास्ति** – 83 Ohne **श्री०** d: Hs. **प्राप्नौषीमां** – 84 d: **०मव्ययम्**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यम् ॥ ८४ ॥ उदेति स्वयमेवान्तरिदमेव विचारयन् । स्थितमेवास्तमायाति जगद्दृश्यं
विचारणात् ॥ ८५ ॥ नृणां ज्ञानैकनिष्ठानामात्मज्ञानविचारणात् । सा जीवन्मुक्तता
देति विदेहान्मुक्ततेव या ॥ ८६ ॥ श्रीराम उवाच ॥ ब्रह्मन्विदेहमुक्तस्य जीवन्मुक्तस्य
लक्षणम् । ब्रूहि येन तथैवाहं यते शास्त्रगया दृशा ॥ ८७ ॥ श्रीवसिष्ठ उवाच ॥ यथा
स्थितमिदं यस्य व्यवहारवतोऽपि च । अस्तं गतं स्थितं व्योम स जीवन्मक्त उच्यते
॥ ८८ ॥ नोदेति नास्तमायाति सुखे दुःखे मुखप्रभा । यथाप्राप्तस्थितेर्यस्य स जीवन्मु
क्त उच्यते ॥ ८९ ॥ यो जागर्ति सुषुप्तस्थो यस्य जाग्रन्न विद्यते । यस्य निर्वासनो बोधः
स जीवन्मुक्त उच्यते ॥ ९० ॥ रागद्वेषभयादीनामनुरूपं चलन्नपि । योऽन्तर्व्योमव
दत्यच्छः स जीवन्मुक्त उच्यते ॥ ९१ ॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते ॥ ९२ ॥ यस्मान्नोद्विजते लोको लोकान्नो
द्विजते च यः । हर्षामर्षभयोन्मुक्तः स जीवन्मुक्त उच्यते ॥ ९३ ॥ शान्तसंसारकल
नः कलावानपि निष्कलः । यः सचिन्तोऽपि निश्चिन्तः स जीवन्मुक्त उच्यते ॥ ९४
॥ यः समस्तार्थजातेषु व्यवहार्यतिशीतलः । परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उ
च्यते ॥ ९५ ॥ जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते । विशत्यदेहमुक्तत्वं पव
नोऽस्पन्दतामिव ॥ ९६ ॥ विदेहमुक्तो नोदेति नास्तमेति न शाम्यति । न सन्नासन्न
दूरस्थो न चाहं न च वेतरः ॥ ९७ ॥ ततः स्तिमितगम्भीरं नतेजो नतमस्ततम् । अना
ख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ॥ ९८ ॥ न शून्यं नापि चाकाशं न दृश्यं ना
पि दर्शनम् । न च भूतपदार्थौघः सदनन्ततया स्थितम् ॥ ९९ ॥ किमप्यव्यपदेशा
त्मा पूर्णात्पूर्णतराकृतिः । न सन्नासन्न सदसन्नाभावो भावनं न च ॥ १०० ॥ चि
न्मात्रं चेत्यरहितमनन्तमजरं शिवम् । अनादिमध्यपर्यन्तं यदनाधि निरामयम् ॥
१०१ ॥ द्रष्टृदर्शनदृश्यानां मध्ये यद्दर्शनं स्थितम् । साधो तदवधानेन तदेतदवबुध्यसे
॥ १०२ ॥ श्रीराम उवाच ॥ परमार्थस्य किं रूपं तस्यानन्तचिदाकृतेः । पुनरेतन्ममा
चक्ष्व निपुणं बोधवृद्धये ॥ १०३ ॥ श्रीवसिष्ठ उवाच ॥ महाप्रलयसंपत्तौ सर्वकारण
कारणम् । शिष्यते तत्परं ब्रह्म तदिदं वर्ण्यते शृणु ॥ १०४ ॥ नाशयित्वा स्वमात्मानं
मनसो वृत्तिसंक्षये । सद्रूपं यदनाख्येयं तद्रूपं तस्य वस्तुनः ॥ १०५ ॥ चितेर्जीवस्व
भावाया यदचेत्योन्मखं वपुः । चिन्मात्रं विमलं शान्तं तद्रूपं परमात्मनः ॥ १०६ ॥
अङ्गलग्नेऽपि वातादौ स्पर्शाद्यनुभवं विना । जीवतश्चेतसो रूपं यत्तत्परममात्मनः ॥
१०७ ॥ अस्वप्नाया अनन्ताया अजडाया महामतेः । यद्रूपं चिरनिद्रायास्तद्रूपं पर
मात्मनः ॥ १०८ ॥ वेदनस्य प्रकाशस्य दृश्यस्य तमसस्तथा । वेदनं यदनाद्यन्तं तद्रूपं

85 b: **विचारय** – 86 b: **॰विचारिणाम्** d: Lies **विदेहोन्मु॰**; **विदेहान्मुक्ततैव** – 87 d: Lies **युक्तो** (für **यते**); Hs. **शास्त्रगता** – 88 Ohne **श्री॰** – 89 c: **॰स्थितिर्यस्य** – 90 a: **सुषुप्ति॰** – 91 b: **चरन्नपि** – 92 b: **यस्य बुद्धिर्न** – 94 a: **॰संसारकल्लोलः** – 95 b: **॰र्यपि शीतलः** – 99 a: **चाकारं** – 100 d: Lies **भवनं**; **न वा** – 101 b: Hs. **॰मजिरं** d: Hs. **यदनादि** – 103 b: **तस्यानंद॰** – 104 Ohne **श्री॰** – 108 b: **महामते**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

परमात्मनः ॥ १०९ ॥ व्यवहारे परस्यापि यत्पाषाणवदासनम् । अव्योम्न एव व्योम
त्वं तद्रूपं परमात्मनः ॥ ११० ॥ वेद्यवेदनवेत्तृत्वरूपत्रयमिदं पुरः । यत्रोदेत्यस्तमाया
ति तद्रूपं परमात्मनः ॥ १११ ॥ स्थावराणां हि यद्रूपं तच्चेद्बोधमयं भवेत् । मनोबुद्ध्या
दिनिर्मुक्तं तत्परेणोपमीयते ॥ ११२ ॥ ब्रह्मार्कविष्णुहरशक्रसदाशिवादिशान्तौ शिवं
परममेतदिहैकमास्ते । सर्वोपधिव्ययवशादविकल्परूपं चैतन्यमात्रमतमुज्झितविश्वस
ङ्गम् ॥ ११३ ॥ इति श्रीवाल्मीकीये मोक्षोपाय उत्पत्तिप्रकरणार्थनिर्देशसर्गः ॥ [४] ॥
श्रीवसिष्ठ उवाच ॥ अत्रेदं मण्डपाख्यानं शृणु श्रवणभूषणम् । निःसंदेहो यथैषोऽर्थ
श्चित्ते विश्रान्तिमेति ते ॥ १ ॥ आसीदस्मिन्महीपीठे कुलपद्मविकाशवान् । पद्मो नाम
नृपः श्रीमान्बहुपुत्रो विवेकवान् ॥ २ ॥ मर्यादापालनाम्भोधिर्द्विषत्तिमिरभास्करः ।
सरः सद्गुणहंसानां दोषतृणहुताशनः ॥ ३ ॥ तस्यासीत्सुभगा भार्या लीला नाम वि
लासिनी । सर्वसौभाग्यवलिता कमलेवोदितावनौ ॥ ४ ॥ उद्विग्ने प्रोद्विग्ना मुदिते मु
दिता समाकुलाकुलिते । प्रतिबिम्बसमा कान्ता संक्रुद्धे केवलं भीता ॥ ५ ॥ सैकदा
चिन्तयामास शुभसंकल्पशालिनी । प्राणेभ्योऽपि प्रियो भर्ता ममैष जगतीपतिः ॥
६ ॥ यौवनोल्लासवाञ्श्रीमान्कथं स्यादजरामरः । भर्त्रानेन कथं सार्धं रमे युगशतान्य
हम् ॥ ७ ॥ ज्ञानवृद्धांस्तपोवृद्धान्विद्यावृद्धानहं द्विजान् । पृच्छामि तावन्मरणं कथं न
स्यान्नृणामिति ॥ ८ ॥ इत्यानीयाथ संपूज्य द्विजान्पप्रच्छ सा नता । अमरत्वं कथं
विप्रा भवेदिति पुनः पुनः ॥ ९ ॥ विप्रा ऊचुः ॥ तपोजपयमैर्देवि समस्ताः सिद्धि
सिद्धयः । संप्राप्यन्तेऽमरत्वं तु न कदाचन लभ्यते ॥ १० ॥ इत्याकर्ण्य द्विजमुखा
च्चिन्तयामास सा पुनः । इदं स्वप्रज्ञयैवाशु भीता प्रियवियोगतः ॥ ११ ॥ मरणं भर्तु
रथ मे यदि दैवाद्भविष्यति । तत्सर्वदुःखनिर्मुक्ता संस्थास्ये सुखमात्मनि ॥ १२ ॥
अथ वर्षसहस्रेण भर्तादौ चेन्मरिष्यति । तत्करिष्ये तथा येन जीवो गेहान्न यास्यति
॥ १३ ॥ तद्भ्रमद्भर्तृजीवेऽस्मिन्निजे शुद्धान्तमण्डपे । भर्त्रावलोकिता नित्यं निवत्स्या
मि यथासुखम् ॥ १४ ॥ अद्यैवारभ्यैतदर्थं देवीं ज्ञप्तिं सरस्वतीम् । जपोपवासनियमै
रातोषं पूजयाम्यहम् ॥ १५ ॥ इति निश्चित्य सा नाथमपुक्त्वैव वरानना । यथाशास्त्रं
चचारोग्रं तपोनियममास्थिता ॥ १६ ॥ त्रिरात्रस्य त्रिरात्रस्य पर्यन्ते कृतपारणा । देव
द्विजगुरुप्राज्ञविद्वत्पूजापरायणा ॥ १७ ॥ स्नानदानतपोध्याननित्योद्युक्तशरीरका । स
र्वास्तिक्यसदाचारकारिणी क्लेशहारिणी ॥ १८ ॥ त्रिरात्रशतमेवं सा बाला नियमशा
लिनी । अनारतं तपोनिष्ठामतिष्ठत्कष्टचेष्टया ॥ १९ ॥ त्रिरात्राणां शतेनाथ पूजिता
प्रतिमानिता । तुष्टा भगवती गौरी वाणीशी समुवाच ताम् ॥ २० ॥ निरन्तरेण तप

110 a: **व्यवहार०** – 111 a: Hs. **०वेत्तृत्वं** b: Lies **पुरम्** – 113 (Vasantatilakā) d: **०मात्रमयमु०** – Kolophon zu Sarga 4: Hs. **मोक्षोपाये**, **०प्रकरणोर्थ०**; LN wie Hs., sonst: **०प्रकरणार्थदर्शनो** [sic] **नाम पंचमः सर्गः ॥ ५ ॥** – 4.1 Ohne **श्री०** – 2 b: **कुलपद्मो** – 3 d: **दोषतृण्या०** – 5 (Āryā) c: **०समाक्रांता** – 7 c: **साकं** – 10 b: **सिद्धसिद्धयः** d: **कथंचन** – 12 a: **भर्तुरग्रे** – 13 c: **यथा** – 16 a/b: **नाथमनुक्त्वैव** c: **चकारोग्रं** – 19 c/d: Lies **तपोनिष्ठा सातिष्ठ०*** – 20 d: **वागीशा**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सा भर्तृभक्त्यातिशायिना । परितुष्टास्मि ते वत्से गृहाण वरमीप्सितम् ॥ २१ ॥ राज्ञ्यु
वाच ॥ जय जन्मजराज्वालादाहदोषशशिप्रभे । जय हार्दान्धकारौघनिवारणरविप्र
भे ॥ २२ ॥ अम्ब मां त्रिजगन्मातस्त्रायस्व कृपणामिमाम् । इदं वरद्वयं देहि यदिह
प्रार्थ्यते मया ॥ २३ ॥ एकं तावद्विदेहस्य भर्तुर्जीवो ममान्तिकात् । अस्मादेव हि मा
यासीन्निजान्तःपुरमण्डपात् ॥ २४ ॥ द्वितीयं तु महादेवि प्रार्थयेऽहं यदा यदा । दर्श
नाय वरार्थेन तदा मे देहि दर्शनम् ॥ २५ ॥ इत्याकर्ण्य जगन्माता तथास्त्वेवमिति
स्वयम् । उक्त्वान्तर्धानमगमत्प्रोत्थायोर्मिरिवार्णवे ॥ २६ ॥ अथ सा राजमहिषी प
रितुष्टेष्टदेवता । पूर्णेवामृतवर्षेण बभूवानन्दधारिणी ॥ २७ ॥ पक्षमासर्तुकटके दिनारे
वर्षदण्डके । क्षणनाभौ स्पन्दमये कालचक्रे वहत्यथ । अन्तर्धिमाजगामास्याः पत्यु
स्तच्चेतनं तनौ ॥ २८ ॥ मृते तस्मिन्महीपाले शोकसंतापपीडिता । निर्जला नलिनी
वासौ परां म्लानिमुपाययौ ॥ २९ ॥ क्षिप्रमाक्रन्दिनी क्षिप्रं मौनमूका वियोगिनी ।
बभूव चक्रवाकीव मानिनी मरणोन्मुखी ॥ ३० ॥ अथ तामतिशोकविह्वलां सकृपा
काशभवा सरस्वती । शफरीं ह्रदशोषदुर्बलां प्रथमा वृष्टिरिवान्वकम्पयत् ॥ ३१ ॥
सरस्वत्यवाच ॥ शवीभूतमिमं वत्से भर्तारं पुष्पखण्डके । आच्छाद्य स्थापयैनं त्वं पु
नर्भर्तारमाप्स्यसि ॥ ३२ ॥ पुष्पाणि म्लानिमेष्यन्ति नो न चैष विनश्यति । भूयश्च
तव भर्तृत्वमचिरेण करिष्यति ॥ ३३ ॥ एतदीयश्च जीवोऽसावाकाशविशदस्तव । न
निर्गमिष्यति क्षिप्रमितोऽन्तःपरमण्डपात् ॥ ३४ ॥ सा दिव्यां भारतीं श्रुत्वा स्थाप
यित्वा पतिं तथा । दुःखादाह्वानयामास ज्ञप्तिं देवीं सरस्वतीम् ॥ ३५ ॥ किं स्मृतास्मि
त्वया वत्से धत्से किमतिशोकिताम् । इत्युपेत्य पुरो ज्ञप्तिस्तामुवाच सरस्वती ॥ ३६
॥ लीलोवाच ॥ क्व ममावस्थितो भर्ता किं करोत्यथ कीदृशः । समीपं नय मां तस्य
नैका शक्नोमि जीवितुम् ॥ ३७ ॥ देव्युवाच ॥ चित्ताकाशं चिदाकाशमाकाशं च
तृतीयकम् । द्वाभ्यां शून्यतरं विद्धि चिदाकाशं वरानने ॥ ३८ ॥ देशाद्देशान्तरप्राप्तौ
संविदो मध्यमेव यत् । निमेषेण चिदाकाशं तद्विद्धि वरवर्णिनि ॥ ३९ ॥ तस्मिन्निर
स्तनिःशेषसंकल्पां स्थितिमेषि चेत् । सर्वात्मकं पदं शान्तं तदा प्राप्नोष्यसंशयम् ॥
४० ॥ अत्यन्ताभावसंपत्त्या जगतस्त्वेतदाप्यते । नान्यथा मद्वरेणाशु त्वं तु प्राप्स्य
सि सुन्दरि ॥ ४१ ॥ श्रीवसिष्ठ उवाच ॥ इत्युक्त्वा सा ययौ देवी दिव्यमात्मीयमा
स्पदम् । लीला च लीलयैवासीन्निर्विकल्पसमाधिभाक् ॥ ४२ ॥ तत्तत्याज निमेषेण
सान्तःकरणपञ्जरम् । स्वदेहं खमिवोड्डीना मुक्तनीडा विहंगमी ॥ ४३ ॥ ददर्श खस्थं

21 b: **०भक्त्यतिशायिना** – 23–24: Bei Hs. vertauscht. – 23 a: **अंब मातर्जगन्मा०** – 31 (Viyoginī) a: **तामतिमात्र०** c: **ह्रदशोषविह्वलां** d: **०कंपत**. Version Ld: **अथ तां मोहमापन्नां दृष्ट्वा ज्ञप्तिसरस्वती । क्षिप्रमाश्वासयामास कौमुदीव कुमुद्वतीम् ॥** – 33 b: **वैष विनंक्ष्यति** – 35 b: **तथा पतिम्** c: **०ह्वाययामास** d: **देवीं ज्ञप्तिं** – 36 **सरस्वत्युवाच ॥** b: **०शोकताम्** – 38 **ज्ञप्तिरुवाच ॥** – 42 Ohne **श्री०** c: **तु** – 43 a: **तत्याजाथ** – 44 a: Lies **स्वस्थं** (mit Rücksicht auf das Metrum evtl. **स्वस्थं ददर्श**)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

भर्तारं तस्मिन्नेवालयाम्बरे । संस्थितं पृथिवीपालमास्थाने बहुराजनि । सिंहासनसमारूढं जय जीवेति संस्तुतम् ॥ ४४ ॥ पूर्वद्वारस्थितासंख्यमुनिविप्रर्षिमण्डलम् । दक्षिणद्वारगासंख्यललनालोकसंकुलम् ॥ ४५ ॥ उत्तरद्वारगासंख्यरथहस्त्यश्वमण्डलम् । पश्चिमद्वारगासंख्यराजराजेशमण्डलम् ॥ ४६ ॥ पपाताथ महारम्भा सा तां नरपतेः सभाम् ॥ ४७ ॥ तद्देशांस्तत्समाचारांस्तथा तेनैव लालितान् । अथान्यानप्यपूर्वांश्च पण्डितान्सुहृदस्तथा ॥ ४८ ॥ महाह्रदनदीशैलपुरपत्तनमण्डितान् । द्विरष्टवर्षं भूपालं प्राक्तन्या जरसोज्झितम् ॥ ४९ ॥ सर्वमालोक्य सा राज्ञी विस्मयं परमं ययौ । अथ व्युत्थाय सा राज्ञी निजान्तःपुरमागता ॥ ५० ॥ देवीं सस्मार विज्ञप्तिं ददर्श च पुरः स्थिताम् । भद्रासनगतां देवीं लीलापृच्छद्भुवि स्थिता ॥ ५१ ॥ यथा पत्युरमूर्तोऽस्मात्सर्गात्सर्गो भ्रमात्मकः । जातस्तथा कथय मे जगद्भ्रमनिवृत्तये ॥ ५२ ॥ देव्युवाच ॥ प्राक्स्मृतेर्भ्रान्तिमात्रात्मा सर्गोऽयमुदितो यथा । तथा द्वितीयः पत्युस्ते यथैतत्कथ्यते शृणु ॥ ५३ ॥ अस्ति कश्चिच्चिदाकाशे क्वचित्संसारमण्डपः । आकाशकाचदलसंछादनाच्छादिताकृतिः ॥ ५४ ॥ मेरुस्तम्भस्थलोकेशपुरंध्रीशालभञ्जिकः । कोणस्थभूतवल्मीकव्याप्तपर्वतलोष्टकः ॥ ५५ ॥ अनेकपुत्रजरठप्रजेशब्राह्मणास्पदम् । वातमार्गमहावंशस्थितवैमानिकीटकः ॥ ५६ ॥ नभोनिवासिसिद्धौघमशकाहितघुंघुमः । सुरासुरादिदुर्बाललीलाकलकलाकुलः ॥ ५७ ॥ तत्र कस्मिंश्चिदेकस्मिन्कोणापवरकोदरे । शैललोष्टतलेऽस्त्येको गिरिग्रामकगर्तकः ॥ ५८ ॥ तस्मिन्नदीशैलवनोपगूढे साग्निः सदारः सुतवानरोगः । गोक्षीरवात्राजभयानभिज्ञः सर्वातिथिर्धर्मपरो द्विजोऽभूत् ॥ ५९ ॥ वित्तवेषवयःकर्मविद्याविभवचेष्टितैः । वसिष्ठस्येव सदृशो न तु वासिष्ठचेतनः ॥ ६० ॥ वसिष्ठ इति नाम्नासौ तस्याभूदिन्दुसुन्दरी । नाम्ना ह्यरुन्धती भार्या भूमिव्योमन्यरुन्धती ॥ ६१ ॥ वित्तवेषवयःकर्मविद्याविभवचेष्टितैः । समैव साप्यरुन्धत्या न तु चैतन्यवत्तया ॥ ६२ ॥ स विप्रस्तस्य शैलस्य सानौ सलिलशाद्वले । कदाचिदुपविष्टः सन्ददर्शाधो महीपतिम् ॥ ६३ ॥ समग्रपरिवारेण यातमाखेटकेच्छया । तमालोक्य महीपालमिदं चिन्तितवानसौ ॥ ६४ ॥ अहो नु रम्या नृपता सर्वसौभाग्यभासिनी । कदा स्यां दशदिक्कुञ्जपूरकोऽहं महीपतिः । पदातिरथहस्त्यश्वपताकाछत्रचामरैः ॥ ६५ ॥ कदा मे वायवः कुन्दमकरन्दसुगन्धयः । यास्यन्त्यतः पुरंध्रीणां सुरतश्रमशीकरान् ॥ ६६ ॥ इत्थं ततः प्रभृत्येष विप्रः संकल्पवानभूत् । स्वधर्मनिरतो नित्यं यावज्जीवमतन्द्रितः ॥ ६७ ॥ हिमाशनिरिवाम्भोजं जर्जरीकर्तुमागता । तं तथा

b: **तस्मिन्नेवांबरालये** d: **०राजके** – Textfolge: 45ab/46cd, 46ab/45cd. – 46 b: **०संकुलम्** (für **०मण्डलम्**) c: **०द्वारगाशेष०** – 48 b: **तानेव तालकान्** – 49 a: **महानदनदी०** a/b: Lies **०शैलान्पुर०** – 50 c: **अथाभ्युत्थाय** – 53 **श्रीदेव्युवाच ॥** c/d: **अ(ा)काशविशदः काचदलसंछादिताकृतिः** – 59 (Indravajrā) b: **श्रुतवान०** – 61 a: Hs. **वसिष्ठ इव** c: **त्वरुंधती** d: **भूमौ** – 63 b: **सरलशाद्वले** – 65 b: **०सौभाग्यलालिता** – 66 c: **यास्यंत्यंतःपुरस्त्रीणां** – 67 a: **प्रभृत्येव** – 68 a: ist **हिमाहति०** zu lesen? b: **०कर्तुमादृतः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

चिन्तयाविष्टं जरा द्विजमुपाययौ । आसन्नमरणस्यास्य भार्या म्लानिमुपागता ॥ ६८
॥ मामथाराधितवती सा ततस्त्वमिवाङ्गने । अमरत्वं सुदुष्प्रापं बुद्ध्वेमं सावृणोद्वरम्
॥ ६९ ॥ देवि स्वमण्डपादेव जीवो भर्तुर्मृतस्य मे । मा यासीदित्यतस्तस्याः स एवाङ्गी
कृतो मया ॥ ७० ॥ अथ कालवशाद्विप्रः स पञ्चत्वमुपाययौ । तस्मिन्नेव गृहाकाशे
जीवाकाशतया स्थितः ॥ ७१ ॥ संपन्नः प्राक्तनानल्पसंकल्पवशतः स्वयम् । आका
शवपुरेवोर्वीपतिः परमशक्तिमान् ॥ ७२ ॥ तस्मिन्द्विजे शवीभूते शोकेनात्यन्तकर्शि
ता । सा तस्य ब्राह्मणी भार्या हृदयेन द्विधागमत् ॥ ७३ ॥ भर्त्रा सह शवीभूता देहमु
त्सृज्य दूरतः । आतिवाहिकदेहेन भर्तारं समुपाययौ ॥ ७४ ॥ तत्रास्य विप्रस्य सुता
गृहाणि भूस्थावरादीनि धनानि सन्ति । अद्याष्टमं वासरमाप्तमृत्योर्जीवो गिरिग्रामक
मन्दिरस्थः ॥ ७५ ॥ देव्युवाच ॥ स ते भर्ताद्य संपन्नो द्विजो भूपत्वमागतः । यासा
वरन्धती नाम ब्राह्मणी सा त्वमङ्गने ॥ ७६ ॥ इहेमौ कुरुतो राज्यं तौ भवन्तौ सुदं
पती । चक्रवाकाविव जवौ भुवं यातौ शिवाविव ॥ ७७ ॥ एष ते कथितः सर्वः
प्राक्तनः संस्मृतिभ्रमः । भ्रान्तिमात्रकमाकाशमेवं सर्गो हि भासते ॥ ७८ ॥ लीलो
वाच ॥ देवि त्वद्वचनं मिथ्या कथं संपन्नमीदृशम् । क्व विप्रजीवः स्वगृहे क्वेमे वय
मिह स्थिताः ॥ ७९ ॥ तादृग्लोकान्तरं सा भूस्ते शैलास्ता दिशो दश । कथं माति
गृहस्यान्तर्यत्रामी वयमास्महे ॥ ८० ॥ मत्त ऐरावणो बद्धः सर्षपाकोणकोटरे । मश
केन कृतं युद्धं सिंहौघैरणुकोटरे ॥ ८१ ॥ पद्माक्षे स्थापितो मेरुर्निगीर्णो भृङ्गसूनुना ।
असमञ्जसमेवैतद्यथेदं देवि तादृशम् ॥ ८२ ॥ देव्युवाच ॥ नाहं मिथ्या वदामीदं य
थावच्छृणु सुन्दरि । भेदनं नियतीनां हि क्रियते नास्मदादिभिः ॥ ८३ ॥ स ग्रामद्वि
जजीवात्मा तस्मिन्नेव स्वसद्मनि । व्योमैवेदं महीराष्ट्रं व्योमात्मैव प्रपश्यति ॥ ८४ ॥
प्राक्तनी सा स्मृतिर्लुप्ता युवयोरुदितान्यथा । स्वप्ने जाग्रत्स्मृतिर्यद्वदेतन्मरणमङ्गने ॥
८५ ॥ इयमन्तः स्थिता भूमिः संकल्पादर्शयोरिव । तस्य सत्यावभासस्य चिद्व्योम्नः
कोशकोटरे ॥ ८६ ॥ परमाणौ परमाणौ सन्ति वत्से चिदात्मनि । अन्तरन्तर्जगन्ती
ति प्रतिभानात्मकान्युत ॥ ८७ ॥ लीलोवाच ॥ अष्टमे दिवसे विप्रः प्रमृतः परमेश्व
रि । गतो वर्षगणोऽस्माकं मातः कथमिदं भवेत् ॥ ८८ ॥ देव्युवाच ॥ देशदैर्घ्यं यथा
नास्ति कालदैर्घ्यं तथाङ्गने । प्रतिभामात्रकादन्यच्चिद्विलासैकरूपिणि । यथावत्प्रति
भासस्य वत्से क्रममिदं शृणु ॥ ८९ ॥ अनुभूय क्षणं जीवो मिथ्यामरणमूर्छनाम् । वि
स्मृत्य प्राक्तनं भावमन्यं पश्यति सुव्रते ॥ ९० ॥ आधेयोऽहमिहाधारे स्थितोऽहमिह
सुव्रते । हस्तपादादिमान्देहो ममायमिति पश्यति ॥ ९१ ॥ एतस्याहं पितुः पुत्रो वर्षा

69 a: **मामप्याराधित०** – 73 a: **तस्मिन्विप्रे** – 75 (Indravajrā) b: lies **भूः**? (vgl. V 80) c: **वासरमाप्य** d: **०ग्रामककंदरस्थः** – 76 Ohne **देव्युवाच ॥** c: **०नाम्ना** – 77 c: **नवौ** d: **भुवि जातौ** – 78 a: **सर्गः** b: **संसृति०** – 79 d: **क्वामी** – 80 c: **मातिं** – 87 ab: **परमाणौ सतिं वत्से जीवे प्रतिचिदात्मनि** (metr. besser) d: **०भासात्म०** – 88 b: **स मृतः** – 89 d: **०रूपिणः** f: **क्रममिमं** – 91 b: **स्थितोऽहमिति सुंदरि**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ण्येतानि सन्ति मे । इमे मे बान्धवा रम्या ममेदं रम्यमास्पदम् ॥ ९२ ॥ इति भान्ति
जगन्त्याशु मृतिमोहादनन्तरम् ॥ ९३ ॥ लीलोवाच ॥ अहो नु परमा दृष्टिर्दर्शिता
देवि मे त्वया । इदानीमहमेतस्यां यावत्परिणता दृशि ॥ ९४ ॥ नाभ्यासेन विना ता
वद्धिन्द्धीदं देवि कौतुकम् । सर्गं ब्राह्मणदंपत्योस्तं मां नय महेश्वरि ॥ ९५ ॥ देव्यु
वाच ॥ अचेत्यचिद्रूपमयीं परमां पावनीं दृशम् । अवलम्ब्येममाकारमवमुच्य भवा
मला ॥ ९६ ॥ एवं स्थिते तं पश्यावः सह सर्गमनर्गलम् । अयं तद्दर्शनद्वारे देहस्तव म
हार्गला ॥ ९७ ॥ जगन्तीमान्यमूर्तानि मूर्तिमन्ति मुधाग्रहात् । भवद्भिरवबुद्धानि हे
मानीवोर्मिकाधिया ॥ ९८ ॥ तवाभ्यासं विना बाले नाकारो ब्रह्मतां गतः । स्थितः
कलनरूपात्मा तेन त्वं नानुपश्यसि ॥ ९९ ॥ तत्र रूढिमुपायाता य इमे त्वस्मदाद
यः । अभ्यासाद्ब्रह्मसंवित्तेः पश्यामस्ते हि तत्पदम् ॥ १०० ॥ आतिवाहिक एवायं
त्वादृशैश्चित्तदेहकः । आधिभूतिकताबुद्ध्या गृहीतश्चिरभावनात् ॥ १०१ ॥ वासनाता
नवं नूनं यदा ते स्थितिमेष्यति । तदातिवाहिकीभावः पुनरेष्यति देहके ॥ १०२ ॥
शुद्धसत्त्वानुपतितं चेतः प्रतनुवासनम् । आतिवाहिकतामेति हिमं तापादिवाम्बु
ताम् ॥ १०३ ॥ वासनातानवे तस्मात्कुरु यत्नमनिन्दिते । तस्मिन्प्रौढिमुपायाते जीव
न्मक्ता भविष्यसि ॥ १०४ ॥ यावन्न पूरितस्त्वेष शीतलो बोधचन्द्रमाः । तावद्देहम
वस्थाप्य सर्गान्तरमवेक्ष्यताम् ॥ १०५ ॥ लीलोवाच ॥ अत्रोपकुरुते ब्रूहि कोऽभ्यासः
कीदृशस्तथा । स कथं पोषमायाति पुष्टे तस्मिंश्च किं भवेत् ॥ १०६ ॥ देव्युवाच ॥
तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधकम् । एतदेकपरत्वं च तदभ्यासं विदुर्बुधाः ॥
१०७ ॥ उदितौदार्यसौन्दर्यवैराग्यरसगर्भिणी । आनन्दस्यन्दिनी येषां मतिस्तेऽभ्या
सिनः परे ॥ १०८ ॥ अत्यन्ताभावसंपत्तौ ज्ञातुर्ज्ञेयस्य वस्तुनः । युक्त्या शास्त्रैर्यतन्ते
ये ते ब्रह्माभ्यासिनः स्थिताः ॥ १०९ ॥ सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा ।
इदं जगदहं चेति बोधाभ्यासं विदुः परे ॥ ११० ॥ दृश्यासंभवबोधेन रागद्वेषादिता
नवे । रतिर्बलोदिता यासौ ब्रह्माभ्यासः स उच्यते ॥ १११ ॥ दृश्यासंभवबोधो हि
ज्ञानं ज्ञेयं स कथ्यते । तदभ्यासेन निर्वाणमित्यभ्यासो महोदयः ॥ ११२ ॥ वसिष्ठ
उवाच ॥ इति संकथनं कृत्वा तस्यां निशि वराङ्गने । समाधिस्थानकं दत्त्वा तस्थतुर्नि
श्चलाङ्गके ॥ ११३ ॥ अविकल्पसमाधानाज्जहतुः पूर्वसंविदम् । तेनैव ज्ञानदेहेन च
चार ज्ञप्तिदेवता ॥ ११४ ॥ मानुषी मानुषं देहं त्यक्त्वा बभ्राम सा तदा । गेहान्तरेव
प्रादेशमात्रमारुह्य खं चिदा ॥ ११५ ॥ बभूवतुश्चिदाकाशरूपिण्यौ व्योमगाकृती ।

93 a: **इति भ्रांतिंर्जगत्यत्र** – 98 d: **हैमानी०** – 100 a: Hs. **तव** – 101 c: **आधिभौतिकया** – 102 c: **०वाहिको भावः** – 104 d: Hs. **भविष्यति** – 106 b: **कीदृशोऽथवा** – 107 b: **०बोधनम्** – 109 a/b: Hs. **०संपत्तिर्ज्ञा०** d: **स्थिराः** – 110–112: Die Hs. hat 112 zusätzlich als Einschub zw. 110ab und 110cd. – 111 b: Hs. **०दिनानघे** – 112 b: **ज्ञेयं च** (so auch Hs. Einschub) – 113 c: **गत्वा** – 114 a: **निर्विकल्प०** – 115 c: **देहांतरं च** d: Lies **चिदः**; **संविदा**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अथ ते ललने लीलालोले ललितलोचने । स्वभावाच्चेत्यसंवित्तेर्नभो दूरमितो गते ॥
११६ ॥ दूराद्दूरमभिप्लुत्य यान्त्यौ ददृशतुर्नभः । एकार्णवमिवोच्छूनं गम्भीरं निर्मला
न्तरम् ॥ ११७ ॥ कोमलं कोमलमरुदासङ्गसुखभोगदम् । मनोवेगमहासिद्धजितवा
तगमागमम् ॥ ११८ ॥ पर्यन्तस्थितकूष्माण्डरक्षःपैशाचमण्डलम् । नृत्यद्भिर्डाकिनी
संघैस्तरंगितमिव क्वचित् ॥ ११९ ॥ प्रवृत्तैर्योगिनीसंघैः श्वकाकोष्ट्रखराननैः । निरर्थं
योजनशतं गत्वागच्छद्भिरावृतम् ॥ १२० ॥ वातस्कन्धनिखातान्तर्वहत्त्रिपथगाज
लम् । क्वचिन्निर्भित्तिसदनं गायन्नारदतुम्बरु । चित्रन्यस्तसमाकारमूककल्पान्तवा
रिदम् ॥ १२१ ॥ क्वचिन्निरन्तरोन्नृत्तमातृमण्डलमालितम् । अपि योजनलक्षाणि क्व
चिद्दुष्प्रापभूतकम् ॥ १२२ ॥ अविनाशितमःपङ्क्तैर्दृषद्गर्भोपमं क्वचित् । अविनाशिबृ
हत्तेजः क्वचिदर्कानलोपमम् ॥ १२३ ॥ उदुम्बरोदरमशकक्रमभ्रमज्जगत्त्रयान्तरगतभू
तसंचयम् । विलङ्घ्य तद्वरललने खमुच्चकैर्महीतलं पुनरपि गन्तुमुद्यते ॥ १२४ ॥ श्री
वसिष्ठ उवाच ॥ इति ते वरवर्णिन्यौ ततो ब्रह्माण्डमण्डलात् । निर्गत्यान्यदनुप्राप्ते यत्र
तद्ब्राह्मणास्पदम् ॥ १२५ ॥ ततो ददृशतुः सर्गे तत्र ते सिद्धयोषितौ । अदृशे एव लो
कस्य मण्डपं ब्राह्मणास्पदम् ॥ १२६ ॥ चिन्ताविधुरदासीकं बाष्पक्लिन्नाङ्गनामुखम् ।
विध्वस्तपूर्वसंस्थानं विद्युद्दग्धमिव द्रुमम् ॥ १२७ ॥ अथ सा निर्मलध्यानचिराभ्या
सेन सुन्दरी । संपन्ना सत्यसंकल्पा सत्यधामा च देववत् ॥ १२८ ॥ चिन्तयामास
मामेत देवीं चेमां च बन्धवः । पश्यन्तु तावत्सामान्यललनारूपधारिणीम् ॥ १२९ ॥
ततो गृहजनस्तत्र स ददर्शाङ्गनाद्वयम् । लक्ष्मीगौर्योर्युगमिव समुद्भासितमन्दिरम् ॥
१३० ॥ नमोऽस्तु वनदेवीभ्यामित्युक्त्वा कुसमाञ्जलिम् । तत्याज ज्येष्ठशर्माथ सार्धं
गृहजनेन सः ॥ १३१ ॥ देव्यौ चाभवतां स्निग्धाविह ब्राह्मणदंपती । सर्वातिथी कु
लकरौ स्तम्भभूतौ द्विजस्थितेः ॥ १३२ ॥ तावेतौ गृहमुत्सृज्य सपुत्रपशुबान्धवम् ।
स्वर्गं गतौ नः पितरौ तेन शून्यं जगत्त्रयम् ॥ १३३ ॥ तद्देव्यौ क्रियतां तावदस्माकं
शोकनाशनम् । महतां दर्शनं नाम न कदाचन निष्फलम् ॥ १३४ ॥ इत्युक्तवन्तं सा
पुत्रं मूर्ध्नि पस्पर्श पाणिना । तस्याः स्पर्शेण तेनासौ दुःखदौर्भाग्यसंकटम् ॥ १३५ ॥
जहौ प्रावृड्घनासङ्गाद्ग्रीष्मतापमिवाचलः । अथान्योऽपि जनस्तत्र जहौ शोकं दुरुत्त
रम् ॥ १३६ ॥ तस्मिन्गिरितटे ग्रामे तस्मिन्मण्डपकोटरे । अन्तर्धिमापतुस्तत्र ततस्ते
सिद्धयोषितौ ॥ १३७ ॥ देव्युवाच ॥ ज्ञेयं ज्ञातमशेषेण दृष्टा दृष्टान्तसंविदः । ईदृशी
यं ब्रह्मसत्ता किमन्यद्वद पृच्छसि ॥ १३८ ॥ लीलोवाच ॥ मृतस्य भर्तुर्जीवोऽसौ यत्र
राज्यं करोति मे । तत्राहं किं न तैर्दृष्टा दृष्टास्मीह सुतेन किम् ॥ १३९ ॥ देव्युवाच ॥

121 b: ०र्बहिस्त्रिपथ० d: ०तुंबुरु – 122 a: ०रोन्मत्त० – 124 (Rucirā) – 125 Ohne श्री० – 126 c: अदृश्ये; Hs. अदृश d: मंडलं – 128 a: निर्मलज्ञान० d: सत्यकामा – 129 b: स्वबांधवाः – 130 b: संददर्शांग० – 132 a/b: देव्यौ च जगतां श्रेष्ठाविह – 136 d: सुदुष्करम् – 137 c: ०मापतुर्दृष्ट्वा

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अभ्यासेन विना वत्से तदा द्वैतस्य निश्चयः । नूनमस्तं गतो नाभून्निःशेषो वरवर्णिनि
॥ १४० ॥ लीलास्मीति विनाभ्यासं तव नास्तं गतोऽभवत् । यदा भावस्तदा सत्यसं
कल्पत्वमभून्न ते ॥ १४१ ॥ अद्यासि सत्यसंकल्पा संपन्ना तेन मां सुतः । संपश्य
त्वित्यभिमतं फलितं तव सुन्दरि ॥ १४२ ॥ इदानीं तस्य भर्तुस्त्वं समीपं यदि गच्छ
सि । तत्तेन व्यवहारस्ते पूर्ववत्संप्रवर्तते ॥ १४३ ॥ लीलोवाच ॥ अहो बत जगन्मात
र्मया स्मृतमिहाधुना । ममेदं राजसं जन्म न तमो न च सात्त्विकम् ॥ १४४ ॥ ब्रह्म
णस्त्ववतीर्णाया अष्टौ जन्मशतानि मे । नानायोनीन्यतीतानि पश्याम्येवाधुना पुनः
॥ १४५ ॥ संसारमण्डले देवि कस्मिंश्चिदभवं पुरा । लोकान्तराब्जभ्रमरी विद्याधरव
राङ्गना ॥ १४६ ॥ दुर्वासनाकलुषिता ततोऽहं मानुषी स्थिता । संसारमण्डलेऽन्यस्मिन्
खंगनेखरकामिनी ॥ १४७ ॥ करञ्जकुञ्जजम्बीरकदम्बवनवासिनी । पत्राम्बरधरी
श्यामा शबर्यहमथाभवम् ॥ १४८ ॥ विहंगवैरिविन्यस्ता वागुरा विपिनावनौ । क्ले
शेन महता छिन्ना अद्येमा वासना इव ॥ १४९ ॥ कर्णिकाक्रोडशय्यासु विश्रान्तम
लिना सह । पद्मकुड्मलकोशेषु भुक्तकिञ्जल्कया रहः ॥ १५० ॥ अस्त्रीत्वफलदातॄणां
कर्मणां परिपाकतः । राजाहमभवं श्रीमान्सुराष्ट्रेषु समाः शतम् ॥ १५१ ॥ शाद्वली
दलदोलायामान्दोलनदरिद्रताम् । मशकस्य मयालोक्य दीनं मशिकया स्थितम् ॥
१५२ ॥ योनिष्वनेकविधदुःखशतान्वितासु भ्रान्तं मया बहुविमर्दसमाकुलासु । संसा
रदीर्घसरितश्चलया लहर्या दुर्वारिवासहरिणीसरणक्रमेण ॥ १५३ ॥ श्रीवसिष्ठ उवाच
॥ एवमा कथयन्त्यौ ते ललने ललिताकृती । उत्पेततुर्नभो दूरं योगचंक्रमणक्रमैः ॥
१५४ ॥ विनिर्गत्य ततः सर्गादाद्यसर्गं द्वितीयकम् । अन्तःपुरं ददृशतुर्जगतीव विनि
र्गते । स्थितं पुष्पभरापूर्णं महाराजमहाशवम् ॥ १५५ ॥ ततः पुनर्विनिर्गत्य योगस्था
दिव्ययोगिनी । विवेश भर्तुः संसारं लीला ज्ञप्तिसमन्विता ॥ १५६ ॥ एतस्मिन्नन्तरे
तस्मिन्मण्डले मण्डितावनौ । चक्रेऽवस्कन्दनं कश्चित्सामन्तोद्रिक्तभूमिपः ॥ १५७ ॥
कस्मिंश्चिद्वितताराण्ये द्वितीयाकाशभूषणम् । सेनाद्वितयमक्षुब्धं सौम्याब्धिद्वितयोप
मम् ॥ १५८ ॥ महारम्भघनं मन्त्रिस्थितराजद्वयान्वितम् । युद्धसज्जं सुसंनद्धमिद्धमग्नि
मिवाद्भुतम् । लीला च ज्ञप्तिदेवी च सा ददर्श नभःस्थिता ॥ १५९ ॥ अथ प्रवृत्तः प्र
सभं प्रलयार्णवरंहसा । सेनयोः शस्त्रसंपातः किरन्ननलविद्युतः ॥ १६० ॥ एतत्समद
मातङ्गकम्पितोर्वीस्खलज्जलः । यन्त्रपाषाणचक्रौघदूरविद्रुतखेचरः ॥ १६१ ॥ दूरोड्डी

140 b: तदा ते द्वैतनिश्चयः d: ०न्निशेषं – 141 c: यद्वा – 144 a: अहो हंत – 145 d: Hs. पश्यामेवा०; पश्यामीवाधुना – 147 d: पन्नगेश्वरकामिनी, lies खगमेश्वरकामिनी – 148 c: पत्रांबरवती – 149 a: विहंग्या वैरिविन्यस्त० d: अधमा – 151 a: ततोऽस्त्रीफल० – 152 c/d: मशकस्य मया सद्यः स्थितं मशकया सह – 153 (Vasantatilakā) d: दुर्वारवाततरणीसरण० – 154 Ohne श्री० c: Hs. उत्पेततोर्नभो – 155 a/b: सर्गादाप्य सर्गं c/d: अन्तःपुरे ददृशतुर्झटितीव विनिर्गते e: ०भराकीर्णं f: महाराजं – 156 c: भर्तृसंसारं – 158 b: ०भीषणे – 159 a/b: मध्यस्थित० c: समुन्नद्ध० f: संददर्श – 161 a: पतत्समद० b: ०चलज्जलः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

नकचत्खङ्गखण्डतारकिताम्बरः । वज्रमुष्टिविनिष्पेषपिष्टसङ्कटकण्टकः ॥ १६२ ॥
नाराचवर्षवरवारिदवारिपूरमत्ताभ्रसंभ्रमविवृत्तकबन्धबर्ही । कल्पान्तकाल इव वेग
विवर्तमानमातङ्गशैलवलितो रणसंभ्रमोऽभूत् ॥ १६३ ॥ एवमत्याकुले युद्धे सास्फोट
भटसंकटे । अष्टभागदशाशेषप्रतापमधुराकृतिः । शस्त्रपातहतो वीर इवाहस्तनुतां य
यौ ॥ १६४ ॥ अथ सेनाधिनाथाभ्यां विचार्य सह मन्त्रिभिः । दूताः परस्परं दत्ता
युद्धं संह्रियतामिति ॥ १६५ ॥ ततो दुन्दुभयः शेमुः प्रतिध्वनितदिङ्मुखाः । विनिर्ग
न्तुं प्रववृते रणारण्याद्बलद्वयम् । अथ वीर इवारक्तः कालेनास्तमितो रविः ॥ १६६ ॥
ततो ध्वान्तौघनासीरे निशीथे समुपस्थिते । लीलापतिरुदारात्मा किंचित्खिन्नमना
इव ॥ १६७ ॥ प्रातःकार्यं विचार्याशु मन्त्रिभिर्मन्त्रकोविदैः । निद्रां मुहूर्तमारेभे गृहे
शशिकरामले ॥ १६८ ॥ ततस्ते दिव्ययोगिन्यौ राज्ञो विविशतुर्गृहम् । कोमलामल
सौगन्धं मृदुमन्दारमारुतम् ॥ १६९ ॥ तत्प्रभावेण निद्राणनृपेतरनराङ्गनम् । तयोर्दे
हप्रभापूरैः शशिनिस्यन्दशीतलैः ॥ १७० ॥ आह्लादितोऽसौ बुबुधे राजोक्षित इवा
मृतैः । आसनद्वयविश्रान्तं स ददर्शाङ्गनाद्वयम् ॥ १७१ ॥ स भूपालोऽथ संचिन्त्य सु
विस्मितमनाः क्षणात् । उत्तस्थौ शयनाच्छेषादिव चक्रगदाधरः । पुष्पाहार इवोत्फु
ल्लो जग्राह कुसुमाञ्जलिम् ॥ १७२ ॥ भूमौ विवसने शुद्धे बद्धपद्मासनो नृपः । जयेतां
जनदौःस्थित्यदाहदोषशशिप्रभे ॥ १७३ ॥ देव्यौ बाह्यान्तरतमोविद्रावणरविप्रभे ।
तयोरुक्त्वेति तत्याज पादयोः कुसुमञ्जलिम् ॥ १७४ ॥ लीलायै भूपजन्माथ वक्तुं
मन्त्रिणमीश्वरी । बोधयामास पार्श्वस्थं संकल्पेन सरस्वती ॥ १७५ ॥ योगिन्यौ स
ततो दृष्ट्वा प्रणम्य कुसुमाञ्जलिम् । तयोः पादेषु संत्यज्य विवेश पुरतस्ततः ॥ १७६ ॥
उवाच देवी तं राजा कथं कस्य सुतः कदा । इह जात इति श्रुत्वा स मन्त्री वाक्यम
ब्रवीत् ॥ १७७ ॥ देव्यौ युष्मत्प्रसादोऽयं भवत्योरपि यत्पुरः । वक्तुं शक्नोमि तदिदं
श्रूयतां जन्म मत्प्रभोः ॥ १७८ ॥ आसीदिक्ष्वाकुवंशोत्थो राजा राजीवलोचनः ।
श्रीमान्कुन्दरथो नाम दोश्छायाच्छादितावनिः ॥ १७९ ॥ तस्यासीदिन्दुवदनः पुत्रो
भद्ररथाभिधः । तस्य विश्वरथः पुत्रस्तस्य पुत्रो बृहद्रथः ॥ १८० ॥ तस्य सिन्धुरथः
पुत्रस्तस्य शैलरथः सुतः । तस्य कामरथः पुत्रस्तस्य पुत्रो महारथः ॥ १८१ ॥ तस्य वि
ष्णुरथः पुत्रस्तस्य पुत्रो मनोरथः । अयमस्मत्प्रभुस्तस्य पुत्रः पूर्णामलाकृतिः ॥ १८२ ॥
महद्भिः पुण्यसंभारैर्विदूरथ इति स्मृतः । जातो मनुः सुमित्राया गौर्या गुह इवापरः
॥ १८३ ॥ पितास्य दशवर्षस्य दत्त्वा राज्यं वनं गतः । पालयामास भूपीठं ततः प्रभृ

162 d: ०कंटः – 163 (Vasantatilakā) a: ०वीरपूर० b: ०विनृत्त० – 164 d: Lies ०कृति e: शस्त्रघात० f: इवार्कस्त० – 169 c: ०सौगंध्य० – 170 a/b: निद्राणं नृपतेरंतरांगनम् d: ०निष्पंद० – 172 e: पुष्पहार इवोत्फुल्लं – 173 c: जयतां – 176 a: स तु ते d: पुरतो नतः – 177 a: देवी हे राजन् – 179 a: ०वंशस्थो – 180 a: तस्याभूदिंदुबिंबाभः d: मनोरथः – Textfolge: 182ab/181ab, 181cd/182cd – 182 b: बृहद्रथः – 183 b: श्रुतः c: मातुः d: इव गुहोऽपरः – 184 b: वनं ययौ

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ति धर्मतः ॥ १८४ ॥ इत्युक्त्वा संस्थिते तूष्णीं मन्त्रिण्यथ नृपे तथा । कृताञ्जलौ नत
मुखे बद्धपद्मासने स्थिते ॥ १८५ ॥ राजन्स्मर विवेकेन पूर्वजातिमिति स्वयम् । वद
न्ती मूर्ध्नि पस्पर्श तं करेण सरस्वती ॥ १८६ ॥ अथ हार्दं तमो मायापङ्कस्य क्षयमाय
यौ । सस्मार पूर्ववृत्तान्तमन्तः स्फुरदिव स्थितम् । अन्यदेहैकराजत्वं लीलाविलसिता
न्वितम् ॥ १८७ ॥ उवाचात्मनि संसारी बत मायेयमातता । परिज्ञाता प्रसादेन दे
व्योरिह मयाधुना ॥ १८८ ॥ हे देव्यौ किमिदं नाम दिनमेकं मृतस्य मे । गतमद्येह
यातानि मम वर्षाणि सप्ततिः । स्मराम्यनेककार्याणि मित्रबन्धुपरिच्छदान् ॥ १८९
॥ ज्ञप्तिरुवाच ॥ राजन्मृतिमहामोहमूर्च्छायाः समनन्तरम् । तस्मिँल्लोके तवातीते त
स्मिन्नेव मुहूर्तके । तस्मिन्नेव गृहे जातः स्फारोऽयं सर्गविभ्रमः ॥ १९० ॥ तदैव चेत
सि तव निर्मलाकाशनिर्मले । प्रतिभानमिदं जातं व्यवहारभ्रमात्मकम् । वयसः सम
तीतानि मम वर्षाणि सप्ततिः ॥ १९१ ॥ यथा स्वप्नमुहूर्ते ते संवत्सरशतभ्रमः । तव मा
याविलासोत्थस्तथायं जाग्रति भ्रमः ॥ १९२ ॥ वस्तुतस्तु न जातोऽसि न मृतोऽसि
कदाचन । शुद्धविज्ञानरूपस्त्वं शान्त आत्मनि तिष्ठसि ॥ १९३ ॥ पश्यसीवैतदखिलं
न च पश्यसि किंचन । सर्वात्मकतया नित्यं प्रकटश्चात्मनात्मनि ॥ १९४ ॥ यस्त्व
शुद्धमतिर्मूढो रूढो न वितते पदे । वज्रसारमिदं तस्य जगदस्त्यसदेव तत् ॥ १९५ ॥
यथा बाल्यस्य वेतालो मृतिपर्यन्तदुःखदः । असदेव सदाकारं तथा मूढमतेर्जगत् ॥
१९६ ॥ अव्युत्पन्नस्य कनके कानके कटके यथा । कटकज्ञप्तिरेवास्ति न मनागपि
हेमधीः ॥ १९७ ॥ तथाज्ञस्य पुरागारनगनागेन्द्रभासुरा । इयं दृश्यदृगेवास्ति न चा
न्या परमार्थदृक् ॥ १९८ ॥ दीर्घस्वप्नमिदं विश्वं विद्ध्यहंतादिसंयुतम् । अत्रान्ये स्वप्न
पुरुषा यथामी जाग्रतस्तथा ॥ १९९ ॥ अस्ति सर्वगतं शान्तं परमार्थघनं शुचि । अचे
त्यचिन्मात्रवपुः परमाकाशमाततम् ॥ २०० ॥ तत्सर्वगं सर्वशक्ति सर्वं सर्वात्मकं स्व
यम् । यत्र यत्र यथोदेति तथास्ति तत्र तत्र वै ॥ २०१ ॥ तदेवमेष राजंस्त्वं लीलार्थमु
पवर्णितः । स्वस्ति तेऽस्तु गमिष्यामि दृष्टा दृष्टान्तसिद्धयः ॥ २०२ ॥ विदूरथ उवाच
॥ ममापि दर्शनं देवि मोघं भवति नार्थिषु । महाफलप्रदायास्तु कथं तव भविष्यति
॥ २०३ ॥ अहं देहमिमं त्यक्त्वा कं देहमपरं शुभे । कदा यास्यामि वरदे तन्मे कथय
तत्त्वतः ॥ २०४ ॥ देव्युवाच ॥ अस्मिन्रणवरे राजन्मर्तव्यं भवताधुना । प्राप्तव्यं प्रा
क्तनं राज्यमेतत्प्रत्यक्षमेव ते ॥ २०५ ॥ श्रीवसिष्ठ उवाच ॥ प्रस्तुतेति कथा यावन्मि
थो मधुरभाषिणोः । तावत्प्रविश्य संभ्रान्त उवाचोर्ध्वस्थितो नरः ॥ २०६ ॥ देव पट्टि

187 a/b: माया राज्ञोऽस्य – 189 c: जातानि e: ०कर्माणि – 190 a: Hs. राजन्स्मृति० f: सर्गः स्फारौघ विभ्रमः – 191 d: ०भ्रमाततम् – 192 a: तु (für ते) c/d: ०विलासेन तथायं – 194 a: पश्यस्यथैतद० d: प्रकचस्यात्मना० – 195 d: सत् – 196 a: बालस्य – 196A: ताप एव यथा वारि मृगाणां भ्रमतो भवेत् । असत्यमेव सत्याभं तथा मूढमतेर्जगत् ॥ – 197 b: Hs. कनके कलशे – 198 b: ०नाग्रेंद्र० – 199 b: चित्ता हंतादि० d: जाग्रतः स्तिथाः – 201 a: Hs. ०शक्तिः d: तथास्ते – 202 c: गमिष्यावो d: दृष्टांतसंविदः – 204 b: तं देहं पद्मनामकम् – 206 Ohne श्री० c: संभ्रांतम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

शचक्रासिगदापरिघवृष्टिमत् । महत्परबलं प्राप्तमेकार्णव इवोद्धतम् ॥ २०७ ॥ नगरे
नगसंकाशे लग्नोऽग्निर्व्याप्तदिक्तटः । दहंश्चटचटास्फोटैः पातयन्नुत्तमान्गृहान् ॥
२०८ ॥ कल्पाम्बुदघटातुल्या व्योम्नि धूममहाद्रयः । बलात्प्रोड्डयनं कर्तुं प्रवृत्ता गरु
डा इव ॥ २०९ ॥ ससंभ्रमं वदत्येवं पुरुषे परुषारवे । उद्भूतः पूरयन्नाशा बहिः कोला
हलो महान् ॥ २१० ॥ बलादाकर्णकृष्टानां धनुषां शरवर्षिणाम् । बृंहतामपि मत्तानां
कुञ्जराणां तरस्विनाम् ॥ २११ ॥ पुरे चटचटास्फोटैर्वल्गतां जातवेदसाम् । पौराणां
दग्धदाराणां महाहलहलारवैः ॥ २१२ ॥ अथ वातायनाद्देव्यौ मन्त्री राजा विदूरथः ।
ददृशुः प्रोल्लसन्नादं महानिशि महापुरम् ॥ २१३ ॥ प्रलयानिलसंरुद्धसप्तैकार्णवरंह
सा । पूर्णं परबलेनोग्रकल्पमेघतरंगिणा ॥ २१४ ॥ कल्पान्तमेघविगलन्मेरुभूधरभा
सुरम् । दह्यमानं महाज्वालाजालैरम्बरपूरकैः ॥ २१५ ॥ मुष्टिग्राह्यमहामेघगर्जासंतर्ज
नोर्जितैः । घोरं कलकलारावैर्मांसलैर्दस्युजल्पितैः ॥ २१६ ॥ तरदुल्मुकखण्डोग्रतारा
तरलिताम्बरम् । अङ्गारराशिनिपतन्नरनार्युग्ररोदनम् ॥ २१७ ॥ एतस्मिन्नन्तरे राज
महिषी मत्तयौवना । अनुयाता वयस्याभिर्विवेश भयविह्वला ॥ २१८ ॥ अथ तस्या
वयस्यैका राजानं तं व्यजिज्ञपत् । देव देवी समायाता पलाय्यान्तःपुरान्तरात् ॥
२१९ ॥ राजन्दारा हृतास्तेऽतिबलवद्भिरुदायुधैः । अन्तःपुराधिपाः सर्वे पिष्टाः शत्रु
भिरुद्धतैः । दूरेणाशङ्कमायातैः परैर्नः पुरमाहृतम् ॥ २२० ॥ इत्याकर्ण्य विलोक्यासौ
देव्यौ युद्धाय याम्यतः । क्षम्यतां मम भार्येयं युष्मत्पादाब्जषट्पदी ॥ २२१ ॥ इत्यु
क्त्वा निर्ययौ राजा कोपाकुलितलोचनः । मत्तेभनिर्भिन्नवनकन्दरादिव केसरी ॥
२२२ ॥ लीला लीलां ददर्शाथ स्वाकारसदृशाकृतिम् । प्रतिबिम्बमिवायातामादर्शे
चारुदर्शनम् ॥ २२३ ॥ प्रबुद्धलीलोवाच ॥ किमिदं देवि हे ब्रूहि कस्मादियमहं स्थि
ता । या साभवमहं पूर्वं कथं सेयमहं स्थिता ॥ २२४ ॥ ज्ञप्तिरुवाच ॥ यादृग्भावो
मृतो भर्ता तव स्वस्मिंस्तदा पुरे । तादृग्भावस्तमेवार्थं तत्रैवायं हि दृष्टवान् ॥ २२५ ॥
अविसंवादि सर्वार्थरूपं यत्तस्य चिन्तितम् । तदेव त्वादृशीं चित्तदर्पणे प्रतिबिम्बते
॥ २२६ ॥ स्वप्नो जाग्रत्यसद्रूपो मृतौ जन्माप्यसद्वपुः । मृतिर्जन्मन्यसद्रूपा मृत्यां
जन्माप्यसन्मयम् । एवं न सन्नासदिदं भ्रान्तिमात्रं विजृम्भते ॥ २२७ ॥ अनुभूतय
एतास्तु काश्चित्पूर्वानुभावतः । अपूर्वानुभवाः काश्चित्समाश्चैवासमास्तथा ॥ २२८ ॥
त्वच्छीला त्वत्समाचारा त्वत्कुला त्वद्वपुः सती । इति लीलेयमाभाति प्रतिभा प्रति
बिम्बजा ॥ २२९ ॥ विदूरथश्च भर्तेह तनुं त्यक्त्वा तवाङ्गने । तदेवान्तःपुरं प्राप्य तादृ

207 c: महत्त्वरिबलं d: इवोद्धतः – 208 d: पातयत्युत्तमा० – 209 c: प्रोड्डीयनं – 210 b: परुषारवः c: उदभूत् – 211 c: बृंहतामति० – 212 b: ज्वलतां – 214 a: ०संक्षुब्ध० – 215 a: कल्पांतवह्नि० b: मेरुमन्दर० – 216 b: ०गर्ज० – 217 b: Hs. ०तरिलिता० – 220 a: राजद्वाराहृतास्त्वेते – 221 b: यास्यतः c: रक्षतां – 223 d: ०दर्शनाम् – 224 a: मे c: साहमभवं – 225 b: तस्मिं० d: तथैवायं – 226 b: बिबिंतम् c: तादृशं d: ०बिंबति – 227 a/b: ०सद्रूपः स्वप्ने जाग्रदसद्वपुः – 228 b: पूर्वानुभूतितः – 230 a: विदूरथस्तु भर्तैष

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

गात्मा भविष्यति ॥ २३० ॥ श्रीवसिष्ठ उवाच ॥ इत्याकर्ण्य वचो देव्या लीला सा तत्पुरास्पदा । पुरः प्रह्वा स्थितोवाच वचनं विहिताञ्जलिः ॥ २३१ ॥ देवी भगवती ज्ञप्तिर्नित्यमेवार्चिता मया । सा यादृश्येव देवेशि तादृश्येव त्वमम्बिके ॥ २३२ ॥ तन्मे कृपणकारुण्याद्वरं देहि वरानने । रणे देहं परित्यज्य यत्र तिष्ठति मे पतिः ॥ २३३ ॥ अनेनैव शरीरेण तत्र स्यामेतदङ्गना । एतदस्त्विति देव्योक्ते पूर्वलीलाब्रवीदथ ॥ २३४ ॥ पूर्वेणैव शरीरेण किमर्थं नाहमीश्वरि । लोकान्तरमिदं नीता तं गिरिग्रामकं तदा ॥ २३५ ॥ देव्यवाच ॥ न किंचित्कस्यचिदहं करोमि वरवर्णिनि । सर्वं संपादयत्याशु संकल्पः प्राणिनां स्वकः ॥ २३६ ॥ मां समाराधयन्त्यास्तु संकल्पोऽभूत्तवेदृशः । मुक्ता स्यामिति तेन त्वं तैः प्रकारैर्विबोधिता ॥ २३७ ॥ अनया त्विममेवार्थं याचिता दत्तवत्यहम् । एवं फलति संकल्पो नृणामस्मत्प्रभावतः ॥ २३८ ॥ श्रीवसिष्ठ उवाच ॥ विदूरथस्तु सदनान्निर्गतः परिवारितः । परिवारेण महता महारत्नैर्विभूषितः ॥ २३९ ॥ आलोकयन्वीरगणानारुरोह रथोत्तमम् । कूटागारसमाकारं मुक्तामाणिक्यमण्डितम् ॥ २४० ॥ अथोदपतदुद्दामनानाभ्ररवनिर्भरः । शैलभित्तिप्रतिध्वानदारुणो दुन्दुभिर्ध्वनिः ॥ २४१ ॥ किङ्किणीजालनिःस्वानैर्हेतिसंघट्टटांकृतैः । धनुश्चटचटाशब्दैः शरझंकारगीतिभिः ॥ २४२ ॥ परस्परभटाह्वानैर्बन्दीविजयरोचनैः । शिलाघनकृताशेषब्रह्माण्डकुहरो ध्वनिः । हस्तग्राह्योऽभवद्भीमो दशाशाकुञ्जपूरकः ॥ २४३ ॥ अथोत्थितेन रजसा पीनेनाम्बररोधिना । मूर्खत्वं यौवनेनेव घनतामाययौ तमः ॥ २४४ ॥ विवेशारिबलं राजा क्षीराब्धिमिव मन्दरः ॥ २४५ ॥ जज्वलुः शस्त्रसंघट्टा ज्वलनादुल्मुका इव । जगर्जुः शरधारौघान्वर्षन्तो वीरवारिदाः ॥ २४६ ॥ निपेतुः कङ्कवत्क्रूरा वीराङ्गेषु च हेतयः । पेतुः पटपटारावं हेतिनिष्पिष्टयोऽम्बरे ॥ २४७ ॥ उत्तस्थुर्यमयात्रायां कबन्धनरपङ्क्तयः । प्रशेमुः पांसवो रक्तैस्तमांस्यायुधवह्निभिः ॥ २४८ ॥ युद्धैकध्यानतः शब्दा भयानि मृतिनिश्चये । अभवत्केवलं युद्धमपशब्दमसंभ्रमम् ॥ २४९ ॥ समसमरवसंवहच्छरौघं टकिटकितारवसंपतन्मुखण्डि । झणझणरवसंमिलन्महास्त्रं तिमिनिधिवद्रणमास दुस्तरं तत् ॥ २५० ॥ एतस्मिन्वर्तमाने तु घोरे समरसंभ्रमे । लीलाद्वयमुवाचेदं देवीं भगवतीं पुनः ॥ २५१ ॥ देवि कस्मादकस्मान्नो भर्ता जयति नो रणे । वद त्वय्यपि तुष्टायामस्मिन्विद्रुतवारणे ॥ २५२ ॥ देव्युवाच ॥ चिरमाराधिता तेन विदूरथनृपारिणा । अहं पुत्रि जयार्थेन न विदूरथभूभृता ॥ २५३ ॥ तेनासावेव विजयी जीयते च विदूरथः । अनेन मुक्त एव स्यामहमित्यस्मि भाविता ॥

231 Ohne श्री० – 234 a: Hs. अनेनेवा – 235 d: वद (für तदा) – 236 d: स्वतः – 237 d: प्रकारैः प्रबोधिता – 238 d: प्रसादतः – 239 Ohne श्री० d: ०रत्नविभूषितः – 241 c/d: ०ध्वानैर्दारुणो दुंदुभिध्वनिः – 242 a: ०निध्वानै० b: ०टंकृतैः d: शरसीत्कार० – 243 a: परस्परं b: बंदीविक्षुब्धरोदनैः d: ०कुहर० – 244 c: यौवनेनैव – 246 a/b: ०संघट्टज्वलना उल्मुका – 249 a: शब्द० b: ०निश्चयैः – 250 (Puṣpitāgrā) b: ०संपतद्भुशुंडि c: कणकणरव० – 251 वसिष्ठ उवाच ॥ d: प्रति (für पुनः) – 253 c: पुत्र्यौ – 254 b: न (für च) c/d: Hs. मुक्तयस्यागमहमि०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

२५४ ॥ प्रतिभारूपिणी तेन बाले मुक्तिर्भविष्यति । एतदीयस्त्वयं भर्तुर्जयी राज्यं क
रिष्यति ॥ २५५ ॥ श्रीवसिष्ठ उवाच ॥ एवं देव्यां वदन्त्यां तु बलयोर्युध्यमानयोः ।
रविर्द्रष्टुमिवाश्चर्यमाजगामोदयाचलात् ॥ २५६ ॥ भुवनं कज्जलाम्भोधेरिवोद्धृत्तमरा
जत । पेतुः कनकनिस्यन्दसुन्दरा रविरश्मयः ॥ २५७ ॥ एतस्मिन्नन्तरे सेनाः सर्वाः
संक्षयमाययुः । आसीद्रणाङ्गणं शून्यमिवाल्पोभयसैनिकम् ॥ २५८ ॥ प्राप्य राजा
पुरः शत्रुं सिन्धुमुद्धरकंधरम् । धनुरास्फालयामास परिरावितदिङ्मुखम् ॥ २५९ ॥
कल्पान्तपवनास्फोट इवामरगिरेस्तटम् । विससर्जोर्जितो राजा प्रातरर्कः करानिव
॥ २६० ॥ तीक्ष्णाः परमदुःस्पर्शाः शलीमुखपरंपराः । सिन्धावपि तथैवासीच्छक्ति
लाघवमेव च ॥ २६१ ॥ एवं सिन्धुर्महाबाहुश्चिरं समरमूर्धनि । क्रीडित्वा पीडयामास
शरवर्षैर्विदूरथम् ॥ २६२ ॥ छिन्नध्वजं छिन्नरथं भिन्नाश्वं भिन्नसारथिम् । छिन्नकार्मुक
वर्माणं छिन्नसर्वाङ्गमाकुलम् ॥ २६३ ॥ हृदि स्फारशिलापट्टदृढपीवरमूर्धनि । भित्त्वा
वज्रसमैर्बाणैः पातयामास भूतले ॥ २६४ ॥ हतो राजा हतो राजा प्रतिराजेन संयुगे ।
इति शब्दे समुद्भूते राष्ट्रमासीत्समाकुलम् ॥ २६५ ॥ भाण्डोपस्करभाराढ्यं विद्रवच्छ
कटव्रजम् । आक्रन्दार्तकलत्रौघं विद्रवन्नागरोत्करम् ॥ २६६ ॥ एतस्मिन्नन्तरे लीला
समुवाच सरस्वतीम् । श्वासावशेषमालोक्य मूढं भर्तारमग्रतः ॥ २६७ ॥ प्रवृत्तो देहमु
त्स्रष्टुं मद्भर्तायमिहाम्बिके । भर्तारमनुयास्यामि दयां कुरु महेश्वरि ॥ २६८ ॥ इत्यु
क्त्वा ज्ञप्त्यनुध्यानात्सा सामर्थ्यवती क्षणात् । पुप्लुवे पेशलाकारा पक्षिणीव नभस्तलम्
॥ २६९ ॥ मेघमार्गमथोल्लङ्घ्य वातस्कन्धानथो पुनः । सूर्यमार्गाद्विनिर्गत्य तारामा
र्गमतीत्य च ॥ २७० ॥ ब्रह्मादिस्थानमाक्रम्य प्राप ब्रह्माण्डखर्परम् । ब्रह्माण्डखर्परं
भित्त्वा जलाद्यावरणांस्ततः । समुल्लङ्घ्य पुरः प्राप महाचिद्गगनान्तरम् ॥ २७१ ॥
अदृष्टपारपर्यन्तमतिवेगेन धावता । सर्वतो गरुडेनापि कल्पकोटिशतैरपि ॥ २७२
॥ तत्र ब्रह्माण्डलक्षाणि सन्त्यसंख्यानि भूरिशः । तान्यन्योन्यमदृष्टानि फलानीव
महावने ॥ २७३ ॥ तत्रैकस्मिन्पुरःसंस्थे विततावरणान्विते । वेधयित्वा विवेशान्तः
प्रापतत्पद्मपत्तनम् ॥ २७४ ॥ तत्र तन्मण्डपं प्राप्य देवीशक्त्युपबृंहिता । प्रविश्य पु
ष्पगुप्तस्य शवस्य निकटे स्थिता ॥ २७५ ॥ तं दृष्ट्वा चिन्तयामास चेतसा स्फुरितात्म
ना । एष मे भविता भर्ता नूनं वीरवराग्रणीः । अहं देव्याः प्रसादेन ततः प्रथममा
गता ॥ २७६ ॥ इति संचिन्त्य सा हस्ते गृहीत्वा चारु चामरम् । वीजयामास राजे
न्द्रं लीला ललितलोचना ॥ २७७ ॥ एतस्मिन्नन्तरे राज्ञः पतितस्य महीतले । जीवं

255 c/d: शत्रुर्जयी – 256 Ohne श्री० a: वदत्यां – 257 b: Hs. ०वृत० c: ०निष्पंद० – 259 d: परिवादित० – 261 b: शिलीमुख० c/d: सिंधोरपि तथैवासीन्मुक्ति० – 266 a: ०भारौघ० d: Hs. ०न्नागरोत्तरम् – 267 b: तामुवाच – 269 c: पेलवाकारा d: नभस्तले – 270 a: मेघमार्गानथो० – 271 b: प्राप्य ब्रह्मांड खर्परे e: Lies पुनः (vgl. 270b) – 274 d: प्रापयत् – 275 a: Hs. तन्मंडलं – 277 d: ललितयौवना – 278 वसिष्ठ उवाच ॥ d: ०दृष्ट्या

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

दृढशतुर्देव्यौ दिव्यदृष्टी नभोगतम् ॥ २७८ ॥ अथ जीवकला लीला ज्ञप्तिश्च त्रितयं
ततः । पुप्लुवे जीवलेखा तु योगिन्यौ ते न पश्यति ॥ २७९ ॥ तामेवानुसरन्त्यौ ते
सर्गात्सर्गान्तरं गते । पद्मराजपुरं प्राप्य लीलान्तःपुरमण्डपम् । क्षणाद्विविशतुः स्वैरं
जीवलेखाप्यथाग्रगा ॥ २८० ॥ ततो दृढशतुस्तत्र शवशय्यैकपार्श्वगाम् । लीलां विदू
रथस्याग्रे प्रस्थितां प्रथमागताम् ॥ २८१ ॥ एतस्मिन्नन्तरे ज्ञप्तिर्जीवं वैदूरथं पुनः । सं
कल्पेन रुरोधाशु मनसः स्पन्दनं यथा ॥ २८२ ॥ अथो भगवतीमाह लीला ललित
लोचना । देवि स प्राक्तनो देहः कथं मम न दृश्यते ॥ २८३ ॥ ज्ञप्तिरुवाच ॥ शृणु
देहस्य किं वृत्तं तव लीले महाशये । समाधौ त्वयि लीनायां तदा तव कलेवरम् ॥
२८४ ॥ निर्जीवं पतितं भूमौ संशुष्कमिव पल्लवम् । काष्ठकुड्योपमो जातः शवस्तु
हिनशीतलः ॥ २८५ ॥ ततो मन्त्रिभिरागत्य मृतेयमिति निश्चयैः । चितौ संक्षिप्य
सघृतं दग्धं चन्दनदारुभिः ॥ २८६ ॥ इदानीं त्वामिहालोक्य सशरीरामुपागताम् ।
परलोकादागतेति महच्चित्रं भविष्यति ॥ २८७ ॥ आतिवाहिकदेहेन प्रतिभामात्ररू
पिणा । दृश्यसे सांप्रतं त्वं तु योगर्द्धिबलबृंहिता ॥ २८८ ॥ विस्मृतस्तव देहोऽसौ वा
सनायाः परिक्षयात् । रूढातिवाहिकदृशा प्रशाम्यत्याधिभूतिकः ॥ २८९ ॥ तदेहि
यावल्लीलायै लीले संकल्पलीलया । आत्मानं दर्शयावोऽस्यै व्यवहारः प्रवर्तताम् ॥
२९० ॥ आवां तावदिमे लीला पश्यत्वित्येव चिन्तिते । ज्ञप्तिदेव्या ततस्तत्र लीला
चलविलोचना ॥ २९१ ॥ गृहमालोकयामास तत्तेजःपुञ्जभास्वरम् । गृहमालोक्य पु
रतो लीलां ज्ञप्तिं विलोक्य च ॥ २९२ ॥ उत्थाय संभ्रमवती तयोः पादेषु सापतत् ।
उपाविशन्विष्टरेषु ज्ञप्तिलीले च ते ततः ॥ २९३ ॥ ज्ञप्तिरुवाच ॥ देहं सगजगामिन्यौ
लीले ललितलोचने । उत्थापयामो नृपतिं शवतल्पतलादिमम् ॥ २९४ ॥ इत्युक्त्वा
मुमुचे जीवमामोदमिव पद्मिनी । स समीरलवाकारस्तन्नासानिकटं ययौ ॥ २९५ ॥
घ्राणाकाशं विवेशाशु वंशरन्ध्रमिवानिलः । अन्तःस्थजीवं वदनं तस्य तत्कान्तिमाय
यौ ॥ २९६ ॥ क्रमादङ्गानि सर्वाणि सरसानि चकाशिरे । स्फारयामास सोऽङ्गानि
रसवन्ति मृदूनि च ॥ २९७ ॥ उन्मीलयामास दृशौ विमलालोककारणे । उत्तस्थौ
प्रोल्लसत्कायो विन्ध्याद्रिरिव जङ्गमः ॥ २९८ ॥ उवाच कः स्थित इति घनगम्भीर
निस्वनम् । लीलाद्वयमथास्याग्रे प्रोवाचादिश्यतामिति ॥ २९९ ॥ का त्वं केयं कुत
श्चेयमित्याह स विलोकयन् । ततो लीलाह हे देव श्रूयतां यद्वदाम्यहम् ॥ ३०० ॥ म
हिला तव लीलाहं प्राक्तनी सहवर्धिता । इयं लीला महिला ते द्वितीया लीलया मया
॥ ३०१ ॥ उपार्जिता त्वदर्थेन प्रतिबिम्बमयी शुभा । शिरोभागोपविष्टेयं येह हैमम

279 b: ज्ञप्तिश्चेति त्रयं – 280 a: तमेवानु० f: Hs. जीवलीलाप्य० – 281 a: दृढशतुर्देव्यौ – 282 c: रुरोधाथ – 283 a: ततो – 286 b: मृतोऽयमिति d: Hs. दग्धश्चन्दन० – 289 d: ०त्याधिभौतिकः – 292 b: ०भासुरम् – 294 a: सहारिगामिन्यौ – 296 c: ०जीव० – 298 b: ०कारिणी – 300 c: तस्मै – 301 b: सहवर्तिनी c: Lies महीला (*m. c.*); इयं ते महिला लीला

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

हासने । एषा सरस्वती देवी त्रैलोक्यजननी शिवा ॥ ३०२ ॥ इत्याकर्ण्य समुत्थाय राजा ज्ञप्तिपदाब्जयोः । पपात प्रयतो भूत्वा सरस्वति नमोऽस्तु ते । इत्युक्तवन्तं हस्तेन स्पृष्ट्वोवाच सरस्वती ॥ ३०३ ॥ सर्वापदः सकलदुष्कृतदृष्टयश्च गच्छन्तु वः शिवमनन्तसुखानि सम्यक् । आयान्तु नित्यमुदिता जनता भवन्तु राष्ट्रे स्थिराश्च विलसन्तु सदा महान्तः ॥ ३०४ ॥ श्रीवसिष्ठ उवाच ॥ सरस्वती तथेत्युक्त्वा तत्रैवान्तर्धिमा ययौ । जयमङ्गलपुण्याहघोषघुंघुमघर्घरम् ॥ ३०५ ॥ हृष्टपुष्टजनाकीर्णं ततोऽभून्नृपमन्दिरम् । ततोऽभिषिषिचुर्विप्रा मन्त्रिणो भूभुजश्च तम् ॥ ३०६ ॥ लीला लीला च राजा च जीवन्मक्ता महाधियः । रेमिरे पूर्ववृत्तान्तकथनैः सुरतैरिव ॥ ३०७ ॥ स ज्ञप्तिज्ञानसंबुद्धो राजा लीलाद्वयान्वितः । चक्र वर्षायुतान्यष्टौ तत्र राज्यमनिन्दितम् ॥ ३०८ ॥ जीवन्मुक्तास्त इत्येवं राज्यं वर्षायुताष्टकम् । कृत्वा विदेहमुक्तत्वमासेदुः शुद्धसंविदः ॥ ३०९ ॥ इति श्रीवाल्मीकीये मोक्षोपाय उत्पत्तिप्रकरणे लीलोपाख्यानम् ॥ [५] ॥ वसिष्ठ उवाच ॥ एतत्ते कथितं राम दृश्यदोषनिवृत्तये । लीलोपाख्यानमनघं घनतां जगतस्त्यज ॥ १ ॥ असदाभासमच्छात्म ब्रह्मास्तीह प्रवर्धितम् । बृहच्चिद्भैरववपुरानन्दाभिधमव्ययम् ॥ २ ॥ तस्य यत्सममापूर्णं शुद्धं सत्त्वमचिह्नितम् । तद्विदामप्यनिर्देश्यं तच्छान्तं परमं पदम् ॥ ३ ॥ ब्रह्मणः स्फुरणं किंचिद्यदवाताम्बुधेरिव । दीपस्याथाप्यवातस्य तं जीवं विद्धि राघव ॥ ४ ॥ तदेव घनसंवित्त्या यात्यहंतामनुक्रमात् । वह्न्यणुस्त्विन्धनाधिक्यात्स्वां प्रकाशकतामिव ॥ ५ ॥ संकल्पोन्मुखतां यातस्त्वहंकारो भवत्युत । चित्तं चेतो मनो माया प्रकृतिश्चेति नामभिः ॥ ६ ॥ परस्मात्कारणादेवं मनः प्रथममुत्थितम् । मननात्मकमाभोगि तेनेदं तन्यते जगत् ॥ ७ ॥ अपारावारसंसारसंवित्सलिलवल्गनैः । चिदेकार्णव एवायं स्वयमात्मा विजृम्भते ॥ ८ ॥ दीर्घस्वप्नः स्थितिं यातः संसाराख्यो मनोवशात् । असम्यग्दर्शनात्स्थाणाविव पुंप्रत्ययो दृढः ॥ ९ ॥ द्वैतं यथा नास्ति चिदात्मतत्त्वयोस्तथैव भेदोऽस्ति न जीवचित्तयोः । यथैव भेदोऽस्ति न जीवचित्तयोस्तथैव भेदोऽस्ति न चित्तसर्गयोः ॥ १० ॥ श्रीवसिष्ठ उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् । राक्षस्योक्तं महाप्रश्नजालमावलिताखिलम् ॥ ११ ॥ अस्ति कज्जलपङ्काद्रेरिवोग्रा शालभञ्जिका । हिमाद्रेरुत्तरे पार्श्वे कर्कटी नाम राक्षसी ॥ १२ ॥ स्थिरविद्युल्लतानेत्रा खर्जूरतरुजानुका । वैडूर्यसूर्याग्रनखा स्नाय्वस्थिग्रन्थिदेहिनी ॥ १३ ॥ तस्या विपुलकायत्वाद्दुर्लभत्वान्निजान्धसः । अतृप्तोऽर्णवलेखाया इवाभूज्जाठरोऽनलः ॥ १४ ॥ न कदाचन सा तृप्तिमुपयाति महोदरी । वडवानलजिह्वेव चिन्तयामास चैकदा ॥ १५ ॥ जम्बूद्वीपगतान्स

302 f: **शुभा** – 304 (Vasantatilakā) – 305 Ohne **श्री०** d: **०घर्घरः** – 306 d: Lies **भूभुजश्च** bzw. **भूभुजं च** – 309 b: **राज्यं निहतकंटकम्** – Kolophon zu Sarga 5: **०प्रकरणे मंडपोपाख्याने लीलोपाख्यानं नाम षष्ठः सर्गः ॥ ६ ॥**; Hs.u. LN **मोक्षोपाये** – 6.2 b: **प्रबृंहितम्** – 3 b: **शुद्ध०** – 7 a: Lies **०देव** – 8 a: Lies **अपारवार०*** (vgl. Apte); **अपारावारविस्तार०** – 9 a: **दीर्घस्वप्न०** – 10 (Vaṃśasthabila [a: **भिदा** statt **द्वैतं**?]) a: **चिदात्मजीव०** – 11 Ohne **श्री०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

र्वाग्निगिरामि जनान्यदि । अनारतमनुच्छ्वासं जलराशीनिवार्णवः । मेघेन मृगतृष्णेव तन्मे क्षुदुपशाम्यति ॥ १६ ॥ तपः करोमि परममखिन्नेनैव चेतसा । इति संचिन्त्य सा सर्वजन्तुजातजिघत्सया ॥ १७ ॥ तपोऽर्थमथ सस्मार पर्वतं भूतदुर्गमम् । तत्र गत्वाथ सा स्नाता तपः कर्तुं कृतस्थितिः ॥ १८ ॥ अतिष्ठदेकपादेन चन्द्रार्कस्पन्द लोचना । क्रमेण दिवसाः पक्षा मासास्तस्यास्ततो ययुः ॥ १९ ॥ शीतातपेषु लीना याः कृताया इव शैलतः । अथ वर्षसहस्रेण तां पितामह आययौ ॥ २० ॥ दारुणं हि तपः सिद्ध्यै नीचानामपि जायते । मनसैव प्रणम्यैनं सा तथैव स्थिता सती ॥ २१ ॥ को वरः क्षुच्छमायालमिति चिन्तापराभवत् । आ स्मृतं प्रार्थयिष्येऽहं वरमेकमिमं विभुम् ॥ २२ ॥ अनायसी वायसीव स्यामहं जीवसूचिका । यथाभिमतमेतेन ग्रसेयं सकलं जनम् । क्रमेण क्षुद्विनाशाय क्षुद्विनाशः परं सुखम् ॥ २३ ॥ प्राणिनां सह सर्वेषां हृदयं प्रविशाम्यहम् । इति संचिन्तयन्तीं तामुवाच कमलासनः ॥ २४ ॥ पुत्रि कर्कटिके रक्षःकुलशैलाभ्रमालिके । उत्तिष्ठ तव तुष्टोऽस्मि गृहाणाभिमतं वरम् ॥ २५ ॥ कर्कट्युवाच ॥ भगवन्भूतभव्येश स्यामहं जीवसूचिका । अनायसी वायसीव विधे दास्यसि चेद्वरम् ॥ २६ ॥ श्रीवसिष्ठ उवाच ॥ एवमस्त्विति तामुक्त्वा पुनराह पिता महः । सूचिका सोपसर्गा त्वं भविष्यसि विषूचिका ॥ २७ ॥ दुर्भोजना दुरारम्भा मूर्खा दुःस्थितयश्च ये । दुर्देशवासिनो ये च तेषां हिंसां करिष्यसि ॥ २८ ॥ प्रविश्य हृदयं प्राणैः पद्मप्लीहादिबाधनात् । वातलेखात्मिका व्याधिर्भविष्यसि विषूचिका ॥ २९ ॥ सगुणं निर्गुणं चैव जनमासादयिष्यसि । गुणवतां चिकित्सार्थं मन्त्रोऽयं तु मयोच्यते ॥ ३० ॥ ॐ ह्लीं ह्लीं रां विष्णुशक्तये नमः । भगवति विष्णुशक्ति एनां हर हर हन हन पच पच मथ मथ उत्सादय उत्सादय दूरं कुरु कुरु स्वाहा । विषूचिकेऽत्रात्र हिमवन्तं गच्छ [।] जीव सः सः चन्द्रमण्डलगतोऽसि स्वाहा ॥ ३१ ॥ इति मन्त्रं महामन्त्रं न्यस्य वामकरोदरे । मार्जयेच्चातुराकारं तेन हस्तेन संयतः ॥ ३२ ॥ हिमशैलाभिमुख्येन विधृत्तां तां विचिन्तयेत् । कर्कटीं कर्कशां क्रुद्धां मन्त्रमुद्गरमर्दिताम् ॥ ३३ ॥ आतुरश्चिन्तयेच्चन्द्रं रसायनं हृदि स्थितम् । अजरामरणं मुक्तं सर्वाधिव्याधिविभ्रमैः ॥ ३४ ॥ साधको हि शुचिर्भूत्वा स्वाचान्तः सुसमाहितः । क्रमेणानेन सकलाः प्रोच्छिनत्ति विषूचिकाः ॥ ३५ ॥ इत्युक्त्वा भगवान्वेधास्तत्रैवान्तरधीयत । अथ प्रादेशमात्राभा ततोऽप्यङ्गुलिरूपिणी । ततो माषशमीतुल्या ततः सूची बभूव सा ॥ ३६

16 b: **जनानपि** d: **०राशिमिवार्णवः** – 17 d: **०जिघांसया** – 18 c: **स्नात्वा** d: **कर्तुं व्यवस्थिता** – 19 b: Hs. **०लोचनः** c/d: **पक्षास्तस्या मासास्ततो** – 20 a: **०तपेष्वलीनायाः** c: **अष्टवर्ष०** – 24 a: **प्राणिनामिह** d: **कमलालयः** – 27 Ohne **श्री०** – 28 c/d: **०वासिनो दुष्टास्तेषां** – 30 c: **सगुणानां** – 31 Hs. **भगवती विष्णुशक्तिः**; **ॐ ह्ला** [lies **ह्लीं**] **ह्लीं श्रीं रां**; **नमो भगवति विष्णुशक्ति एहि एनां हर हर दह दह हन हन पच पच मथ मथ**; **दूरे**; **विषूचिके त्वं हिमवन्तं गच्छ गच्छ जीव सारचन्द्रमंडलं गतोऽसि** – 32 a: **मंत्री** d: Hs. **संशयः** – 33 b: **विधृतां** – 34 ab: **आतुरं चिंतयेच्चंद्रे रसायनहृदि स्थितम्** – 36 d: **०ऽप्यङ्गुल०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ कस्यचिद्विवशाङ्गस्य क्षीणस्य विपुलस्य वा । प्रविश्यान्तर्वातसूची भवत्यति विषू
चिका ॥ ३७ ॥ कस्यचित्तनुदेहस्य सुस्थस्य विकलस्य च । प्रविश्य जीवसूचित्वे भवत्य
ति विषूचिका ॥ ३८ ॥ एवं बहूनि वर्षाणि प्राणिप्राणौघघातिनी । देहद्वयेन बभ्राम
व्योम्नि भूमितले तथा ॥ ३९ ॥ अथ कालेन बहुना कर्कटी वनराक्षसी । निर्वेदमन्त
रगमद्धिक्कष्टं किमिदं कृतम् ॥ ४० ॥ किमहं सूचितां याता सूच्यां किमिव मास्यति ।
सूचीह रक्तमांसानां कणमात्रेण पूर्यते ॥ ४१ ॥ ममान्तरनिशं हन्त तृष्णासूची सुदु
र्भरा । क्व मे तानि विशालानि गतान्यङ्गानि दुर्धियः । कालमेघविशालानि सुविशी
र्णानि पर्णवत् ॥ ४२ ॥ सूच्यामयि हताशायां मनागपि न मान्ति हि । स्वादुमांसर
सग्रासा वसा वा रक्तमेव वा ॥ ४३ ॥ इति संचिन्त्य चित्तस्थं संहृत्य जनमारणम् ।
तदेव हिमवच्छृङ्गं जगाम तपसे पुनः ॥ ४४ ॥ सर्वतश्चित्तमाहृत्य निर्वेदरसगर्भिणी ।
सूचीदेहेन सोद्विग्ना तेपेऽतिकठिनं तपः ॥ ४५ ॥ निःसंकल्पा निराहारा निस्तरंगम
नोमयी । अथ वर्षसहस्रान्ते सा प्राप परमां दशाम् ॥ ४६ ॥ बभूव निर्मला सूची त
पसा क्षीणकिल्बिषा । जाता विदितवेद्या सा स्वयमेव तया धिया ॥ ४७ ॥ ततो व
र्षसहस्राणि निःसंकल्पतया तथा । तस्थौ निखिलसंसारहेयतां हृदि कुर्वती ॥ ४८ ॥
तां वेधास्तादृशीं ज्ञात्वा पदं परममास्थिताम् । उपेत्योवाच भगवान्पुत्रि कर्कटि राक्ष
सि ॥ ४९ ॥ तामेव तनुमासाद्य सुखिनी भुवने चर । जीवन्मुक्तासि हे वत्से हार्दं ते
गलितं तमः ॥ ५० ॥ ये मूढा ये दुरारम्भा मूर्खा दुःस्थितयश्च ये । दुर्देशवासिनो ये
च ते ते ग्रासो वपुःस्थितेः ॥ ५१ ॥ इत्युक्त्वान्तर्दधे वेधाः साभूत्तदनु राक्षसी । अ
न्तः संचिन्मयी बाह्यवृत्तिकल्लोलवर्जिता ॥ ५२ ॥ चिरं तदनु सा तस्थौ निर्विकल्प
समाधिना । अथ कालेन महता चित्तस्पन्दनमेत्य सा ॥ ५३ ॥ बहिर्वृत्तिमयी जाता
तां सस्मार पुनः क्षुधाम् । यावत्सत्त्वं हि देहस्य स्वभावो नापवर्तते ॥ ५४ ॥ ततः सं
चिन्तयामास ग्रासो जात्युचितो मम । वेधसा कल्पितो मूढास्ततस्तान्विचिनोम्य
हम् । इति संचिन्त्य सा तस्मादुत्थाय गिरिश्शृङ्गतः ॥ ५५ ॥ विवेश शैलपादस्थं कि
रातजनमण्डलम् । तत्र क्वापि महाटव्यां निवासमकरोत्ततः ॥ ५६ ॥ एतस्मिन्नन्तरे
तत्र किरातजनमण्डले । हस्तहार्यतमःपिण्डा बभूवासितयामिनी ॥ ५७ ॥ तस्यां
रजन्यां भीमायां मन्त्रिणा सह भूमिपः । अटवीं विक्रमोदारः प्राविशद्वीरचर्यया ॥
५८ ॥ अटव्यां कर्कटी सा तौ चरन्तौ राजमन्त्रिणौ । अपश्यद्धृतधैर्याथ वेतालालो
कनोन्मुखौ ॥ ५९ ॥ अथ सा चिन्तयामास लब्धो भक्षो ह्यहो मया । मूढावेतावना

37 b: **विकलस्य च** – 38 b: **दुःस्थस्य** d: **भवत्यंतर्विषूचिका** – 39 b: **प्राणिप्राणैक०** – 40 a: **महता** – 41 a: **सूचिका जाता** b: **यास्यति** c: **सूचीयं** – 43 a: **सूच्यामपि** c: Hs. **०मांसवसाग्रासा**; **०ग्रासो** d: **च** (für **वा**) – 47 b: **क्षीणकल्मषा** – 48 b: **तया** – 51 d: **ग्रासाय सुस्थिताः** – 52 c/d: **संचिन्मयी जाता बाह्यकल्लोल०** – 55 a: **तत्र सा चिंतयामास** c/d: **मूढो जनस्तान्वि०** – 56 d: **०तदा** – 58 b: **भूपतिः** – 60 b: **भक्ष्यो**; Hs. **ह्यतो**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्मज्ञौ भारो देहः किलानयोः ॥ ६० ॥ इहामुत्र च नाशाय मूढो दुःखाय जीवति । यत्नाद्विनाशनीयोऽसौ पापसंपत्तिहेतुतः ॥ ६१ ॥ आदिसर्गे च नियमः कृतः पङ्कज जन्मना । हिंस्राणां भोजनायास्तु मूढात्मा नात्मवानिति ॥ ६२ ॥ तस्मादिमौ मया चाद्य भोक्तव्यौ भोज्यतां गतौ । अभव्य एव निर्दोषं प्राप्तमर्थमुपेक्षते ॥ ६३ ॥ मा क दाचिदिमौ स्यातां गुणयुक्तौ महाशयौ । तादृग्दूरविनाशो हि स्वभावान्मे न रोचते ॥ ६४ ॥ तदेतौ संपरीक्षेऽहं यदि तावद्गुणान्वितौ । तद्भक्षं न करोम्येतौ न हिंसा गु णिनः क्वचित् ॥ ६५ ॥ अकृत्रिमसुखं कीर्तिमायुश्चैवाभिवाञ्छता । सर्वाभिमतदा नेन पूजनीया गुणान्विताः ॥ ६६ ॥ अपि नङ्क्ष्यामि देहेन नैव भोक्ष्ये गुणान्वितम् । सुखयन्ति हि चेतांसि जीवितादपि साधवः ॥ ६७ ॥ अपि जीवितदानेन गुणिनं परिपालयेत् । गुणवत्संगमौषध्या मृत्युरप्येति मित्रताम् ॥ ६८ ॥ यदाहमपि रक्षामि राक्षसी गुणशालिनम् । तत्रान्यः को न कुर्यात्तं हृदि हारमिवामलम् ॥ ६९ ॥ उदार गुणयुक्ता ये विहरन्तीह देहिनः । धरातलेन्दवः सङ्गाद्भृशं शीतलयन्ति ते ॥ ७० ॥ मृतिर्गुणितिरस्कारो जीवितं गणिसंश्रयः । फलं स्वर्गापवर्गादि जीविताद्गुणिसंश्र यात् ॥ ७१ ॥ तस्मादिमौ परीक्ष्येऽहं कयाचित्प्रश्नलीलया । किंमात्रज्ञानकावेताविति तामरसेक्षणौ ॥ ७२ ॥ श्रीवसिष्ठ उवाच ॥ अथ सा राक्षसी रक्षःकुलकाननमञ्जरी । तमस्येवाभ्रलेखेव गम्भीरं निनाद ह ॥ ७३ ॥ नादान्ते समुवाचेदं हुंकारपरुषं वचः । गर्जितानन्तरं जातं करकाशनिशब्दवत् ॥ ७४ ॥ भो भो घोराटवीव्योमपदवीशशि भास्करौ । महामायातमीपीठशिलाकोटरकीटकौ ॥ ७५ ॥ कौ भवन्तौ महाबुद्धी दुर्बुद्धी वा समागतौ । मद्ग्रासपदमापन्नौ क्षणान्मरणकोविदौ ॥ ७६ ॥ राजोवाच ॥ भो भो भूतक किं स्यास्त्वं क्व तिष्ठसि स्वदेहकम् । दर्शयास्यास्तव गिरः को बिभेत्य लिनीध्वनेः ॥ ७७ ॥ राज्ञेत्युक्ते रस्यमुक्तमिति संचिन्त्य सा तयोः । प्रकाशायाप्यधै र्याय ननाद च जहास च ॥ ७८ ॥ ततो ददृशतुस्तां तौ शब्दपूरितदिग्गणाम् । स्वा ट्टहासप्रभापूरदरप्रकटिताकृतिम् ॥ ७९ ॥ कल्पाशनिभ्राशनिकाघृष्टामद्रितटीमिव । तामवेक्ष्य महावीरौ तथैवाक्षुभितौ स्थितौ ॥ ८० ॥ मन्त्र्युवाच ॥ महाराक्षसि संरम्भः किमयं तव निष्फलः । लाघवो ह्यथ वा कार्ये लाघवेऽप्यतिसंभ्रमः ॥ ८१ ॥ त्यज सं रम्भमारम्भो नायं तव विराजते । विषये हि प्रवर्तन्ते धीमन्तः स्वार्थसाधकाः ॥ ८२ ॥ त्वादृशीनां सहस्राणि मशिकानामिवाचले । अस्माकं धीरतावात्या व्यूढानि तृण पर्णवत् ॥ ८३ ॥ संरम्भज्वरमुत्सृज्य समया स्वच्छया धिया । युक्त्या च व्यवहारि

61 c: **तस्माद्विनाश०** – 63 a: **तस्मादेतौ मयैवाद्य** – 64 a: **न** (für **मा**) c: **तादृग्रूप०** – 65 a: **संपरीक्ष्ये** b: **तादृग्गु०** c: **तद्भक्ष्यं** d: **हिंस्ये** – 66 a: **अकृत्रिमं** b: Hs. **०वाञ्छिता** – 69 a: **यत्राहमपि** – 73 Ohne **श्री०** d: **विननाद्** – 74 c: **जात०** – 75 c: **०तमःपीठ०** – 76 d: **०कोचितौ** – 77 b: **च देहकम्** (metr. korrekt) – 78 a: **रम्यमु०** d: **सुजहास** – 79 b: **०दिङ्मुखीम्** c: **तादृग्घास०** d: **०पूरदूरप्रकटिता०** – 80 a/b: **कल्पांताशनिकाशेन घुष्टामद्रि०** – 81 c: **लाघवं ह्यथवा कार्यं** – 83 b: **मशकानामिवाबले**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ण्या स्वार्थः प्राज्ञेन साध्यते ॥ ८४ ॥ कथयाभिमतं किं ते किमर्थयसि चार्थिनी । अर्थी स्वप्नेऽपि नास्माकमप्राप्तार्थः पुरा गतः ॥ ८५ ॥ इत्युक्ता सा तदा तेन चिन्तया मास राक्षसी । अहो नु विमलाचारं सत्त्वं पुरुषसिंहयोः ॥ ८६ ॥ न सामान्याविमौ मन्ये विचित्रेयं चमत्कृतिः । वचोवक्रेक्षणान्येव वदन्त्यन्तर्विनिश्चयम् ॥ ८७ ॥ वचोवक्रेक्षणद्वारैर्धीमतामाशया मिथः । एकीभवन्ति सरितां पयांसि चलनैरिव ॥ ८८ ॥ आभ्यां प्रायः परिज्ञातो मम भावोऽनयोर्मया । न विनाश्यौ मयेमौ च स्वयमेवाविनाशिनौ ॥ ८९ ॥ तदेतौ परिपृच्छामि किंचित्संदेहमुत्थितम् । प्राज्ञं प्राप्य न पृच्छन्ति ये च केचिन्नराधमाः ॥ ९० ॥ इति संचिन्त्य पृच्छायै ततानावसरं ततः । अकालकल्पाभ्ररवं हासं संयम्य चाब्रवीत् । कौ भवन्तौ नरौ धीरौ कथ्यतामिति मेऽनघौ ॥ ९१ ॥ मन्त्र्युवाच ॥ अयं राजा किरातानामस्याहं मन्त्रितां गतः । उद्यतौ रात्रिचारेण त्वादृग्जनविनिग्रहे । राज्ञां रात्रिंदिनं धर्मो दुष्टभूतविनिग्रहः ॥ ९२ ॥ राक्षस्युवाच ॥ राजंस्त्वमसि दुर्मन्त्री सन्मन्त्री तु नृपो भवेत् । सद्रूपस्य भवेन्मन्त्री राजा सन्मन्त्रिणो भवेत् ॥ ९३ ॥ राजैवादौ विवेकेन योजनीयः सुमन्त्रिणा । तेनार्यतामुपयाति यथा राजा तथा प्रजाः ॥ ९४ ॥ प्रभुत्वं समदृष्टित्वं राज्ञः स्याद्राजविद्यया । तामेव यो न जानाति नासौ मन्त्री न वा नपः ॥ ९५ ॥ भवन्तौ तद्विदौ साधू यदि तच्छ्रेय आप्स्यथः । नो चेदनर्थदोषः स्यात्प्रकृतेरद्म्यहं युवाम् ॥ ९६ ॥ एकोपायेन मत्पार्श्वाद्बालकावुत्तरिष्यथः । मत्प्रश्नपञ्जरं सारं चेद्विदारयथो धिया ॥ ९७ ॥ वसिष्ठ उवाच ॥ इत्युक्त्वा राक्षसी प्रश्नान्सा वक्तुमुपचक्रमे । कथ्यतामिति राज्ञोक्ते तानि माञ्शृणु राघव ॥ ९८ ॥ राक्षस्युवाच ॥ एकस्यानेकसंख्यस्य कस्याणोरम्बुधेरिव । अन्तर्ब्रह्माण्डलक्षाणि लीयन्ते बुद्बुदा इव ॥ ९९ ॥ किमाकाशमनाकाशं नकिंचित्किंचिदेव किम् । गच्छन्न गच्छति च कः कोऽतिष्ठन्नेव तिष्ठति ॥ १०० ॥ कश्चेतनोऽपि पाषाणः कश्च व्योमनि चित्रकृत् । अणौ जगन्ति तिष्ठन्ति कस्मिन्बीज इव द्रुमः ॥ १०१ ॥ कस्मान्न किंचिच्च पृथगूर्म्यादीव महाम्भसः । द्वैतमप्यपृथक्कस्माद्द्रवतेव महाम्भसः ॥ १०२ ॥ यद्येतान्सपदि मयोदितान्भवन्तौ मत्प्रश्नान्न खलु विगाहितुं समर्थौ । तद्रक्षोजठरहुताशनेन्धनत्वं निर्विघ्नं झटिति गमिष्यथः क्षणान्मे ॥ १०३ ॥ श्रीवसिष्ठ उवाच ॥ महानिशि महारण्ये महाराक्षसकन्यया । इति प्रोक्ते महाप्रश्ने महामन्त्री गिरं ददौ ॥ १०४ ॥ भवत्या परमात्मैष कथितः कमलेक्षणे । अनयैव वचोभङ्ग्या ब्रह्मविद्बोधयोग्यया ॥ १०५ ॥ अनाख्यत्वादगम्यत्वान्मनःषष्ठेन्द्रियस्थितौ । चिन्मा

85 d: **पुरो** – 88 a/b: **०द्वारैर्धर्मिता०** – 89 c: **मयैतौ** – 90 d: **संदेहं ते नराधमाः** – 91 b: **तत्त्वानां वचनं ततः** c: Hs. **०वरं** d: **साब्रवीत्** – 92 e: **रात्रिंदिवं** – 93 a: **सन्मंत्री** b: **दुर्मंत्री न नृपो** c: **सन्नृपश्च भवेन्मंत्री** – 94 d: **प्रजा** – 97 d: **चेद्धि दारयथो** – 102 a/b: **पृथक्कंपादीव** d: **०वर्तते च महा०** – 103 (Praharṣiṇī) a: **यद्येतान्सपदि धिया विचारयंतौ** b: Hs. **मत्प्रश्नान् सपदि वि०** d: **क्षणेन** – 104 Ohne **श्री०** – 105 **मंत्र्युवाच ॥** – 106 b: **०स्थितेः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्रमेवमात्माणुराकाशादपि सूक्ष्मकः ॥ १०६ ॥ चिदणोः परमस्यान्तः कोटिब्रह्माण्ड
बुद्बुदाः । उद्भूय स्थितिमभ्यस्य लीयन्ते शक्तिपर्ययात् ॥ १०७ ॥ आकाशं बाह्यशून्य
त्वादनाकाशं तु चित्ततः । अकिंचिद्यदि निर्देश्या वस्तुसत्तेति किंचन ॥ १०८ ॥ चे
तनोऽसौ प्रकाशात्मा वेद्याभावाच्छिलोपमः । स्वात्मनि व्योमनि स्वच्छे जगदुन्मेष
चित्रकृत् ॥ १०९ ॥ तद्भामात्रमिदं विश्वमिति न स्यात्ततः पृथक् । जगद्भेदोऽपि तद्भा
नमिति भेदोऽपि तन्मयः ॥ ११० ॥ सर्वगः सर्वसंबद्धो गत्यभावान्न गच्छति । ना
स्त्यसावाश्रयाभावात्सद्रूपत्वात्तथास्ति च ॥ १११ ॥ श्रुत्वैतन्मन्त्रिणो वाक्यं राक्षसी
वाक्यमाददे । अहो नु परमार्थोक्तिः पावनी तव मन्त्रिणः । राजा राजीवपत्राक्ष इदा
नीमेष भाषताम् ॥ ११२ ॥ राजोवाच ॥ जाग्रतः प्रत्ययाभावो यस्याहुः प्रत्ययं परम् ।
सर्वसंकल्पसंन्यासश्चेतसा यत्परिग्रहः ॥ ११३ ॥ यत्संकोचविकासाभ्यां जगत्प्रलय
सृष्टयः । निष्ठा वेदान्तवाक्यानामथ वाचामगोचरः ॥ ११४ ॥ कोटिद्वयान्तरालस्थ
मथ कोटिद्वयीमयम् । यस्य चित्तमयी लीला जगदेतच्चराचरम् ॥ ११५ ॥ यस्य विश्वा
त्मकत्वेऽपि खण्ड्यते नैकपिण्डता । सन्मात्रं तत्त्वया भद्रे कथ्यते ब्रह्म शाश्वतम् ॥
११६ ॥ श्रीवसिष्ठ उवाच ॥ इति राजमुखाच्छ्रुत्वा कर्कटी वनमर्कटी । अविबुद्धपदा
न्तःस्थं जहौ मत्सरचापलम् ॥ ११७ ॥ अन्तःशीतलतां तोषं विश्रान्तिमपतापताम् ।
प्राप्ता प्रावृण्मयूरीव सज्योत्स्नेव कुमुद्वती ॥ ११८ ॥ राक्षस्युवाच ॥ अहो बत प्रवृत्तेयं
भवतोर्भाति शेमषी । अनस्तमितसारेण प्रबोधार्केण भासिता । विवेकिनो जगत्पू
ज्याः सेव्या मन्ये भवादृशाः ॥ ११९ ॥ महतामेव संसर्गात्पुनर्दुःखं न बाधते । को
ऽपि दीपशिखाहस्तस्तमसा परिभूयते ॥ १२० ॥ मयेमौ जङ्गलप्राप्तौ भवन्तौ भूमिभा
स्करौ । पूजनीयावतः शीघ्रमीहितं कथ्यतां शुभौ ॥ १२१ ॥ राजोवाच ॥ प्रार्थये त्वा
महं रक्षःकुलकाननमञ्जरि । भूयो भवत्या यत्प्राणा हिंसनीया न कस्यचित् ॥ १२२
॥ प्रीताथो राक्षसी प्राह कर्कटी वनमर्कटी ॥ १२३ ॥ बाढमेवं करोम्यद्यप्रभृत्यवित
थं प्रभो । सत्यमेव न किंचिद्धि हिंसनीयं मयाधुना ॥ १२४ ॥ राजोवाच ॥ यद्येवं
फुल्लपद्माक्षि परदेहैकभोजने । किं स्याच्छरीरवृत्त्यै ते स्थिताया मत्समीहिते ॥ १२५
॥ राक्षस्युवाच ॥ कालौ बहुतिथौ राजन्प्रबुद्धायाः समाधितः । जाता भोजनवाञ्छा
मे न तां तु गणयाम्यहम् ॥ १२६ ॥ इदानीं तव वाक्येन प्राक्तनध्याननिश्चला । याव
दिच्छं सुखेनासे सजीवा शालभञ्जिका ॥ १२७ ॥ आमृतिं धारणां बद्ध्वा धारयामि
शरीरकम् । ययेत्थमन्तकालेन त्यजामीति मतिर्मम ॥ १२८ ॥ आशरीरपरित्यागमि

108 b: **च चित्त्वतः** c: **अकिंचिदित्यनिर्देश्यं** – 109 c: **आत्मनि** – 110 a: **तद्भावमात्रमिदं** (mit überzähliger Silbe) – 111 d: **०त्वादथास्ति** – 112 c: **अथो** – 113 a/b: **०भावाद्यस्या०** c/d: Lies **०संन्यासाच्चेतसा** – 117 Ohne **श्री०** c: **अवबुद्धपदा तस्थौ** – 118 ab: **अंतःशीतलतामेत्य सा विश्रांतिमवाप ताम्** – 119 a: **पवित्रेयं** – 120 c: **को हि** – 121 a: Lies **जङ्गले**; **मयैतौ जांगलं** – 124 c: **सर्वमेव** – 125 c: **०भृत्यै** – 126 a: **कालेन बहुना** – 127 a: **इदानीं शिखरं गत्वा** – 128 c: **यथेष्टमतिकालेन**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

दानीं न मया नृप । हिंसनीयाः परप्राणाः पश्यन्त्या सर्वगं शिवम् ॥ १२९ ॥ इति
संजातसौहार्दा तौ विसृज्य निशाचरी । यदा गन्तुं प्रवृत्तासौ तदा राजाब्रवीद्वचः ॥
१३० ॥ नास्मत्प्रणयसौहार्दं वितथीकर्तुमर्हसि । सौहार्दं सुजनानां हि दर्शनादेव वर्धते
॥ १३१ ॥ लघुं सौभाग्यसंयुक्तं कृत्वाकारं मनोहरम् । आगच्छास्मद्गृहं भद्रे तत्र तिष्ठ
यथासुखम् ॥ १३२ ॥ राक्षस्युवाच ॥ मुग्धस्त्रीरूपधारिण्य दातुं शक्तोऽसि भोजनम् ।
संतर्पयसि मां केन राक्षसीरूपधारिणीम् ॥ १३३ ॥ रक्षोऽन्नमेव मे तुष्ट्यै न सामान्य
जनाशनम् । पूर्वसिद्धस्वभावोऽयमादेहं न निवर्तते ॥ १३४ ॥ राजोवाच ॥ हेमस्रग्दा
मवलिता दिनानि कतिचिन्मम । गृहे स्त्रीरूपिणी तिष्ठ यावदिच्छामनिन्दिते ॥ १३५
॥ ततो दुष्कृतिनश्चौरान्वध्याञ्शतसहस्रशः । मण्डलेभ्यः समानीय ददे तुभ्यं स्वभो
जनम् ॥ १३६ ॥ कान्तारूपं परित्यज्य गृहीत्वा तानशेषतः । नयस्व हिमवच्छृङ्गं तत्र
भुङ्क्ष्व यथासुखम् । महाशनानामेकान्ते भोजनं हि सुखायते ॥ १३७ ॥ तृप्तिं निद्रां
मनाक्कृत्वा भव भूयः समाधिभाक् । समाधिविरता भूयो ह्यागत्य पुनरन्यदा ॥ १३८
॥ नयस्वान्यान्वध्यतरान्हिंसा नैषा च धर्मतः । स्वधर्मेण च हिंसैव महाकरुणया समा
॥ १३९ ॥ त्वं समेष्यसि वावश्यं मां समाधिविरागिणी । असतामपि तद्रूढं सौहार्दं
न निवर्तते ॥ १४० ॥ राक्षस्युवाच ॥ युक्तमुक्तं त्वया राजन्करोम्येवमहं सखे । सौ
हार्देन प्रवृत्तस्य को वाक्यं नाभिनन्दति ॥ १४१ ॥ वसिष्ठ उवाच ॥ इत्युक्त्वा राक्ष
सी तत्र संपन्ना सा विलासिनी ॥ १४२ ॥ राजन्नागच्छ गच्छाम इत्युक्त्वा नृपम
न्त्रिणौ । अग्रे गंतुं प्रवृत्तौ तौ रात्रावनुससार सा ॥ १४३ ॥ अथ ते पार्थिवगृहं प्राप्य
तां रजनीं मिथः । कथयैकगृहे रम्ये क्षपयामासुरादृताः ॥ १४४ ॥ प्रभातेऽन्तःपुरे त
स्थौ पुरंध्रीजनलीलया । राक्षसी मन्त्रिराजानौ स्वव्यापारौ बभूवतुः ॥ १४५ ॥ ततो
दिवसषट्केन संचितानि महीभृता । नृपान्तरपुरेभ्योऽपि स्वमण्डलगणात्तथा ॥ १४६
॥ त्रीणि वध्यसहस्राणि तानि तस्यै तदा ददौ । सा बभूव निशाकाले सैवोग्रा कृष्ण
राक्षसी ॥ १४७ ॥ तानि वध्यसहस्राणि जग्राह भुजमण्डले । ययौ राजानमापृच्छ्य
तदेव हिमवच्छिरः ॥ १४८ ॥ ततः प्रभृति साद्यापि किरातजनमण्डले । वध्यानाग
त्य गह्णाति समाधिव्युत्थिता सती ॥ १४९ ॥ इति श्रीवाल्मीकीये मोक्षोपाये वासि
ष्ठरामायण उत्पत्तिप्रकरणे कर्कटीराक्षसीसूच्युपाख्यानम् ॥ [६] ॥ श्रीवसिष्ठ उवाच
॥ एतत्ते सर्वमाख्यातं सूचीवृत्तान्तकीर्तनात् । आत्मैवास्ति परं सत्यं नान्याः संसार
दृष्टयः ॥ १ ॥ सर्वं हि मन एवेदमित्थं स्फरति सृष्टिषु । अत्रेदमैन्दवाख्यानं शृणु श्रव

133 d: **राक्षसीजाति०** – 134 d: **नो** – 135 d: **यावदिच्छाम्य०** – 136 c: **समाहृत्य** – 138 a: Hs. **मनाक् भूत्वा** c/d: **भूयोऽप्यागत्य** – 139 b: **नैषां हि** d: Hs. **०कारुण्यया** – 140 c: **संरूढं** – 143 c: **आश्रमं स्वं प्रवृत्तौ** – 144 c: **कथयैव गृहे** – 146 d: **०तदा** – 148 d: **तदैव** – 149 d: **समाधेर्व्युत्थिता** – Kolophon zu Sarga 6: Hs. **०रामायणे**; **इति श्रीमोक्षोपाये उत्पत्तिप्रकरणे सूच्युपाख्यानं नाम सप्तमः सर्गः ॥ ७ ॥** – 7.1 Ohne **श्री०** – 2 b: Hs. **दृष्टिषु**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

णभूषणम् ॥ २ ॥ राम ते कथयिष्यामि तदाख्यानमनिन्दितम् । चितिशक्तेः समुल्ला
सं निश्चिनोषि जगद्यतः ॥ ३ ॥ चित्तबालो जगद्यक्षं मिथ्या पश्यत्यबोधितः । बोधि
तोऽसौ परं रूपं स्वं पश्यति निरामयम् ॥ ४ ॥ चित्तमेव हि संसारो रागादिक्लेशदूषि
तम् । तदैव तैर्विनिर्मुक्तं भवान्त इति कथ्यते ॥ ५ ॥ कदाचिदखिलं सर्वं संहृत्य दि
वसक्षये । एकाग्रो भगवान्वेधाः सुप्तः स्वामनयन्निशम् ॥ ६ ॥ निशान्ते स प्रबुद्धात्मा
कृत्वा संध्यां यथाविधि । प्रजाः स्रष्टुं दृशौ स्फारे व्योम्नि योजितवानजः ॥ ७ ॥ अ
थासौ दृष्टवांस्तत्र मनसा वितताम्बरे । पृथक्स्थितान्महारम्भान्सर्गान्स्थितिविनिर्म
लान् ॥ ८ ॥ तानालोक्य विशुद्धेन परेण स्वेन चेतसा । भृशं विस्मयमापन्नः किमेत
त्कथमित्युत ॥ ९ ॥ अथालोक्य चिरं कालं मनसैव तदाम्बरे । अर्कं तस्माज्जगज्जाला
देकमानीय पृष्टवान् ॥ १० ॥ कस्त्वं कथमिदं जातं जगज्जालं महाद्युते । यदि जाना
सि भगवंस्तदेतत्कथयानघ ॥ ११ ॥ इत्युक्तो वेधसा भानर्भक्तिप्रह्वेण चेतसा । नमस्कृ
त्याभ्युवाचेदमनिन्द्यपदया गिरा ॥ १२ ॥ अस्य दृश्यप्रपञ्चस्य नित्यं कारणतामसि ।
गतः कस्मान्न जानीषे किं मामीश्वर पृच्छसि ॥ १३ ॥ अथ मद्वाक्यसंदर्भे लीला चे
त्तव सर्वग । अचिन्तितां मदुत्पत्तिं तच्छृणु त्वं वदाम्यहम् ॥ १४ ॥ तले कैलासशैल
स्य जम्बूद्वीपैककोणके । सुवर्णजटनाम्नाढ्यं त्वत्पुत्रैर्जनितप्रजैः । मण्डलं कल्पितं
श्रीमदनल्पसुखसुन्दरम् ॥ १५ ॥ तत्राभूदतिधर्मात्मा ब्राह्मणो ब्रह्मवित्तमः । इन्दुर्ना
मातिशान्तात्मा कश्यपस्य कुलोद्भवः ॥ १६ ॥ तस्य प्राणसमा भार्या काचित्तस्यां
महात्मनः । न बभूवात्मजस्तस्य मरुभूमौ तरुर्यथा ॥ १७ ॥ तौ ततो दंपती खिन्नौ
पुत्रार्थं तपसे गिरेः । कैलासस्यांसमारूढौ शुचिव्रतपरायणौ ॥ १८ ॥ भूतैरनावृते शू
न्ये तस्मिन्कैलासकुञ्जके । तेपतुस्तौ तपो घोरं जलाहारौ तरुस्थिती । ततस्तुष्टोऽभवद्दे
वस्तयोः शशिकलाधरः ॥ १९ ॥ आजगामाथ तं देशं यत्र तौ विप्रदंपती । वरं विप्र
गृहाणाशु तुष्टोऽस्मि तमुवाच ह ॥ २० ॥ विप्र उवाच ॥ भगवन्देवदेवेश दश पुत्रा
महाधियः । भव्या भवन्तु मे भूयः शोको येन न बाधते ॥ २१ ॥ अथैवमस्त्विति प्रो
च्य जगामान्तर्धिमीश्वरः । ततस्तौ दंपती तुष्टौ वरं लब्ध्वा गृहं गतौ ॥ २२ ॥ ततः
कालेन सुषुवे दशपुत्राननिन्दितान् । ब्राह्मणी दश ते बालाः क्रमेण प्रौढिमाययुः ॥
२३ ॥ अथ कालेन महता तेषां तौ पितरौ तदा । संजग्मतुस्तनुं त्यक्त्वा स्वां गतिं ग
तिकोविदौ ॥ २४ ॥ मातापितृभ्यां रहिता दश ते ब्राह्मणास्ततः । ययुः कैलासशि
खरं गृहं संत्यज्य खेदिनः ॥ २५ ॥ तत्र संचिन्तयामासुरुद्विग्नास्ते विबन्धवः । किं

3 c: ०शक्ति० – 5 c: तदेव – 6 a: सर्गं d: सुप्तस्तामनयन्निशाम् – 7 a: संप्रबुद्धात्मा – 8 b: वितर्तेऽबरे d: स्थितिनिरर्गलान् – 9 b: तेचसा – 10 c: स्तूर्यं – 12 c: नमस्कृत्वा० – 13 c: Hs. गजः; गतस्तस्मान्न – 14 a/b: ०संदर्भैर्लीला – 15 a: Hs. तात (für तले); Hs. stets *kailāśa* b: जंबु० c: सुवर्णतटनाम्नाथ d: ०प्रभैः – 16 c: इंदुनामा० – 18 c: कैलासस्य समारूढौ – 19 c: Hs. ततो – 25 a/b: रहितास्ततस्ते ब्राह्मणा दश – 26 b: विबांधवाः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

स्यादिह परं श्रेयः किमिह स्याद्दुःखदम् ॥ २६ ॥ कियदेतज्जनैश्वर्यं सामन्तो हि महे
श्वरः । किं नाम संपद्भूपानां सम्राडिह महेश्वरः ॥ २७ ॥ किं नाम संपत्साम्राज्यमि
न्द्रस्तेषां महेश्वरः । किं नाम तन्महेन्द्रत्वं यन्मुहूर्तं प्रजापतेः ॥ २८ ॥ विनश्यति न
यत्कल्पैः किं स्यात्तदिह शोभनम् ॥ २९ ॥ ज्येष्ठभ्रातोवाच ॥ ऐश्वर्याणां हि सर्वेषामा
कल्पान्ताविनाशि यत् । रोचते भ्रातरस्तन्मे ब्रह्मत्वमिह नेतरत् ॥ ३० ॥ इतरे भ्रातर
ऊचुः ॥ युक्तमुक्तं कथं तात सर्वदुःखापमार्जनम् । शाधि नस्त्वं गतिर्नोऽद्य विरञ्चि
त्वमु वाप्नुमः ॥ ३१ ॥ ज्येष्ठभ्रातोवाच ॥ पद्मासनगतो भास्वान्ब्रह्माहमिति चेतसा ।
सृजामि संहरामीति ध्यानमस्तु चिराय वः ॥ ३२ ॥ अग्रजेनेति कथिता बाढं कृत्वा
त उत्तमाः । ध्यानाधीनधियस्तस्थुर्लिपिकर्मार्पितोपमाः ॥ ३३ ॥ अन्तःस्थेनैव मनसा
चिन्तयामासुराद्दताः । ब्रह्माहं जगतः स्रष्टा कर्ता भोक्ता महेश्वरः ॥ ३४ ॥ लोकपा
लपुरैः सार्धं भुवनानि चतुर्दश । निर्मितानि मयैतानि तेषामन्तरहं स्थितः ॥ ३५ ॥
दश ते ब्राह्मणा एवं बद्धपद्मजभावनाः । देहान्विसस्मरुः पूर्वान्पूर्वभावनयार्पितान् ॥
३६ ॥ अथ ते देहकाः सर्वे पवनैरातपेन च । कालेन शोषमभ्येत्य गलिताः शीर्णपर्ण
वत् ॥ ३७ ॥ स तेषां दशधा सर्गः प्रतिभासोऽयमुत्थितः । भावनापरिपाकेन दश ते
ब्रह्मतां गताः ॥ ३८ ॥ त एते दश संसारा मनोव्योमनि संस्थिताः । एषामन्यतमश्चा
हं भास्करोऽहर्निशाकरः ॥ ३९ ॥ इत्युक्त्वा वेधसं भानुर्जगाम निजमन्दिरम् । विर
ञ्चिरपि देवेशः स्वव्यापारपरोऽभवत् ॥ ४० ॥ इति श्रीमोक्षोपाय ऐन्दवोपाख्यानम्
॥ [७] ॥ वसिष्ठ उवाच ॥ मनो हि जगतां कर्तृ मनो हि पुरुषः स्मृतः । मनःकृतं कृतं
लोके न शरीरकृतं कृतम् ॥ १ ॥ सामान्यब्राह्मणा भूत्वा मनोभावनया किल । ऐन्द
वा ब्रह्मतां याता मनसः पश्य शक्तताम् ॥ २ ॥ मनसा भाव्यमानो हि देहतां याति
देहकः । देहभावनया मुक्तोर्देहधर्मैर्न बाध्यते ॥ ३ ॥ नान्तर्मुखतया योगी देहे वेत्ति
प्रियाप्रिये । इन्द्रस्याहल्यया सार्धं वृत्तान्तोऽत्र निदर्शनम् ॥ ४ ॥ श्रीराम उवाच ॥
काहल्या भगवन्निन्द्रस्तव को वात्र संमतः । ययोरुदन्तश्रवणे पावनी दृष्टिरेति माम्
॥ ५ ॥ श्रीवसिष्ठ उवाच ॥ श्रूयते हि पुरा राम मागधेषु महीपतिः । इन्द्रद्युम्न इति
ख्यात इन्द्रद्युम्न इवापरः ॥ ६ ॥ तस्येन्दुबिम्बप्रतिमा भार्या कमललोचना । अहल्या
नाम तत्रासीच्छशाङ्कस्येव रोहिणी ॥ ७ ॥ तस्मिन्नेव पुरे खिङ्गः खिङ्गप्रकरशेखरः ।
इन्द्रो नामापरः कश्चिन्नागरीणां प्रियोऽवसत् ॥ ८ ॥ साहल्याहल्यया सार्धमिन्द्रस्य

27 Nach a/b zusätzlich: सामन्तसंपत्किं नाम राजानो हि माहेश्वराः । (27A) c: का नाम – 29 a/b: च यत्कल्पे किं तत्स्यादिह – 30 Hs. ०भ्राता उवाच; ज्येष्ठ उवाच – 31 इतरे ऊचुः a: त्वया (für कथं) c: तत्त्वं d: ०त्वमवाप्नुमः – 32 ज्येष्ठ उवाच ॥ b: तेजसा – 33 c/d: ०धियस्तत्र लिपि० – 37 a: अथ ते b: बद्धप द्मात्म० – 38 a: सर्ग० – 39 a: संस्कारा b: Hs. ०व्योम्नि c: ०मस्याहं – Kolophon zu Sarga 7: इति श्रीयोगवासिष्ठे मोक्षोपाय उत्पत्तिप्रकरणे ऐंदवोपाख्यानं नामाष्टमः सर्गः ॥ ८ ॥ – 8.1 b: पुरुषः परः – 2 a: सामान्या ब्रा० d: शक्तिताम् – 3 b: देहितां c/d: मुक्तो देह० – 4 c: Hs. stets *ahilyā* c/d: सार्धमुदंतो – 8 a/b: षिङ्गः षिङ्ग० c: इंद्रनामाऽपरः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यदभूत्पुरा । तदाकर्ण्यैतिहासेभ्यस्तस्मिन्निन्द्रे त्वरज्यत ॥ ९ ॥ तयोर्घनतरस्नेहनिराव रणचेष्टयोः । स दुर्विनयवृत्तान्तो राजान्तिकमुपाययौ ॥ १० ॥ एवमन्योन्यमासक्तं भावमालक्ष्य भूपतिः । चकार बहुभिर्भेदैः स तयोरनुशासनम् ॥ ११ ॥ तावुभावपि संत्यक्तौ दुर्मती सलिलाशये । तुष्टौ जहसतुस्तत्र न खेदमुपजग्मतुः ॥ १२ ॥ ग्रथितौ गजपादेषु न तौ श्रममुपागतौ । कशाभिस्ताड्यमानाङ्गौ नापतुः कामपि व्यथाम् ॥ १३ ॥ ज्वालाभिर्दह्यमानौ तौ स्थितौ हिमशिलास्विव । अपृच्छत्तौ ततो राजा खिन्नौ स्थः किं न दुर्मती ॥ १४ ॥ अथ तौ धरणीपालमूचतुर्मुदिताशयौ । संस्मर्तावामिहा न्योन्यमुखकान्तिमनिन्दिताम् ॥ १५ ॥ आत्मानं न विजानीवो जातावन्योन्यतन्म यौ । मुह्यावो न महीपाल स्वाङ्गैरपि विकर्तितैः ॥ १६ ॥ इष्टेऽर्थे चिरमाविष्टं क्वापि धी रस्थिरं मनः । भावाभावाः शरीरोत्था नृप शक्ता न बाधितुम् ॥ १७ ॥ भावितं तीव्र वेगेन मनसा यन्महीपते । तदेव पश्यत्यचलं न शरीरविचेष्टितम् ॥ १८ ॥ न काश्चन क्रिया राजन्मुनिशापादिका अपि । तीव्रसंवेगसंपन्नं शक्ताश्चालयितुं मनः ॥ १९ ॥ एककार्ये निविष्टं हि मनो धीरस्य भूपते । न चाल्यते मेरुरिव वज्रपातशतैरपि ॥ २० ॥ राजञ्शरीरशकलानि वृथोत्थितानि चेतो हि कारणममीषु शरीरकेषु । वारीव सर्ववनखण्डलतारसेषु मुख्यं शरीरमिह विद्धि मनो महात्मन् ॥ २१ ॥ देहे क्षते वि विधदेहगणं करोति स्वप्नभावनाविव नवं नवमाशु चेतः । चित्ते क्षते तु न करोति हि किंचिदेव देहस्ततः समनुपालय चित्तरत्नम् ॥ २२ ॥ श्रीवसिष्ठ उवाच ॥ ताभ्यामथै वमुक्तोऽसौ राजा राजीवलोचनः । मुनिं भरतनामानं पार्श्वस्थं समुवाच ह ॥ २३ ॥ भगवन्सर्वधर्मज्ञ परमार्थरसस्पृशः । रमयन्त्येव हृदयं गिरः कामान्धयोरपि ॥ २४ ॥ शासितौ च यथाशास्त्रमेतौ निर्वासयाम्यहम् । इत्युक्त्वा राजशार्दूलस्तावुभौ निर वासयत् ॥ २५ ॥ इत्युत्पत्तिप्रकरणे कृत्रिमेन्द्रोपाख्यानम् ॥ [८] ॥ वसिष्ठ उवाच ॥ एतत्ते कथितं राम मयाख्यानकलीलया । सर्व एव जगत्यस्मिन्द्विशरीराः शरीरिणः ॥ १ ॥ एकं मनःशरीरं च क्षिप्रकारि चलं सदा । अकिंचित्करमन्यत्तु शरीरं मांसनि र्मितम् ॥ २ ॥ श्रीराम उवाच ॥ विस्तरेण मम ब्रह्मन्क्षुद्रस्यास्य निराकृतेः । मानसस्य शरीरस्य स्वरूपं वक्तुमर्हसि ॥ ३ ॥ श्रीवसिष्ठ उवाच ॥ अनन्तस्यात्मतत्त्वस्य सर्वशक्ते र्महात्मनः । संकल्पशक्तिखचितं यद्रूपं तन्मनो विदुः ॥ ४ ॥ भावः सदसतोर्मध्ये

9 d: ऽन्वरज्यत – 11b: भावमालोक्य – 14 a: ज्वालानिर्द० c: अपृच्छत d: स्थो न तु दुर्मती – 15 a: Hs. धरिणी० c: संस्मृत्यावामिहान्योन्यं – 17 b: धीरं मनःकृतम् c: भावं भावाः – 17A: आवां तन्न विजानीवो जातावन्योन्यतन्मयौ ॥ (Vgl. 16ab) – 18 c: पश्यत्यखिलं – 19 c: तीव्रवेगेन संपन्नं – 20 b: Hs. भूपतेः d: प्रतिघातशतैरपि – 21 (Vasantatilakā) a: शरीरकलनानि – 22 (Vasantatilakā) b: Hs. धनमाशु – 23 Ohne श्री० a: ताभ्यां तथैव० – 24 c: चेतांसि (für हृदयं) – Kolophon zu Sarga 8: इति श्रीमोक्षोपाये उत्पत्तिप्रकरणे इंद्रोपाख्यानं नाम नवमः सर्गः ॥ ९ ॥ – 9: V 1 etc. bei Hs. V 26 etc. – 2 a: तु (für च) c: ०मन्यच्च – 3 a/b: ब्रह्मन् जडस्यास्य c/d: रूपमारूढसंकल्पं मनसो वक्तुमर्हसि – 4 Ohne श्री०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

नृणां चलति यश्चलः । कलनोन्मुखतां यातस्तद्रूपं मनसो विदुः ॥ ५ ॥ यतः कुतश्चि
दुत्पन्नं चित्तं यत्किंचिदेव हि । नित्यमात्मनि मोक्षाय योजयेन्मोक्षयुक्तिषु ॥ ६ ॥
अत्रेदं चित्रमाख्यानं कथयामि तवानघ । यदाख्यातं भगवता पुरा पङ्कजजन्मना
॥ ७ ॥ अस्ति रामाटवी स्फारा शून्या शान्ता विभीषणा । योजनानि शतं यस्यां ल
क्ष्यन्ते कोणमात्रकम् ॥ ८ ॥ अस्यामेको हि पुरुषः सहस्रकरलोचनः । पर्याकुलमति
र्भीमः संस्थितो वितताकृतिः ॥ ९ ॥ स सहस्रेण बाहूनामादाय परिघान्बहून् । प्रहर
त्यात्मनः पृष्ठे स्वात्मनैव पलायते ॥ १० ॥ दृढप्रहारैः प्रहरन्स्वयमेवात्मनात्मनि । प्र
विद्रवति भीमात्मा स योजनशतान्यपि ॥ ११ ॥ क्रन्दत्पलायमानोऽसौ गत्वा दूरमि
तस्ततः । श्रमवान्विवशाकारो विशीर्णचरणाङ्गकः ॥ १२ ॥ पतितोऽवश एवाशु मह
त्यन्धोऽन्धकूपके । कृष्णरात्रितमोभीमनभोगम्भीरकोटरे ॥ १३ ॥ ततः कालेन बहु
ना सोऽन्धकूपात्समुत्थितः । पुनः प्रहारैः प्रहरन्विद्रवत्यात्मनात्मनि ॥ १४ ॥ पुन
र्दूरतरं गत्वा शशाङ्ककरशीतलम् । कदलीकाननं कान्तं संप्रविष्टो हसन्निव ॥ १५ ॥
कदलीखण्डकात्तस्माद्विनिष्क्रम्य क्षणात्पुनः । स्वयं प्रहारैः प्रहरन्विद्रवत्यात्मनात्म
नि ॥ १६ ॥ पुनर्दूरतरं गत्वा करञ्जवनगुल्मकम् । प्रविष्टः कण्टकव्याप्तं शलभः पाव
कं यथा ॥ १७ ॥ तस्मात्करञ्जगहनाद्विनिष्क्रम्य क्षणादिव । पुनः प्रहारैः प्रहरन्विद्र
वत्यात्मनात्मनि ॥ १८ ॥ पुनर्दूरतरं गत्वा तमेवान्धोऽन्धकूपकम् । स संप्रविष्टस्त्व
रया विशीर्णावयवाकृतिः ॥ १९ ॥ अन्धकूपात्समुत्थाय प्रविष्टः कदलीवनम् । कद
लीकाननाच्छुभ्रकरञ्जवनगुल्मकम् ॥ २० ॥ करञ्जकाननात्कूपं कूपाद्रम्भावनान्त
रम् । प्रविश्य प्रहरंश्चैव स्वयमात्मनि संस्थितः ॥ २१ ॥ एवंरूपनिजाचारः समालो
क्य चिरं मया । अवष्टभ्य बलादेव मुहूर्तपरिबोधितः ॥ २२ ॥ पृष्टश्च किमिदं कस्त्वं
केनार्थेन करोषि वा । किं च वाभिमतं ते स्यात्किं मुधा परिमुह्यसि ॥ २३ ॥ इति
पृष्टेन कथितं तेन मे रघुनन्दन । नाहं कश्चिन्न चैवेदं मुने किंचित्करोम्यहम् ॥ २४ ॥
त्वयाहमवभग्नोऽस्मि त्वं मे शत्रुरहोबत । त्वया दृष्टोऽस्मि नष्टोऽस्मि दुःखाय च सु
खाय च ॥ २५ ॥ इत्युक्त्वा विक्लवान्यङ्गान्यालोक्य स्वान्यतुष्टिमान् । रुरोदातिरवं
दीनो मेघो वर्षन्निवारवी ॥ २६ ॥ क्षणमात्रेण तत्रासावुपसंहृत्य रोदनम् । स्वान्यङ्गा
नि समालोक्य जहास प्रसभं चिरम् ॥ २७ ॥ अथाट्टहासपर्यन्ते स पुमान्पुरतो मम ।
क्रमेण तानि तत्याज स्वान्यङ्गानि समन्ततः ॥ २८ ॥ प्रथमं पतितं तस्य शिरः परम
दारुणम् । ततस्ते बाहवः पश्चाद्वक्षस्तदनु चोदरम् ॥ २९ ॥ अथ क्षणेन स पुमान्तान्य

6 c: ०मात्मविमोक्षाय d: मुक्तियुक्तिषु – 7 a: चित्तमा० – 8 b: शून्याऽशांतातिभीषणा d: लक्ष्यते – 9 d: विकृताकृतिः – 10 c: प्रहरन्ना० – 12 a: क्रंदन्प० – 13 c: ०भीमे – 17–18: Nach 14. – 20 c: ०काननाच्छुभ्रं, lies ०काननाच्छुभ्रात् (vgl. 15c) – 21 c: प्रविष्टः d: स्वयमेवात्मनि स्थितः – 22 a: ०चारं d: मुहूर्तं प्रतिबोधितः – 23 a: कस्त्वं किमिदं b: च c: Hs. तवाभिमतं d: परिधावसि – 25 a: Hs. त्वयायम० – 28 b: संभ्रमात्पुरतो – 30 b: स्वान्यंगानि

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ङ्गानि यथायथम् । संत्यज्य नियतेः शक्त्या क्वापि गन्तुमुपस्थितः ॥ ३० ॥ दृष्टवानह मेकान्ते पुनरन्यं तथा नरम् । प्रहरन्तं भ्रमन्तं च पर्याकुलतरान्तरम् ॥ ३१ ॥ स मया समवष्टभ्य परिपृष्टस्तथैव हि । तेनैवासौ क्रमेणाथ रुदित्वा संप्रहस्य च । अङ्गैर्विशी र्णतामेत्य यायावलमलक्ष्यताम् ॥ ३२ ॥ दृष्टवानहमेकान्ते तथैवान्यं क्वचिन्नरम् । पलायमानः पतितो ह्यत्यन्तान्धोऽन्धकूपे ॥ ३३ ॥ तत्राहं सुचिरं कालमवसं तत्प्रती क्षकः । अथासौ सुचिरेणापि कूपान्नाभ्युत्थितः शठः ॥ ३४ ॥ दृष्टवान्पुनरन्यं च प्रपतन्तमितस्ततः । अवष्टभ्य तथैवाशु तस्य प्रोक्तं पुनर्मया ॥ ३५ ॥ दुर्मतिर्मामसौ मूढ नैव जानासि किंचन । अपैहि दुर्द्विजेत्युक्त्वा स्वव्यापारपरोऽभवत् ॥ ३६ ॥ एवं तस्मिन्महारण्ये बहवस्तादृशा नराः । परिभ्रमन्तस्तिष्ठन्ति विद्यतेऽद्यापि साटवी ॥ ३७ ॥ सा भीषणा विविधकण्टकसङ्कटाङ्गी घोराटवी घनतमोगहनापि लोकैः । आगत्य निर्वृतिमवाप्तनिजावबोधैरासेव्यते कुसुमगुल्मकवाटिकेव ॥ ३८ ॥ श्रीराम उवाच ॥ कासौ महाटवी ब्रह्मन्कुत्र वा विद्यतेऽनघ । के च ते पुरुषास्तत्र किं वा कर्तुं कृतोद्यमाः ॥ ३९ ॥ श्रीवसिष्ठ उवाचा ॥ रघुनाथ महाबाहो शृणु वक्ष्यामि तेऽखि लम् । न सा महाटवी राम दूरे नैव च ते नराः ॥ ४० ॥ येयं संसारपदवी गम्भीरा पारकोटरा । तां त्वं शून्यविकाराढ्यां विद्धि राम महाटवीम् ॥ ४१ ॥ तत्र ये ते महा काराः पुरुषाः प्रभ्रमन्ति हि । मनांसि तानि विद्धि त्वं दुःखे निपतितान्यलम् ॥ ४२ ॥ द्रष्टा योऽयमहं तेषां सविवेको महामते । मया तान्यवबोध्यन्ते विवेकेन मनांसि हि ॥ ४३ ॥ परं बोधं समासाद्य मत्प्रसादान्महामते । मनांसि कानिचित्तानि गता न्युपशमात्परम् ॥ ४४ ॥ कानिचिन्नाभिनन्दन्ति मां विवेकं विमोहतः । मत्तिरस्का रवशतः कूपेष्वेव पतन्त्यधः ॥ ४५ ॥ ये तेऽन्धकूपा गहना नरकास्ते रघूद्वह । कदली काननं स्वर्गः करञ्जो मर्त्यमण्डलम् ॥ ४६ ॥ प्रविष्टान्यन्धकूपान्तर्निर्गतानि न यानि तु । महापातकयुक्तानि नरके तानि सर्वदा ॥ ४७ ॥ यत्तत्करञ्जगहनं तत्कलत्ररसा विलम् । दुःखकण्टकसंबाधं मानुष्यं विविधैषणम् ॥ ४८ ॥ यैरहं पुंभिरबुधैर्दुर्द्विजेति तिरस्कृतः । तैर्मनोभिरनात्मज्ञैः सुविवेकस्तिरस्कृतः ॥ ४९ ॥ त्वया दृष्टोऽस्मि नष्टोऽ स्मि शत्रुर्मे त्वमिति द्रुतम् । यदुक्तं तद्विचित्तेन गलता परिदेवितम् ॥ ५० ॥ रुदितं यन्महाक्रन्दं नराणां तत्र राघव । तद्भोगजालं त्यजता मनसा रोदनं कृतम् ॥ ५१ ॥ अर्धप्राप्तविवेकस्य न प्राप्तस्यामलं पदम् । मनसस्त्यजतो भोगान्परितापो हि जायते ॥ ५२ ॥ हसितं तु यदानन्दि पुंसां तदवबोधतः । परिप्राप्तविवेकेन संतोषश्चेतसा

32 a: संमुखीकृत्य c: क्रमेणैव f: Hs. यथाबालक्ष्यताम् – 33 b: तथैवान्यः क्वचिन्नरः – 34 b: ०वसंस्तत्प्र० – 35 b: Hs. प्रत्यसंतमि० d: चिरं मया – 36 a: दुर्मतेऽत्युक्त्वा b: Lies जानाति c: Hs. उपैहि – 38 (Vasantatilakā) c: ०मनाप्त० d: Hs. ०गुल्मुक० – 39 a: Hs. क्वासौ b: दृश्यते – 40 Ohne श्री० – 41 a: सेयं संभार० b: Lies ०कोटराम् – 42 a: तत्र ते तु – 43 b: साविवेको – 44 d: ०शमं परम् – 45 a/b: Hs. ०भिनिन्दन्ति कां b: विमोहिताः – 47 b: भयानि – 48 c: दुःखं – 49 d: स्वविवेक० – 50 c: Lies तद्वि चित्तेन * d: ममतापरि० – 52 d: Hs. परितापितजायते

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

कृतः ॥ ५३ ॥ परिप्राप्तविवेकस्य त्यक्तसंसारसंस्थितेः । चेतसस्त्यजतो रूपमानन्दो हि विवर्धते ॥ ५४ ॥ यदासौ समवष्टभ्य मया दृष्टः प्रयत्नतः । तद्विवेको बलाच्चित्तमादत्त इति दर्शितम् ॥ ५५ ॥ यदात्मनि प्रहारौघैः पुमान्प्रहरति स्वयम् । तत्तत्कुकल्पनाघातैः प्रहरत्यात्मना मनः ॥ ५६ ॥ पलायते यत्पुरुषः स्वात्मानं प्रहरन्स्वयम् । स्ववासनाप्रहारेभ्यस्तत्रस्यति मनः स्वयम् ॥ ५७ ॥ संकल्पवासनाजालैः स्वैरेवायाति बन्धनम् । मनो लालामयैर्बन्धैः कोशकारः कृमिर्यथा ॥ ५८ ॥ एतत्ते कथितं राम चित्तोपाख्यानमद्भुतम् । चित्तेन वैतदालोच्य चित्तत्यागे स्थिरो भव ॥ ५९ ॥ इति मोक्षोपाये चित्तोपाख्यानम् ॥ [९] ॥ श्रीवसिष्ठ उवाच ॥ प्रबुद्धानां मनो राम ब्रह्मैवेदं हि नेतरत् । सर्वशक्ति परं ब्रह्म नित्यमापूर्णमव्ययम् ॥ १ ॥ न तदस्ति न तस्मिन्यद्विद्यते विततात्मनि । ययोल्लसति शक्त्यासौ प्रकाशं सोऽधिगच्छति ॥ २ ॥ चिच्छक्तिर्ब्रह्मणो राम शरीरेषूपलभ्यते । स्पन्दशक्तिश्च वातेषु दर्ढ्यशक्तिस्तथोपले ॥ ३ ॥ द्रवशक्तिरिवाम्भःसु दीप्तशक्तिस्तथानले । शून्यशक्तिस्तथाकाशे नाशशक्तिर्विनाशिनि ॥ ४ ॥ फलपुष्पलतापत्रशाखाविटपमूलवान् । वृक्षबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितम् ॥ ५ ॥ क्वचित्काश्चित्कदाचिच्च तस्मादुद्यन्ति शक्तयः । देशकालविचित्रत्वात्क्ष्मातलादिव शालयः ॥ ६ ॥ स आत्मा सर्वगो राम नित्योदितमहावपुः । यन्मनाङ्मननीं शक्तिं धत्ते तन्मन उच्यते ॥ ७ ॥ आदौ मनस्तदनु बन्धविमोक्षदृष्टी पश्चात्प्रपञ्चरचना भुवनाभिधाना । इत्यादिका स्थितिरियं हि गता प्रतिष्ठामाख्यायिका सुभगबालजनोदितेव ॥ ८ ॥ श्रीराम उवाच ॥ किमुच्यते मुनिश्रेष्ठ बालकाख्ययिकाक्रमः । क्रमेण कथयैतन्मे मनोवर्णनकारणम् ॥ ९ ॥ श्रीवसिष्ठ उवाच ॥ मुग्धमुग्धमतिर्बालो धात्रीं पृच्छति राघव । कांचिद्विनोदिनीं धात्रि कथयाख्यायिकामिति ॥ १० ॥ सा बालस्य विनोदाय धात्री तस्य महामते । आख्यायिकां कथयति प्रसन्नमधुराक्षरा ॥ ११ ॥ क्वचित्सन्ति महात्मानो राजपुत्रास्त्रयः शुभाः । धार्मिकाः शौर्यमुदिता अत्यन्तासति पत्तने ॥ १२ ॥ द्वौ न जातौ तथैकस्तु गर्भ एव हि न स्थितः । अथात्युत्तमलाभार्थमेकदा ते शुभास्त्रयः ॥ १३ ॥ स्वकीयाच्छून्यनगरान्निर्गता विमलाशयाः । गच्छन्तो गगने वृक्षान्ददृशुः फलशालिनः ॥ १४ ॥ तेषु विश्रम्य विश्रम्य भुक्त्वा स्वादु च तत्फलम् । ययुः सुखं विलासेन ते त्रयो राजसूनवः ॥ १५ ॥ सरित्त्रितयमासेदुस्ततः कल्लोलमालिनी । तत्रैका परिशुष्कैव मनागप्यम्बु न द्वयोः ॥ १६ ॥ परिशुष्का भृशं यासौ तस्यां ते सस्नुरादृताः । चिरं कृत्वा जलक्रीडां पीत्वा क्षीरोपमं पयः

55 d: Hs. दर्शितः – 56 c: तत्र तत्कल्पना० – 57 d: तत्र तत्र मनः – 58 c: लीला० d: कोशकार० – 59 b: ०ख्यानमुत्तमम् c: चित्तेनैवेदमालोक्य – Kolophon zu Sarga 9: इति श्रीयोगवासिष्ठसारे [!] मोक्षोपाये चित्तोपाख्यानं नाम दशमः सर्गः ॥ १० ॥ – 10.1 Ohne श्री० – 4 a: द्रवशक्तिरथोंऽभःसु b: दाहशक्ति० – 4A: यथाण्डान्तर्जले बर्हिः [lies बर्ही *] सर्वोऽस्तीदं तथात्मनि ॥ – 5 a: फलपत्रलतापुष्प० – 6 a: क्वचित्कचित्क० – 7 a: Hs. नाम – 8 (Vasantatilakā) – 10 Ohne श्री० a: कऽपि मुग्ध० c/d: कांचिद्विनोदिनीं वार्तां (sic) धात्रि संकथयाशु मे – 11 d: ०राक्षरम् – 13 c: अथाप्युत्तम० – 16 b: ०मालितम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ १७ ॥ अथासेदुर्दिनस्यान्ते भविष्यन्नगरं त्रयः । दूरश्रुतसमुल्लासखेलनागरमण्ड
लम् ॥ १८ ॥ ददृशुस्तत्र रम्याणि त्रीन्यथो भुवनानि ते । एकं निर्भित्ति निस्तम्भमनु
त्पन्नं गृहद्वयम् ॥ १९ ॥ अभित्ति मन्दिरं चारु प्रविष्टास्ते नृपात्मजाः । प्रापुः स्थाली
त्रयं तत्र तप्तकाञ्चनकल्पितम् ॥ २० ॥ तत्र खर्परतां याते द्वे एका चूर्णतां गता । जगृ
हुश्चूर्णतां यातां स्थालीं ते शुद्धबुद्धयः ॥ २१ ॥ तस्यां द्रोणत्रयं पक्वं न्यूनं द्रोणत्रयेण
तु । अन्धसस्तु द्विजैर्भुक्तं निर्मुखैर्बहुभोजिभिः । विप्रभुक्तावशेषं तु भुक्तमन्धो नृपा
त्मजैः ॥ २२ ॥ भविष्यन्नगरे तस्मिन्राजपुत्रास्त्रयो हि ते । सुखमद्य स्थिताः पुत्र मृग
याव्यवहारिणः ॥ २३ ॥ धात्र्येति कथिता राम बालायाख्यायिका शुभा । निश्चयं स
ययौ बालो निर्विचारणया धिया ॥ २४ ॥ एषा हि कथिता राम बालकाख्यायिका
तव ॥ २५ ॥ इयं संसाररचना विचारोज्झितचेतसाम् । बालाकाख्यायिकेवेत्थमेवं
स्थितिमुपागता ॥ २६ ॥ संकल्पजालकलनैव जगत्समग्रं संकल्पजालकलनानु मनो
विलासः । संकल्पमात्रमलमुत्सृज निर्विकल्पमाश्रित्य निश्चयमवाप्नुहि राम शान्तिम्
॥ २७ ॥ इत्युत्पत्तिप्रकरणे बालकाख्यायिका ॥ [१०] ॥ श्रीवसिष्ठ उवाच ॥ स्वसं
कल्पवशान्मूढो मोहमेति न पण्डितः । धिया विचारधर्मिण्या मोहसंरम्भहीनया ।
विचारय धिया सत्यमसत्यं संपरित्यज ॥ १ ॥ अबद्धो बद्ध इत्युक्त्वा किं मुधा परि
शोचसि । अनन्तस्यात्मतत्त्वस्य किं कथं केन बध्यते ॥ २ ॥ अनन्ते चिद्घनानन्दे नि
र्विकल्पैकरूपिणि । स्थिते द्वितीयस्याभावात्को बद्धः कश्च मुच्यते ॥ ३ ॥ तस्मादुल्ला
समात्रं तु मनसो बन्धतां गतः । मनःप्रशमने राम मोक्ष एवावशिष्यते ॥ ४ ॥ गो
ष्पदं योजनव्यूहः स्वासु लीलासु चेतसः । कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्प
ताम् ॥ ५ ॥ अत्र ते शृणु वक्ष्यामि वृत्तान्तमिममुत्तमम् । जागतीहेन्द्रजालश्रीश्चित्त
स्यान्तः स्थिता यथा ॥ ६ ॥ अस्त्यस्मिन्वसुधापीठे नानावनसमाकुलः । उत्तरः पाण्ड
वो नाम स्फीतो जनपदो महान् ॥ ७ ॥ अत्रास्ति लवणो नाम राजा परमधार्मिकः ।
हरिश्चन्द्रकुलोद्भूतो भूमाविव दिवाकरः ॥ ८ ॥ यद्यशःकुसुमोत्तंसपाण्डुरस्कन्धमण्ड
लाः । तत्र शैला विराजन्ते हंसाः प्रोद्धूलिता इव ॥ ९ ॥ जिह्मतां यो न जानाति न
दृष्टा येन तुच्छता । उदारता येन धृता वाचकेन यथाभिधा ॥ १० ॥ स कदाचित्स
भास्थाने सिंहासनगतोऽभवत् । सुखोपविष्टे तत्रास्मिन्राजन्यात्मविदां वरे ॥ ११ ॥
सभां विवेश साटोपं कश्चित्तामिन्द्रजालिकः । स ननाम महीपालं शिखरोदारकंध
रम् ॥ १२ ॥ उवाचोत्कंधरं भूपं स पद्ममिव षट्पदः । विलोकय विभो तावदेका

18 c/d: ०समुल्लापं खेलन्नागर० – 19 b: भवनानि – 22 c: अन्धस्ततो – 23 c: सुखमेव – 24 b: बालकाख्या० – 26 c/d: ०काख्यायिका चेत्थमवस्थिति० – 27 (Vasantatilakā) b: ०कलनात्तु – Kolophon zu Sarga 10: इति श्रीयोगवासिष्ठसारे [!] मोक्षोपाय उत्पत्तिप्रकरणे बालकाख्यायिकोपाख्यानं नाम एकादशः सर्गः ॥ ११ ॥ – 11.1 Ohne श्री० f: हि परित्यज – 2 c: Lies अनन्त आत्मतत्त्वस्तु – 4 a: Lies ०मात्रात्तु b: गतम्; lies बद्धतां* – 6 c: जागती ह्रींद्र० – 7 c: Lies उत्तराः* – 8 a: तत्रास्ति – 9 b: सर्वे शैला d: हाराः – 10 b: गृध्नुता d: Hs. करैकेन – 11 d: राजनीति० – 12 b: कश्चिन्नामेंद्र० d: Lies ०बन्धुरम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मिह खरोलिकाम् । पीठस्थ एव साश्चर्या चन्द्रोदय इवावनौ ॥ १३ ॥ इत्युक्त्वा पि
च्छिका तेन भ्रामिता भ्रमदायिनी । नानाविरचनाबीजं मायेव परमात्मनः ॥ १४ ॥
तां ददर्श महाराज तेजोरेणुविराजिताम् । सभां सैन्धवसामन्तो विवेशास्मिन्क्षणे
तदा ॥ १५ ॥ तं चैवानुजगामाश्वः सौम्यः परमवेगवान् । स तमश्वमुपादाय पार्थिवं
समुवाच ह ॥ १६ ॥ इदमुच्चैःश्रवःप्रख्यं हयरत्नं महीपते । प्रभुणा मम भूचक्रप्रभोः
संप्रहितं तव ॥ १७ ॥ राजते हि पदार्थश्रीर्महतामर्पणाच्छुभा । इत्युक्तवति तस्मिन्स
प्रत्युवाचेन्द्रजालिकः ॥ १८ ॥ सदश्वमेनमारुह्य भुवनं विहर प्रभो । अश्वमालोकया
मास तेनोक्त इति भूपतिः ॥ १९ ॥ अथानिमिषया दृष्ट्या राजा चित्रोपमाकृतिः ।
बभूवालोकयन्नश्वं लिपिकर्मार्पितो यथा ॥ २० ॥ तस्थौ मुहूर्तयुग्मं तु ध्यानासक्त
इवात्मनि । ततस्ते विस्मयापन्ना ययुश्चिन्तां सभासदः ॥ २१ ॥ संदेहसागरे मग्नाः
स्थितास्तत्र च मन्त्रिणः । प्रशशाम सभास्थानजनकोलाहलो महान् ॥ २२ ॥ विततवि
स्मियजिह्मितया तया जनतया भयमोहविषण्णया । स्तिमितचक्षुषि भूमिपतौ स्थिते
मुकुलिताब्जवनस्य धृता द्युतिः ॥ २३ ॥ श्रीवसिष्ठ उवाच ॥ मुहूर्तद्वितयेनाथ बोध
माप महीपतिः । बभूवाथ प्रबुद्धोऽसावासनोपरि कम्पितः ॥ २४ ॥ पुरोगैर्धार्यमा
णोऽथ पर्याकुलमतिर्नृपः ॥ २५ ॥ अथैनं परिपप्रच्छुः सदस्या मन्त्रिणस्तथा । समय
प्राप्तबोधं तु सादरं विनयान्विताः ॥ २६ ॥ मनस्ते निर्मलं कस्मात्संभ्रमेषु निमज्जति ।
मनो मोहमुपादत्ते महत्त्वपरिजृम्भितम् ॥ २७ ॥ अथ राजाह साश्चर्यमुन्मीलितवि
लोचनः । इदमाश्चर्यमाख्यानं शृणुताद्य सभासदः ॥ २८ ॥ पिच्छिकामहमालोक्य
जाल्मेन भ्रामितामिमाम् । अश्वमारूढवानेनमात्मना भ्रान्तमानसः । गन्तुं प्रवृत्तो
मृगयामेकोऽहमिति रंहसा ॥ २९ ॥ अनेनातिविलोलेन दूरं नीतोऽस्मि वाजिना ।
भोगाभ्यासजडेनाज्ञो मुग्धः स्वमनसा यथा ॥ ३० ॥ ततः प्रलयनिर्दग्धजगदास्पद
भीषणम् । निःपक्षि स्फारनीहारं निर्वृक्षमजलं महत् । संप्राप्तोऽहमपर्यन्तमरण्यं श्रा
न्तवाहनः ॥ ३१ ॥ तदरण्यमथासाद्य मतिर्मे खेदमागता । आसूर्यान्तं दिनं तत्र प्रक्रा
न्तं सीदता मया ॥ ३२ ॥ तदरण्यमथातीतमतिकृच्छ्रेण खेदिना । विवेकिनेव संसारः
प्राप्तवानथ जङ्गलम् ॥ ३३ ॥ जम्बूकदम्बप्रायेषु कलालापाः पतत्रिणः । यत्र स्फुर
न्ति खण्डेषु पान्थानामिव बन्धवः ॥ ३४ ॥ तत्र जम्बीरवृक्षस्य तलं संप्राप्तवानहम् ।
आलम्बिता मया तत्र स्कन्धसंसङ्गिनी लता ॥ ३५ ॥ मयि प्रलम्बमानेऽस्यां प्रयातः
स तुरंगमः । गङ्गावलम्बिनि नरे यथा दुष्कृतसंचयः ॥ ३६ ॥ चिरं दीर्घाध्वगः खिन्न

13 e/f: **साश्चर्यं चंद्रोदयमिवावनौ** – 15 a/b : **महीपालस्ते०** d: **ततः** – 16 c: **सामंतोऽश्व०** – 17 a: **इदमुचैश्रवप्रख्यं** – 20 a: **०निमेषया** – 22 c: **०स्थाने** – 23 (Drutavilambita) a: **०विस्मित०**, lies **०विस्मय०*** d: Lies **वृता*** – 24 Ohne **श्री०** b: **प्रबुबोध** – 26 b: **तदा** c: **सम्यक्प्राप्तप्रबोधं** – 27 d: **न महत्त्वविजृंभितम्** – 29 d: **भ्रांतचेतसा** f: **ऽहमतिरंहसा** – 30 b: **दूरे** – 33 c: **संसारं**; Hs. **विवेकेन च** d: **जांगलम्** – 34 d: **बांधवाः** – 35 a: **जंबीरखंडस्य** d: **०संसर्गिणी** – 37 a: **चिर०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

स्तत्र विश्रान्तवानहम् । तत्र कल्पसमा रात्रिर्मोहमग्नस्य मे गता ॥ ३७ ॥ न स्नातवा न्नार्चितवान्न तदा भुक्तवानहम् । केवलं मे गता रात्रिश्वापदां धुरि तिष्ठतः ॥ ३८ ॥ सह शीतार्तिमद्दन्तपङ्क्तिटंकारशीत्कृतैः । सार्धं तिमिरसंघातैः सा व्यतीयाय शर्वरी ॥ ३९ ॥ प्रवृत्तस्तामहं स्फारां संविहर्तुं ततः स्थलीम् ॥ ४० ॥ न किंचिद्दृश्यते तत्र भूतं जरठजङ्गले । अभिजातो गुणलवो यथा मूर्खशरीरके ॥ ४१ ॥ केवलं विगताशङ्कं खण्डभ्रमणचञ्चलाः । चीचीकुचीचीवचना विहरन्ति विहंगमाः ॥ ४२ ॥ अथाष्टभागमापन्ने व्योम्नो दिवसनायके । दृष्टा मयाथ भ्रमता दारिकौदनधारिणी ॥ ४३ ॥ तरत्तारकनेत्रां तां श्यामामधवलाम्बराम् । अहमभ्यागतस्तत्र शर्वरीमिव चन्द्रमाः ॥ ४४ ॥ मह्यमोदनमाश्वेतद्बाले बलवदापदि । देहि दीनार्तिहरणात्स्फारतां यान्ति संपदः ॥ ४५ ॥ क्षुदन्तर्महतीयं मे बाले वृद्धिमुपेयुषी । याञ्चयापि तया मह्यमित्थं दत्तं न किंचन । यत्नप्रार्थितया लक्ष्म्या यथा दुष्कृतिने धनम् ॥ ४६ ॥ केवलं चिरकालेन मय्यत्यन्तानुगामिनि । खण्डात्खण्डं निपतति च्छायाभूते पुरःस्थिते ॥ ४७ ॥ तयोक्तं हारकेयूरीं चण्डालीं विद्धि मामिति । राजन्याचनमात्रेण मत्तो नाप्नोषि भोजनम् ॥ ४८ ॥ इत्युक्तवत्या गच्छन्त्या चलन्त्या च पदे पदे । कुञ्जकेषु निगच्छन्त्या लीलावनतयोदितम् ॥ ४९ ॥ ददामि भोजनमिदं भर्ता भवसि चेन्मम । वाहयत्यत्र मे दाता पुष्करे पुष्कसः पिता ॥ ५० ॥ तस्येदमन्नं भवति भर्तृत्वे दीयते स्थिते । प्राणैरपि हि संपूज्या वल्लभाः पुरुषा यतः ॥ ५१ ॥ अथोक्ता सा मया भर्ता भवामि तव सुव्रते । केनापदि विचार्यन्ते वर्णधर्मकुलक्रमाः ॥ ५२ ॥ ततस्तयौदनादर्धं मह्यमेकं समर्पितम् । जम्बूफलरसः पीतः संभुक्तं पक्कणौदनम् ॥ ५३ ॥ विश्रान्तं च मया तत्र मोहोपहतचेतसा । मां हस्तेनाथ सादाय प्राणं बहिरिव स्थितम् ॥ ५४ ॥ दुराकृतिं दुरारम्भमाससाद भयप्रदम् । पितरं पीवराकारमवीचीमिव यातनाम् ॥ ५५ ॥ तयाहमनुषङ्गिण्या मातङ्गाय निवेदितः । अयं मम भवेद्भर्ता तात हे तव रोचताम् ॥ ५६ ॥ स तस्या बाढमित्युक्त्वा दिनान्ते समुपस्थिते । मुमोच दातावां बद्धौ कृतान्तः किंकराविव ॥ ५७ ॥ नीहाराभ्रकडारासु दिक्षु प्रोद्धूलितास्विव । वेतालबन्धनात्तस्माद्दिनान्ते चलिता वयम् ॥ ५८ ॥ क्षणेन पक्कणं प्राप्ताः संध्यायां दीर्घजङ्गलात् । विकर्तितवराहाश्वकपिकुक्कुटवायसम् । शोषार्थं प्रसृतार्द्रान्त्रतन्त्रीजालपतत्खगम् ॥ ५९ ॥ बालहस्तस्थितक्रव्यपिण्डक्कणितमक्षिकम् । संभ्रमोपहितानल्पकदलीदलपिण्डके ॥ ६० ॥ अहमास्थितवांस्तत्र नवे श्वशुरमन्दिरे ॥ ६१ ॥ श्वश्वा मे केकराक्ष्या तु

38 c/d: केवलं तु गता रात्रिः सापदां – 39 a: शीतार्तमद्० b: ०टांकार० – 40 b: संप्रवृत्तस्ततः – 42 c: चीचीकुचीति – 43 c: मया प्रभ्रमता – 44 a: तरतारक०, lies त्रसत्तारक० – 45 b: Lies ०दापदे* c/d: ०हारिण्यः स्फारितां – 46 a: Hs. मां – 47 b: ०गामिनी c: खंडे – 49 c: निषज्ञंत्या d: ०वनितयो० – 50 c/d: वाहयत्यत्र मे दांतावुद्दाले पुक्कसः पिता – 52 d: वर्णजातिकुल० – 53 d: स भुक्तः पक्कणौदनः – 54 b: मोहापहत० – 55 a: दुराचारम् d: ०वीचिमिव; lies यातना* – 57 c: दांतावाबद्धौ – 59 e: शोषार्थ० – 60 d: ०दलखंडकम्, lies ०दलपिण्डकम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तेनासृञ्ज्ञयचक्षुषा । जामातायमिति प्रोक्तं तया तदभिनन्दितम् ॥ ६२ ॥ बहुनात्र किमुक्तेन कस्मिंश्चिद्दिवसे ततः । दत्ताथ तेन सा मह्यं कुमारी भयदायिनी । सुकृष्णा कृष्णवर्णेन दुष्कृतेनेव यातना ॥ ६३ ॥ सरभसमभितोऽभिनेदुरत्र प्रसृतमहामदिरासवाः श्वपाकाः । हतपटुपटहा विलासवन्तः स्वयमिव दुष्कृतराशयो महान्तः ॥ ६४ ॥ राजोवाच ॥ ततः प्रभृति तत्राहं संपन्नः पुष्टपुष्कसः । सप्तरात्रोत्सवस्यान्ते क्रमान्मा साष्टकं गतम् ॥ ६५ ॥ पुष्पिता साथ संपन्ना स्थिता गर्भवती ततः । प्रासूत दुःखदां कन्यां विपद्दुःखक्रियामिव । सा कन्या ववृधे शीघ्रं मूर्खचिन्तेव पीवरी ॥ ६६ ॥ पुनः प्रसूता सा वर्षैस्त्रिभिः पुत्रमशोभनम् । अनर्थमिव दुर्बुद्धिराशापाशविधायकम् । पुष्कसी सा प्रसूताथ पुनरप्यर्भकं ततः ॥ ६७ ॥ तया सह समास्तत्र मया बह्व्योऽतिवाहिताः । शीतवातातपक्लेशविवशेन दशान्तरे ॥ ६८ ॥ कलत्रचिन्ताहतया धिया संदह्यमानया । दृष्टाः कष्टसमारम्भा दिशः प्रज्वलिता इव ॥ ६९ ॥ अथ गच्छति काले तु जराजर्जरितायुषि । तृणोत्थदहनज्वालासमश्मश्रुधरे मयि । अकाण्डमरणोड्डीनचण्डचण्डालमण्डलम् ॥ ७० ॥ निरन्नतृणपत्राम्बु विन्ध्यकच्छं तदा ययौ । न वर्षति घनव्राते दृष्टनष्टे व्यवस्थिते ॥ ७१ ॥ प्रौढाङ्गारगणोन्मिश्रगतौ वहति मारुते । अकाण्डमभवद्धीममुद्दामदवपावकम् ॥ ७२ ॥ शोषिताशेषगहनं भस्मशेषतृणोलपम् ॥ ७३ ॥ तस्मिंस्तदा वर्तमाने कष्टे विधिविपर्यये । जनाः केचन निष्क्रम्य गतास्तु ससुहृज्जनाः ॥ ७४ ॥ शीर्णाः केचन तत्रैव प्रविष्टा अनलं परे । केचिच्छ्वभ्रेषु पतिताः केऽपि जाता मुमूर्षवः ॥ ७५ ॥ अहं कलत्रमादाय कृच्छ्रात्तस्माद्विनिर्गतः ॥ ७६ ॥ सार्धं त्रिभिरपत्यैश्च तया च सहितः शनैः । प्राप्य तद्देशपर्यन्तं तत्र तालतरोस्तले ॥ ७७ ॥ अवरोप्य सुतान्स्कन्धात्ताननर्थानिवोल्बणान् । विश्रान्तोऽस्मि चिरश्रान्तो रौरवादिव निर्गतः ॥ ७८ ॥ अथ चण्डालकन्यायां विश्रन्तायां तरोस्तले । सुप्तायां शीतलच्छाये द्वौ समालिङ्ग्य दारकौ ॥ ७९ ॥ पुच्छको नाम तनयो ममैकः पुरतः स्थितः । अत्यन्तं वल्लभोऽस्माकं कनीयान्मौर्ख्यवानिति ॥ ८० ॥ स मामुवाच दीनात्मा बाष्पपूर्णविलोचनः । तात देह्याशु मे मांसं पातुं च रुधिरं क्षनात् ॥ ८१ ॥ पुनः पुनर्वदन्नेवं स बालस्तनयो मम । प्राणान्तिकीं दशां प्राप्तः साक्रन्दो हि पुनः पुनः ॥ ८२ ॥ तस्य तामार्तिमालोक्य मया दुःखातिभारिणा । सोढुं तामापदं तीव्रामशक्तेन हतात्मना । मरणायातिमित्राय कृतोऽन्तर्निश्चयो मया ॥ ८३ ॥ तत्र काष्ठानि संचित्य चितां रचितवानहम् । चिता चटचटास्फोटैः स्थिता मदभिकाङ्क्षिणी ॥ ८४ ॥

63 c: **दत्ता च** f: Hs. **याचना** – 64 (Puṣpitāgrā) a: **०मभितो विनेदुरत्र** – 65 b: **०पुक्कसः** – 66 a: **सापि** f: **मूर्खे चिनतेव** – 67 e: **पुक्कसी** – 68 b: **मम** – 70 Nach c/d zusätzlich: **तत्र दुर्भिक्षमासीच्च परिशुष्कतृणं महत् ।** (70A) e/f: Lies **०ड्डीनं***, **चण्डं*** und **०मण्डले** – 71 b: **विंध्यकक्षं** d: **दृष्टनष्टे क्वचिज्जने** – 72 a: **प्रौढांगारगणे व्योम्नि** – 74 c: **केचिद्विनिष्क्रम्य** d: **गतास्ते** – 75 b: Hs. **पुरे** – 77 a: **०पत्यैस्तु** – 78 c: Lies **चिरं** (vgl. 13.85); **ऽस्मि ततस्तत्र** – 80 a: **पृच्छको** b: **ममैष** c: **मुग्धवागिति** – 81 b: **०पूरितलोचनः** c: Hs. **पातं**; lies **पानं***? – 84 b: **चितामाचितवानहम्**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तस्यां तु यावदात्मानं चितायां निक्षिपाम्यहम् । चलितोऽस्मि जवात्तावदस्मात्सिंहास
नान्नृपः । ततस्तूर्यनिनादेन जयशब्देन बोधितः ॥ ८५ ॥ इति शाम्बरिकेणायं मोह
उत्पादितो मम । अज्ञानेनेव जीवस्य दशाशतसमन्वितः ॥ ८६ ॥ इत्युक्तवति राजेन्द्रे
लवणे भूरितेजसि । अन्तर्धानं जगामासौ तत्र शाम्बरिकः क्षणात् ॥ ८७ ॥ अथेदमू
चुस्ते सभ्या विस्मयोत्फुल्ललोचनाः । नायं शाम्बरिको देव यस्य नास्ति धनैषणा ॥
८८ ॥ दैवी काचन मायेयं संसारस्थितिबोधिनी । मनोविलासः संसार इति यस्यां
प्रतीयते ॥ ८९ ॥ सर्वशक्तेरनन्तस्य विलासो हि मनोजगत् ॥ ९० ॥ इति मोक्षोपाये
शाम्बरिकोपाख्यानम् ॥ [११] ॥ श्रीवसिष्ठ उवाच ॥ यत्कृतं मनसा नाम तत्कृतं वि
द्धि राघव । यत्त्यक्तं मनसा नाम तत्त्यक्तं विद्धि राघव ॥ १ ॥ यस्य चाचलतां यातं
मनो मननवर्जितम् । अनुत्तमपदेऽनासौ ध्यानेनानुगतोऽनघ ॥ २ ॥ संयमान्मनसः
शान्तिमेति संसारसंभ्रमः । मन्दरेऽस्पन्दतां याते यथा क्षीरमहार्णवः ॥ ३ ॥ मनसो
वृत्तयो या या भोगसंकल्पविभ्रमैः । संसारविषवृक्षाणां ता एवाङ्कुरपङ्क्तयः ॥ ४ ॥
अस्य चित्तमहाव्याधेश्चिकित्सायां वरौषधम् । स्वायत्तं शृणु वक्ष्यामि सुसाध्यं स्वादु
निश्चितम् ॥ ५ ॥ त्यजन्नभिमतं वस्तु यस्तिष्ठति निरामयः । जितमेव मनस्तेन बाह्य
प्रसरमुज्झता ॥ ६ ॥ स्वायत्तमेकान्तहितं स्वेप्सितत्यागवेदनम् । यस्य दुष्करतां यातं
धिक्तं पुरुषकीटकम् ॥ ७ ॥ शास्त्रसंगमधीरेण चिन्तातप्तमतापिना । छिन्द्धि त्वमय
सैवायो मनसैव मनो मुने ॥ ८ ॥ स्वपौरुषैकसाध्येन स्वेप्सितत्यागरूपिणा । मनःप्र
शममात्रेण विना नास्ति शुभा गतिः ॥ ९ ॥ सर्वं सर्वगतं शान्तं ब्रह्म संपद्यते तदा ।
असंकल्पनशस्त्रेण छिन्नं चित्तं गतं यदा ॥ १० ॥ तां महत्पदवीमेकां कामप्यधिवसं
श्चिरम् । चित्तं चिद्धक्षितं कृत्वा चित्तादपि परो भव ॥ ११ ॥ भव भावनया मुक्तो
युक्तः परमया धिया । धारयात्मानमव्यग्रो ग्रस्तं चित्तं ततः परम् ॥ १२ ॥ परपौरुष
माश्रित्य नीत्वा चित्तमचित्तताम् । तां महापदवीमेहि यत्र नाशा न चेतरत् ॥ १३ ॥
अनुद्वेगः श्रियो मूलमनुद्वेगात्प्रवर्तते । जन्तोर्मनोजयो येन त्रिलोकीविजयस्तृणम् ॥
१४ ॥ यदि रम्यमरम्यत्वे त्वया संविदितं चिदा । छिन्नान्येव तदङ्गानि चित्तस्येति
मतिर्मम ॥ १५ ॥ इदं सोऽहमिदं तन्म एतावन्मात्रकं मनः । तदभावनमात्रेण दात्रे
णेव विलूयते ॥ १६ ॥ छिन्नाभ्रमजलं व्योम्नि यथा शरदि लूयते । वातेनाकल्पनेनैव
तथान्तर्धूयते मनः ॥ १७ ॥ कल्पान्तपवना वान्तु यान्तु चैकत्वमर्णवाः । तपन्तु

86 c: Hs. अज्ञानेनैव – 88 a: अत्रेदमू० – 89 c: मनोविवर्तः – Kolophon zu Sarga 11: इति श्रीयोगवा
सिष्ठे मोक्षोपाये शांम्बरिकोपाख्यानं नाम द्वादशः सर्गः ॥ १२ ॥; Hs. शाम्बरीको – 12.1 Ohne श्री०
c/d: मनसा तावत्तत्त्यक्तं – 2 a: यस्याचपलतां d: Hs. ०तो(ऽ)नयः; lies ०तोऽनघः*? – 3 b: ०विभ्रमः –
4 b: ०विभ्रमाः – 5 b: परौषधम् – 6 d: बाह्यं – 8 a: ०संगमतीक्ष्णेन c: त्वमायसेनायो; lies त्वमयसेवा
यो* d: मुने मनः – 10 d: Hs. तदा – 11 a: महापदवी० – 13 a: परं d: यत्र नासि – 14A: ध्यानतो
हृदयाकाशे चिति चिच्चक्रधारया । मनो मारय निःशङ्कं ततो बध्नन्ति नाधयः ॥ – 15 b: विदा – 16 a: अयं
सोऽहमिदं तन्मे – 17 a: छिन्नाभ्रमंडलं b: धूयते c: ०नेनैवं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

द्वादशादित्या नास्ति निर्मनसः क्षितिः ॥ १८ ॥ असंकल्पनमात्रैकसाध्ये सकलसि
द्धिदे । असंकल्पातिसाम्राज्ये तिष्ठावष्टभ्य तत्पदम् ॥ १९ ॥ संकल्पमात्रविभवेन
मनोऽरिणा त्वं निर्जीयसे विविधवस्तुनिदर्शनेन । संतोषमात्रविभवेन मनो विजित्य
नित्योदितेन सुखमेहि निरीप्सितेन ॥ २० ॥ परमपावनया हिमशीतया समतया मत
यात्मविदामपि । शमितया मितयान्तरहंतया यदवशिष्टमृतं पदमस्तु तत् ॥ २१ ॥
श्रीवसिष्ठ उवाच ॥ न हि चञ्चलताहीनं मनः क्वचन दृश्यते । चञ्चलत्वं मनोधर्मो
वह्नेर्धर्मो यथोष्णता ॥ २२ ॥ यैषा हि चञ्चला स्पन्दशक्तिश्चित्तत्त्वसंस्थिता । तां वि
द्धि मानसीं शक्तिं जगदाडम्बरात्मिकाम् ॥ २३ ॥ यत्तु चञ्चलताहीनं तन्मनो मृतमु
च्यते । तदेव च तपःशास्त्रं सिद्धान्तो मोक्ष उच्यते ॥ २४ ॥ तस्य चञ्चलता यैषा त्व
विद्या राम सोच्यते । वासनापरनाम्नीं तां विचारेण विनाशय ॥ २५ ॥ अविद्यया
वासनया तयान्तश्चित्तसत्तया । विलीनया त्यागवशात्परं श्रेयोऽधिगम्यते ॥ २६ ॥
यत्तत्सदसतोर्मध्यं यन्मध्यं चित्तजाड्ययोः । तन्मनः प्रोच्यते राम द्वयदोलायिता
कृति ॥ २७ ॥ जाड्यानुसंधानधृतं जाड्यात्मकतयेद्धया । चेतो जडत्वमायाति दृढा
भ्यासवशेन हि ॥ २८ ॥ विबोधैकानुसंधानाच्चिदंशात्मतया मनः । तेनैकतामुपाया
ति दृढाभ्यासवशादिह ॥ २९ ॥ पौरुषेण प्रयत्नेन तस्मिन्नेव पदे मनः । योज्यते तत्पदं
प्राप्य भवत्यभ्यासतो हि तत् ॥ ३० ॥ अतः पौरुषमाश्रित्य चित्तमाक्रम्य चेतसा ।
विशोकं पदमालम्ब्य निरातङ्कः स्थिरो भव ॥ ३१ ॥ मन एव समर्थं हि मनसो दृढ
निग्रहे । अराजा कः समर्थो हि राज्ञो राघव निग्रहे ॥ ३२ ॥ नृणां ग्रहगृहीतानां संसा
रार्णवपातिनाम् । आवर्तैरूह्यमानानां दूरं स्वमन एव नौः ॥ ३३ ॥ मनसैव मनश्छि
त्त्वा पाशं परमबन्धनम् । भवादुत्तारयात्मानं नासावन्येन तार्यते ॥ ३४ ॥ ययोदेति
मनोनाम्नी वासना वासितान्तरा । तां तां परिहरेत्प्राज्ञस्ततोऽविद्याक्षयो भवेत् ॥ ३५
॥ भोगौघवासनां त्यक्त्वा त्यज त्वं भोगवासनाम् । भावाभावौ ततस्त्यक्त्वा निर्वि
कल्पः सुखी भव ॥ ३६ ॥ एष एव मनोनाशस्त्वविद्यानाश एव च । यद्यत्संवेद्यते किं
चित्तत्रास्थापरिवर्जनम् ॥ ३७ ॥ अनास्थैव हि निर्वाणं दुःखमास्थापरिग्रहः । स्वेनैषा
वै प्रयत्नेन पुंसः संपद्यते क्षणात् ॥ ३८ ॥ अविद्याऽविद्यमानैव नष्टसंज्ञेषु विद्यते ।
नाम्नैवाङ्गीकृताभावा सम्यक्प्रज्ञस्य सा कुतः ॥ ३९ ॥ श्रीराम उवाच ॥ अविद्यावि
भवप्रोत्थं निबिडं पुरुषस्य हि । नश्यत्यान्ध्यं कथमिदं भूयोऽपि भगवन्वद ॥ ४० ॥

18 d: **क्षतिः** – 19 d: **तिष्ठावष्टब्धतत्पदः** – 20 (Vasantatilakā) b: Hs. **०विदर्शनेन** – 21 (Drutavilambita) b: Lies **०विदामति** *; Hs. **समतयात्मविदामतिशीतया** d: **०शिष्टमजं** – 22 Ohne **श्री०** a: Hs. **तेन हंचलता०**; lies **नेह** * b: **विद्यते** – 24 b: **मनोऽमृत०** c/d: Lies **०शास्त्रसिद्धान्तो** * – 25 d: Hs. **विनाशाय विनाशय** – 27 b: Lies **चित्त्व०** * d: Hs. **द्वयलोलायताकृति** – 28 a: **०हृतं** – 29 c: **चिदेकता०** – 30 c: Lies **यत्पदं** d: **यत्** – 32 c/d: **किं समर्थः स्याद्राज्ञो** – 33 a: **तृण्णाग्राह०** d: **दूरे स्वं मन** – 35 a: Lies **यायोदेति** * – 36 a: **भोगैकवासनां** b: **भेदवासनाम्** – 37 c: **संविदितं** d: **तत्रास्याः** – 38 c/d: **अनेनैव प्रयत्नेन ब्रह्म संपद्यते क्षणात्** – 39 b: **नष्टप्रज्ञेषु** c: **०कृताकारा**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

श्रीवसिष्ठ उवाच ॥ तावत्संसारभृगुषु स्वात्मना सह देहिनम् । आन्दोलयति नीरन्ध्र
दुःखकण्टकशालिषु ॥ ४१ ॥ अविद्या यावदस्यास्तु नोत्पन्ना क्षयकारिणी । स्वयमा
त्मावलोकेच्छा मोहसंक्षयदायिनी ॥ ४२ ॥ अस्याः परं प्रपश्यन्त्या आत्मनाशः प्र
जायते । दृष्टे सर्वगते बोधे स्वयं ह्येषा विलीयते ॥ ४३ ॥ इच्छामात्रमविद्येयं तन्नाशो
मोक्ष उच्यते । स चासंकल्पमात्रेण सिद्धो भवति राघव ॥ ४४ ॥ मनागपि मनोव्यो
म्नि वासनारजनीक्षये । कालिका तनुतामेति चिदादित्यप्रकाशनात् ॥ ४५ ॥ श्रीराम
उवाच ॥ यावत्किंचिदिदं दृश्यं साविद्या क्षीयते च सा । आत्मभावनया ब्रह्मन्नात्मा
सौ कीदृशः स्मृतः ॥ ४६ ॥ श्रीवसिष्ठ उवाच ॥ चेत्यानुपातरहितं सामान्येन च सर्व
गम् । यच्चित्तत्त्वमनाख्येयं स आत्मा परमेश्वरः ॥ ४७ ॥ सर्वं च खल्विदं ब्रह्म नित्यं
चिद्घनमक्षयम् । कल्पनास्य मनोनाम्नी विद्यते न हि काचन ॥ ४८ ॥ न जायते न
म्रियते किंचिदत्र जगत्त्रये । न च भावविकाराणां सत्ता क्वचन विद्यते ॥ ४९ ॥ केवलं
केवलाभासं सर्वसामान्यामक्षतम् । चेत्यानुपातरहितं चिन्मात्रमिह विद्यते ॥ ५० ॥
तस्मिन्नित्ये तते शुद्धे चिन्मात्रे निरुपद्रवे । शान्ते ब्रह्मसमाभोगे निर्विकारोदितात्म
नि ॥ ५१ ॥ यैषा स्वभावानुमितं स्वयं संकल्प्य धावति । चिच्चेत्यं स्वयमम्लाना सा
म्लाना मन उच्यते ॥ ५२ ॥ एकस्मात्सर्वगाद्देवात्सर्वशक्तेर्महात्मनः । विभागकलना
शक्तिर्लहरीवोत्थिताम्भसः ॥ ५३ ॥ अतः संकल्पसिद्धेयं संकल्पेनैव नश्यति । येनैव
जाता तेनैव वह्निज्वालेव वायुना ॥ ५४ ॥ अहं ब्रह्मेति संकल्पात्सुदृढान्मुच्यते मनः
॥ ५५ ॥ कृशोऽतिदुःखी बद्धोऽहं हस्तपादादिमानहम् । इति भावानुरूपेण व्यवहा
रेण बध्यते ॥ ५६ ॥ नाहं दुःखी न मे देहो बन्धः कोऽस्यात्मनः स्थितः । इति भावा
नुरूपेण व्यवहारेण मुच्यते ॥ ५७ ॥ नाहं मांसं न चास्थीनि देहादन्यः परो ह्यहम् ।
इति निश्चयवानन्तः क्षीणाविद्यो विमुच्यते ॥ ५८ ॥ कल्पितैवमविद्येयमनात्मन्या
त्मभावना । पुरुषेणाप्रबुद्धेन न प्रबुद्धेन राघव ॥ ५९ ॥ मनो यदनुसंधत्ते तत्सर्वेन्द्रि
यवृत्तयः । क्षणात्संपादयन्त्येता राजाज्ञामिव मन्त्रिणः ॥ ६० ॥ परं पौरुषमाश्रित्य
यत्नात्परमया धिया । भोगेच्छाभावनाचिन्तां समूलामलमुद्धरेत् ॥ ६१ ॥ मम पुत्रा
मम धनमयं सोऽहमिदं मम । इतीयमिन्द्रजालेन वासनैव विवल्गति ॥ ६२ ॥ मा
भवाज्ञो भव ज्ञस्त्वं जहि संसारवासनाम् । अनात्मन्यात्मभावेन किमज्ञ इव रोदिषि
॥ ६३ ॥ कस्तवायं जडो मूको देहो भवति राघव । यदर्थं सुखदुःखाभ्यामवशः परि
भूयसे ॥ ६४ ॥ अहो नु चित्रं यत्सत्यं ब्रह्म तद्विस्मृतं नृणाम् । यदसत्यमविद्याख्यं

41 Ohne श्री° b: देहिनाम् d: °शाखिषु – 43 a/b: प्रपश्यंत्याः स्वात्म° – 44 c: °शस्त्रेण – 47 Ohne श्री° – 48 b: °मव्ययम् c: Folgt Le (Hs. entstellt: अकल्पनास्या मनो°); कल्पनान्या – 50 b: °क्षयम् – 51 c: समसमाभोगे – 52 a: स्वभावातिगतं d: मननान्मन – 53 a: एतस्मा° c: °कल्पना° – 55 a: सर्वं ब्रह्मेति Vor a/b zusätzlich: नाहं ब्रह्मेति संकल्पात्सुदृढाद्बध्यते मनः । (55A) – 57 b: कस्यात्मनः – 58 a: न वा° b: परोऽस्म्यहम् – 61 c/d: भोगाशाभावनां चित्तात्समूलामेवमुद्धरेत् – 62 d: वासनैवाधिव ल्गति

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तत्पुरः परि वल्गति ॥ ६५ ॥ तिष्ठतस्तव कर्येषु मास्तु रागानुरञ्जना । स्फटिकस्येव
चित्राणि प्रतिबिम्बानि गृह्णतः ॥ ६६ ॥ श्रीवाल्मीकिरुवाच ॥ एवमुक्तो भगवता व
सिष्ठेन महात्मना । विकासितान्तःकरणो रामो गिरमथाददे ॥ ६७ ॥ श्रीराम उवाच
॥ अहो नु चित्रं पद्मोत्थैर्बद्धास्तन्तुभिरद्रयः । अविद्यमाना या विद्या तया विश्वं खि
लीकृतम् ॥ ६८ ॥ इदं तद्वज्रतां यातं तृणमत्र जगत्त्रये । अविद्ययापि यद्ब्रह्म सर्गो नि
बिडबन्धनम् ॥ ६९ ॥ अन्यच्च संशयो मेऽयं महात्मन्हृदि वर्तते । लवणोऽसौ महा
भागः किं नामापदमाप्तवान् ॥ ७० ॥ श्रीवसिष्ठ उवाच ॥ अत्र ते शृणु वक्ष्यामि वृत्ता
न्तमिवमुत्तमम् । लवणोऽसौ यथा यातश्चण्डालत्वं मनोभ्रमात् ॥ ७१ ॥ मनः कर्तृ
फलं भुङ्क्ते न शरीरं क्रियाफलम् । येनैतद्बुध्यसे नूनं तदाकर्णय राघव ॥ ७२ ॥ हरिश्च
न्द्रकुलोत्थेन लवणेन पुरानघ । एकान्तैकोपविष्टेन चिन्तितं मनसा चिरम् ॥ ७३ ॥
पितामहो मे सुमहान् राजसूयस्य याज्ञकः । अहं तस्य कुले जातस्तं यजे मनसा मखम्
॥ ७४ ॥ इति संचिन्त्य मनसा कृत्वा संभारमाद्दतः । राजसूयस्य दीक्षायां प्रविवेश
महीपतिः ॥ ७५ ॥ ऋत्विजश्चार्चयामास पूजयामास सन्मुनीन् । देवानामन्त्रयामास
ज्वालयामास पावकम् ॥ ७६ ॥ अथेत्थं यजमानस्य मनसोपवनान्तरे । ययौ संवत्स
रः साग्रो देवर्षिद्विजपूजया ॥ ७७ ॥ भूतेभ्यो द्विजपूर्वेभ्यो दत्त्वा सर्वस्वदक्षिणाम् ।
व्यबुध्यत दिनस्यान्ते स्व एवोपवने नृपः ॥ ७८ ॥ एवं स लवणो राजा राजसूयमवा
प्तवान् । मनसैव हि पुष्टेन युक्तस्तस्य फलेन च ॥ ७९ ॥ अतश्चित्तं परं विद्धि भोक्तारं
सुखदुःखयोः । शृणु शाम्बरिकस्याथ वृत्तान्तं रघुनन्दन ॥ ८० ॥ यदा शाम्बरिकः
काले संप्राप्तो लावणीं सभाम् । तदाहमवसं तत्र तत्प्रत्यक्षेण दृष्टवान् ॥ ८१ ॥ अहं
सभ्यैस्ततस्तत्र गते शम्बरकारिणि । किमेतदिति यत्नेन पृष्टश्च पृथिवीभुजा ॥ ८२ ॥
चिन्तयित्वा मया दृष्ट्वा तत्र तत्कथितं ततः । शृणु तत्ते प्रवक्ष्यामि राम शाम्बरिके
हितम् ॥ ८३ ॥ राजसूयस्य कर्तारो ये हि ते द्वादशाब्दिकम् । अपि दुःखं प्राप्नुवन्ति
नानाकारदशामयम् ॥ ८४ ॥ ततः शक्रेण गगनाद्दुःखाय लवणस्य सः । प्रहितो देव
दूतो हि राम शाम्बरिकाकृतिः ॥ ८५ ॥ राजसूयक्रियाकर्तुस्तस्य दत्त्वा महापदम् ।
अगच्छत्स नभोमार्गं सुरसिद्धनिषेवितम् ॥ ८६ ॥ श्रीवसिष्ठ उवाच ॥ अथापरं प्रव
क्ष्यामि शृणु राम याथातथम् । अज्ञानभूः सप्तपदा ज्ञभूः सप्तपदैव हि ॥ ८७ ॥ पदा

67 Ohne श्री० – 68 a: अहो विचित्रं d: Hs. खली० – 69 c/d: अविद्ययापि यन्नाम सर्गो निगडबंधनः – 70 a: संशयोऽयं मे c: Hs. महाभाग – 71 Ohne श्री० b: Lies वृत्तान्तमिदमु०* (entgegen 11.6); वृत्तां तमिममद्भुतम् c: यथा जात० – 72 b: Hs. शरीरे क्रियाफले – 74 b: याजकः d: Hs. यजे – 75 b: संभारमग्रतः – 76 ab: ऋत्विजश्चाह्वयामास सन्मुखीकृत्य देवताः – 77 a: तस्येत्थं b: Hs. entstellt (मनसावचसांतरे) – 78 c: Hs. विबुध्य तद्दिन० – 79 c: जुष्टेन – 80 a: Hs. अथ चित्तं नरं Nach a/b zusätzlich: जन्मनः [lies तन्मनः*] पावनोपाये सत्ये योजय राघव । (80A) – 82 b: शांबर० c/d: यत्तेन पृष्टेन – 83 b: वचः (für ततः) – 84 c: अतिदुःखं – 85 a: अतः – 86 LN 2. Aufl.: Nach a/b nochmals 84cd (86A). c: अगमत्स – 87 Ohne श्री० a: अतः परं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

न्तराण्यसंख्यानि भवन्त्यन्योन्यमेतयोः । एते प्रतिपदं बद्धमूले स्वं फलतः फलम् ॥
८८ ॥ स्वरूपावस्थितिर्मुक्तिस्तद्भ्रंशोऽहंत्ववेदनम् । एतत्संक्षेपतः प्रोक्तं तज्ज्ञत्वाज्ञत्व
लक्षणम् ॥ ८९ ॥ शुद्धसन्मात्रसंवृत्तेः स्वरूपान्न चलन्ति ये । रागद्वेषोदयाद्भावात्तेषां
नाज्ञत्वसंभवः ॥ ९० ॥ यत्स्वरूपपरिभ्रंशश्चेत्यार्थं चितिमज्जनम् । एतस्मादपरो मोहो
न भूतो न भविष्यति ॥ ९१ ॥ अर्थादर्थान्तरं चित्ते याति मध्ये तु या स्थितिः । निर
स्तमननाकारा स्वरूपस्थितिरुच्यते ॥ ९२ ॥ संशान्तसर्वसंकल्पा या शिलान्तरिव स्थि
तिः । जाड्यनिद्राविनिर्मुक्ता सा स्वरूपस्थितिः स्मृता ॥ ९३ ॥ अहंतांशक्षये शान्ते
भेदे निःस्पन्दचित्तता । अजडा या प्रकचति तत्स्वरूपमिति स्थितम् ॥ ९४ ॥ बीजजा
ग्रत्तथा जाग्रन्महाजाग्रत्तथैव च । जाग्रत्स्वप्नस्तथा स्वप्नः स्वप्नजाग्रत्सुषुप्तकम् ॥ ९५
॥ इति सप्तविधो मोहः पुनरेष परस्परम् । श्लिष्टो भवत्यनेकाख्यः शृणु लक्षणमस्य तु ॥
९६ ॥ प्रथमं चेतनं यत्स्यादनाख्यं निर्मलं चितः । भविष्यच्चितिजीवादिनामशब्दा
र्थभाजनम् ॥ ९७ ॥ बीजरूपं स्थितं जाग्रद्बीजजाग्रत्तदुच्यते । एषा ज्ञप्तेर्नवावस्था त्वं
जाग्रत्संस्थितिं शृणु ॥ ९८ ॥ नवप्रसूतस्य परादयं चाहमिदं मम । इति यः प्रत्ययः
स्वच्छस्तज्जाग्रत्प्रागभावनात् ॥ ९९ ॥ अयं सोऽहमिदं तन्म इति जन्मान्तरोदितः ।
पीवरः प्रत्ययः प्रोक्तो महाजाग्रदिति स्फुरन् ॥ १०० ॥ अरूढमथ वा रूढं सर्वथा तन्म
यात्मकम् । यज्जाग्रतो मनोराज्यं जाग्रत्स्वप्नः स उच्यते ॥ १०१ ॥ द्विचन्द्रशुक्तिका
रूप्यमृगतृष्णादिभेदतः । अभ्यासं जाग्रतः प्राप्य स्वप्नोऽनेकविधो भवेत् ॥ १०२ ॥
अल्पकालं मया दृष्टमेतन्नैवेति यत्र हि । परामर्शः प्रबुद्धस्य स स्वप्न इति कथ्यते ॥
१०३ ॥ चिरसंदर्शनाभावादप्रफुल्लबृहद्वपुः । चिरकालानुवृत्तस्तु स्वप्नो जाग्रदिवोसि
तः ॥ १०४ ॥ स्वप्नजाग्रदिति प्रोक्तो जाग्रत्यपि परिस्फुरन् ॥ १०५ ॥ षडवस्थापरि
त्यागे जडा जीवस्य या स्थितिः । भविष्यद्दुःखबोधाढ्या सौषुप्ती सोच्यते गतिः । जग
त्तस्यामवस्थायामन्तस्तमसि लीयते ॥ १०६ ॥ सप्तावस्था इति प्रोक्ता मयाज्ञानस्य रा
घव । एकैका शतशाखात्र नानाविभवरूपिणी ॥ १०७ ॥ श्रीवसिष्ठ उवाच ॥ इमां
सप्तपदां ज्ञानभूमिमाकर्णयानघ । नानया ज्ञातया भूयो मोहपङ्के निमज्जसि ॥ १०८
॥ वदन्ति बहुभेदेन वादिनो योगभूमिकाः । मम त्वभिमता नूनमिमा एव शुभप्रदाः
॥ १०९ ॥ अवबोधे विदुर्ज्ञानं तदिदं साप्तभूमिकम् । मुक्तिस्तु ज्ञेयमित्युक्ता भूमिका
सप्तकात्परम् ॥ ११० ॥ ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता । विचारणा द्वि

88 b: Hs. भवन्त्यन्यान्यथैतयोः c/d: Lies बद्धमूला – 89 c: एतत्संक्षिप्य तत्प्रोक्तं d: तज्ज्ञात्वा ज्ञ० – 90 a: ०संवित्तेः c/d: रागद्वेषादयो भावास्तेषां – 91 b: ०श्चेत्यार्थ० – 93 b: शिलावदवस्थितिः – 94 a: अहं तांशे क्षते b: c: निष्पन्द० – 95 d: Hs. सुप्तजाग्र० – 96 b: पुनरेव d: शृणु तस्य च लक्षणम् – 99 d: Hs. ०ग्रतः प्राग्भावना – 100 a: Hs. इदं सो(ऽ)हमिदं – 101 a: Hs. आरूढमथवारूढं d: Hs. जाग्रत्सुप्तः – 103 a/b: दृष्टमेतन्नो वेति – 104 c: ०वृत्तश्च – 106 c/d: Hs. ०बोधाढ्यो सुषुप्ती f: ०मंधे तमसि – 107 a: स्वप्नावस्था c: शतसंख्यात्र – 108 Ohne श्री० d: निमज्जति – 109 b: ज्ञानिनो d: सुखप्रधाः – 110 a: अव बोधं d: भूमिका भूमिकांतरे

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तीया तु तृतीया तनुमानसा ॥ १११ ॥ सत्तापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।
पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता ॥ ११२ ॥ आसामन्ते स्थिता मुक्तिस्तस्यां
भूयो न शोचति । एतासां भूमिकानां त्वमिदं निर्वचनं शृणु ॥ ११३ ॥ स्थितः किं
मूढ एवासि प्रेक्ष्येयं शास्त्रसज्जनैः । वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ॥ ११४
॥ शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकम् । सदाचारप्रवृत्तिर्या प्रोच्यते सा विचार
णा ॥ ११५ ॥ विचारणाशुभेच्छाभ्यामिन्द्रियार्थेष्वरक्तता । यत्र सा तनुताभावात्प्रो
च्यते तनुमानसा ॥ ११६ ॥ भूमिकात्रितयाभ्यासाच्चित्तेऽर्थविरतेर्वशात् । सत्त्वात्मनि
स्थितिः शुद्धे सत्तापत्तिरुदाहृता ॥ ११७ ॥ दशाचतुष्टयाभ्यासादसंसङ्गफलाय च ।
रूढसत्त्वचमत्कारा प्रोक्तासंसक्तिनामिका ॥ ११८ ॥ भूमिकापञ्चकाभ्यासादात्मा
रामतया दृढम् । आभ्यन्तराणां बाह्यानां पदार्थानामभावनात् ॥ ११९ ॥ परप्रयुक्तेन
चिरं प्रयत्नेनात्मबोधनम् । पदार्थभावनी नाम षष्ठी संजायते गतिः ॥ १२० ॥ भूमि
षट्कचिराभ्यासाद्भेदस्यानुपलम्भतः । यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः ॥
१२१ ॥ एषा हि जीवन्मुक्तेषु तुर्यावस्थेह विद्यते । विदेहमुक्तविषयं तुर्यातीतमतः परम्
॥ १२२ ॥ ये हि राम महाभागाः सप्तमीं भूमिकां गताः । आत्मारामममहात्मानस्ते
महत्पदमागताः ॥ १२३ ॥ जीवन्मुक्ता न सज्जन्ति सुखदुःखरसस्थितौ । प्राकृतेनार्य
कार्येण किंचित्कुर्वन्ति वा न वा ॥ १२४ ॥ पार्श्वस्थबोधिताः सन्तः पूर्वाचारक्रमाग
तम् । आचारमाचरन्त्येव सुप्तबुद्धवदक्षताः ॥ १२५ ॥ भूमिकासप्तकं त्वेतद्धीमतामेव
गोचरः ॥ १२६ ॥ प्राप्ता ज्ञानदशामेतां पशुम्लेच्छादयोऽपि च । सदेहा वाप्यदेहा वा
ते मुक्ता नात्र संशयः ॥ १२७ ॥ ज्ञप्तिर्हि ग्रन्थिविच्छेदस्तस्मिन्सति हि मुक्तता । मृग
तृष्णाम्बुबुद्ध्यादिशान्तिमात्रात्मकस्त्वसौ ॥ १२८ ॥ ये तु मोहार्णवात्तीर्णास्ते प्राप्ताः
पावनं पदम् । ते स्थिता भूमिकास्वासु स्वात्मलाभपरायणाः ॥ १२९ ॥ एतासु भूमिषु
जयन्ति हि ये महान्तो वन्द्यास्त एव हि जितेन्द्रियशत्रवस्ते । सम्राट्स्वराडपि च यत्र
तृणायते तत्सारं पदं जगति ते समवाप्नुवन्ति ॥ १३० ॥ मनःप्रशमनोपायो योग इत्य
भिधीयते । सप्तभूमिः स विज्ञेयः कथितास्ताश्च भूमिकाः ॥ १३१ ॥ एतासां भूमिका
नां तु गम्यं ब्रह्माभिधं पुरम् । त्वत्ताहंतात्मता यत्र परता नास्ति काचन ॥ १३२ ॥
न क्वचिद्भेदकलना न भावाभावरञ्जना । सर्वशान्ति निरालम्बं व्योमस्थं शाश्वतं शि
वम् ॥ १३३ ॥ अनामयमनाभासमनामकमकारणम् । न सन्नासन्न मध्यान्तं न सर्वं
सर्वमेव च ॥ १३४ ॥ मनोवचोभिरग्राह्यं शून्याच्छून्यं सुखात्सुखम् । असंवेदनमा

112 a: **सत्वापत्ति॰** c: Hs. **पदार्थभावनी**, lies **पदार्थाभाविनी*** – 114 a/b: **किं मूढ इव तिष्ठामि प्रेक्षेऽहं** – 115 a: **॰संपर्को** – 117 b: **॰च्चित्ताऽर्थ॰** d: **सत्वापत्ति॰** – 118 b: **॰दसंसर्गफलाय** – 119 b: **॰त्स्वात्मा राम॰** – 120 a: Hs. **पराप्र॰** b: **प्रयत्नेनाव॰** c: Lies **पदार्थाभाविनी*** – 121 b: **॰पलंभनः** – 123 c: **आत्मारामा** – 124 c: Hs. **प्रकृ॰**; **प्राकृतेनार्थ॰** d: Hs. **मानवाः** – 126 b: **गोचरम्** – 127 b: **ये** (für **च**) c: **वा विदेहा** – 129 b: **परमं** – 130 (Vasantatilakā) – 131 **वसिष्ठ उवाच ॥** – 132 b: **परम्** – 133 a: Hs. **॰ललना** c: **सर्वं शान्तं** – 134 b: **॰मनात्मक॰** 135 cd: Text fraglich. c: **असंवेदनमाशांत॰**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सीत्त्वमात्मवेदनमाततम् ॥ १३५ ॥ श्रीवसिष्ठ उवाच ॥ एतत्ते कथितं राम ज्ञानं वै
सप्तभूमिकम् । त्वं माहात्म्यमविद्यायाः पुनः शृणु रुघूद्वह ॥ १३६ ॥ लवणोऽसौ मही
पालस्तदा दृष्ट्वा तथा भ्रमम् । द्वितीये दिवसे गन्तुं प्रवृत्तस्तां महाटवीम् ॥ १३७ ॥ यत्र
दृष्टं महादुःखमरण्यानीं स्मरामि ताम् । चित्तादर्शगतां विन्ध्ये कदाचिल्लभ्यतेऽपि सा
॥ १३८ ॥ इति निश्चित्य सचिवैः स ययौ दक्षिणापथम् । पुनर्दिग्विजयायैव प्राप्य
विन्ध्यमहीधरम् ॥ १३९ ॥ पूर्वदक्षिणपाश्चात्यमहावनतटस्थलीम् । बभ्राम कौतुकात्स
र्वां व्योमवीथीमिवोष्णरुक् ॥ १४० ॥ अथैकस्मिन्प्रदेशे तां चिन्तामिव पुरोगताम् ।
ददर्शोग्रामरण्यानीं परलोकमहीमिव ॥ १४१ ॥ स तत्र विहरंस्तांस्तान्वृत्तान्तान्सक
लानपि । दृष्टवान्पृष्टवांश्चैव ज्ञातवांश्च विसिस्मये ॥ १४२ ॥ तान्परिज्ञातवांश्चापि व्या
धान्पुष्कसजान्पुनः । विस्मयाकुलया बुद्ध्या भूयो बभ्राम संभ्रमी ॥ १४३ ॥ अथ प्राप
महाटव्याः पर्यन्ते धूमधूसरम् । तमेव ग्रामकं यस्मिन्सोऽभवत्पुष्टपुष्कसः । तत्र पश्य
ञ्जनांस्तांस्तान्स्त्रियस्तास्ताः कुटीरिकाः ॥ १४४ ॥ अन्यासु वृद्धासु सबाष्पनेत्रा स्व
ल्पार्तियुक्तासु च वर्णयन्ती । वृद्धाति कान्तारविशीर्णबन्धुस्तत्राभिनादा परिरोदिती
दम् ॥ १४५ ॥ हा पुत्रकाः कुत्र गताः स्थ दीना दृष्टेर्ममोत्सङ्गमपास्य दूरम् । हा पुत्रि
गुञ्जाफलचारुहारे नीतासि मे दुर्विधिनातिदूरम् ॥ १४६ ॥ हा राजपुत्रेन्दुसमानका
न्त संत्यज्य शुद्धान्तविलासिनीस्ताः । रतिं प्रयातोऽसि ममात्मजायां न सापि ते सु
स्थिरतामुपेता ॥ १४७ ॥ संसारनद्याश्वतरंगभङ्गक्रियाविलासैर्विहितोपहासैः । किं
नाम तुच्छं न कृतं नृपेशो यद्योजितः पुष्कसकन्यकायाम् ॥ १४८ ॥ एवं लपन्तीं
किल तत्र वृद्धां दासीभिराश्वास्य नृपो निजाभिः । पप्रच्छ किं वृत्तमिहासि का च का
ते सुता के च सुतास्तवेति ॥ १४९ ॥ उवाच सा बाष्पविलोचनाथ ग्रामस्त्वयं पुष्क
सघोषनामा । इहाभवत्पुष्कसपः पतिर्मे बभूव तस्येन्दुसमा सुतैका ॥ १५० ॥ सा दै
वयोगात्पतिमिन्दुतुल्यमिहागतं प्राप धरातलेन्द्रम् । सा तेन सार्धं सुचिरं सुखानि
भुक्त्वा प्रसूता तनयां सुतौ च ॥ १५१ ॥ केनचिच्चथ कालेन ग्रामकेऽस्मिञ्जनेश्वर ।
अवृष्टिदुःखमभवद्भीषणं भग्नमानवम् ॥ १५२ ॥ महता तेन दुःखेन सर्वे ते ग्रामिका
जनाः । विनिर्गत्य गता दूरं सर्वे पञ्चत्वमागताः ॥ १५३ ॥ तेनेमा दुःखभागिन्यः
शून्ये वयमिह प्रभो । शोच्यांस्ताननुशोचन्त्यस्तिष्ठामो दुःखजीविताः ॥ १५४ ॥
इत्याकर्ण्याङ्गनावक्त्राद्राजा विस्मयमागतः । मन्त्रिणां मुखमालोक्य चित्रार्पित इवाभ

136 b: **साप्त०** – 137 b: **०स्तत्र** – 138 a: **मया दुःख०** – 139 b: **प्रययौ** d: Hs. **वंध्यं मही०** – 140 d: **०वोष्णगुः** – 142 a/b: **विहरंस्तां तु स्ववृता०** d: Hs. **विसस्मये**, lies **विसिस्मिये** * – 143 a: **तत्परि०** b: **पुक्कस०** – 144 d: **०पुक्कसः** e: **तत्रापश्यज्ज०** – 145 (Indravjrā) Text z. T. fraglich. b: **स्वभर्तृयुक्तासु** d: **तत्रातिदीना** – 146 (Indravjrā) c: **०फलदामहारे** – 147 (Upajāti) a: Hs. **०कान्ते** b: Hs. **०विलासिनीस्वे** – 148 (Upajāti) a: **०नद्या स्वतरंग०** d: **पुक्कस०** – 149 (Indravajrā) a: **लपंतीमवलोक्य वृद्धां** c: **पप्रच्छ वृत्तं किमिहासि का त्वं** – 150 (Upajāti) b: **पुक्कसपोष०** c: **पुक्कस०**; Hs. **०सभूपतिर्मे** – 151 (Upajāti) a: **०मिंद्रतुल्य०** – 153 b: **ग्रामका** – 154 b: **स्थिताः** (für **प्रभो**)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

वत् ॥ १५५ ॥ तेषां समुचितैर्मानसंमानैर्दुःखसंक्षयम् । कृत्वा करुणयाविष्टो दृष्टलो
कपरावरः ॥ १५६ ॥ आजगाम गृहं पौरैर्वन्दितः प्रविवेश च । ज्ञाताविद्यास्वभावोऽ
सौ नीतो बोधं मया ततः ॥ १५७ ॥ इत्येवं राघवाविद्या महती भ्रमदायिनी । अस
त्सत्तां नयत्याशु सच्चासत्तां नयत्यलम् ॥ १५८ ॥ श्रीराम उवाच ॥ कथमेवं वद ब्रह्म
न्स्वप्नः सत्यत्वमागतः । संशयो भगवन्सोऽयं न मे गलति चेतसः ॥ १५९ ॥ श्रीव
सिष्ठ उवाच ॥ सर्वमेतदविद्यायां संभवत्येव राघव । एतत्ते गाधिवृत्तान्ते स्फुटमग्रे
भविष्यति ॥ १६० ॥ काकतालीयवच्चेतोवासनावशतः स्वतः । संवदन्ति महारम्भा
व्यवहाराः परस्परम् ॥ १६१ ॥ दृष्टं यत्पक्कणे राज्ञा तत्र शाम्बरिकेहया । तत्र योल्ल
सिता विद्या सैवान्येद्युरिति ध्रुवम् ॥ १६२ ॥ तत्काले लवणेनाशु दृष्टो यः स्वप्नविभ्र
मः । स एव संविदं प्राप्तो विन्ध्यपुष्कसचेतसाम् ॥ १६३ ॥ लावणी प्रतिभा रूढा वि
न्ध्यपुष्कसचेतसि । विन्ध्यपुष्कससंविद्या रूढा पार्थिवचेतसि ॥ १६४ ॥ व्यवहार
गतेस्तस्याः सत्तास्ति प्रतिभानतः । सत्ता सर्वपदार्थानां नान्या संवेदनादृते ॥ १६५
॥ संबन्धे दृष्टदृश्यानां मध्ये द्रष्टुर्हि यद्वपुः । द्रष्टृदर्शनदृश्यादिवर्जितं तदिदं परम् ॥
१६६ ॥ दशादशागते चित्ते मध्ये यच्चेतसो वपुः । अजाड्यसंविन्मननं तन्मयो भव
सर्वदा ॥ १६७ ॥ अजाग्रत्स्वप्नरूपस्य यत्ते रूपं सनातनम् । अचेतनं चाजडं च तन्म
यो भव सर्वदा ॥ १६८ ॥ चित्तं दूरं परित्यज्य योऽसि सोऽसि स्थिरो भव । भव भा
वनया मुक्तो युक्त्या परमयान्वितः ॥ १६९ ॥ संसारोग्रारघट्टेऽस्मिन्या दृढा यन्त्रवाहि
नी । रज्जुस्तां वासनामेतां छिन्द्धि राघव यत्नतः ॥ १७० ॥ पूर्वं मनः समुदितं परमा
त्मतत्त्वात्तेनाततं जगदिदं सविकल्पजालम् । शून्येन शून्यमपि खेन यथाम्बरेण नी
लत्वमुल्लसति चारुतराभिधानम् ॥ १७१ ॥ संकल्पसंक्षयावशाद्गलिते तु चित्ते संसार
मोहमिहिका गलिता भवन्ति । स्वच्छं विभाति शरदीव खमागतायां चिन्मात्रमेकम
जमाद्यमनन्तमन्तः ॥ १७२ ॥ [१२] ॥ इति श्रीवाल्मीकीये मोक्षोपाय उत्पत्तिप्रकर
णम् ॥ ॥ श्रीवसिष्ठ उवाच ॥ अकर्तृकमरङ्गं च गगने चित्रमुत्थितम् । अद्रष्टृकं सानु
भवमनिद्रं स्वप्नदर्शनम् ॥ १ ॥ साक्षिभूते समे स्वस्थे निर्विकल्पे चिदात्मनि । निरि
त्थं प्रतिबिम्बन्ति जगन्ति मुकुरे यथा ॥ २ ॥ एतत्ते राम वक्ष्यामि कार्यकारणतां वि
ना । स्थिता ब्रह्मणि विश्वश्रीः प्रतिभामात्ररूपिणी ॥ ३ ॥ एकं ब्रह्मचिदाकाशं सर्वा

156 a: **तेषां समुदितैर्दानैः** – 157 a/b: **पौरैर्मुदितः प्रविवेश ह** – 159 Ohne **श्री०** a: **कथमेतद्वद** – 160 Ohne **श्री०** – 161 c: **समुदंति** – 163–164: stets **०पुक्कस०** – 164 c: **०संविद्धा** – 165 b: So auch Ld, Le; Hs. **प्रतिभाततः** – 166 a: **द्रष्टृदृश्यानां**, lies **दृष्टिदृश्यानां*** c: Hs. **दृष्टुदर्शन०** – 167 a: **देशाद्देशं गते** – 168 a: **अजाग्रत्स्वप्ननिद्रस्य** – 168A: **जडतां वर्जयित्वैकां शिलाया हृदयं हि यत् । अमनस्कं महाबाहो तन्मयो भव सर्वदा ॥** – 171 (Vasantatilakā) b: **स्वविकल्पजालैः** c: **तेन** – 172 (Vasantatilakā) – Kolophon nach Sarga 12 (Hs. ohne Sarga-Kol.): **इति श्रीवाल्मीकीये मोक्षोपाय उत्पत्तिप्रकरणे लवणोपाख्यानं नाम त्रयोदशः सर्गः ॥ १३ ॥ उत्पत्तिप्रकरणं समाप्तम् ॥ श्रीरामाय नमः ॥ शुभम् ॥**; Hs. **मोक्षोपाये** – Vor 13.1: **ॐ नमः परमात्मने ॥** (1. Aufl.) – 1 Ohne **श्री०** d: **स्वानुभव०** – 2 a: **स्वच्छे** c: **निरर्थं** d: Hs. **मकरे**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्मकमखण्डितम् । इति भावय यत्नेन चेतश्चाञ्चल्यशान्तये ॥ ४ ॥ एषापि रेखावलि
ता यथैका पीवरी शिला । तथा त्रैलोक्यवलितं ब्रह्मैकमिति दृश्यते ॥ ५ ॥ द्वितीय
कारणाभावादनुत्पन्नमिदं जगत् । तिष्ठति ब्रह्मणि स्फारे प्रतिभामात्ररूपधृक् ॥ ६ ॥
अत्र भार्गववृत्तान्तं कथयामि तवानघ । अनुत्पन्नमिदं विश्वं येन चेतसि पश्यसि ॥
७ ॥ पुरा मन्दरशैलस्य सानौ कुसुमसंकुले । अतप्यत तपो घोरं कस्मिंश्चिद्भगवान्भृ
गुः ॥ ८ ॥ तमुपास्ते स्म तेजस्वी बालपुत्रो महामतिः । शुक्रः सकलचन्द्राभः प्रकाश
इव भास्करः ॥ ९ ॥ विद्याविद्यादृशोर्मध्ये शुक्रोऽप्राप्तमहापदः । त्रिशङ्कुरिव रोदोऽन्त
रवर्तत तदा किल ॥ १० ॥ निर्विकल्पसमाधिस्थे स कदाचित्पितर्यथ । अव्यग्रोऽभ
वदेकान्ते जितारिरिव भूमिपः ॥ ११ ॥ ददर्शाप्सरसं तत्र गच्छन्तीं नभसः पथा ।
मन्दारमाल्यवलितां मन्दानिलचलालकाम् ॥ १२ ॥ कान्तामालोक्य तस्याभूदुल्लास
तरलं मनः । अथ तां मनसा ध्यायंस्तत्रैवामीलितेक्षणः ॥ १३ ॥ आरब्धवान्मनोरा
ज्यमिदमेकः किलोशना । एषा हि ललना व्योम्नि सहस्रनयनालये । संप्राप्तोऽयमहं
स्वर्गमालोलसुरसुन्दरम् ॥ १४ ॥ मदमन्मथमत्ताङ्ग्य इमास्ता सुरयोषितः । देवेश्वरं
निषेवन्ते वनं वनलता यथा ॥ १५ ॥ इह तावदिमं शक्रमहमासनसंस्थितम् । द्वितीय
मिव त्रैलोक्यस्रष्टारमभिवादये ॥ १६ ॥ इति संचिन्त्य शुक्रेण मनसैव शचीपतिः ।
तेनाभिवादितस्तत्र द्वितीय इव खे भृगुः ॥ १७ ॥ अथ सादरमुत्थाय शुक्रः शक्रेण
पूजितः । स्वर्गे विहर्तुमारेभे स्वर्भामिपरिमोदितः ॥ १८ ॥ तत्र तां मृगशावाक्षीं का
न्तामध्यगतामसौ । ददर्श सापि तं राम दृष्ट्वा परवशाभवत् ॥ १९ ॥ रसाद्विकसतो
र्नूनमन्योन्यमतिरक्तयोः । प्रातरर्कनलिन्योर्या शोभा सैव तयोरभूत् ॥ २० ॥ अथ
तां तादृशीं दृष्ट्वा शुक्रः संकल्पितार्थभाक् । तमः संकल्पयामास संहारमिव भूतकृत्
॥ २१ ॥ अथ सर्वेषु भूतेषु गतेष्वभिमतां दिशम् । आजगाम भृगोः पुत्रं सा मयूरीव
वारिदम् ॥ २२ ॥ ततः कल्पलताकुञ्जे तौ विशश्रमतुः क्वचित् ॥ २३ ॥ अथ चित्तवि
लासेन चिरमुत्प्रेक्षितैः प्रियैः । प्रणयैर्भार्गवस्यासीत्तुष्टये स समागमः ॥ २४ ॥ अथा
वसदसौ शुक्रः पुरंदरपुरे तया । सुखं चतुर्युगान्यष्टौ हरिणेक्षणया सह ॥ २५ ॥ पुण्य
क्षयानुसंधानात्पपातावनिमण्डले । पतितस्यावनौ तस्य स्ववपुर्विस्मृतिं गतम् ॥ २६
॥ जीवश्चान्द्रमसं ज्योतिर्भृगुस्तनोर्विवेश ह ॥ २७ ॥ प्रालेयतामुपेत्याशु शालितामग
मत्ततः । शालींस्तान्भुक्तवान्पक्वान्दशार्णेषु द्विजोत्तमः ॥ २८ ॥ स शुक्रः शुक्रतामेत्य
तद्भार्यातनयोऽभवत् । ततो मुनीनां संसर्गात्तपस्युग्रे व्यवस्थितः ॥ २९ ॥ अवसन्मे
रुगहने मन्वन्तरमनिन्दितः । तत्र तस्य समुत्पन्नो मृग्यां पुत्रो नराकृतिः ॥ ३० ॥

5 a: **रेखोपरेखावलिता** b: Hs. **यथैषा** d: **दृश्यताम्** – 9 b: **बालः पुत्रो** d: **प्रकाशेनेव** – 10 c/d: **रोदस्योर वर्तत** – 11 c: Hs. **अव्ययो** – 12 c: **मंदारमाला°** – 14 b: **°मेव किलोशनाः** e: Hs. **ऽहमलं** e/f: lies **स्वर्गमालोक°** – 15 a: **मंदमन्मथमातंग्य** – 16 b: **°महमास्थानसुस्थितम्** – 18 d: **स्वर्वासि°** – 20 b: **°मनुरक्तयोः** – d: lies **संहार इव** *; **भूतभुक्**, Hs. lässt offen, ob **°कृत्** oder **°भृत्** – 24 b: **चिरसुप्रेक्षितैः श्रुतैः** – 26 d: **स्वपुरी स्मृतिमागता** – 27 b: **°र्भृगुसूतो विवेश**, lies **°र्भृगुसूनोर्विवेश** *

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तत्स्नेहेन परं मोहं पुनरप्यायया क्षणात् । पुत्रस्यास्य धनं मेऽस्तु गुणश्चायुश्च शाश्वतम्
॥ ३१ ॥ इत्यनारतचिन्ताभिर्जहौ सत्यामवस्थितिम् । धर्मचिन्तापरिभ्रंशात्पुत्रार्थं भो
गचिन्तय । क्षीणायुषं तमहरन्मृत्युः सर्प इवानिलम् ॥ ३२ ॥ भोगैकचिन्तया सार्धं
स समुत्क्रान्तचेतनः । प्राप्य मद्रेशपुत्रत्वमासीन्मद्रमहीपतिः ॥ ३३ ॥ अथान्यान्य
पि जन्मानि समुपेत्य बहूनि तु । जातः स गङ्गातीरस्थस्तपस्वितनयो मुनिः ॥ ३४ ॥
अथ कालेन महता पवनातपजर्जरः । कायस्तस्य पपातोर्व्यां भृगुशुक्रसमुद्भवः ॥
३५ ॥ रागद्वेषविहीनत्वात्तस्य पुण्यायनस्य तु । महातपस्थाच्च भृगोर्न भुक्तो मृगपक्षि
भिः ॥ ३६ ॥ अथ वर्षसहस्रेण दिव्येन परमेश्वरः । भृगुः परमसंबोधाद्विरराम समा
धितः ॥ ३७ ॥ नापश्यदग्रे तनयं विनयावनताननम् । सीमन्तं गुणसेनायाः पुण्यमू
र्तिमिव स्थितम् ॥ ३८ ॥ अपश्यत्केवलं कालकङ्कालं पुरतो महत् । देहयुक्तमिवाभा
ग्यं दारिद्र्यमिव मूर्तिमत् ॥ ३९ ॥ तापशुष्कवपुः कृत्तिरन्ध्रस्फुरिततित्तिरि । संशुष्का
न्त्रोदरगुहाछायाविश्रान्तदर्दुरम् ॥ ४० ॥ प्रेक्ष्य तच्छुष्ककङ्कालमालानं दुःखदन्ति
नः । पूर्वापरपरामर्शमकुर्वन्भृगुरुत्थितः ॥ ४१ ॥ आलोकसमकालं हि ज्ञात्वा पुत्रं
मृतं भृगुः । कालं प्रति चकाराशु कोपं परमदारुणम् ॥ ४२ ॥ अकाल एव मत्पुत्रो
नीतः किमिति कोपिनः । कालाय शापमुत्स्रष्टुं भगवानुपचक्रमे ॥ ४३ ॥ अथाकलि
तरूपोऽसौ कालः कवलितप्रजः । आधिभूतिकमास्थाय वपुर्मुनिमुपाययौ ॥ ४४ ॥
खड्गपाशधरः श्रीमान्कुण्डली कवचान्वितः । षण्मुखः षड्भुजो बह्व्या वृतः किंकर
सेनया ॥ ४५ ॥ स उपेत्य महाबाहो कुपितं तं महामुनिम् । कल्पक्षुब्धाब्धिगम्भीरं
सान्त्वपूर्वमुवाच ह ॥ ४६ ॥ त्वमनन्ततपा विप्रो वयं नियतिपालकाः । तेन संपूज्य
से पूज्यः साधु नेतरयेच्छया ॥ ४७ ॥ मा तपः क्षपयाबुद्धे कल्पकालमहानलैः । यो
न दग्धोऽस्मि मे तस्य किं त्वं शापेन वक्ष्यसि ॥ ४८ ॥ संसारावलयो ग्रस्ता निगीर्णा
रुद्रकोटयः । भुक्तानि विष्णुवृन्दानि क्व न शक्ता वयं मुने ॥ ४९ ॥ भोक्तारो हि वयं
ब्रह्मन्भोजनं युष्मदादयः । स्वयं नियतिरेषा हि नावयोरेतदीहितम् ॥ ५० ॥ नेह कर्ता
न भोक्तास्ति दृष्ट्या नष्टकलङ्कया । बहवश्चेह कर्तारो दृष्ट्या दुष्टकलङ्कया ॥ ५१ ॥ पु
ष्पाणि तरुखण्डेषु भूतानि भुवनेषु च । कर्मणायान्ति यान्तीह कल्पते हेतुना विधेः
॥ ५२ ॥ क्व सा ज्ञानमयी दृष्टिः क्व महत्त्वं क्व धीरता । मार्गे सर्वप्रसिद्धेऽपि किमन्ध
इव मुह्यसि ॥ ५३ ॥ स्वकर्मपरिपाकोत्थामविचार्य दशां मुनेः । किं मूर्ख इव सर्वज्ञ
मुधा मां शप्तुमिच्छसि ॥ ५४ ॥ चित्तमेवेह पुरुषस्तत्कृतं कृतमुच्यते ॥ ५५ ॥ मनो
हि जीवनाज्जीवो निश्चयैकतया तु धीः । अहंकारोऽभिमन्तृत्वान्नानातां स्वयमेति हि

32 b: गुणाश्वा० – 34 b: बहून्यपि c/d: ०तीरस्थतपस्वि० – 36 b: पुण्याश्रमस्य c: ०तपस्त्वाच्च – 38 c/d: सीमांते गुणसीमायाः पुण्यं मूर्तमिव स्थितम् – 39 a/b: कायकंकालं – 40 b: ०तित्तिरिम् c/d: संशुष्कांतो दरगुहाच्छाया० – 42 a: आलोक्य – 43 b: कोपतः, lies कोपितः* – 44 c: आधिभौतिक० – 45 c/d: षड्भुजः षण्मुखो बाह्या – 47 c/d: पूज्य साधो नेतरयेक्षया – 48 d: धक्ष्यसि – 49 a: ब्रह्मांडावलयो – 51 b, d: Hs. ०कलंकयैः – 52 d: कल्पांते – 53 a: क्वासौ – 54 b: मुने

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ ५६ ॥ तन्मनस्तव पुत्रस्य समाधौ त्वयि संस्थिते । प्रयातं वैबुधं सद्म संत्यज्यौशनसं
वपुः ॥ ५७ ॥ असेवत मुने तत्र विश्वाचीं देवसुन्दरीम् । अथ विप्रो दशार्णेषु कोस
लेषु महीपतिः ॥ ५८ ॥ धीवराङ्गमहाटव्यां हंसस्त्रिपथगातटे । सूर्यवंशनृपः प्रौढेश्वरः
शाल्वेषु देशिकः ॥ ५९ ॥ कल्पं विद्याधरः श्रीमान्धीमानथ मुनेः सुतः । सौवीरेषु च
सामन्तस्त्रैगर्तः शैवदेशिकः ॥ ६० ॥ वंशगुल्मः किरातेषु हरिणस्वान्तजङ्गले । सरी
सृपस्तालतटे तमाले वनकुक्कुटः ॥ ६१ ॥ अन्यास्वपि विचित्रासु वासनावशतः स्वतः ।
विषमास्वेव पुत्रस्ते चचारान्तरयोनिषु ॥ ६२ ॥ वासुदेवाभिधानोऽसौ मुने विप्रकुमा
रकः । तपश्चरति ते पुत्रः स गङ्गासरितस्तटे ॥ ६३ ॥ जटावानक्षवलयी जितसर्वेन्द्रि
यभ्रमः । तत्र वर्षशतान्यष्टौ संस्थितस्तपसि स्थिरे ॥ ६४ ॥ यदीच्छसि मुने द्रष्टुं तं स्व
प्नाभं मनोभ्रमम् । तत्समुन्मीलय ज्ञाननेत्रमाशु विलोकय ॥ ६५ ॥ इत्युक्ते जगदीशेन
कालेन समदृष्टिना । मुनिः संचिन्तयमास ज्ञानाक्ष्णा तनयेहितम् ॥ ६६ ॥ ददर्श च
मुहूर्तेन प्रतिभानवशादसौ । पुत्रोदन्तमशेषेण बुद्धिदर्पणबिम्बितम् ॥ ६७ ॥ पुनर्मन्द
रसानुस्थां कालाकालाग्रसंस्थिताम् । स गङ्गायास्तटादेत्य विवेश स्वतनुं भृगुः ॥ ६८
॥ विस्मयस्मेरया दृष्ट्या कालमालोक्य कान्तया । वीतरागमुवाचेदं वीतरागो मुनि
र्वचः ॥ ६९ ॥ भगवन्भूतभव्येश बाला वयमनुज्ज्वलाः । त्वादृशामेव धीर्देव त्रिकाला
मलदर्शिनी ॥ ७० ॥ इत्युक्तो भगवान्कालो हसन्निव जगद्गतीः । हस्तं हस्तेन जग्राह
भृगुमिन्दुमिवांशुमान् ॥ ७१ ॥ अथ कालभृगू देवौ मन्दराचलकन्दरात् । गन्तुं प्रवृ
त्ताववनौ स्वर्गङ्गासरितस्तटम् ॥ ७२ ॥ क्षणादवापतुस्तत्र तौ स्वर्गङ्गां तरंगिणीम् ।
ददर्शाथ तटे तस्याः कस्मिंश्चित्तनयं भृगुः ॥ ७३ ॥ शान्तेन्द्रियसमाधिस्थमचञ्चलम
नोमृगम् । समालोक्य भृगोः पुत्रं कालः संकल्पवानभूत् ॥ ७४ ॥ विबुध्यतामयमथ
समाधेर्विरराम सः । उन्मील्य नेत्रे सोऽपश्यदग्रे कालभृगू प्रभः ॥ ७५ ॥ कदम्बल
तिकापीठादथोत्थाय ननाम तौ । मिथः कृतसमाचाराः शिलायां समुपाविशन् ॥
७६ ॥ अथोवाच वचः शान्तं स च गङ्गातटद्विजः । भवतोर्दर्शनेनाहमद्य निर्वृतिमा
गतः ॥ ७७ ॥ यो न शास्त्रेण तपसा न ज्ञानेन न विद्यया । विनष्टो मे मनोमोहः क्षी
णोऽसौ दर्शनेन वाम् ॥ ७८ ॥ न तथा सुखयन्त्यन्तर्निर्मलामृतवृष्टयः । यथा प्रहर्षय
न्त्येता महतामेव दृष्टयः ॥ ७९ ॥ चरणाभ्यामिमं देशं भवन्तौ भूरितेजसौ । कौ मां
पवित्रयन्तौ स्तः शशाङ्कार्काविवाम्बरम् ॥ ८० ॥ इत्युक्तवन्तं प्रोवाच भृगुर्जन्मान्त
रात्मजम् । स्मरात्मानं प्रबुद्धोऽसि नाज्ञोऽसीति रघूद्वह ॥ ८१ ॥ प्रबोधितोऽसौ भृगु

56 b: निश्वायकतया – 59a: धीवरोऽथ महा०, lies धीवरोऽङ्गमहा०* c: सूर्यवंशे नृपः पौंड्रः शौरः – 60c/d: सामंतस्त्रिगर्ते – 61 b: Text entstellt; हरिणश्रीश्च जांगले c: ०तले – 62 b: Hs. वासनावेशतः सुतः – 63 d: समंगा० – 66 c: स चिंतयमास d: ज्ञानात्त्तनयेहितम् – 67 a: Hs. स (für च) – 68 b: कालाकाराग्र०, lies कालात्कालाग्र० c: समंगाया० – 72 d: समंगासरितस्तटे – 73 a: क्षणादेवापतु० b: समंगां – 74 a: शांतेन्द्रियं समाधि० – 75 a: ०मयमिति d: प्रभू – 77 b: स समंगातटे द्विजः d: Hs. निर्वृत्ति० – 78 c: Hs. विनष्टो(ऽ)सौ – 80 c: lies स्थः; कौ पवित्रितवंतौ नः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

णा जन्मान्तरदशां निजाम् । मुहूर्तमात्रात्सस्मार ध्यानोन्मीलितलोचनः ॥ ८२ ॥ अथासौ विस्मयस्मेरमुखो मुदितमानसः । वितर्कमन्थरां वाचमुवाच वदतां वरः ॥ ८३ ॥ अहो भ्रममयी दृष्टिर्जृम्भते कापि चेतसि । यद्वशादिदमाभोगि जगच्चक्रं प्रवर्तते ॥ ८४ ॥ ज्ञातं ज्ञातव्यमधुना दृष्ट द्रष्टव्यमक्षतम् । विश्रान्तोऽस्मि चिरं श्रान्तश्चिन्मात्रान्नास्ति किंचन ॥ ८५ ॥ उत्तिष्ठ तात गच्छामः पश्यामो मन्दरस्थिताम् । तां तनुं नियतिं द्रष्टुं कौतुकी विहराम्यहम् ॥ ८६ ॥ न समीहतमस्तीह नासमीहितमस्ति मे ॥ श्रीवसिष्ठ उवाच ॥ विचारयन्तस्तत्त्वज्ञा इति ते जागतीर्गतीः ॥ ८७ ॥ स्वर्गङ्गायातटात्प्रापुः क्षणान्मन्दरकन्रम् । ददर्श भार्गवस्तत्र पूर्वजन्मोद्भवां तनुम् ॥ ८८ ॥ उवाच चेदं हे तात शुष्का तनुरियं हि सा । या त्वया सुखसंभोगैः पुरा समभिलालिता ॥ ८९ ॥ पश्य विश्रान्तसंदेहं विगताशेषकौतुकम । निरस्तकल्पनाजालं कथं शेते सुखं वने ॥ ९० ॥ सर्वसंज्वरसंमोहमिहिकाशरदागमम् । अचित्तत्वं विनान्यन्न श्रेयः पश्यामि जन्तुषु ॥ ९१ ॥ त एव सुखसंभोगसीमानं समुपागताः । महाधियः शान्तधियो ये याता विमनस्कताम् ॥ ९२ ॥ सर्वदुःखदशामुक्तां संस्थितां विगतज्वराम् । दिष्ट्या पश्याम्यमननां वने तनुमिमामहम् ॥ ९३ ॥ अथाक्षिप्य वचस्तस्य कालः प्रोवाच भार्गवम् ॥ ९४ ॥ प्रविशेमां तनुं साधो नगरीमिव पार्थिवः । गुरुत्वमसुरेन्द्राणां कर्तव्यमनया त्वया ॥ ९५ ॥ कल्याणमस्तु वां यामो वयं त्वभिमतां दिशम् । इत्युक्त्वा मुञ्चतोर्बाष्पं तयोः सोऽन्तरधीयत ॥ ९६ ॥ गते तस्मिन्भगवति भार्गवो नियतेर्वशात् । विवेश तां तनुं हित्वा स्वर्गङ्गाद्विजभावनाम् ॥ ९७ ॥ तस्यां प्रविष्टजीवायां पुत्रतन्वां महामुनिः । चकाराप्यायनं मन्त्रैः स कमण्डलुवारिभिः । सर्व नाड्यस्ततस्तत्र तस्याः पूर्णा विरेजिरे ॥ ९८ ॥ अथ शुक्रः समुत्तस्थौ वहत्प्राणसमीरणः । पुरोऽभिवादयामास पितरं पावनाकृतिम् ॥ ९९ ॥ ततस्तौ कानने तस्मिन्पावने भृगुभार्गवौ । संस्थितौ मननोन्मुक्तौ निस्तरंगाविव ह्रदौ ॥ १०० ॥ एवं ते भार्गवाख्यानं वर्णितं रघुनन्दन ॥ १०१ ॥ इति श्रीवाल्मीकीये मोक्षोपाये भार्गवोपाख्यानम् ॥ [१३] ॥

श्रीवसिष्ठ उवाच ॥ जन्तोः कृतविचारस्य विगलद्वृत्तिचेतसः । मननं त्यजतो नित्यं किंचित्परिणतात्मनः ॥ १ ॥ दृश्यं संत्यजतो हेयमुपादेयमुपेयुषः । द्रष्टारं पश्यतो नित्यमद्रष्टारमपश्यतः ॥ २ ॥ निर्ज्ञातव्ये परे तत्त्वे जागरूकस्य जीवतः । सुप्तस्य घनसंमोहमये संसारवर्त्मनि ॥ ३ ॥ अत्यन्तपक्ववैराग्यादरसेषु रसेष्वपि । संसारवासनाजाले खगजाल इवाखुना । त्रोटितेऽथ दृढग्रन्थौ श्लथे वैराग्यरंहसा ॥ ४ ॥

84 d: **जगज्ज्ञालं** – 85 b: Hs. **दृष्टव्य॰** – 86 c/d: lies **नियतां**; **नियतेर्द्रष्टुं कौतुकं** – 87 Ohne **श्री॰** – 88 a: **समंगायायास्त्रयः प्रापुः** – 91 a: **सर्वाशाज्वर॰** b: **॰शरदागमे** c/d: **विचित्तत्वं विना नान्यच्छ्रेयः** – 92 c: **महाधियः प्राप्तधियो** – 97 b: **नियतेर्वशः** c: **समंगा॰** – 98 c/d: **सर्वा नाड्यस्ततस्तन्व्यस्तस्याः** – 101A: **विचार्य सुदृढं चित्ते यथेच्छसि तथा कुरु ॥** – Kolophon zu Sarga 13: **इति श्रीयोगवासिष्ठसारे** [!] **मोक्षोपाये स्थितिप्रकरणे भार्गवोपाख्यानं नाम चतुर्दशः सर्गः ॥ १४ ॥** – 14.1 Ohne **श्री॰** – 3 a: **निज्ञातव्ये** – 4 d: Hs. **इवांबुना**, lies **इवौतुनः** e: Hs. **दृढग्रन्थि॰**; **त्रोटिते हृदयग्रन्थौ**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

कातकं फलमासद्य यथा वारि प्रसीदति । तथा विज्ञानवशतः स्वभावः संप्रसीदति
॥ ५ ॥ नीरागं निरुपासङ्गं निर्द्वंद्वं निरुपाश्रयम् । विनिर्याति मनो मोहाद्विहगः पञ्ज
रादिव ॥ ६ ॥ शान्तसंदेहदौरात्म्यं गतकौतुकविभ्रमम् । परिपूर्णान्तरं चेतः पूर्णेन्दु
रिव राजते ॥ ७ ॥ विचारेण परिज्ञातस्वभावस्योदितात्मनः । अनुकम्प्या भवन्तीह
ब्रह्मविष्णिवन्द्रशंकराः ॥ ८ ॥ कोऽहं कथमिदं चेति यावन्न प्रविचारितम् । संसारड
म्बरं तावदन्धकारोपमं स्थितम् ॥ ९ ॥ आत्मानमितरं चैव दृशा नित्याविभिन्नया ।
सर्वं चिज्ज्योतिरेवेति यः पश्यति स पश्यति ॥ १० ॥ सर्वशक्तिरनन्तात्मा सर्वभावा
न्तरस्थितः । अद्वितीयश्चिदित्यन्तर्यः पश्यति स पश्यति ॥ ११ ॥ नाहं न चान्यदस्तीह
ब्रह्मैवास्ति निरामयम् । इत्थं सदसतोर्मध्ये यः पश्यति स पश्यति ॥ १२ ॥ अयत्नोप
नतेष्वक्षि दिग्द्रव्येषु यथा पुनः । नीरागमेव पतति तद्वत्कार्येषु धरिधीः ॥ १३ ॥ परि
ज्ञायोपभुक्तो हि भोगो भवति तुष्टये । विज्ञाय सेवितश्चौरो मैत्रीमेति न चौरताम् ॥
१४ ॥ अशङ्कितोपसंप्राप्ता ग्रामयात्रा यथाध्वगैः । प्रेक्ष्यते तद्वदेव ज्ञैर्भोगश्रीरवलो
क्यते ॥ १५ ॥ मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः । तमेवालब्धविस्तारं
क्लिष्टत्वाद्बहु मन्यते ॥ १६ ॥ बद्धमुक्तो महीपालो ग्रासमात्रेण तुष्यति । परैरबद्धोऽना
क्रान्तो न राज्यं बहु मन्यते ॥ १७ ॥ हस्तं हस्तेन संपीड्य दन्तैर्दन्तान्विचूर्णयन् । अ
ङ्गान्यङ्गैरिवाक्रम्य जयेदादौ स्वकं मनः । मनसो विजयान्नान्या गतिरस्ति भवार्णवे
॥ १८ ॥ एतावति धरणितले सुभगास्ते साधुचेतनाः पुरुषाः । पुरुषकथासु च गण्या
न जिता ये चेतसा स्वेन ॥ १९ ॥ हृदयबिले कृतकुण्डल उल्बणकलनाविषो मनोभुज
गः । यस्योपशान्तिमागतमुदितं च तमव्ययं वन्दे ॥ २० ॥ श्रीवसिष्ठ उवाच ॥ महा
नरकसम्राजो मत्तदुष्कृतवारणाः । आशाशरशलाकाढ्या दुर्जया हीन्द्रियारयः ॥ २१
॥ प्रक्षीणचित्तदर्पस्य निगृहीतेन्द्रियद्विषः । पद्मिन्य इव हेमन्ते क्षीयन्ते भोगवासनाः
॥ २२ ॥ तावन्निशीथवेताला वल्गन्ति हृदि वासनाः । एकतत्त्वदृढाभ्यासाद्यावन्न
विजितं मनः ॥ २३ ॥ भृत्योऽभिमतकर्तृतत्वान्मन्त्री सत्कार्यकारणात् । सामन्तश्चे
न्द्रियाक्रान्तेर्मनो मन्ये विवेकिनः ॥ २४ ॥ लालनात्स्निग्धललना पालनात्पावनः
पिता । सुहृदुक्तं च विश्वासान्मनो मन्ये मनीषिणाम् ॥ २५ ॥ स्वालोकितः शास्त्रदृ
शा स्वबुद्ध्या स्वानुभावितः । प्रयच्छति परां सिद्धिं त्यक्त्वात्मानं मनःपिता ॥ २६ ॥
सुदृष्टः सुपरामृष्टः सुधृढः सुप्रबोधितः । स्वगुणेनोर्जितो भाति हृदि हृद्यो मनोमणिः
॥ २७ ॥ एनोमनोमणिं राम बहुपङ्ककलङ्कितम् । विवेकवारिणा सिद्ध्यै प्रक्षाल्यालो

14.9 b: **यावन्नांतर्विचारितम्** c: **संसाराडंबरं** – 10 b: Hs. **दृश्यान्नि०**, lies **दृष्ट्या*** **नि०** – 12 a: **०दस्तीति** c: **०तोर्मध्यं** – 13 c: **अरागमेव** – 17 a: **बंधयुक्तो** – 18 b: **०चूर्ण्य च** c: **अंगान्यंगैः समाक्रम्य** – 19–20 (Āryā) – 19 b: **०चेतसः** – 20 d: **च** fehlt; nach **उदितं** schiebt LN 2. Aufl. in Klammern **चित्तं** ein. – 21 Ohne **श्री०** a: **०साम्राज्ये** b: **मत्ता** – 24 c/d: **सामंतश्चेंद्रियक्रांत्या गुरुर्विद्याप्रदानतः** – 25 b: Lies **०त्पालनः*** c: Hs. **सुहृदुन्मत्तवि०**, lies **सुहृदुत्तमवि०*** – 26 b: Hs. **सुद्धांतः**, lies: **स्वध्यातः*** – 27 a/b: **सुदृष्टः सुदृढः स्वच्छः सुकांतः सुप्रबोधितः** c: Hs. **स्वगुणेनोपार्जितो** – 28 a: **एवं मनो०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

कवान्भव ॥ २८ ॥ विवेकं परमाश्रित्य बुद्ध्या सत्यमवेक्ष्य च । इन्द्रियारीनलं जित्वा
तीर्णो भव भवार्णवात् ॥ २९ ॥ अयमहमिति निश्चयो वृथा यस्तमलमपास्य महामते
स्वबुद्ध्या । यदितरमवलम्ब्य तत्पदं स्वं व्रज पिब भुङ्क्ष्व न बध्यतेऽमनस्कः ॥ ३० ॥
श्रीवसिष्ठ उवाच ॥ दामव्यालकटन्यायो मा ते भवतु राघव । भीमभासदृढस्थित्या
तवास्त्विवति विशोकता ॥ ३१ ॥ श्रीराम उवाच ॥ दामव्यालकटन्यायो भीमभासदृ
ढस्थितिः । ब्रह्मन्किमुक्तं भवता भवतापापहारिणा ॥ ३२ ॥ श्रीवसिष्ठ उवाच ॥ दाम
व्यालकटन्यायं भीमभासदृढस्थितिम् । शृणु राघव तच्छ्रुत्वा यथेच्छसि तथा कुरु ॥
३३ ॥ आसीत्पातालकुहरे सर्वाश्चर्यमनोहरे । शम्बरो नाम दैत्येन्द्रो मायामणिमहा
र्णवः ॥ ३४ ॥ तस्योत्सादितदेवस्य कठिनोड्डामराकृतेः । बभूव विपुलं सैन्यमासुरं सुर
नाशनम् ॥ ३५ ॥ तस्मिन्मायामये सुप्ते देशान्तरगते तथा । तत्सैन्यं तरसा जघ्नुश्छि
द्रं प्राप्य किलामराः ॥ ३६ ॥ अथ शम्बरदैत्येन मुण्डिकाङ्कद्रुमादयः । रक्षार्थं मत्तसा
मन्ताः स्वसेनासु नियोजिताः ॥ ३७ ॥ तानप्यन्तरमासाद्य जघ्नुर्देवा भयानकान् ।
स्वयं कोपादथायासीच्छम्बरः सुरपत्तनम् ॥ ३८ ॥ तस्य मायाबलाद्भीताः सुरास्तेऽ
न्तर्धिमाययुः । मेरुकाननकुञ्जेषु भयभारावयन्त्रिताः ॥ ३९ ॥ क्रन्दत्क्षुद्रामरगणं बाष्प
क्लिन्नाप्सरोमुखम् । शून्यं ददर्श स स्वर्गं कल्पक्षीणजगत्समम् ॥ ४० ॥ विहृत्य कुपित
स्तत्र दोर्दण्डमदघूर्णितः । लोकपालपुरीं दग्ध्वा जगामात्मीयमालयम् ॥ ४१ ॥ एवं
दृढतरीभूते द्वेषे दानवदेवयोः । देवाः स्वर्गं परित्यज्य दिक्षु जग्मुरदर्शनम् ॥ ४२ ॥
अथ शम्बरदैत्येन ये ये सेनाधिनायकाः । क्रियन्ते यत्नतस्तांस्ताञ्जघ्नुर्यत्नपराः सुराः
॥ ४३ ॥ यावदुद्वेगमापान्नः शम्बरः कोपवान्भृशम् । ससर्ज मायया घोरानसुरांस्त्री
न्महाबलान् ॥ ४४ ॥ निर्मिता मायया भीमाः पक्षक्षुब्धा इवाद्रयः । उदगुस्ते महामा
या दामो व्यालः कटस्तथा ॥ ४५ ॥ वासनात्माभिमानाभ्यां हीनास्ते प्रथमोद्गताः ।
नाभिपातं न चापातं विदुस्ते न पलायनम् । न जीवितं न मरणं समरे न जयाजयौ
॥ ४६ ॥ केवलं सैनिकानग्रे दृष्ट्वा निहननोद्यताः । शम्बरश्चिन्तयामास परितुष्टमना
स्तदा ॥ ४७ ॥ इष्टानिष्टाभिरेते हि वासनाभिर्यदुज्झिताः । तदेते न पलायन्ते देवैर
भिहता अपि ॥ ४८ ॥ इति निर्णीय दैत्येन्द्रो दामव्यालकटान्विताम् । सेनां संप्रेषया
मास देवेन्द्रबलघातिनीम् ॥ ४९ ॥ दैत्याः सागरकुञ्जेभ्यः कन्दरेभ्यश्च सायुधाः । उद
गुर्भीमनिह्लादाः सपक्षगिरिलीलया ॥ ५० ॥ अथोत्तस्थुर्निकुञ्जेभ्यः कन्दरेभ्यः सुरा
बलात् । प्रयान्त इव शैलेन्द्रा भीमाः स्वर्वासिनां गणाः ॥ ५१ ॥ देवासुरपताकिन्यो
स्तद्युद्धमभवत्तयोः । अकालोल्बणकल्पान्तभीषणं भुवनान्तरे ॥ ५२ ॥ तस्मिंस्तदा वर्त

29 c: **तीर्त्वा** – 30 (Puṣpitāgrā) c: **यदितरद०; त्वं** d: **बध्यसे** – 31 Ohne **श्री०** d: **तवास्त्वतिवि०** – 34 b: **सर्वैश्वर्य०** – 35 a: **तस्यादिदेवदेवस्य** – 36 a: **मायाबले** – 37 c: **मंत्रिसामंताः** – 38 b: Hs. **भयानकाः** – 40 b: **०क्लिन्नांगनामुखम्** – 46 c: **वापातं** d: **न विदुस्ते** – 47 d: **ते हननोद्यताः** – 48 b: Hs. **परिपुष्ट०** – 50 c: **०निर्ह्लादाः** – 51 b: Lies **कन्दरेभ्योऽसुरा** d: Lies **गणान्**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मानेे घोरे समरसंभ्रमे । पतिताङ्गायुधानीह प्रस्रवद्रुधिराणि च । पयांसीव विसेतूनि
देवसैन्यानि दुद्रुवुः ॥ ५३ ॥ दामव्यालकटास्तानि चिरमन्तर्हितान्यपि । अनुजग्मु
र्लसन्नादमिन्धनानीव पावकाः ॥ ५४ ॥ अन्विष्यन्तोऽपि यत्नेन नालभन्तासुराः सु
रान् ॥ ५५ ॥ अलब्धेष्वमरौघेषु दामव्यालकटास्तदा । जग्मुः पातालकोशस्थं प्रभुं प्र
मुदिताशयाः ॥ ५६ ॥ अथ देवा विषण्णास्ते क्षणमाश्वास्य वै ययुः । जयोपायाय वि
क्षिप्ता ब्रह्माणममितौजसम् ॥ ५७ ॥ तेषामाविरभूद्ब्रह्मा रक्तरक्ताननश्रियाम् ॥ ५८ ॥
प्रणम्य ते सुरास्तस्मै तत्सर्वं शम्बरेहितम् । सम्यक्प्रकथयामासुर्दामव्यालकटक्रमम्
॥ ५९ ॥ समाकर्ण्याखिलं ब्रह्मा विचार्य स विचारयन् । उवाचेदं सुरानीकमाश्वास
नपरं वचः ॥ ६० ॥ हन्त वर्षसहस्रान्ते शम्बरस्य रणे सुराः । जेतव्यमसुरेशेन ताव
त्कालं प्रतीक्ष्यताम् ॥ ६१ ॥ दामव्यालकटानेतानद्य त्वमरसत्तमाः । योधयन्तः पला
यध्वं युध्यध्वं पुनरेव च ॥ ६२ ॥ युद्धाभ्यासवशादेषां मुकुराणामिवाशये । अहंकार
चमत्कारः प्रतिबिम्बमुपैष्यति ॥ ६३ ॥ गृहीतवासनास्वेते दामव्यालकटाः सुराः ।
सुजया वो भविष्यन्ति लग्नजालाः खगा इव ॥ ६४ ॥ आस्थामात्रमनन्तानां दुःखा
नामाकरं विदुः । अनास्थामात्रमभितः सुखानामाकरं विदुः ॥ ६५ ॥ वासनातन्तुब
द्धोऽयं लोकोऽपि परिवर्तते । सा प्रवृद्धाति दुःखाय सुखायोच्छेदमागता ॥ ६६ ॥ धी
रोऽप्यतिबहुज्ञोऽपि कुलजोऽपि महानपि । तृष्णया बध्यते जन्तुः सिंहः शृङ्खलया य
था ॥ ६७ ॥ इत्युक्त्वा भगवान्देवस्तत्रैवान्तर्धिमाययौ ॥ ६८ ॥ सुराश्चाकर्ण्य तद्वाक्यं
जग्मुश्चाभिमतं दिशम् । चक्रुर्दुन्दुभिनिर्घोषं प्रलयाभ्ररवोपम् ॥ ६९ ॥ अथ दैत्यैर्महा
व्योम्नि तैः पातालतलोत्थितैः । कालक्षेपकरं घोरं पुनर्युद्धमवर्तत । पुनः पलायनं च
क्रुरयुध्यन्त पुनः सुराः ॥ ७० ॥ एवं ते कालहरणं युद्धेन सुरपुंगवाः । चक्रुर्नानावि
धोपायैर्दैत्यव्यामोहकारणात् ॥ ७१ ॥ एतावता च कालेन वृद्धिभावादहंकृतेः । दामा
दयोऽहमित्यास्थां जगृहुर्ग्रस्तचेतसः ॥ ७२ ॥ भयवासनया ग्रस्ता मोहवासनया ततः ।
आशापाशातिबद्धास्त ततः कृपणतां गताः ॥ ७३ ॥ स्थिरो भवतु मे देहः सुखायास्तु
धनं मम । इति बद्धधियां तेषां धैर्यमन्तर्धिमाययौ ॥ ७४ ॥ अतस्तस्मिन्रणे दैत्याः सा
पेक्षत्वमुपाययुः । मरिष्यामो मरिष्याम इति चिन्ताहताशयाः ॥ ७५ ॥ अथ प्रम्ला
नसत्त्वास्ते हन्तुमग्रगतं भटम् । न शेकुरिन्धने क्षीणे हविर्दग्धुमिवाग्नयः ॥ ७६ ॥ बहु
नात्र किमुक्तेन मरणाद्भीतचेतसः । पलायनैकशरणा नष्टास्ते त्रिदशारयः ॥ ७७ ॥

53 e: **विशीर्णानि** – 56 b: **०स्तथा** – 57 b: Lies **०श्वस्य*** c: **दामादिभिश्च विजिता** – 58 b: **रक्तो रक्तास नच्छविः** – 59 a: **प्रणेमुस्ते** – 60 b: **विचार्य स विचारवान्** – 61 **ब्रह्मोवाच ॥** c: **जेतव्या समरे सेना**, lies **जेतव्यममरेशेन*** – 62 a/b: **०नेतान्युध्यध्वममरेश्वराः** d: **युद्धार्थं** – 63 a: **०बलादेषा** – c/d: Hs. **०त्कारं प्रतिबिंबमुपेक्ष्यति** – 64 a: **०वासना ह्येते** b: **०कटासुराः** c: **सुजेया** – 66 b: **लोको हि** – 67 b: **प्रवृद्धोऽपि महानपि** – 69 a: **सुरास्त्वाकर्ण्य** – 72 b: **दृढाभ्यासादहंकृतेः** d: **जगृहुर्युक्त०** – 73 a: **भववासनया** b: **०नया युताः** c: **०पाशनि०** d: Hs. **क्षपणतां** – 74 c: **वृद्धधियां**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अतः प्रबोधाय तव वच्मि राम महामते। दामव्यालकटन्यायो मा तवास्त्विवति ली
लया ॥ ७८ ॥ अविवेकानुसंधानाच्चित्तमापदमीदृशीम्। अनन्तभवदुःखाय परिगृह्णा
ति हेलया ॥ ७९ ॥ श्रीराम उवाच ॥ कथं दामकटव्यालाः समुत्पन्नाः परात्पदात्।
इति मे संशयं ब्रह्मन्यथावच्छेतुमर्हसि ॥ ८० ॥ श्रीवसिष्ठ उवाच ॥ यथा दामादयो
राम प्रतिभामात्ररूपिणः। तथैवेमे वयमपि न बहिः क्वापि संस्थिताः ॥ ८१ ॥ अली
कमेव त्वद्भावो मद्भावोऽलीकमेव च। दामव्यालकटादीनां सद्भावोऽलीकमेव सः
॥ ८२ ॥ प्रतिभासमयी काचिज्जीवशक्तिः परात्मनः। शम्बरध्यानविक्षुब्धा त्रिधो
ल्लासमवाप सा ॥ ८३ ॥ तस्मान्नेमे वयं सत्या न च दामादयः क्वचित्। सत्यं संवेदनं
शुद्धं बोधाकाशं निरञ्जनम् ॥ ८४ ॥ सत्यं सर्वगतं शान्तमस्त्यनस्तमनोदयम्। तस्य
शक्तिसमुल्लासमात्रं जगदिति स्थितिः ॥ ८५ ॥ सर्वत्र सर्वमिदमस्ति यथानुभूतं नो
किंचन क्वचिदिहास्ति न चानुभूतम्। शान्तं सदेकमिदमाततमित्थमास्ते संत्यक्तश
ङ्कमपभेदमतस्त्वमास्व ॥ ८६ ॥ इति श्रीवाल्मीकीये मोक्षोपाये स्थितिप्रकरणे दामा
द्युपाख्यानम् ॥ [१४] ॥ श्रीवसिष्ठ उवाच ॥ इदं मे स्यादिदं मे स्यादितिबुद्धिमनोम
ते। स्वेन दौर्भाग्यदैन्येन न भस्माप्युपतिष्ठते ॥ १ ॥ वेत्ति नित्यमुदारात्मा त्रैलोक्यम
पि यस्तृणम्। तं त्यजन्त्यापदः सर्वा मृगा इव जरत्तृणम् ॥ २ ॥ परिस्फुरति यस्यान्त
र्नित्यं सत्यचमत्कृतिः। ब्राह्ममण्डमिवाखण्डं लोकेशाः पालयन्ति तम् ॥ ३ ॥ येषां गु
णेषु संतोषो रोषो येषां श्रुतं प्रति। सत्यव्यसनिनो ये च ते नराः पशवः परे ॥ ४ ॥
अप्यापदि दुरन्तायां नैव गन्तव्यमक्रमे। राहुरप्यक्रमेणैव पिबन्नप्यमृतं स्वतः ॥ ५
॥ अवश्या वशमायान्ति यान्ति सर्वापदः क्षयम्। अक्षयं भवति श्रेयः क्रीतं येन गु
णैर्यशः ॥ ६ ॥ परमं पौरुषं यत्नादास्थायादाय सूद्यमम्। यथाशास्त्रमनुद्वेगमाचरन्को
न सिद्धिभाक् ॥ ७ ॥ यथाशास्त्रं विहरता त्वरा कार्या न सिद्धिषु। चिरकालपरीपक्वा
सिद्धिः पुष्टफला भवेत् ॥ ८ ॥ वीतशङ्कभयायासमगर्धमपयन्त्रणम्। व्यवहारो यथा
शास्त्रं क्रियतां मा विनश्यताम् ॥ ९ ॥ अनर्थायार्थसंपत्तिर्भोगौघो भवरोगदः। आप
दः संपदः सर्वाः सर्वत्रानादरो जयः ॥ १० ॥ आचारचारुचरितस्य विविक्तवृत्तेः सं
सारसौख्यलवदुःखदशास्त्वगृध्नोः। आयुर्यशांसि च गुणाश्च सहैव लक्ष्म्या फुल्लन्ति
माधवलता इव सत्फलाय ॥ ११ ॥ श्रीवसिष्ठ उवाच ॥ न तपांसि न तीर्थानि न शा
स्त्राणि जयन्ति च। संसारसागरोत्तारे सज्जनासेवनं विना ॥ १२ ॥ लोभमोहरुषां
यस्य तनुतानुदिनं भवेत्। यथाशास्त्रं विहरति स्वकर्मसु स सज्जनः ॥ १३ ॥ अहमर्थोऽ

78 a: अहमेतत्प्रबोधाय d: मा भवत्विति – 79 d: Hs. लीलया – 80/81 Ohne श्री० – 81 c: वयमिति – 82 d: च (für सः) – 86 (Vasantatilakā) c: ०मानन० – Kolophon zu Sarga 14: ०ख्यानं नाम पंचदशः सर्गः ॥ १५ ॥ – 15.1 Ohne श्री० b: बुद्धिर्महामते d: न सत्यमुपतिष्ठति – 4 b: रागो d: पशवोऽपरे – 5 a: अथापदि b: ०मक्रमम् d: मृतः, lies हतः – 6 a: वश्यतां यांति 7 a/b: यत्नमास्थाया० d: सिध्यति – 8 b: चिरकालं परा पक्वा – 9 a: वीतशोक० – 11 (Vasantatilakā) b: ०सौख्यफल० – 12 Ohne श्री० b: जपंति हि d: Hs. सज्जनाः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

परिज्ञातः परमार्थाम्बरेऽमलः । परिज्ञातोऽहमर्थस्तु परमार्थाम्बरं भवेत् ॥ १४ ॥ चिज्ज्योत्स्ना यावदेषान्तरहंकारघनावृता । विकासयति नो तावत्परमार्थकुमुद्वतीम् ॥ १५ ॥ अहंकारोऽङ्कुरो जन्मवृक्षाणामक्षयात्मनाम् । ममेदमिति विस्तीर्णास्तेषां शाखा ह्यसत्फलाः ॥ १६ ॥ श्रीराम उवाच ॥ किमाकृतिरहंकारः कथं संत्यज्यते प्रभो । स शरीरोऽशरीरश्च त्यक्ते तस्मिंश्च किं भवेत् ॥ १७ ॥ श्रीवसिष्ठ उवाच ॥ त्रिविधो राघवास्तीह त्वहंकारो जगत्त्रये । द्वौ श्रेष्ठावितरस्त्याज्यः शृणु त्वं कथयामि ते ॥ १८ ॥ अहं सर्वमिदं विश्वं परमात्माहमच्युतः । नान्यदस्तीति संविद्या परमा सा ह्यहंकृतिः । मोक्षायैषा न बन्धाय जीवन्मुक्तस्य विद्यते ॥ १९ ॥ सर्वस्माद्व्यतिरिक्तोऽहं वालाग्रशतकल्पितः । इति या संविदेवासौ द्वितीयाहंकृतिः शुभा ॥ २० ॥ पाणिपादादिमात्रोऽयमहमित्येष निश्चयः । अहंकारस्तृतीयोऽसौ लौकिकस्तुच्छ एव सः ॥ २१ ॥ वर्ज्य एष दुरात्मासौ कन्दः संसारदुस्तरे । अनेनाभिहतो जन्तुरधोऽधः परिधावति ॥ २२ ॥ अनया दुरहंकृत्या भावात्संत्यक्तया चिरम् । शिष्टाहंकारवाञ्जन्तुर्भगवान्याति मुक्तताम् ॥ २३ ॥ प्रथमौ द्वावहंकारावङ्गीकृत्यातिलौकिकौ । तृतीयाहंकृतिस्त्याज्या लौकिकी दुःखदायिनी ॥ २४ ॥ एषा तावत्परित्याज्या त्यक्त्वैनां दुःखदायिनीम् । यथा यथा पुमांस्तिष्ठेत्परमेति तथा तथा ॥ २५ ॥ अहंकृतिद्दशावेते पूर्वोक्ते भावयन्यदि । तिष्ठत्यभ्येति परमं तत्पदं पुरुषोऽनघ ॥ २६ ॥ अथ ते अपि संत्यज्य सर्वाहंकृतिवर्जितम् । संतिष्ठते तथाप्युच्चैः पदमेवाधिरोहति ॥ २७ ॥ शरीरस्थामयापुण्यदुरहंकारवर्जनात् । अनन्यपरमं श्रेय एतदेव परं पदम् ॥ २८ ॥ श्रीवसिष्ठ उवाच ॥ अथ ते शृणु वक्ष्यामि दामादिषु गतेष्वपि ॥ २९ ॥ देवनिर्जितसैन्योऽसौ शम्बरो दृप्तमानसः । पुनर्देववधोद्युक्तं चिन्तयामास दानवः ॥ ३० ॥ दामादयस्ते रचिता ये मया माययासुराः । मौर्ख्यात्तैर्भाविता युद्धे मिथ्यैवान्तरहंकृतिः ॥ ३१ ॥ इदानीं संसृजाम्यन्यान्दानवान्माययोदितान् । तानप्यध्यात्मशास्त्रज्ञान्सविवेकान्करोम्यहम् ॥ ३२ ॥ ततस्तत्त्वपरिज्ञानान्मिथ्याभावनयोज्झितम् । नाहंकारं प्रयास्यन्ति विजेष्यन्ते च ते सुरान् ॥ ३३ ॥ इति संचिन्त्य दैत्येन्द्रस्तादृशान्दानवान्धिया । माययोत्पादयामास बुद्बुदानिव वारिधिः ॥ ३४ ॥ सर्वज्ञा वेद्यवेत्तारो वीतरागा गतैनसः । यथाप्राप्तैककर्तारो भावितात्मान उत्तमाः ॥ ३५ ॥ भीमो भासो दृढ इति नामभिः परिलाञ्छि

15 a: **यावदेवांत॰** b: Hs. **विकाशयति** d: **॰कुमुद्वती** – 16 a: **अहंभावोंऽकुरो** d: **शाखास्त्वसत्फलाः**, lies **शाखा ह्यसत्फलाः** * – 17/18 Ohne **श्री॰** – 18 b: **सोऽहंकारो** – d: **शृणु ते कथयाम्यहम्** – 19 b: Hs. **॰मुच्यते** c: **संचिंत्य** e: **एषा सा नैव बंधाय** – 20 Nach c/d zusätzlich die Wiederholung von 19e/f wie Haupttext (20A) – 22 b: **संसारसंततेः** – 23 b: Hs. **भवात्** d: **॰र्भवत्याशु विमुक्तये** – 26 c: Hs. **तिष्ठत्यभ्येत्य** – 27 b: **॰वर्जितः** c: **स तिष्ठति तथात्युच्चैः** – 28 a/b: **शरीरावस्था महापुण्या दुरहंकृतिवर्जनात्** c: **अत्यंतं परमं** – 29 Ohne **श्री॰** b: Hs. **गतेष्वथ** – 30 c: **पुनर्देववधोपायं** – 31 a/b: **दामादयो ये रचितास्ते मया मयया पुरा** c/d: **मोहत्तैर्भाविता बुद्धिर्मिथ्यै॰** – 32 b: **माययोत्तमान्** – 33 b: **॰ज्झिताः** d: Hs. **नो सुरान्** – 35 c: **याथा॰**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ताः । जगत्तृणमिवाशेषं पश्यन्तः पावनाशयाः ॥ ३६ ॥ ते दैत्येन्द्रवचः प्राप्य च्छाद्
यामासुरम्बरम् । अयुध्यन्त समं देवैरपि वर्षगणान्बहून् ॥ ३७ ॥ तेषां यावदुदेत्यन्त
र्ममेदमिति वासना । तावत्कोऽयमहं चेति विचाराद्यात्यसत्यताम् ॥ ३८ ॥ ततस्तैर्नि
रहंकारैर्जरामरणनिर्भयैः । प्राप्तार्थकारिभिर्वीरैर्वर्तमानानुवर्तिभिः । वीतरागैर्गतद्वेषैः
सततं समदृष्टिभिः ॥ ३९ ॥ सा दैवी दानवैः सेना भीमभासदृढादिभिः । हता भुक्ता
क्षता प्लुष्टा स्वान्तश्रीरिव भोक्तृभिः ॥ ४० ॥ भीमभासदृढक्षुण्णा ततो गीर्वाणवाहि
नी । परिदुद्राव वेगेन गङ्गेव हिमवच्च्युता ॥ ४१ ॥ सा सुरानीकिनी देवं क्षीरोदार्णव
शायिनम् । जगाम शरणं शैलं वातार्तेवाभ्रमालिका ॥ ४२ ॥ अथ देवेन ते दैत्याः सं
गरे भृशदारुणे । चक्राग्निज्वालनिर्दग्धाः प्रापिता वैष्णवीं पुरीम् ॥ ४३ ॥ तस्माद्वास
नया बद्धं मुक्तं निर्वासनं मनः । राम निर्वासनीभावमाहराशु विवेकतः ॥ ४४ ॥ स
म्यगालोकनात्सर्वा वासना प्रविलीयते । वासनाविलये चेतः शममायाति दीपवत्
॥ ४५ ॥ इति श्रीवाल्मीकीये मोक्षोपाये स्थितिप्रकरणे भीमाद्युपाख्यानम् ॥ [१५]
॥ श्रीवसिष्ठ उवच ॥ अस्य संसारदुःखस्य सर्वोपद्रवदायिनः । उपाय एक एवास्ति मन
सः स्वस्य निग्रहः ॥ १ ॥ श्रूयतां ज्ञानसर्वस्वं श्रुत्वा चैवावधार्यताम् । भोगेच्छामात्र
को बन्धस्तत्त्यागो मोक्ष उच्यते ॥ २ ॥ किमन्यैः शास्त्रसंदर्भैः क्रियतामिदमेव तु ।
यद्यत्स्वाद्विह तत्सर्वं दृश्यतां वषिवद्विवत् ॥ ३ ॥ विषया विषमाभोगाः प्रविचार्य पु
नः पुनः । मनसा संपरित्यज्य सेव्यमानाः सुखावहाः ॥ ४ ॥ मनसोऽभ्युदये नाशो
मनोनाशे महोदयः । ज्ञमनो नाशमभ्येति मनोऽज्ञस्य हि शृङ्खलाः ॥ ५ ॥ नानन्दं न
निरानन्दं न चलं नाचलं स्थिरम् । न सन्नासन्न चैतेषां मध्यं ज्ञानिमनो विदुः ॥ ६ ॥
श्रीराम उवाच ॥ यथेदं संस्थितं विश्वं विश्वातीते चिदात्मनि । तन्मे कथय हे ब्रह्मन्पु
नर्बोधविवृद्धये ॥ ७ ॥ श्रीवसिष्ठ उवाच ॥ यथा सर्वगतः सौक्ष्म्यादाकाशं नोपलक्ष्य
ते । तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते ॥ ८ ॥ सर्वसंकल्परहिता सर्वसंज्ञावि
वर्जिता । सैषा चिदविनाशात्मा तत्त्वोत्त्यादिकृताभिधा ॥ ९ ॥ आकाशशतभागा
च्छा ज्ञेषु निष्कलरूपिणी । सकलामलसंसारस्वरूपैकात्मदर्शिनी ॥ १० ॥ तरंगादि
मयी स्फारा नानाता सलिलार्णवे । तस्मान्न व्यतिरेकेण यथा भाति विसारिणी ॥
११ ॥ त्वत्तामत्तामयी स्फारा नानातेयं चिदर्णवे । चिन्मात्राव्यतिरेकेण तथैवेत्थं
प्रकाशते ॥ १२ ॥ अज्ञेष्वसत्सु भावेषु संसारगुणगर्भिणी । ज्ञेषु प्रकाशरूपैव सकलै
कात्मिका सती ॥ १३ ॥ अनुभूतिवशान्नित्यं कर्मादीनां प्रकाशिनी । स्वादिनी सर्व

38 c: कोऽयमहंतेति – 40 a: Hs. देवदानवसेना d: स्वान्न० – 42 c: Hs. शीलं – 43 c: Hs. ०ज्वाला० – 44 d: Hs. ०माशुराह – 45 a/b: ०लोकनात्सत्याद्वासना d: शाम्यत्यस्नेहदीपवत् – Kolophon zu Sarga 15: इति श्रीयोगवासिष्ठसारे [!] स्थितिप्रकरणे भीमाद्युपाख्यानं नाम षोडशः सर्गः ॥ १६ ॥ – 16.1 Ohne श्री० b: ०कारिणः – 3 b: ०तामेतदेव – 5 a: ऽभ्युदयो b: ०नाशो d: शृंखला – 6 a: Lies सानन्दं (vgl. 23.125c/Konj.) – 8 Ohne श्री० b: ०दाकाशो – 9 d: स्वात्मेत्यादि० – 11b–12a fehlt bei der Hs. – 12 b: नाना सेयं – 13 a/b: अज्ञेष्वसत्स्वभावोग्रसंसारगणगर्भिणी

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

भावानां भावनी भवभोगिनाम् ॥ १४ ॥ नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति ।
न च याति न चायाति न चेह न च नेह चित् ॥ १५ ॥ सैषा चिदमलाकारा स्वय
मात्मनि संस्थिता । राघवेत्थं प्रपञ्चेन जगन्नाम्ना विजृम्भते ॥ १६ ॥ तत्स्वभावेन चि
न्नाम्ना सर्वगेनोदितात्मना । प्रकाशेनाप्रकाशेन निरंशेनांशधारिणा ॥ १७ ॥ स्वयं स्व
कल्पनायोगादनन्तं पदमुज्झता । अयमस्मीति भावेन गच्छताज्ञपदं शनैः ॥ १८ ॥
नानातायां प्ररूढायामस्यां संसृतिपूर्वकम् । भावाभावग्रहोत्सर्गपदे स्थितिमुपागते ।
पुर्यष्टकं स्पन्दशतैः करोति न करोति च ॥ १९ ॥ इत्थं स्थिरचलाकाराः संसारावल
योऽभितः । स्वभावाद्ब्रह्मणः सर्वाः पुनरायान्ति यान्ति च ॥ २० ॥ व्योमन्येव निरा
भासे निदाघात्सरितो यथा । लक्ष्यन्ते तद्वदेवेमाश्चित्तत्वे सृष्टिदृष्टयः ॥ २१ ॥ यथा
मदवशादात्मा स्वोऽन्यवत्प्रतिभासते । तथैव चित्ताचिद्वृत्तौ स एव स इव स्थितः ॥
२२ ॥ येन शब्दं रसं रूपं गन्धं जानासि राघव । सोऽयमात्मा परं ब्रह्म सर्वमापूर्य
संस्थितः ॥ २३ ॥ ब्रह्मैवेदं स्थिरं नामामलमस्तीह नेतरत् । तरंगोर्मिगणैरम्भः सिन्धोः
स्फुरति नो रजः ॥ २४ ॥ द्वितीया कल्पनैवेह न रघूद्वह विद्यते । ब्रह्ममात्रादृते वह्ना
वौष्ण्यमात्रादृते यथा ॥ २५ ॥ आदौ शमदमप्रायैर्गुणैः शिष्यं प्रबोधयेत् । पश्चात्सर्व
मिदं ब्रह्म शुद्धत्वमिति बोधयेत् ॥ २६ ॥ अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ।
महानरकजालेषु स तेन विनियोजितः ॥ २७ ॥ प्रबुद्धबुद्धेः प्रक्षीणभोगेच्छस्य निरा
शिषः । आत्मविद्यामलमते त्वादृशो राम गोचरः ॥ २८ ॥ सति दीप इवालोकः स
त्यर्क इव वासरः । सति पुष्प इवामोदश्चिति सत्यां जगत्तथा । प्रतिभासत एवेदं न
जगत्परमार्थतः ॥ २९ ॥ श्रीराम उवाच ॥ क्षीरोदकुल्यातुल्याभिः शीतलामलदीप्ति
भिः । तवोक्तिभिर्विचित्राभिर्गम्भीराभिरिवोदितः ॥ ३० ॥ क्षणमान्ध्यमिवाप्नोमि
क्षणं यामि प्रकाशताम् । शीतातपलवः प्रावृड्लोलाभ्र इव वासरः ॥ ३१ ॥ अनन्त
स्याप्रमेयस्य सर्वस्यैकस्य भास्वतः । अनस्तमितसारस्य कलना कथमागता ॥ ३२ ॥ श्री
वसिष्ठ उवाच ॥ यथाभूतार्थवाक्यार्थाः सर्वा एव ममोक्तयः । नासमर्था विरूपार्थाः
पूर्वापरविरोधतः ॥ ३३ ॥ ज्ञानदृष्टौ प्रसन्नायां प्रबोधे प्रततोदये । यथावज्ज्ञास्यसि स्व
स्थो मद्वाग्दृष्टिबलाबलम् ॥ ३४ ॥ अविद्ययैवोत्तमया स्वात्मना स्वोद्यमक्षयात् । विद्या
सा प्राप्यते राम सर्वदोषापहारिणी ॥ ३५ ॥ शाम्यति ह्यस्त्रमस्त्रेण मलेन क्षाल्यते
मलः । शमं विषं विषेणैति रिपुणा हन्यते रिपुः ॥ ३६ ॥ ईदृशी भूतमायेयं या स्वना
शेन हर्षदा । न लक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणैव नश्यति ॥ ३७ ॥ नास्त्येषा परमा
र्थेनेत्येवं भावनयेद्धया । ज्ञो भूत्वा ज्ञेयसंप्राप्त्या ज्ञास्यस्यस्यास्त्वमाशयम् ॥ ३८ ॥

16 c: राघवेयं – 19 a: प्रवृद्धायाम° – 20 a: स्थिरबला° c: Hs. स्वभावं ब्रह्मणः – 21 a: चिदाभासे – 22 b: अन्यवत्प्र° c: चित्त्वाविद्यातः d: स एवास इति – 24 a: lies रामा°*; स्थितं नाम्ना b: Hs. °स्तीति नेततं c: तरंगोग्र° – 25 c/d: Hs. वह्नौ वैष्ण्य° – 26 d: शुद्धस्त्व° – 28 c/d: lies °मतेस्त्वादृशो; नास्त्य विद्यामलमिति त्वादृशस्यैव गोचरः – 30 Ohne श्री° a: °कुक्षितुल्याभिः d: गंभीराभिः प्रबोधितः – 31 c: °लवप्रा° – 33 Ohne श्री° – 34 b: विततोदये – 35 b: स्वात्मनाशोद्यमोत्थया

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यावत्तु न प्रबुद्धस्त्वं तावन्मद्वचसैव ते । निश्चयो भवतूद्दामो नास्त्यविद्येति निश्चलः
॥ ३९ ॥ सद्ब्रह्मैवेति यस्यान्तर्भावना स हि मुक्तिभाक् । भेददृष्टिरविद्येयं सर्वथा तां
विवर्जयेत् ॥ ४० ॥ अविद्यासरितः पारमात्मलाभादृते किल । राम नासाद्यते तद्धि
पदमक्षयमुच्यते ॥ ४१ ॥ कुतो जातेयमिति ते राम मास्तु विचारणा । इमां कथमहं
हन्मीत्येषा तेऽस्तु वचिारणा ॥ ४२ ॥ अस्तं गतायां क्षीणायामस्यां ज्ञास्यसि राघव ।
यत एषा यथैवैषा यथा नष्टेत्यखण्डितम् ॥ ४३ ॥ तदस्यां रोगशालायां यत्नं कुरु चि
कित्सने । यथैषा जन्मदुःखेषु न भूयस्त्वां नियोक्ष्यति ॥ ४४ ॥ आत्मन्येवात्मना
व्योम्नि यथा सरति मारुतः । तथैवात्मात्मशक्त्यैव स्वात्मन्येवैति लोलताम् ॥ ४५ ॥
स्वात्मनि स्वपरिस्पन्दैः स्फुरत्यच्छैश्चिदर्णवत् । एकात्मकमखण्डं तदित्यन्तर्भाव्यतां
दृढम् ॥ ४६ ॥ किंचित्क्षुभितरूपा सा चिच्छक्तिश्चिन्महार्णवे । तन्मयैव स्फुरत्यच्छा
तत्रैवोर्मिरिवार्णवः ॥ ४७ ॥ क्षणं स्पुरति सा देवी सर्वशक्तितया तया । देशकालक्रि
याशक्तीर्वयस्याः संप्रकर्शति ॥ ४८ ॥ स्वं स्वभावं विदित्वोच्चैरप्यनन्तपदास्थिता । रू
पं परिमितैवासौ भावयत्यविभाविता ॥ ४९ ॥ यदेवं भावितं रूपं तया परमकान्त
या । तदेवैनामुपगता नामसंख्यादिका दृशः ॥ ५० ॥ विकल्पकलिताकारं देशकाल
क्रियास्पदम् । चितो रूपं महाबाहो क्षेत्रज्ञ इति कथ्यते ॥ ५१ ॥ वासनां कलयन्सो
ऽपि यात्यहंकारतां पुनः । अहंकारो विनिर्णेता कलङ्की बुद्धिरुच्यते ॥ ५२ ॥ बुद्धिः
संकल्पकलिता प्रयाति मनसास्पदम् । मनो घनविकल्पं तु गच्छतीन्द्रियतां शनैः ।
पाणिपादमयं देहमिन्द्रियाणि विदुर्बुधाः ॥ ५३ ॥ एवं जीवो हि संकल्पवासनारज्जु
वेष्टितः । दुःखजालपरीतात्मा क्रमादायाति चित्तताम् ॥ ५४ ॥ इति शक्तिमयं चेतो
घनाहंकारतां गतम् । कोशकारकृमिरिव स्वेच्छया याति बन्धनम् ॥ ५५ ॥ स्वसंक
ल्पिततन्मात्रजालाभ्यन्तरवर्ति च । परां विवशतामेति शृङ्खलाबद्धसिंहवत् ॥ ५६ ॥
क्वचिन्मनः क्वचिद्बुद्धिः क्वचिज्ज्ञानं क्वचित्क्रिया । क्वचिदेतदहंकारः क्वचित्पुर्यष्टकं
स्मृतम् ॥ ५७ ॥ क्वचित्प्रकृतिरित्युक्तं क्वचिन्मायेति कल्पितम् । क्वचिन्मलमिति
प्रोक्तं क्वचित्कर्मेति संज्ञितम् ॥ ५८ ॥ क्वचिद्बन्ध इति प्रोक्तं क्वचिच्चित्तमिति स्थि
तम् । प्रोक्तं क्वचिदविद्येति क्वचिदिच्छेति संमतम् ॥ ५९ ॥ इमं संसारमखिलमाशा
पाशविधायकम् । दधदन्तः फलैर्हीनं वटधाना वटो यथा ॥ ६० ॥ चिन्तानलशिखा

39 a: **प्रबुद्धत्वं** c: Lies **भवतूद्यामो** : vgl. **उद्याम** BHS und Pāli **उय्याम**; **उद्यम** (vgl. V 35) hier *m. c.*. nicht möglich. – 40 a: **सर्वं ब्रह्मेति** – 43 c: **यथा चैषा**, Hs. **यथैवेष** – 44 a: **तदस्या रोगशालाया** – 45 c: **तथात्मा स्वात्मशक्त्यैव** – 46 b: **स्फुरत्यच्छश्चिदर्णवः**, lies **स्फुरत्यक्षै*श्चिदर्णवम्** – 47 c: **तन्मय्येव** d: Hs. **०वार्णवः** – 48 a: **स्पुरंती** b: **तथा** – 49 a: **स्वस्वभावं** b: **०पदे स्थिता** c: **परिमितेनासौ** – 50 a: **यदैवं** c: **तदैवैनामनुगता** – 51 a: **विकल्पकल्पिता०** – 52 a: **वासनाः** – 53 b: **मननास्पदम्** (so auch Hs. Korr.), lies **मनसः पदम्*** e/f: **पाणिपादादिमदेहमिन्द्रियाणि** – 54 d: **नीचताम्** – 55 a: Lies **चितिश क्ति०** – 56 a: **०तन्मात्रं** – 57 c: **क्वचिदेवेत्यहंकारः** – 58 d: **संस्थितम्** – 59 b: **स्फुटम्** – 60 c: Hs. **दधदन्त०** d: **वटं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

दग्धं कोपाजगरचर्वितम् । कामाब्धिकल्लोलहतं विस्मृतात्मपितामहम् । समुद्धर म
नो राम मातङ्गमिव कर्दमात् ॥ ६१ ॥ ज्वलज्जरामरणविषादमूर्च्छिते शुभाशुभप्रसर
पराहताकृतौ । दयेह न स्वमनसि यस्य जायते नराकृतिर्जगति स राम राक्षसः ॥ ६२
॥ श्रीवसिष्ठ उवाच ॥ एव जीवाश्रिता भावा भवभावनयाहिताः । ब्रह्मणः कलिताका
रा लक्षशोऽप्यथ कोटिशः ॥ ६३ ॥ संख्यातीताः पुरा जाता जायन्तेऽद्यापि चाभि
तः । उत्पत्स्यन्तेऽपि चैवान्ये कणौघा इव निर्झरात् ॥ ६४ ॥ केचित्प्रथमजन्मानः
केचिज्जन्मशताधिकाः । केचिच्चासंख्यजन्मानः केचिद्द्वित्रिभवान्तराः ॥ ६५ ॥ के
चित्किंनरगन्धर्वविद्याधरमहोरगाः । केचिदर्केन्द्रवरुणत्र्यक्षाधोक्षजपद्मजाः ॥ ६६ ॥
केचिद्ब्राह्मणभूपालवैश्यशूद्रगणाः स्थिताः । केचित्पुण्यौषधीपत्रफलमूलपतङ्गकाः ॥
६७ ॥ केचित्कदम्बजम्बीरशालतालतमालकाः । केचिन्महेन्द्रमलयसह्यमन्दरमेरवः
॥ ६८ ॥ केचित्क्षीरदधिक्षारघृतेक्षुजलराशयः । केचिद्विशालाः ककुभः केचिन्नद्यो
महारयाः ॥ ६९ ॥ विहरन्ति जगत्केचिन्निपतन्त्युत्पतन्ति च । कन्दुका इव हस्तेन
मृत्युनाविरतं हताः ॥ ७० ॥ भुक्त्वा जन्मसहस्राणि भूयः संसारसंकटे । पतन्ति के
चिदबुधाः संप्राप्यातिविवेकताम् ॥ ७१ ॥ अविरतमियमातता स्थितोच्चैर्भवति विन
श्यति वर्धते मुधैव । त्रिभुवनरचना विमोहमाया परमपदे लहरीव वारिराशौ ॥ ७२
॥ श्रीराम उवाच ॥ जीवो मनःपदं प्राप्य वैरिञ्चं पदमागतः । यथा ब्रह्मंस्तथा सर्वं
विस्तरेण वदाशु मे ॥ ७३ ॥ श्रीवसिष्ठ उवाच ॥ ब्राह्म्यं शृणु महाबाहो शरीरग्रहणक्र
मम् । निदर्शनेन तेनैव जागतीं ज्ञास्यसि स्थितिम् ॥ ७४ ॥ दिक्कालाद्यनवच्छिन्नमा
त्मतत्त्वं स्वशक्तितः । लीलयैव यदादत्ते दिक्कालकलितं वपुः ॥ ७५ ॥ तदेव जीवप
र्यायं वासनावेशतत्परम् । मनः संकल्पते लोलं कलनाकलनोन्मुखम् ॥ ७६ ॥ कलय
न्ती मनःशक्तिरादौ भावयति क्षणात् । आकाशभावनावस्थां शब्दबीजरसोन्मुखीम्
॥ ७७ ॥ ततस्तद्घनतां यातं घनस्पन्दं क्रमान्मनः । भावयत्यनिलस्पन्दं स्पर्शबीजर
सोन्मुखम् ॥ ७८ ॥ ताभ्यामाकाशवाताभ्यां दृढाभ्यासवशात्ततः । शब्दस्पर्शस्वरू
पाभ्यां संकर्षाज्जन्यतेऽनलः ॥ ७९ ॥ मनस्तादृग्गुणगतं रसतन्मात्रवेदनम् । क्षणाच्चे
तत्यपां शैत्यं जलसंवित्ततो भवेत् ॥ ८० ॥ ततस्तादृग्गुणघनं मनो भावयति क्षणात् ।
गन्धतन्मात्रमेतस्माद्भूमिसंवित्ततो भावेत् ॥ ८१ ॥ अथेत्थं भूमितन्मात्रवेष्टितं तनुतां
जहत् । वपुर्वह्निकणाकारं स्फुरितं व्योम्नि पश्यति ॥ ८२ ॥ अहंकारकलायुक्तं बुद्धि
बीजसमन्वितम् । तत्पुर्यष्टकमित्युक्तं भूतहृत्पद्मषट्पदम् ॥ ८३ ॥ तस्मिंस्तु तीव्रसंवे

62 (Rucirā) – 63 Ohne श्री० a: जीवाश्रितो b: ०भावनयेहिताः c: कल्पिता० – 64 c: जलौघा – 66 c: ०दर्केंदु० – 68 c: ०मलयाः – 69 a: केचित्क्षारदधिक्षीर० c: Hs. कुकुभं – 70 a: विहरंत्युच्चकैः – 71 d: संप्राप्याप्यविवेकिताम् – 72 (Puṣpitāgrā) a: स्थितौघैर्भवति; Hs.: ०च्चै०* fehlt. – 73 Ohne श्री० b: वैरश्चं – 74 Ohne श्री० a: ब्राह्मं d: ज्ञास्यसे जागतीं – 76 a: तदेतज्जीव० b: वासनावशतः परम् c: संपद्यते – 77 c: ०भावनामच्छां d: Lies ०रसोन्मुखी – 78 Hs.(entstellt) hat u. a. ०रसोन्मुखी (d) – 79 b: ०वशाद्यतः d: संघर्षाज्जायते – 81 a: ०गुणगतं – 82 a/b: भूततन्मात्रैर्वेष्टितं – 83 d: Lies ०षट्पदः*

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

गाद्भावयन्भास्वरं वपुः । स्थूलतामेति पाकेन मनो बिल्वफलं यथा ॥ ८४ ॥ मूषास्थ
द्रुतहेमाभं स्फुरितं विमलाम्बरे । संनिवेशमथादत्ते तत्तेजः स्वं स्वभावतः ॥ ८५ ॥
ऊर्ध्वे शिरःपीठमयमधः पादमयं तथा । पार्श्वयोर्हस्तसंस्थानं मध्ये चोदरधर्मिणम् ॥
८६ ॥ कालेन स्फुटतामेति भवत्यमलविग्रहः । बुद्धिसत्यबलोत्साहविज्ञानैश्वर्यसंस्थि
तः ॥ ८७ ॥ स एव भगवान्ब्रह्मा सर्वलोकपितामहः । अवलोक्य वपुर्ब्रह्मा कान्तमा
त्मीयमुत्तमम् । चिन्तामभ्येति भगवांस्त्रिकालामलदर्शनः ॥ ८८ ॥ एतस्मिन्परमा
काशे चिन्मयैकात्मरूपिणि । अदृष्टपारपर्यन्ते प्रथमं किमभूदिति । इति चिन्तितवा
न्ब्रह्मा सद्यो जातोऽमलात्मदृक् ॥ ८९ ॥ संपश्यन्सर्गवृन्दानि समतीतान्यनेकशः ।
स्मरत्यथो स सकलान्सर्वधर्मगुणक्रमान् ॥ ९० ॥ लीलया कल्पयत्येषासत्याः संकल्प
जाः प्रजाः । नानाचारसमारम्भा गन्धर्वनगरं यथा ॥ ९१ ॥ तासां स्वर्गापवर्गार्थं ध
र्मकामार्थसिद्धये । अनन्तानि विचित्राणि शास्त्राणि समकल्पयत् ॥ ९२ ॥ दृष्टिरेव
मियं रेमे सर्गे संस्थितिमागता । चिरं विरूपान्मनसः पुष्पलक्ष्मीर्मधोरिव ॥ ९३ ॥
श्रीवसिष्ठ उवाच ॥ स्वसंकल्पकृताः सर्वे देवासुरनरादयः । स्वसंकल्पोपशमने शाम्य
न्त्यस्नेहदीपवत् ॥ ९४ ॥ आकाशसदृशं सर्वं कल्पनामात्रजृम्भितम् । जगत्पश्य महा
बुद्धे सुदीर्घस्वप्नमुत्थिम् ॥ ९५ ॥ न जायते न म्रियते इति किंचित्कदाचन । परमा
र्थेन सुमते मिथ्या सर्वं तु विद्यते ॥ ९६ ॥ कोशमाशाभुजङ्गानां संसाराडम्बरं त्यज ।
असदेतमिति ज्ञात्वा मात्र भावं निवेशय ॥ ९७ ॥ गन्धर्वनगरस्यार्थे भूषिते दूषितेऽथ
वा । अविद्यांशे सुतादौ वा कः क्रमः सुखदुखयोः ॥ ९८ ॥ धनदारेषु वृद्धेषु दुःखमु
क्तं न दृष्टता । वृद्धायां मोहमायायां कः समाश्वासवानिह ॥ ९९ ॥ यैरेव जायते रागो
मूर्खस्याधिकतां गतैः । तैरेव भोगैः प्राज्ञस्य विराग उपजायते ॥ १०० ॥ अतो राघव
तत्त्वज्ञो व्यवहारेषु संस्थितः । नष्टं नष्टमुपेक्षस्व प्राप्तं प्राप्तमुपाहर ॥ १०१ ॥ अनाग
तानां भोगानामवाञ्छनमकृत्रिमम् । आगतानां च संभोग इति पण्डितलक्षणम् ॥
१०२ ॥ यस्यासदिदमित्यास्था निवृत्ता सर्ववस्तुष । क्रोडीकरोति सर्वज्ञं नाविद्या तम
वास्तवी ॥ १०३ ॥ शुद्धं सदसतोर्मध्यं पदं बुद्ध्यावलम्ब्य च । सबाह्याभ्यन्तरं दृश्यं
मा गृहाण विमुञ्च मा ॥ १०४ ॥ यस्य नेच्छा न वानिच्छा ज्ञस्य कर्मणि तिष्ठतः । न
तस्य लिप्यते प्रज्ञा पद्मपत्रमिवाम्बुभिः ॥ १०५ ॥ यदि ते नेन्द्रियार्थश्रीः स्वदते हृदि
राघव । तदसि ज्ञातविज्ञानः समुत्तीर्णो भवार्णवात् ॥ १०६ ॥ उच्चैःपदाय परया प्रज्ञ
या वासनागणात् । पुष्पाद्गन्धमिवोदारं चेतो राम पृथक्कुरु ॥ १०७ ॥ संसाराम्बुनि

84 a: **तस्मिंस्तत्तीव्र॰** b: **॰न्भासुरं**; lies **॰द्भावयद्भा॰*** – 85 d: **स्वस्वभावतः** – 86 a: **ऊर्ध्वं शिरःपिंड॰**; lies **शिरापीड॰** d: Lies **॰धर्मितम्** (vgl. BHS) – 87 a: **स्फुटतामेत्य** c: **बुद्धिसत्त्व॰** – 89 c: **अदृष्टापार॰** – 90 a: **सर्ववृन्दानि** – 91 a/b: **कल्पयत्येष चित्राः**; lies **कल्पयत्येषोऽसत्याः** – 93 a/b: **सृष्टिरेवमियं राम सर्गेऽस्मिन्स्थितिमागता** c: **विरंचिरूपा॰** – 94 Ohne **श्री॰** b: **॰नरामराः** – 97 c: **असदेतदिति** – 98 c: **अविद्यांशसुताद्यैर्वा** – 99 b: Lies **तुष्टता***; **दुःखं युक्तं न चेष्टतः** d: **समायासवानिह** – 101 b: Hs. **संस्थिते** c: Hs. **॰पेक्ष्यस्व** – 103 a: **यस्य स्यादि॰**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

धावस्मिन्वासनाम्बुपरिप्लुते । ये प्रज्ञानावमारूढास्ते तीर्णा ब्रुडिताः परे ॥ १०८ ॥ न
त्यजन्ति न वाञ्छन्ति व्यवहारं जगद्गतम् । सर्वमेवानुवर्तन्ते पारावारविदो जनाः ॥
१०९ ॥ सुशून्येऽपि न खिद्यन्ते देवोद्याने न सङ्गिनः । नियतिं न च मुञ्चन्ति महा
न्तो भास्करा इव ॥ ११० ॥ श्रीवाल्मीकिरुवाच ॥ इत्थंगिरा विमलया विमलाशयस्य
रामो मुनेः सुपरिमृष्ट इवाबभासे । ज्ञानामृतेन मधुरेण विराजितान्तः पूर्णः शशाङ्क
इव शीतलतां जगाम ॥ १११ ॥ श्रीवसिष्ठ उवाच ॥ कदाचित्सृष्टयः शार्व्यः कदाचि
त्पद्मजोद्भवाः । कदाचिदपि वैष्णव्यः कदाचिन्मुनिनिर्मिताः ॥ ११२ ॥ कदाचिद
ब्जजो ब्रह्मा कदाचित्सलिलोद्भवः । अण्डोद्भवः कदाचिच्च कदाचिज्जायतेऽम्बरात्
॥ ११३ ॥ कस्यांचिद्भूरभूत्सृष्टौ नीरन्ध्रतरुसंकटा । कस्यांचिन्नरनीरन्ध्रा कस्यांचिद्भू
धरावृता ॥ ११४ ॥ भूरभून्मृन्मयी काचित्काचिदासीद्दृषन्मयी । आसीद्धेममयी का
चित्काचिन्मांसमयी तथा ॥ ११५ ॥ कदाचित्प्रथमं व्योम प्रतिष्ठामधिगच्छति । क
दाचित्प्रथमं पृथ्वी कदाचित्प्रथमं पयः । कदाचित्प्रथमं तेजः कदाचित्प्रथमं मरुत्
॥ ११६ ॥ निदर्शनार्थं सृष्टेस्तु मयैकस्य प्रजापतेः । भवते कथितोत्पत्तिर्न त्वत्र निय
मः क्वचित् ॥ ११७ ॥ पुनः कृतं पुनस्त्रेता पुनश्च द्वापरः कलिः । पुनः पुनरिदं सर्वं त
न्नास्ति न पुनश्च यत् ॥ ११८ ॥ जगन्मायास्वरूपस्य वर्णनाव्यपदेशतः । दाशूराख्या
यिकां राम वर्ण्यमानां मया शृणु ॥ ११९ ॥ अस्त्यस्मिन्वसुधापीठे विचित्रकुसुमद्रु
मः । मागधो नाम विख्यातः श्रीमाञ्जनपदो महान् ॥ १२० ॥ कदम्बवनविस्तारिता
लावलितजङ्गलः । विचित्रविहगव्यूहसर्वाश्चर्यमनोहरः ॥ १२१ ॥ तत्रैकस्मिन्गिरितटे
कर्णिकारसमाकुले । कदलीखण्डनीरन्ध्रे नीपगुल्मविराजिते ॥ १२२ ॥ कश्चित्परमध
र्मात्मा मुनिरासीन्महातपाः । दाशूरनामा महता तपोयोगेन संयुतः ॥ १२३ ॥ शरलो
मेति विख्यातः पिता तस्य बभूव ह । रामापर इव ब्रह्मा तस्मिन्नेवावसद्गिरौ । तस्या
सावेकपुत्रोऽभूत्कचो देवगुरोरिव ॥ १२४ ॥ तेन सार्धं स पुत्रेण नीतवाञ्जीवितं वने ।
अथासौ शरलोमात्र भुक्त्वा युगगणान्ययौ । त्यक्तदेहः सुरागारं त्यक्तनीडः खगो य
था ॥ १२५ ॥ एक एव वने तस्मिन्दाशूरः प्ररुरोद ह । दशापनीतपितृकः करुणं कुर
रो यथा ॥ १२६ ॥ मातापितृवियोगेन शोकसंतापिताशयः । म्लानिमभ्याययौ नूनं
हेमन्त इव पङ्कजम् ॥ १२७ ॥ बालोऽसावथ दीनात्मा वनदेवतया वने । इत्थमाश्वा
सितो राम तदादृश्यशरीरया ॥ १२८ ॥ ऋषिपुत्र महाप्राज्ञ किमज्ञ इव रोदिषि । सं
सारस्य न कस्मात्त्वं स्वरूपं वेत्सि चञ्चलम् ॥ १२९ ॥ सर्वदैवेदृशी साधो संसारस्य

108 d: **दुःखिताः** – 109 b: **जगद्भवम्** – 110 a: **ते शून्ये** b: **ते देवोद्यानसंगिनः** c: **च न** – 111 (Vasanta-tilakā) Ohne **श्री०** b: **स परिपुष्ट** c: **विचारितातः** d: **पूर्णं** – 111A: **श्रीराम उवाच ॥ सृष्टिरेकविधा किं स्यात्किं वा बहुविधा वद । तद्विज्ञानेन मायाया रूपं स्फुटतरं भवेत् ॥** – 112 Ohne **श्री०** – 113 c: **कदाचित्तु** – 114 a: **कदाचि०** – 115 **कदाचिन्मृन्मयी भूमिः कदाप्यासीद्दृषन्मयी । कदाचित्कांचनमयी कदाचिन्मांसमय्यभूत् ॥** – 117 c: **भवेत** d: **त्वयं** – 118 d: **तत्रास्ति न पुनस्तु यत्** – 121 a: Lies **०विस्तारी** – 125 e: **त्यक्त्वा देहं** – 128 d: Hs. **तथादृश्य०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

स्थितिश्चला । जायते जीवते पश्चादवश्यं च विनश्यति ॥ १३० ॥ तदर्थं मा कृथा व्यर्थं
विषादं मरणे पितुः । अवश्यं भाव्यस्तमयो जातस्याहर्पतेरिव ॥ १३१ ॥ अशरीरामि
ति श्रुत्वा गिरमारक्तलोचनः । धैर्यमासादयामास शिखण्डी स्तनितादिव ॥ १३२ ॥
उत्थायावश्यकं कृत्वा पाश्चात्यं पितुरादृतः । चकार तपसे बुद्धिं दृढ उत्तमसिद्धये
॥ १३३ ॥ ब्राह्मेण कर्मणा तस्य विपिने चरतस्तपः । अनन्तसंकल्पमयं श्रोत्रियत्वं ब
भूव ह ॥ १३४ ॥ अज्ञातज्ञेयबुद्धेस्तु सुश्रोत्रियतया तया । न विशश्राम चेतोऽस्य पवि
त्रेऽपि धरातले ॥ १३५ ॥ केवलं सर्वमेवेदमपि शुद्धं धरातलम् । अशुद्धमिव पश्यन्स
न रेमे क्वचिदेव हि ॥ १३६ ॥ अथ संकल्पमागत्य स्वसंकल्पनयैव सः । वृक्षाग्रमेव सं
शुद्धं स्थितिरत्रोचिता मम ॥ १३७ ॥ तथेदानीं तपस्तप्ये तपसा येन शाखिषु । खग
वत्स्थितिमाप्नोति शाखासु च दलेषु च ॥ १३८ ॥ इति संचिन्त्य संज्वाल्य हुताशम
तिभास्वारम् । जुहाव तस्मिन्प्रोत्कृत्य मांसं स्वस्कन्धभित्तितः ॥ १३९ ॥ अथ गीर्वाण
वृन्दस्य समग्रा गलभित्तयः । मन्मुखस्थेन मा यान्तु विप्रमांसेन भास्वताम् ॥ १४० ॥
इति संचिन्त्य भगवान्सप्तार्चिस्तस्य देवता । पुरो बभूव दीप्तांशुर्दीप्तांशुर्वाक्पतेरिव
॥ १४१ ॥ उवाच वचनं विप्रकुमाराभिमतं वरम् । गृहाण स्थापितं साधो कोशकोशा
न्मणिं यथा ॥ १४२ ॥ इत्युक्तवन्तममलमर्घपुष्पोपशोभितम् । संपूज्य स्तुतिवाक्येन
प्राह विप्रकुमारकः ॥ १४३ ॥ भगवन्पूतिवर्णाया भुवः पावनमण्डलम् । नाप्नोमि तेन
वृक्षाणामुपरि स्थितिरस्तु मे ॥ १४४ ॥ इत्युक्ते मुनिपुत्रेण सर्वदेवमुखं शिखी । एवम
स्तु तवेत्युक्त्वा जगामान्तर्धिमीश्वरः ॥ १४५ ॥ तस्मिन्नन्तर्हिते देवे क्षणात्सांध्य इवा
म्बुदे । अथ काननमध्यस्थं चुम्बिताम्बुदमण्डलम् । कदम्बं रोदसीस्तम्भमारुरोह द्वि
जोत्तमः ॥ १४६ ॥ तत्रासौ व्योमलग्नायां शाखायां प्रान्तपल्लवे । विवेश विगताशङ्क
मेकाग्रतपसि स्थितः ॥ १४७ ॥ अथोपविश्य मृदुनि तत्र पल्लवविष्टरे । क्षणमालोकि
तास्तेन दिशः कौतुकचञ्चला ॥ १४८ ॥ सरिदेकावलीरम्याः शैलेन्द्रस्तनकुड्मलाः ।
निर्मलाकाशकबरा लोलनीलाम्बुदालकाः ॥ १४९ ॥ तस्मिँल्लतादले स्थित्वा विलोक्य
ककुभः क्षणम् । दृढपद्मासनं बद्ध्वा दिग्भ्यः प्रत्याहृतात्मना ॥ १५० ॥ अज्ञातपरमा
र्थेन क्रियामात्रे च तिष्ठता । फलकार्पण्ययुक्तेन चेतसा सोऽकरोन्मखम् ॥ १५१ ॥ त
त्रासौ दश वर्षाणि मनसैवायजत्सुरान् । गवाश्वनरमेधाद्यैर्यज्ञैर्विपुलदक्षिणैः ॥ १५२
॥ कालेनामलतां याते वितते तस्य चेतसि । बलादवततारान्तर्ज्ञानमात्मप्रसादनम् ॥
१५३ ॥ ततो विशीर्णवरणो विगलद्वासनामलः ॥ १५४ ॥ स ददर्शैकदा तस्यां लता

131 c: **अवश्यभाव्योऽस्तमयो** – 133 d: **दृढामुत्तम॰** – 136 a/b: **सर्वमेवेदं सुविशुद्धं** c: **अशुद्धमेव** d: **न रमे त्क्वचिदेव** – 137 a: **संकल्पनेनैव** b: **संकल्पमनसैव** – 138 a/b: **अथेदानीं तपस्तप्यं तपसोग्रेण शाखिषु ।** – 139 Hs. entstellt – 142 d: **कोशस्थं सन्मणिं** – 143 a/b: **इत्युक्तवन्तं तं देवमर्घ॰** c: **स्तुतिवादेन** – 144 a: **भगवन्भूतपूर्णाया** – 145 c: Hs. **तथेत्यु॰** – 147 a/b: **॰लग्नायाः शाखायाः** d: Lies **॰मेकाग्रं*** – 148 d: Lies **॰चञ्चलः**; **कौतुकलीलया** – 149 c: Lies **॰कवचा** – 150 a: **॰तागृहे** c: **दृढं** – 153 d: **॰प्रसादजम्** – 154 a: **विशीर्णावरणो**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यां मध्यसंस्थिताम् । वनदेवीं विशालाक्षीमालोलकुसुमाम्बराम् ॥ १५५ ॥ तामुवाचा
नवद्याङ्गीं स मुनिर्विनताननाम् । का त्वमुत्पलपत्राक्षि कान्तिविक्षोभितस्मरा ॥ १५६
॥ इत्युक्ते मृगशावाक्षी गौरपीनपयोधरा । मुनिमाह मनोहारि मुग्धाक्षरमिदं वचः ॥
१५७ ॥ यानि यानि दुरापाणि वाञ्छितानि माहीतले । प्राप्यन्ते तानि तान्याशु म
हतामेव याञ्चया ॥ १५८ ॥ अहमस्मिँल्लवाकीर्णे त्वत्कदम्बाभ्यलंकृते । लतालीलाल
या ब्रह्मन्विपिने वनदेवता ॥ १५९ ॥ यश्चैत्रसितपक्षस्य त्रयोदश्यां स्मरोत्सवे । बभूव
वनदेवीनां समाजो नन्दने वने । तत्राहमागामं नाथ त्रैलोक्यललनासदः ॥ १६० ॥
ततो दृष्टा मया सर्वा वयस्या मदनोत्सवे । अपुत्रया पुत्रयुक्तास्तेनाहं दुःखिता भृशम्
॥ १६१ ॥ त्वयि सर्वार्थिसार्थस्य बृहत्कल्पतरौ स्थिते । अनाथेव कथं नाथ किल शो
चाम्यपुत्रिका ॥ १६२ ॥ देहि मे भगवन्पुत्रं नो चेदहमिहाग्नये । प्रकरोम्याहुतिं पुत्र
दुःखदाहोपशान्तये ॥ १६३ ॥ तामित्युक्तवतीं तन्वीं विहस्य मुनिपुङ्गवः । प्राह हस्त
गतं पुष्पं तस्यै दत्त्वा दयान्वितः ॥ १६४ ॥ गच्छ तन्वङ्गि मासेन पूजार्हमलिलोचने ।
प्रसोष्यसे सुतं कान्तं प्रसूनमिव सल्लता ॥ १६५ ॥ किं त्वसौ मरणावेशयायिन्यान्त
स्त्वया सुतः । याचितः कृच्छ्रसंप्राप्यज्ञानस्ते न भविष्यति ॥ १६६ ॥ इत्युक्त्वा स मु
निस्तन्वीं प्रसन्नमुखमण्डलाम् । परिचर्यां करोमीति प्रार्थनोक्तां न्यसर्जयत् ॥ १६७
॥ सा जगामात्मसदनं मुनिः स्वार्थपरोऽभवत् । अवहक्रमशः काल ऋतुसंवत्सराङ्कि
तः ॥ १६८ ॥ अदीर्घेणैव कालेन सैवोत्पलविलोचना । द्वादशाब्दमुपादाय सुतं मुनि
मुपाययौ ॥ १६९ ॥ सा प्रणम्योपविश्याथ मुनिमिन्दुसमानना । उवाच कलया वा
चा चूतद्रुममिवालिनी ॥ १७० ॥ अयं स भगवन्भव्यकुमारः पुत्र आवयोः । कृतो
मया समग्राणां कलानां किल कोविदः ॥ १७१ ॥ प्रभो केवलमेतेन ज्ञानं नाधिगतं
शुभम् । तेन संसारयन्त्रेण अवशः परिपीड्यते । ज्ञानं त्वमेवास्य विभो कृपयोपदिशा
धुना ॥ १७२ ॥ एवं वदन्तीं स मुनिर्मच्छिष्यमबले सुतम् । इहैव स्थापयैनं त्वमित्यु
क्त्वा तां व्यसर्जयत् ॥ १७३ ॥ तस्यां गतायां स पितुरन्तेवासितया तया । अतिष्ठ
त्संयतो धीमानर्कस्येवारुणः पुरः ॥ १७४ ॥ कदर्थप्राप्तविज्ञानं ततश्चित्राभिरुक्ति
भिः । चिरकालमसौ तत्र मुनिः पुत्रमबोदयत् ॥ १७५ ॥ आख्यायिकाख्यानशतैर्दृ
ष्टान्तैर्दृष्टकल्पितैः । तथेतिहासवृत्तान्तैर्वेदवेदान्तनिश्चयैः । अनुद्वेगितया नित्यं विस्त
रेण यथाक्रमम् ॥ १७६ ॥ श्रीवसिष्ठ उवाच ॥ कदाचिदथ मार्गेण तेन कैलासवाहि

155 a: संददर्शैकदा b: Hs. ०स्थितम्; लतायामग्रतः स्थिताम् – 156 d: ०स्मरे – 157 b: गौरी d: Hs. ०मिमं – 159 a: अहमत्र द्रुमाकीर्णे c: ०लीलालये – 161 a: तत्र c: पुत्रयुता० – 162 a: Hs. सर्वार्थ० – 164 c: प्रादाद्धस्तगतं पुष्पं d: प्रेम्णा (für दत्त्वा) – 166 a/b: ०वेशोपायिन्या यस्त्वया c: ०संप्राप्त० – 167 d: व्यसर्जयत् – 168 c: कालं (sic) d: ०रांकितम् – 169 a: अथ दीर्घेण कालेन – 170 a: ०विश्याग्रे – 171 a: भव्यः – 172 c/d: संसारयन्त्रेऽस्मिन्नवशः – 174 b: ०वासितयात्तया – 176 b: ०दृष्टि० e: अनुद्वेगतया – 177 Ohne श्री० a: ०चिदार्यमार्गेण d: व्योमवीथीं गतः पुरा

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

**नीम् । अहं स्नातुमदृश्यात्मा व्योमवीथीं गतोऽगमम् ॥ १७७ ॥ निर्गत्य नभसः सप्त
मुनिमण्डलकोटरात् । रात्रौ प्राप्तोऽस्मि सुमते दाशूर तरु पृष्टतः ॥ १७८ ॥ यावच्छृणो
मि विटपकुहरात्कानने वचः । कुड्मलाम्भोजखण्डस्य षट्पदस्येव निस्वनम् ॥ १७९
॥ दाशूर उवाच ॥ शृणु वत्स महाबुद्धे वस्तुनोऽस्य समामिमाम् । वर्णयामि महाश्च
र्यामेकामाख्यायिकां तव ॥ १८० ॥ अस्ति राजा महावीर्यो विख्यातो भुवनत्रये ।
नाम्ना स्वोत्थ इति श्रीमाञ्जगदाक्रमणक्षमः ॥ १८१ ॥ यस्यानुशासनं सर्वे भुवनेष्वपि
नायकाः । शिरोभिर्धारयन्त्युच्चैश्चूडामणिमिवोत्तमम् ॥ १८२ ॥ यः साहसैकरसिको
नानाश्चर्यविहारवान् । केनचित्त्रिषु लोकेषु न महात्मा वशीकृतः ॥ १८३ ॥ यस्यार
म्भक्रसहस्राणि सुखदुःखप्रदान्यलम् । संख्यातुं केन शक्यन्ते कल्लोला जलधेरिव ॥
१८४ ॥ यस्य वीर्यं सुवीर्यस्य न शस्त्रैर्न च पावकैः । केनचिद्भुवने क्रान्तमाकाशमिव
मुष्टिना ॥ १८५ ॥ यदीयां विततारम्भां लीलां निर्माणभासुराम् । मनागनुपकुर्वन्ति
शक्रोपेन्द्रहरा अपि ॥ १८६ ॥ त्रयस्तस्य महाबाहो देहा दिग्भरणक्षमाः । जगदाक्रम्य
तिष्ठन्ति उत्तमाधममध्यमाः ॥ १८७ ॥ व्योमन्येवातिवितते जातोऽसौ त्रिशरीरकः ।
तत्रैव च स्थितिं यातः शब्दपातखपक्षिवत् । तत्रैवापारपर्यन्ते नगरं तेन निर्मितम् ॥
१८८ ॥ चतुर्दशमहारथ्यं भागत्रयविभूषितम् । शीतलोष्णात्मकाक्षीणदीपद्वयविरा
जितम् ॥ १८९ ॥ तस्मिन्नेवातिविपुले पत्तने तेन भूभृता । संचारिणा विरचिता मु
ग्धापवरकागणाः । ऊर्ध्वं केचिदधः केचित्केचिन्मध्ये नियोजिताः ॥ १९० ॥ असि
तच्छादनाच्छन्ना नवद्वारविभूषिताः । अनारतवहद्वातबहुवातायनान्विताः ॥ १९१ ॥
दीपपञ्चकसालोकास्त्रिस्थूणाः शुक्रदारवः । मसृणालेपमृदवः प्रतोलीकुलसंभवाः ॥
१९२ ॥ मायया रचितास्तेन राज्ञा तेषु महात्मना । रक्षितारो महायक्षा नित्यमालो
कभीरवः ॥ १९३ ॥ अथापवरकौघेषु चलत्सु स महीपतिः । करोति विविधां क्रीडां
नीडेष्विव विहंगमाः ॥ १९४ ॥ त्रिशरीरः स तेष्वन्तस्तैर्यक्षैः सह पुत्रक । लीलालस
मुषित्वाशु पुनर्निष्क्रम्य गच्छति ॥ १९५ ॥ तस्येच्छा जायते वच्छ कदाचिच्चलचेत
सः । विनाशं संप्रयामीति तेनाशु स विनश्यति ॥ १९६ ॥ पुनरुत्पद्यते तूर्णं खान्म**

178 a/b: **नभसस्तत्र मुनिमंडलकोदरात्** (sic) – d: Lies **दाशूरं**; **दाशूरतरुमुन्नतम्** – 179 c: Lies: **०संस्थस्य***; **कुड्मलांभोजसद्मस्थ०** d: Hs. **निश्चितम्** – 180 Hs. ohne **दाशूर उवाच ॥** a: **पुत्र** d: Hs. **०ख्यायिका मिमाम्** – 181 d: **०क्रमणे क्षमः** – 185 c: **०चिद्भवने** – 186 a: **विततारंभ०** c: **न मनागनुकुर्वंति** – 187 a/b: **महाबाहोर्देह०** (wurde nur bei LN gefunden) – 188 d: Hs. **शब्दवात०**; **शब्दपातश्च पक्षिवत्** – 189 b: **विभागत्रयभूषितम्** Nach a/b zusätzlich: **वनोपवनमालाढ्यं क्रीडाशिखरिसुस्थितम् । मुक्तालताध वलितं वापीसप्तकभूषितम् ।** (189A) – 190 c: Lies **संचारिणो*** d: Hs. **मुग्धापवरिका०** – e/f: **ऊर्ध्वं केचि दधः केचिन्मध्ये केचिन्नियोजिताः** – 191 a: **असिताच्छादना०** – 192 d: **०कुलसंकुलाः** – 193 c: **महापक्षा** d: Hs. **०भैरवः** – 194 d: **विहंगमः** – 195A: **तस्येच्छा जायते वत्स कदाचिच्चलचेतसः । पुरं भविष्यन्निर्माणं** [2. Aufl.: **०णां**] **किंचिद्यामीति निश्चला ॥** B: **भूताविष्ट इवावेगात्तत उत्थाय धावति । पुरं तदप्यवाप्नोति गंध र्वैरिव निर्मितम् ॥** – 196 a: **वत्स**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

होर्मिरिवाम्भसः । व्यवहारं तनोत्युच्चैः पुनरारम्भमन्थरम् ॥ १९७ ॥ स्वयैव व्यवहृ
त्याथ कदाचित्परिदूयते । किं करोमीदमज्ञोऽस्मि दुःखितोऽस्मीति शोचितः । मुदमे
त्य कदाचिच्च स्वयमायाति पीनताम् ॥ १९८ ॥ पिबति गच्छति वल्गति जृम्भते स्फु
रति भाति न भाति च भासुरः । श्रुतमहामहिमा स माहीपतिः पतिरपामिव वातर
याकुलः ॥ १९९ ॥ श्रीवसिष्ठ उवाच ॥ अथापृच्छत्सुतस्तत्र जम्बूद्वीपे महानिशि । क
दम्बाग्रावचूलास्थं पितरं पावनाशयः ॥ २०० ॥ कोऽसौ स्वोत्थ इति ख्यातो भूपस्ता
तोत्तमाकृतिः । कथितं च किमेतन्मे तदेतद्ब्रूहि तत्त्वतः ॥ २०१ ॥ दाशूर उवाच ॥
शृणु पुत्र कथाभूतमेतत्ते कथयाम्यहम् । येन संसारचक्रस्य तत्त्वमस्यावबुध्यसे ॥
१०२ ॥ असदभ्युत्थितारम्भमवस्तुमयमाततम् । संसारसंस्थानमिदमेवमाकथितं म
या ॥ २०३ ॥ परमान्नभसो जातः संकल्पः स्वोत्थ उच्यते । जायते स्वयमेवासौ स्वय
मेव विलीयते ॥ २०४ ॥ यत्स्वरूपमिदं सर्वं जगदाभोगि विद्यते । जायते तत्र जाते
तु तस्मिन्नष्टे विनश्यति ॥ २०५ ॥ ब्रह्मविष्ण्विन्द्ररुद्रादींस्तस्यैवावयवान्विदुः ॥ २०६
॥ शून्ये व्योमनि तेनेदं निर्मितं त्रिजगत्पुरम् । प्रतिभासानुसंधानमात्रेणैति विरञ्चि
ताम् ॥ २०७ ॥ यत्रेमे वितता लोकालोककोशाश्चतुर्दश । वनोपवनमालाश्च यत्रोद्या
नपरंपरा । क्रीडाशिखरिणो यत्र सह्यमन्दरमेरवः ॥ २०८ ॥ शीतोष्णदीप्ती चन्द्रा
र्कौ दीपौ यत्रानिलाक्षतौ । सूर्यांशुकबरालोलतरंगोत्तुङ्गमौक्तिकाः । वहन्ति सरितो
यत्र सन्मुक्तावलयश्चलाः ॥ २०९ ॥ इक्षुक्षीरादिसलिला मणिरत्नबिसाङ्कुराः । और्वान
लाम्बुजा यत्र वाप्यः सप्तमहार्णवाः ॥ २१० ॥ तस्मिन्नेव जगत्यस्मिन्पुरे संकल्पभूभृ
ता । क्रीडार्थमात्मनश्चित्रा देहापवरकाः कृताः ॥ २११ ॥ केचिद्गीर्वाणनामान ऊर्ध्व
एव नियोजिताः । नरनागादयः केचिदध एव निवेशिताः ॥ २१२ ॥ वातयन्त्रप्रवा
हेण चलन्तो मांसमृन्मयाः । श्वेतास्थिदारवश्चित्रास्त्वग्लेपमसृणामलाः ॥ २१३ ॥ के
शकृष्णोलपोल्लासरचिताच्छादनश्रियः । कर्णाक्षिनासाप्रमुखैर्द्वारैर्नवभिरन्विताः ॥
२१४ ॥ कर्णनासास्यताल्वादिवातायनगणान्विताः । भुजाद्यङ्गप्रतोलीकाः पञ्चेन्द्रि
यकदीपकाः ॥ २१५ ॥ मायया रचितास्तेषु संकल्पेन महामते । अहंकारमहायक्षाः
परमालोकभीरवः ॥ २१६ ॥ देहापवरकस्यान्तर्महाहंकारयक्षकैः । सह संक्रीडतेऽत्यर्थं
तस्मिन्नेवासदुत्थितैः ॥ २१७ ॥ क्षणमभ्युदयं याति क्षणं शाम्यति दीपवत् । देहगेहे
षु संकल्पस्तरंगः सागरेष्विव । भविष्यन्नवनिर्माणमप्याप्नोति तदा पुरम् ॥ २१८ ॥

198 a: व्यवहृत्यासौ c: करोम्यहमज्ञो d: शोचति – 199 (Drutavilambita) b: स्फुरति भाति च भासुररूप धृक् c: सुत महा० – 200 Ohne श्री० c: कदंबद्रुमपर्णस्थं – 201 a: स्वोत्थेति विख्यातो d: त्वयेति ब्रूहि – 202 a: यथाभूत० – 205 a: तत्स्वरूप० – 207 c: Hs. ०भासानुबंधान० – 208 a: यत्रैते – 209 a: ०दीप्तौ b: चंडानि० c/d: ०कवदालोलत्त० (lies: ०कचदालोलत०) – 210 d: Hs. बाष्प (für वाप्यः) – 212 c/d: केचिन्मध्येऽधश्च नियोजिताः – 213 a: प्राणयंत्र० – c/d: स्थितास्थिदारवः स्निग्धत्वग्लेप० – 215 b: Hs. ०गुणान्विताः – 216 d: ०भीषणाः – 217 b: ०पक्षकैः c: सहितः – 218 e/f: भविष्यन्नेव निर्माणमवाप्नोति

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यदा संकल्पितं वस्तु क्षणादेव प्रपश्यति । असंकल्पनमात्रेण स्वेनैवाशु विनश्यति । अनन्तायात्मदुःखाय नानन्दाय कदाचन ॥ २१९ ॥ इदं स्फारं जगद्दुःखं प्रतनोत्यात्मसत्तया । असत्तया नाशयति घनं सांध्यं यथा तमः ॥ २२० ॥ स्वयैव दुःखदायिन्या चेष्टया परिरोदिति । संकल्पितानन्दलवस्तिष्ठत्युदरकंधरः ॥ २२१ ॥ त्रयस्तस्या मतेर्देहा अधमोत्तममध्यमाः । तमःसत्त्वरजःसंज्ञाः कारणं जगतः स्थितेः ॥ २२२ ॥ तमोरूपो हि संकल्पो नित्यं प्राकृतचेष्टया । परां कृपणतामेत्य प्रयाति कृमिकीटताम् ॥ २२३ ॥ सत्त्वरूपो हि संकल्पो धर्मज्ञानपरायणः । अदूरकेवलीभावः साम्राज्य इव तिष्ठति ॥ २२४ ॥ रजोरूपो हि संकल्पो लोकसंव्यवहारवान् । परितिष्ठति संसारे पुत्रदारानुरञ्जितः ॥ २२५ ॥ त्रिविधं तु परित्यज्य रूपमेतन्महामते । संकल्पः परमायाति पदमात्मपरिक्षये ॥ २२६ ॥ सर्वा दृष्टीः परित्यज्य नियम्य मनसा मनः । सबाह्याभ्यन्तरार्थस्य संकल्पस्य क्षयं कुरु ॥ २२७ ॥ यदि वर्षसहस्राणि तपश्चरति दारुणम् । पातालस्थस्य भूस्थस्य स्वर्गस्थस्यापि तत्त्व । नान्यः कश्चिदुपायोऽस्ति संकल्पोपरमादृते ॥ २२८ ॥ अनाबाधेऽविकारे च सुखे परमपावने । संकल्पोपशमे यत्नं पौरुषेण परं कुरु ॥ २२९ ॥ संकल्पतन्तावखिला भावाः प्रोताः किलानघ । छिन्ने तन्तौ न जाने ते क्व यान्ति विशरारवः ॥ २३० ॥ निःसंकल्पो यथाप्राप्तव्यवहारपरो भव । चिदचेत्योन्मुखत्वं हि याति संकल्पसंक्षये ॥ २३१ ॥ अधिगतपरमार्थतामुपैति प्रसभमपास्य विकल्पजालमुच्चैः । अधिगमय पदं तदद्वितीयं विततसुखाय सुषुप्तचित्तवृत्तिः ॥ २३२ ॥ पुत्र उवाच ॥ कीदृशस्तात संकल्पः कथमुत्पद्यते प्रभो । कथं वा वृद्धिमाप्नोति कथं चैष विनश्यति ॥ २३३ ॥ दाशूर उवाच ॥ अनन्तस्यात्मतत्त्वस्य सत्तासामान्यरूपिणः । चितश्चेत्योन्मुखत्वं यत्तत्संकल्पाङ्कुरं विदुः ॥ २३४ ॥ लेशतः प्राप्तसत्ताकः स एव घनतां शनैः । याति चित्तत्त्वमापूर्य दृढं जाड्याय मेघवत् ॥ २३५ ॥ भावयन्ती चितिश्चेत्यं व्यतिरिक्तमिवात्मनः । संकल्पतामिहायाति बीजमङ्कुरतामिव ॥ २३६ ॥ संकल्पनां हि संकल्पः स्वयमेव प्रजायते । वर्धते स्वत एवाशु दुःखाय न सुखाय तु ॥ २६७ ॥ मा संकल्पय संकल्पं भावं भावय मा स्थितौ । एतावतैव भावे न भव्यो भवसि भूतये ॥ २३८ ॥ संकल्पनाशने यत्नो न भूयाननुगच्छति । भावनाभावमात्रेण संकल्पः क्षीयते स्वयम् ॥ २३९ ॥ सुमनःकुसुमामर्दे किंचिद्व्यतिकरो भवेत् । सुसाध्येऽभावमात्रेण न तु संकल्पनाशने ॥ २४० ॥ संकल्पेनैव संकल्पं मनसा च मनो मुने । छित्त्वा स्वात्मनि तिष्ठ त्वं किमेतावति दुष्करम् ॥ २४१ ॥ यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि । असन्मयविकल्पोत्थे उभे एते तते यतः ॥ २४२ ॥

221 d: ०स्तिष्ठत्युत्तर०, lies ०स्तिष्ठत्युद्धुर०*; ०कंधरम् – 226 b: Hs. महामुने – 227 c: ०तरस्थस्य – 228 b: ०श्चरसि c/d: पातालस्थश्च भूस्थश्च स्वर्गस्थश्चापि f: ०पशमादृते – 229 c: संकल्पोपरमे – 230 b: Hs. प्रोक्ताः (etc.) – 231 c: चिदचित्यो० – 232 (Puṣpitāgrā) a: ०मुपेत्य – 233 c: ०मायाति – 236 c: ०मिवायाति – 237 a: संकल्पनं; lies संकल्पनाद्धि – 239 a/b: Lies यत्ने न भूतानु० d: संकल्पो जीयते ह्ययम् – 240 c: सुसाध्याभाव० – 241 b: मनसैव

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तन्दुलस्य यथा चर्म यथा ताम्रस्य कालिमा । नश्यति क्रियया पुत्र पुरुषस्य तथा म
लम् ॥ २४३ ॥ जीवस्य तन्दुलस्येव मलं सहजमप्यलम् । नश्यते च न संदेहस्तस्मादुद्य
मवान्भव ॥ २४४ ॥ मम गुरुविभवोज्ज्वला विलासा इति तव मास्तु वृथैव विभ्रमोऽ
न्तः । त्वमपि च विततार्श्च ते विलासा विलसति सर्वमिदं तदात्मतत्त्वम् ॥ २४५ ॥
श्रीवसिष्ठ उवाच ॥ इत्याकर्ण्य तदा तत्र रात्रावालपनं तयोः । अहं रघुकुलाकाशश
शाङ्क रघुनन्दन । पतितः खात्कदम्बाग्रे पत्रपुष्पफलाकुले ॥ २४६ ॥ मामप्यालोक्य
संप्राप्तं दाशूरोऽर्घं सपर्यया । विस्तीर्णं विष्टरं पत्रे परया पर्यपूजयत् ॥ २४७ ॥ आव
योस्तत्र चित्राभिः कथाभिरितरेतरम् । शर्वरी सा व्यतीयाय मुहूर्तमिव कान्तयोः ॥
२४८ ॥ अहं विसृज्य दाशूरं ततोऽमरनदीं गतः ॥ २४९ ॥ दाशूराख्यायिकैषा ते
कथिता रघुनन्दन । दाशूराख्यायिकेवेदं जगदित्येव भाव्यताम् ॥ २५० ॥ इति श्री
वाल्मीकीये मोक्षोपाये दाशूराख्यायिका ॥ [१६] ॥ श्रीवसिष्ठ उवच ॥ अपर्यन्तस्य
कालस्य कियानंशः शरच्छतम् । तावन्मात्रात्मकायुर्यः किमास्थां सोऽनुधावति ॥ १
॥ अन्तरास्थां परित्यज्य भावश्रीभावनामयीम् । योऽसि सोऽसि जगत्यस्मिंल्लीलया
विहरानघ ॥ २ ॥ निरिच्छे संस्थिते रत्ने यथालोकः प्रवर्तते । सत्तामात्रेण देवे तु तथै
वायं जगद्गणः ॥ ३ ॥ अत आत्मनि कर्तृत्वमकर्तृत्वं च संस्थितम् । निरिच्छत्वादक
र्तासौ कर्ता संनिधिमात्रतः ॥ ४ ॥ द्वे एवात्मनि विद्येते कर्तृताकर्तृतेऽनघ । यत्रैव ते
चमत्कारस्तामाश्रित्य स्थिरो भव ॥ ५ ॥ सर्वत्राहमकर्तेति दृढभावनयानया । प्रवाह
पतितं कार्यं कुर्वन्नपि न लिप्यते ॥ ६ ॥ याति नीरसतां जन्तुरप्रवृत्तेः स्वचेतसः । त
स्मान्नित्यमकर्ताहमिति भावनयेद्धिया । परमामृतनाम्नी सा समतैवावशिष्यते ॥ ७ ॥
अथ सर्वं करोमीति महाकर्तृतया तया । यदीच्छसि स्थितिं राम तत्तामप्युत्तमां वि
दुः ॥ ८ ॥ अहं यत्र करोमीमं समग्रं जागतं भ्रमम् । रागद्वेषक्रमस्तत्र कुतोऽन्यस्याप्य
संभवात् ॥ ९ ॥ यदन्येन शरीरं मे दग्धमन्येन लालितम् । सोऽस्मदारम्भ एवातः कः
खेदोल्लासयोः क्रमः ॥ १० ॥ मत्सुखासुखविस्तारे जगज्जालक्षयोदये । अहं कर्तेति म
त्वान्तः कः खेदोल्लासयोः क्रमः ॥ ११ ॥ खेदोल्लासविलासेषु स्वात्मकर्तृतयैकया ।
स्वसंकल्पे लयं याते समतैवावशिष्यते ॥ १२ ॥ समता सर्वभावेषु यासौ सत्या परा
स्थितिः । तस्यामेव स्थितं चित्तं न भूयो जन्मभाग्भवेत् ॥ १३ ॥ अथ वा सर्वकर्तृत्वम
कर्तृत्वं च राघव । सर्वं त्यक्त्वा मनः पीत्वा योऽसि सोऽसि स्थिरो भव ॥ १४ ॥ अयं
सोऽहमयं नाहं करोमीदमिदं तु न । इति भावानुसंधानमयी दृष्टिर्न तुष्टये ॥ १५ ॥

243 d: **मलः** – 244 c: **नश्यत्येष** – 245 (Puṣpitāgrā) d: **चिदात्म°** – 246 Ohne **श्री°** b: **द्वयोः** – 247 a: Hs. **मामथालोक्य** b: Lies **ऽथ*** **सप°**; Hs. **तदासूरोसपर्यया** c: **वितीर्णविष्टरे**, lies **विस्तीर्णे विष्टरे**; lies **पत्रैः*** – 248 d: **मुहूर्त इव** – Kolophon zu Sarga 16: **इति श्रीयोगवासिष्ठसारे** [!] **स्थितिप्र°** [sic] **दाशूराख्यानं नाम सप्तदशः सर्गः ॥ १७ ॥** – 17.1 Ohne **श्री°** c: **तावन्मात्रमहायुर्यः** – 2 b: **°श्रीर्भावना°** – 5 a: Nach B; Hs. (entst.) deutet auf diese Version hin. **ते द्वे आत्मनि** – 6 c: **कर्म** – 9 d: Hs. **कुतोन्यस्मात्य°** – 11 c: Hs. **स्वयंकल्पे** – 12 b: **सत्यपरा** c: **तस्यामवस्थितं** – 15 c: Hs. **भावानुबंधान°**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सा कालसूत्रपदवी सा महावीचिवागुरा । सासिपत्रवनश्रेणी या देहेऽहमिति स्थितिः
॥ १६ ॥ सा त्याज्या सर्वयत्नेन सर्वनाशेऽप्युपस्थिते । स्प्रष्टव्या सा न भव्येन सश्वमां
सेव पुष्कसी ॥ १७ ॥ तया सुदूरोज्झितया दृष्टौ पटललेखया । उदेति परमा दृष्टिर्ज्यो
त्स्नेव विगताम्बुदा । यथाभ्युदितया राम तीर्यतेऽयं भवार्णवः ॥ १८ ॥ कर्ता नास्मि
न चायमस्मि स इति ज्ञात्वैवमन्तः स्फुटं कर्तैवास्मि समग्रमस्मि तदिति ज्ञात्वाथ वा
निश्चयम् । कोऽप्येवास्मि न कश्चिदेवमिति वा निर्णीय सर्वोत्तमे तिष्ठ त्वं स्वपदे स्थि
ताः पदविदो यत्रोत्तमाः साधवः ॥ १९ ॥ श्रीवसिष्ठ उवाच ॥ बन्धो हि वासनाबन्धो
मोक्षः स्याद्वासनाक्षयः । वासनां त्वं परित्यज्य मोक्षार्थित्वमपि त्यज ॥ २० ॥ मान
सीर्वासनाः पूर्वं त्यक्त्वा विषयवासिताः । मैत्र्यादिभावनानाम्नीर्गृहाणामलवासनाः
॥ २१ ॥ ता अप्यन्तः परित्यज्य ताभिर्व्यवहरन्नपि । अन्तः शान्तसमस्नेहो भव चि
न्मात्रवासनः ॥ २२ ॥ तामप्यथ परित्यज्य मनोबुद्धिसमन्विताम् । शेषे स्थिरसमाधा
नो येन त्यजसि तत्त्यज ॥ २३ ॥ चिन्मनःकलनाकालप्रकाशतिमिरादिकम् । वासनां
वासितारम्भं प्राणस्पन्दनपूर्वकम् ॥ २४ ॥ समूलमखिलं त्यक्त्वा व्योमसौम्यप्रशा
न्तधीः । यस्त्वं भवसि सद्बुद्धे स भवानस्तु सत्कृतः ॥ २५ ॥ हृदयात्संपरित्यज्य सर्व
मेव महामतिः । यस्तिष्ठति गतव्यग्रः स मुक्तः परमेश्वरः ॥ २६ ॥ समाधिमथ कर्मा
णि मा करोतु करोतु वा । हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशयः ॥ २७ ॥ नैष्क
र्म्येण न तस्यार्थो न तस्यार्थोऽस्ति कर्मभिः । न समाधिजपाभ्यां वा यस्य निर्वासनं
मनः ॥ २८ ॥ विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः । संत्यक्तवासनान्मौनादृते
नास्त्युत्तरं पदम् ॥ २९ ॥ दृष्टं द्रष्टव्यमखिलं भ्रान्त्वा भ्रान्त्वा दिशो दश । जनाः क
तिपया एव यथावस्त्ववलोकिनः ॥ ३० ॥ ये केचन समारम्भा ये जनस्य क्रियाक्र
माः । ते सर्वे देहमात्रार्था आत्मार्थं तु न किंचन ॥ ३१ ॥ सर्वत्र पञ्चभूतानि षष्ठं किं
चिन्न विद्यते । पाताले भूतले स्वर्गे रतिमेतु क्व धीरधीः ॥ ३२ ॥ युक्त्या वै चरतो ज्ञ
स्य संसारो गोष्पदाकृतिः । दूरसंत्यक्तयुक्तेस्तु महामत्तार्णवोपमः ॥ ३३ ॥ न केचन
जगद्भावास्तत्त्वज्ञं रञ्जयन्त्यमी । नागरं नागरीकान्तं कुग्रामललना इव ॥ ३४ ॥ स्फा
रब्रह्मामलाम्भोधेः फेनाः सर्वे कुलाचलाः । चिदादित्यमहातेजोमृगतृष्णा जगच्छ्रि
यः ॥ ३५ ॥ अत्रैव वस्तुन्युदिताः शृणु राघव पूर्वजाः । कचेन गाथा या गीता बार्ह
स्पत्येन पावनीः ॥ ३६ ॥ कचः कदाचिदुत्थाय समाधेः प्रीतमानसः । एकान्ते समु
वाचेदमेको गद्गदया गिरा ॥ ६७ ॥ किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि
किम् । आत्मना पूरितं विश्वं महाकल्पाम्बुना यथा ॥ ३८ ॥ सबाह्याभ्यन्तरे देहे अध

17 c/d: Hs. z. T. entstellt. d: **श्वमांसेनेव पुक्कसी** – 18 e: **यदा०**, lies **यया०*** – 19 (Śārdūlavikrīḍita) b: **निश्चितम्** – 20 Ohne **श्री०** c: Lies **वासनास्त्वं*** – 22 c: **शांततम०** – 23 d: **तं त्यज** – 24 a: **०कलनाकार०** c: **वासितारं च** – 25 b: **०सौम्यः** d: **तत्त्वतः**, Hs. **सत्कृतं** – 26 b: **महामते** – 29 d: **नास्त्युत्तमं परम्** – 31 b: **जनस्याक्रिया०** – 33 a: **चरतस्तस्य** d: **महावर्तार्णवोपमः** – 39 a/b: **देहेष्वध** c: **त्वतश्चात्मा**; Hs. **ततः आत्मा**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ऊर्ध्वं च दिक्षु च । इत आत्मा ततश्चात्मा नास्त्यनात्ममयं क्वचित् ॥ ३९ ॥ न तद
स्ति न यत्राहं न तदस्ति न यन्मयि । किमन्यदभिवाञ्छामि सर्वं संविन्मयं स्थितम्
॥ ४० ॥ इति कचगाथाः ॥ श्रीवसिष्ठ उवाच ॥ ये हि राघव सत्त्वस्था जाता भुवि
महागुणाः । ते नित्यमेवाभ्युदिता उदिताः ख इवेन्दवः ॥ ४१ ॥ नापदि ग्लानिमाया
न्ति निशि हेमाम्बुजं यथा । नेहन्ते प्रकृतादन्यद्रमन्ते शिष्टवर्त्मनि ॥ ४२ ॥ नित्य
मापूर्णतामन्तरक्षुब्धामिन्दुसुन्दरीम् । आपद्यपि न मुञ्चन्ति शशिनः शीततामिव ॥
४३ ॥ आकृत्यैव विराजन्ते मैत्र्यादिगुणकान्तया । समाः समरसाः सौम्याः सततं
साधुवृत्तयः ॥ ४४ ॥ अब्धिवद्धृतमर्यादा भवन्ति वितताशयाः । अतस्तेषां महाबा
हो पदमापदवीक्षितम् । सर्वदैवानुगन्तव्यं मङ्क्तव्यं नापदर्णवे ॥ ४५ ॥ कोऽहं कथमि
दं चेति संसारमलमाततम् । प्रविचार्य प्रयत्नेन प्राज्ञेन सह साधुना ॥ ४६ ॥ न कर्मसु
निमङ्क्तव्यं नानार्येण सहावसेत् । द्रष्टव्यः सर्वसंहर्ता न मृत्युरवहेलया ॥ ४७ ॥ शरी
रमस्थिमांसं च त्यक्त्वा रक्ताद्यशोभनम् । भूतमुक्तावलीतन्तु चिन्मात्रमवलोकयेत्
॥ ४८ ॥ यैव चिद्गगनाभोगभूषणे व्योम्नि भास्करे । धराविवरकोशस्थे सैव चित्की
टकोटरे ॥ ४९ ॥ तामसीं राजसीं चैव जातिमन्यामपि स्थिताः । स्वप्रयत्नवशाद्यान्ति
सन्तः सात्त्विकजातिताम् ॥ ५० ॥ [१७] ॥ इति वाल्मीकीये मोक्षोपये स्थितिप्रक
रणम् ॥ ॥ श्रीवसिष्ठ उवाच ॥ दीर्घसंसारमायेयं राम राजसतामसैः । धार्यते मान
वैर्नित्यं सुस्तम्भैरिव मण्डपः ॥ १ ॥ सत्त्वस्थजातिभिर्धीरैस्त्वादृशैर्गुणबृंहितैः । हेलया
त्यज्यते पक्का मायेयं त्वगिवोरगैः ॥ २ ॥ समस्तं खल्विदं ब्रह्म सर्वमात्मेदमाततम् ।
अहमन्य इदं चान्यदिति भ्रान्तिं त्यजानघ ॥ ३ ॥ ततो ब्रह्मघने नित्ये संभवन्ति न
कल्पनाः । विच्छित्तयः पयोराशौ यथा राम जलेतराः ॥ ४ ॥ न शोकोऽस्ति न मो
होऽस्ति न जन्मास्ति न जन्मवान् । यदस्तीह तदेवास्ति विज्वरो भव राघव ॥ ५ ॥
निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् । अद्वितीयो विशोकात्मा विज्वरो
भव राघव ॥ ६ ॥ समः स्वस्थः स्थिरमतिः शान्तः शान्तमना मुनिः । मौनी वरमणि
स्वच्छो विज्वरो भव राघव ॥ ७ ॥ यस्येदं जन्म पाश्चात्यं तस्य चैव महामते । वि
शन्ति विद्या विमला मुक्ता वेणुमिवोत्तमम् ॥ ८ ॥ आर्यता हृद्यता मैत्री सौम्यता
मुक्तता ज्ञता । समाश्रयन्ति तं नित्यमन्तःपुरमिवङ्गनाः ॥ ९ ॥ पेशलाचारमधुरं
सर्वे वाञ्छन्ति तं जनाः । वेणुं मधुरनिध्वानं वने वनमृगा इव ॥ १० ॥ एष तावत्क्र
मः प्रोक्तः सामान्यः सर्वजन्तुषु । इममन्यं विशेषं त्वं शृणु राजीवलोचन ॥ ११ ॥

Kol. nach V 40: Hs. **कथयगाथा**, lies **कचकथा** * – 41 Ohne **श्री०** d: **मुदिताः** – 42 c: Lies **प्राकृताद०** * – 45 d: Hs.. **०पदमीक्षितम्** f: **मंतव्यं** – 46 c: **प्रविचार्यं** – 47 a: **नाकर्मसु** – 48 c: Lies **०तन्तुं** * – 50 b: Lies **श्रिताः** * – Kol. nach Sarga 17 (Hs. ohne Sarga-Kol.): **इति श्रीवाल्मीकीये योगवासिष्ठसारे** [!] **मोक्षोपाये स्थितिप्रकरण उपदेशाख्यानं नामाष्टदशः सर्गः ॥ १८ ॥ समाप्तमिदं स्थितिप्रकरणं चतुर्थम् ॥** – 18.1 Ohne **श्री०** (2. Aufl.) – 4 d: **राम न सन्मयाः** – 7A: **यथाप्राप्तानुभवनात्सर्वत्रानभिवाञ्छनात् । त्यागादानपरित्यागाद्विज्वरो भव राघव ॥** – 8 b: Lies **तमाश्वेव** * – 11 a: Hs. **प्रोक्तो** c: Lies **च** (für **त्वं**)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अस्मिन्संसारसंरम्भे जातानां देहधारिणाम् । अपवर्गक्षमौ राम द्वाविमावुत्तमौ क्रमौ
॥ १२ ॥ एकस्तावद्गुरुप्रोक्तादनुष्ठानाच्छनैःशनैः । जन्मना जन्मभिर्वापि सिद्धिदः स
मुदाहृतः ॥ १३ ॥ द्वितीयस्त्वात्मनैवाशु किंचिदुत्पन्नचेतसः । भवति ज्ञानसंप्राप्तिरा
काशफलपातवत् ॥ १४ ॥ नभःफलनिपाताभज्ञानसंप्रतिपत्तये । अत्रेमं शृणु वृत्तान्तं
प्राक्तनं कथयामि ते ॥ १५ ॥ श्रीवसिष्ठ उवाच ॥ अस्त्यस्तमितसर्वापदुद्यत्संपदुदार
धीः । विदेहानां महीपालो जनको नाम वीर्यवान् । कल्पवृक्षोऽर्थिपार्थानां मित्राब्जा
नां दिवाकरः ॥ १६ ॥ स कदाचिन्मधौ मत्तकोकिलोल्लासशालिनि । ययावुपवनं
कान्तं नन्दनं वासवो यथा ॥ १७ ॥ तस्मिन्नुपवने रम्ये केसरामोदमोदिते । दूरस्था
नुचरः सोऽथ कुञ्जेषु विचहार ह ॥ १८ ॥ अथ शुश्राव कस्मिंश्चित्तमालावलिगुल्मके ।
सिद्धानामप्रदृश्यानां स्वप्रसङ्गादुदाहृताः । इमाः कमलपत्राक्ष गीता गीतात्मभाव
नाः ॥ १९ ॥ द्रष्टृदृश्यसमायोगात्प्रत्ययानन्दनिश्चयः । यस्तं स्वमात्मतत्त्वोत्थं निःस्प
न्दं समुपास्महे ॥ २० ॥ द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह । दर्शनप्रथमाभास
मात्मानं समुपास्महे ॥ २१ ॥ द्वयोर्मध्यगतं नित्यमस्ति नास्तीति पक्षयोः । प्रकाशनं
प्रकाशानामात्मानं समुपास्महे ॥ २२ ॥ अशिरस्कहकाराभमशेषाकारसंस्थितम् । अ
जस्रमुच्चरन्तं तं स्वात्मानं समुपास्महे ॥ २३ ॥ संत्यज्य हृद्गुहेशानं देवमन्यं प्रयान्ति
ये । ते रत्नमभिवाञ्छन्ति त्यक्तहस्तस्थकौस्तुभाः ॥ २४ ॥ सर्वाशाः किल संत्यज्य फ
लमेतदवाप्यते । येनाशाविषवल्लीनां मूलमाला विलूयते ॥ २५ ॥ बुद्ध्वाप्याद्यन्तवैरस्यं
यः पदार्थेषु दुर्मतिः । बध्नाति भावनां भूयो नरो नासौ स गर्दभः ॥ २६ ॥ उत्थिता
नुत्थितानेतानिन्द्रियादीन्पुनः पुनः । हन्याद्विवेकदण्डेन वज्रेणेव हरिर्गिरीन् ॥ २७
॥ उपशमसुखमाहरेत्पवित्रं शमवशतः शममेतिसाधुचेतः । प्रशमितमनसः स्वके स्व
रूपे भवति सुखे स्थितिसत्तमे चिराय ॥ २८ ॥ श्रीवसिष्ठ उवाच ॥ इति सिद्धगणो
द्गीतां गीतां श्रुत्वा महीपतिः । विषादमाजगामाशु भीरू रणरवादिव ॥ २९ ॥ परिवा
रमशेषेण विसृज्य स्वं स्वमालयम् । एक एवाविशद्राजा मृगेन्द्र इव भूधरम् ॥ ३० ॥
तत्र प्रोड्डयनालोलखगपक्षतिचञ्चलाः । आलोकयँल्लोकगतीर्विललापेदमातुरः ॥ ३१
॥ हा कष्टमतिकष्टासु लोललोकदशास्वयम् । पाषाणेष्विव पाषाण आलुठामि भ्रमाद
हम् ॥ ३२ ॥ अपर्यन्तस्य कालस्य कोऽप्यंशो जीव्यते मया । तस्मिन्भावं निबध्नामि

14 a: **द्वितीयः स्वात्म०** b: **किंचिद्युत्पन्न०** d: Hs. **०पातवान्** – 15 a: **०पाताभे** – 16 Ohne **श्री०** e: **ऽर्थिसार्थानां** – 18 a: Hs. **तस्मिन्नरवने** b: Lies **०मोदिनि** – 19 b: **०त्तमालवनगुल्मके** Nach c/d zusätzlich: **विविक्तवासिनां नित्यं शैलकंदरचारिणाम् ।** (19A) – 23 a: Lies **अशरीरं हकारा०** a/b: **सशिरस्कं हकारादिमशेषाकार०** c/d: **०मुच्चरंतं स्वमात्मानं** – 24 a: **हृद्गृहे०** c/d: **त्यक्त्वा हस्तस्थकौस्तुभम्** – 27 b: **०यारीन्पुनः**, lies **०याहीन्पुनः*** – 27A: Wiederholung von 14.18a–d mit identischem Wortlaut (nur bei LN festgestellt) – 28 (Puṣpitāgrā) d:**स्थितिरुत्तमा** – 29 Ohne **श्री०** a: **०गणोद्गीर्णां** – 30 b: Hs. **स्वमालया** – 32 a: **कष्टमिति कष्टासु** b: **०दशा स्वयम्** c/d: **पाषाणमालुठामि**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

धिङ्मामधमजीवितम् ॥ ३३ ॥ कियन्मात्रमिदं नाम राज्यमाजीवितं मम । किमेतेन
विना ह्यस्मिंस्तिष्ठामि हतधीर्यथा ॥ ३४ ॥ यद्वस्तु यच्च वा रम्यं यदुदारमकृत्रिमम् ।
किंचित्तदिह नास्त्येव किंनिष्ठेयं धृतिर्मम ॥ ३५ ॥ अद्य ये महतां मूर्ध्नि ते दिनैर्निप
तन्त्यधः । हन्त चित्त महत्तायां कैष विश्वस्तता बत ॥ ३६ ॥ ते महाविभवाभोगास्ते
सन्तः स्निग्धबान्धवाः । सर्वं स्मृतिपथं प्राप्तं वर्तमानेऽत्र का धृतिः ॥ ३७ ॥ क्व धना
नि महीपानां ब्रह्मणः क्व जगन्ति वा । प्राक्तानि प्रयातानि कथं विश्वस्तता मम ॥
३८ ॥ कोटयो ब्रह्मणां याता गताः सर्वपरंपराः । प्रयाताः पांसुवद्भूताः का धृतिर्मम
जीविते ॥ ३९ ॥ संसाररात्रिदुःस्वप्ने शून्ये देहमये भ्रमे । आस्थां चेदनुबध्नामि तन्म
मास्तु धिगस्थितिम् ॥ ४० ॥ अजस्रमुपयातास्ते यान्ति चाद्यापि वासराः । अविनष्टै
कसद्वस्तुर्दृष्टो नाद्यापि वासरः ॥ ४१ ॥ यन्मध्ये यच्च पर्यन्ते यच्चापाते मनोरमम् ।
सर्वमेवापवित्रं तद्विनाशामेध्यदूषितम् ॥ ४२ ॥ श्वः श्वः पापीयसीमेव श्वः श्वः क्रूरत
रामपि । श्वः श्वः खेदकरीमेति दशामिह जडो जनः ॥ ४३ ॥ अज्ञानैकहतो बाल्ये यौ
वने वनिताहतः । शेषे कलत्रचिन्तार्तः किं करोतु कदा जडः ॥ ४४ ॥ सत्यसत्ता स्थि
ता मूर्ध्नि मूर्ध्नि रम्येष्वरम्यता । सुखेषु मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहम् ॥ ४५
॥ येषां निमेषणोन्मेषैर्जगतां प्रलयोदयाः । तादृशाः पुरुषाः सन्ति मादृशां गणनैव
का ॥ ४६ ॥ संपदश्च विचित्रा यास्ताश्चेच्चित्तेन संमताः । तत्ता अपि महारम्भा हन्त
मन्ये महापदः ॥ ४७ ॥ आपदोऽपि विचित्रा यास्ताश्चेन्मनसि संमताः । तत्ता अपि
महारम्भा मन्ये मनसि संपदः ॥ ४८ ॥ संसार एव दुःखानां सीमान्तः किल कथ्य
ते । तन्मध्यपतिते देहे सुखमासाद्यते कथम् ॥ ४९ ॥ सहस्राङ्कुरशाखात्मफलपल्लव
शालिनः । अस्य संसारवृक्षस्य मनो मूलमिति स्थितम् ॥ ५० ॥ संकल्पमेव तन्मन्ये सं
कल्पोपशमेन तु । शोषयामि यदा शोषमेति संसारपादपः ॥ ५१ ॥ प्रबुद्धोऽस्मि प्रबु
द्धोऽस्मि दृष्टश्चौरो मयात्मनः । मनो नाम निहन्म्येनं मनसास्मि चिरं हतः ॥ ५२ ॥
एतावन्तमिमं कालं मनोमुक्ताफलं मम । अविद्धमासीदधुना विद्धं तु गुणमर्हति ॥
५३ ॥ विबुधैः साधुभिः सिद्धैरहं साधु प्रबोधितः । आत्मानमनुगच्छामि परमानन्द
साधनम् ॥ ५४ ॥ अयमहमिदमाततं ममेति स्फुरितमपास्य बलादसत्यमन्तः । रिपु
मतिमलिनं मनो निहन्मि प्रशममुपैमि नमोऽस्तु ते विवेक ॥ ५५ ॥ श्रीवसिष्ठ उवा
च ॥ इति संचिन्त्य जनकस्तूष्णीमेव बभूव ह । शान्तचापलचेतस्त्वाल्लिपिकर्मार्पि
तोपमः ॥ ५६ ॥ तूष्णीमथ चिरं स्थित्वा जनको जनजीवितम् । व्युत्थितश्चिन्तयामा
स मनसा शमशालिना ॥ ५७ ॥ किमुपादेयमस्तीह यत्नात्संसाधयामि किम् । यतः

18.33 d: ०मधमचेतसम् ; Hs. धिग्माम० – 34 c: वृथा – 36 a: अथ – 38 d: केयं – 39 b: स्वर्ग०, lies सर्ग०* c: ०द्भूपाः – 40 c: ०बध्नाति – 41: वासराः bis नाद्यापि fehlt bei der Hs. – 44 c: ०चिंतार्थः – 45 a: सतोऽसत्ता b: रम्येऽप्यरम्यता – 46 a/b: ०णोन्मेषौ जगतां प्रलयोदयौ – 47 a: संपदोऽपि – 48 d: Lies सकलसंपदः* (Lf, BŚ) – 51 c: यथा – 52 a: प्रबुद्धोऽस्मि प्रबुद्धोऽस्मि c: नामेह हन्म्येनं – 55 (Puṣpitāgrā) c: ०मतिबलिनं – 56 Ohne श्री० – 57 b: जनजीवनः – 58 जनक उवाच ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

स्थिरस्य शुद्धस्य चितः का मेऽस्ति कल्पना ॥ ५८ ॥ नाभिवाञ्छामि पदवीं संप्राप्तं न
त्यजाम्यहम् । स्वच्छ आत्मनि तिष्ठामि यन्ममास्तु तदस्तु मे ॥ ५९ ॥ श्रीवसिष्ठ उ
वाच ॥ इति संचिन्त्य जनको यथाप्राप्तां क्रियामसौ । असक्तः कर्तुमुत्तस्थौ दिनं दिन
पतिर्यथा ॥ ६० ॥ भविष्यन्नानुसंधत्ते नातीतं चिन्तयत्यसौ । वर्तमाननिमेषं तु हस
न्नेवावतिष्ठति ॥ ६१ ॥ स्वविचारवशेनैव तेन तामरसेक्षण । प्राप्तं प्राप्यमशेषेण राम
नेतरयेच्छया ॥ ६२ ॥ सुन्दर्या निजया रज्व्या प्रज्ञयैव वयस्यया । पदमासाद्यते राम
न नाम क्रिययान्यया ॥ ६३ ॥ य एव यत्नः क्रियते बाह्यार्थोपार्जने जनैः । स एव य
त्नः कर्तव्यः पूर्वं प्रज्ञाविवर्धने ॥ ६४ ॥ सीमान्तं सर्वदुःखानामापदां कोशमुत्तमम् ।
बीजं संसारवृक्षाणां प्रज्ञामान्द्यं विनाशयेत् ॥ ६५ ॥ चिन्तामणिरियं प्रज्ञा हृत्कोश
स्था विवेकिनः । फलं कल्पलतेवैषा चिन्तितं संप्रयच्छति ॥ ६६ ॥ विवेकिनमसंमूढं
प्राज्ञमाशागणोत्थिताः । दोषा न परिबाधन्ते संनद्धमिव सायकाः ॥ ६७ ॥ पिधानं
परमार्कस्य जडात्मा विततोऽमतः । अहंकाराम्बुदो मत्तः प्रज्ञावातेन पात्यते ॥ ६८ ॥
पदमतुलमुपैतुमिच्छतोच्चैः प्रथममियं मतिरेव लालनीया । फलमभिलषता कृषीबलेन
प्रथमतरं ननु कृष्यते धरैव ॥ ६९ ॥ इत्युपशमप्रकरणे जनकोपाख्यानम् ॥ [१८] ॥
वसिष्ठ उवाच ॥ मुष्टयो मोहबीजानां वृष्टयो विविधापदाम् । कुदृष्टयः क्षयं यान्ति दृष्टे
तस्मिन्परावरे ॥ १ ॥ नित्यमात्तविचारस्य पश्यतश्चञ्चलं जगत् । जनकस्येव कालेन स्व
यमात्मा प्रसीदति ॥ २ ॥ न दैवं न च कर्माणि न धनानि न बान्धवाः । शरणं भव
भीतानां स्वप्रयत्नादृते नृणाम् ॥ ३ ॥ अयमेवाहमित्यस्मिन्संकोचे विलयां गते । सम
स्तभुवनव्यापी विस्तार उपजायते ॥ ४ ॥ अयमेवाहमित्यस्या निशाया उदिते क्षये ।
स्वयं सर्वगतः स्फारः स्वालोकः संप्रवर्तते ॥ ५ ॥ उपादेयानुपतनं हेयैकान्तविवर्ज
नम् । यदेतन्मनसो राम तद्बंद्धं विद्धि नेतरत् ॥ ६ ॥ मा खेदं भज हेयेषु मापादेयप
रो भव । हेयादेयदृशौ त्यक्त्वा शेषस्थः सुस्थिरो भव ॥ ७ ॥ निराशता निर्भयता नि
त्यता समता ज्ञता । निरीहता निष्क्रियता सौम्यता निर्विकल्पता ॥ ८ ॥ धृतिर्मैत्री
मनस्तुष्टिर्मुदिता मृदुभाषिता । हेयोपादेयनिर्मुक्ते ज्ञे तिष्ठन्त्यपवासनम् ॥ ९ ॥ गृही
ततृष्णाशफरिवासनाजालमाविलम् । संसारवारिप्रसृतं चिन्तातन्तुभिराततम् । अन
या तीक्ष्णया तात छिन्द्धि बुद्धिशिलाकया ॥ १० ॥ मनसैव मनश्छित्वा कुठारेणेव पा
दपम् । पदं पावनमासाद्य सद्य एव स्थिरो भव ॥ ११ ॥ तिष्ठन्गच्छन्स्वपञ्जाग्रन्निवसन्नु

59 a: **नाभिवांछाम्यसंप्राप्तं** – 60 Ohne **श्री०** b: **यथाप्राप्त०** c: Hs. **असक्तुः** – 61 a: **भविष्यं नानु०** d: **हसन्नेवानुवर्तते** – 62 d: **नेतरयेहया** – 63 a: **निजया बुद्ध्या**, lies (mit Hiat) **निजया ऋज्व्या** * – 64 d: **प्रज्ञाविवृद्धये** – 65 a: **सीमानं** – 68 b: **विततोऽसितः** – 69 (Puṣpitāgrā) – Kolophon zu Sarga 18: **इति श्रीमोक्षोपाय उपशमप्रकरणे जनकोपाख्यानं नामैकोनविंशः सर्गः ॥ १९ ॥** Hs. **इति उपशम०** – 19.1 b: **दृष्टयो** – 2 a: **नित्यमन्तर्विचारस्य** – 4 d: Lies **विस्तर** * – 6 d: **तं बंधं** – 7 b: **नोपादेय०**, lies **मोपादेय०** * – 9 a/b: **मनस्तुष्टिर्मृदुता** – 10 f: **०शलाकया** Nach e/f zusätzlich: **वात्ययांबुदजालं च छित्त्वा तिष्ठ पदे तते** (sic) **।** (10A) – 12 b: **०न्निश्वसन्नु०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्पतन्पतन् । असदेवेदमित्यन्तर्निश्चित्यास्थां परित्यज ॥ १२ ॥ मनः प्रकृत्यैव जडं चि
त्तत्वमनुधावति । मांसगर्धेन मार्जारो वने मृगपतिं यथा ॥ १३ ॥ सिंहवीर्यवशाल्लब्धं
मांसं भुङ्क्तेऽनुगो हरेः । संविद्वीर्यवशात्प्राप्तं दृश्यमाश्रयते मनः ॥ १४ ॥ दृश्यमाश्रय
सीदं चेत्तत्सचित्तोऽसि बन्धवान् । दृश्यं संत्यजसीदं चत्तदचित्तोऽसि मोक्षवान् ॥
१५ ॥ अनन्ताकाशसंकाशहृदयो हृदयेश्वरः ॥ १६ ॥ आत्मनो जगतश्चान्तर्द्रष्टृदृश्यद
शान्तरे । दर्शनाख्ये स्वमात्मानं सर्वदा भावयन्भव ॥ १७ ॥ स्वाद्यस्वादकसंत्यक्तं स्वा
द्यस्वादकमध्यगम् । स्वादनान्तःस्थितं ध्यायन्नित्यमात्ममयो भव ॥ १८ ॥ रागानुभ
वनीयस्य सदानुभवितुः स्वयम् । अवलम्ब्य निरालम्बं मध्यं मध्ये स्थिरो भव ॥ १९
॥ श्रीराम उवाच ॥ अतिगम्भीरमेवैतद्भगवन्वचनं तव । यदहंकारतृष्णां त्वं मा गृ
हाणेति वक्षि माम् ॥ २० ॥ यदहंकारसंत्यागं करोमि तदिदं प्रभो । त्यजामि देहना
मानं संनिवेशमशेषतः ॥ २१ ॥ अहंकारक्षये देहकलावश्यं विनश्यति । मूले क्रकच
संलूने सुमहानिव पादपः ॥ २२ ॥ श्रीवसिष्ठ उवाच ॥ सर्वत्र वासनात्यागो राम रा
जीवलोचन । द्विविधः कथ्यते तज्ज्ञैर्ध्येयो ज्ञेयश्च नामतः ॥ २३ ॥ अहमेषां पदार्था
नामेते न मम जीवितम् । नाहमेभिर्विना कश्चिन्न मयैते विना किल ॥ २४ ॥ इत्यन्त
र्निश्चयं त्यक्त्वा विचार्य मनसा सह । नाहं पदार्थस्य न मे पदार्थ इति भाविते ॥ २५
॥ अन्तः शीतलया बुद्ध्या कुर्वतो लीलया क्रियाः । यो नूनं वासनात्यागो ध्येयो राम
स कीर्तितः ॥ २६ ॥ सर्वसर्विकया बुद्ध्या यं कृत्वा वासनाक्षयम् । जहाति निर्ममो
देहं ज्ञेयोऽसौ वासनाक्षयः ॥ २७ ॥ अहंकारमयीं त्यक्त्वा वासनां लीलयैव यः । ति
ष्ठति ध्येयसंत्यागी स जीवन्मुक्त उच्यते ॥ २८ ॥ निर्मूलकलनां त्यक्त्वा वासनां यः
समं गतः । ज्ञेयत्यागमयं विद्धि मुक्तं तं रघुनन्दन ॥ २९ ॥ द्वावेतौ राघव त्यागौ समौ
मुक्तपदे स्थितौ । द्वावेतौ ब्रह्मतां यातौ द्वावेतौ विगतज्वरौ ॥ ३० ॥ आपतत्सु यथा
कालं सुखदुःखेष्वनारतम् । न हृष्यति म्लायति यः स मुक्त इति कथ्यते ॥ ३१ ॥ ई
प्सितानीप्सिते न स्तो यस्यान्तर्वस्तुदृष्टिषु । सुषुप्तवद्यश्चलति स मुक्त इह कथ्यते ॥
३२ ॥ हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः । न परामृश्यते योऽन्तः स जीवन्मुक्त
उच्यते ॥ ३३ ॥ सुषुप्तवत्प्रशमितभाववृत्तिना स्थितं सदा जाग्रति येन चेतसा । कला
न्वितो विधुरिव यः सदा मुदा निषेव्यते मुक्त इतीह स स्मृतः ॥ ३४ ॥ श्रीवसिष्ठ उ
वाच ॥ बाह्यार्थव्यसनोच्छूना तृष्णाबद्धेति राघव । सर्वार्थव्यसनोन्मुक्ता तृष्णामुक्ते
ति कथ्यते ॥ ३५ ॥ इदमस्तु ममेत्यन्तर्यैषा राघव भावना । तां तृष्णां शृङ्खलां विद्धि

14 a–c: **ल्लब्धं** bis **संविद्वीर्यवशा** fehlt bei der Hs. – 15 b: Hs. **बंधनात्** Nach c/d zusätzlich: **नाहं ज्ञेयमिति ध्यायंस्तिष्ठ त्वमचलः सदा ।** (15A) – 16 b: **हृदयेश्वरे** – 17 c: Lies **दर्शनाख्यं** – 19 c: Hs. **अनालम्ब्य** – 19A (Upajāti): **एतामहंभावमयीमपुण्यां छित्वा**[sic 1. Aufl.]**नहंभावशलाकयैव । स्वभावनां भाव्य भवांतभूमौ भवाभिभूताखिलभूतभूतिः ॥** – 21 a: **यद्यहंकार°** b: **तदिमं** – 22 a/b: **देहः किलावश्यं** – 23 Ohne **श्री°** – 27 a: **सर्वं समस्तया** – 28 a: **अहंकारसखीं** – 29 b: Lies **शमं** * – 31 c: **ग्लायति** – 32 d: **इति** – 34 (Rucirā/Vaṃśasthabila) b: **तेन** – 35 Ohne **श्री°** a: **बाह्यार्थवासनोद्भूता** c: **°वासनो°**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

कलनां च महामते ॥ ३६ ॥ तामेतां सर्वभावेषु सत्स्वसत्सु च सर्वदा । संत्यज्य पर मोदारं पदमेति महामनाः ॥ ३७ ॥ बन्धास्थामथ मोक्षास्थां सुखदुःखदशामपि । त्य क्त्वा सदसदास्थां च तिष्ठाक्षुब्धमहाब्धिवत् ॥ ३८ ॥ अन्यच्च राम मनसि पुरुषस्य विचारिणः । जायते निश्चयः साधो स्फाराकारश्चतुर्विधः ॥ ३९ ॥ आपादमस्तकमहं मातापितृविनिर्मितः । इत्येको निश्चयो राम बन्धायासद्विलोकनात् ॥ ४० ॥ अतीतः सर्वभावेभ्यो वालाग्रादप्यहं तनुः । इति द्वितीयो मोक्षाय निश्चयो जायते सताम् ॥ ४१ ॥ जगज्जालपदार्थात्मा सर्वमेवाहमक्षयः । तृतीयो निश्चयश्चेत्थं मोक्षायैव रघूत्तम ॥ ४२ ॥ जगच्चासदिदं शून्यं शून्यव्योमसमं सदा । एवमेव चतुर्थोऽपि निश्चयो मो क्षसिद्धये ॥ ४३ ॥ एतेषां प्रथमः प्रोतस्तृष्णया बन्धयोग्यया । शुद्धतृष्णास्त्रयः स्व च्छा जीवन्मुक्तिविलासिनः ॥ ४४ ॥ सर्वमात्माहमेवेति निश्चयो यो महामते । तमा दाय विषादाय न भूयो याति मे मतिः ॥ ४५ ॥ शून्यं प्रकृतिवेदीति ब्रह्म विज्ञानमि त्यपि । शिवः पुरुष ईशानो नित्यमात्मेति कथ्यते ॥ ४६ ॥ द्वैताद्वैतसमुद्भेदैर्जगन्नि र्माणलीलया । परमात्ममयी शक्तिरद्वैतैव विजृम्भते ॥ ४७ ॥ आत्मीये परकीये च सर्वस्मिन्नेव सर्वदा । नष्टे चोपचिते कार्ये सुखदुःखे गृहाण मा ॥ ४८ ॥ सर्वातीतप दालम्बी पूर्णेन्दुशिशिराशयः । नोद्वेगी न च तुष्टात्मा संसारे नावसीदति ॥ ४९ ॥ समः शत्रौ च मित्रे च दयादाक्षिण्यसंयुतः । प्राप्तकर्मकरो नित्यं संसारे नावसीदति ॥ ५० ॥ नाभिनन्दति न द्वेष्टि न शोचति न काङ्क्षति । ईहितानीहितैर्मुक्तः संसारे ना वसीदति ॥ ५१ ॥ सर्वस्याभिमतं वक्ता चोदितः पेशलोक्तिमान् । आशयज्ञश्च भूतानां संसारे नावसीदति ॥ ५२ ॥ पूर्णां दृष्टिमवष्टभ्य ध्येयत्यागविलासिनीम् । जीवन्मुक्त तया स्वच्छो लोके विहर राघव ॥ ५३ ॥ अन्तः संत्यक्तसर्वाशो वीतरागो विवासनः । बहिः सर्वसमाचारो लोके विहर राघव ॥ ५४ ॥ उदारपेशलाचारः सर्वाचारविवृद्धि मान् । अन्तः सर्वपरित्यागी लोके विहर राघव ॥ ५५ ॥ अन्तर्नैराश्यमादाय बहिरा शोन्मुखेहितः । बहिस्तप्तोऽन्तरा शीतो लोके विहर राघव ॥ ५६ ॥ बहिः कृत्रिमसंर म्भो हृदि संरम्भवर्जितः । कर्ता बहिरकर्तान्तर्लोके विहर राघव ॥ ५७ ॥ त्यक्ताहंकृ तिराश्वस्तमतिराकाशशोभनः । अगृहीतकलङ्काङ्को लोके विहर राघव ॥ ५८ ॥ अयं बन्धुः परश्चायमयं चाहमयं भवान् । इति मिथ्यादृशो राम विगलन्तु तवाधुना ॥ ५९ ॥ अयं बन्धुरयं नेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधेयं कुटुम्ब कम् ॥ ६० ॥ विविधजन्मशताहितसंभ्रमे जगति बन्धुरबन्धुरितीक्षणम् । भ्रमदशैव विवल्गति वस्तुतस्त्रिभुवनं चिरबन्धुरबन्ध्वपि ॥ ६१ ॥ अत्रैवोदाहरन्तीममितिहासं

37 c: परमोदार० – 39 a: अन्यश्च – 40 b: मातृपितृ० – 42 c: निश्चयोप्येवं – 44 a: प्रोक्तः (sic) d: जीव न्मुक्त० – 45 d: ते – 46 a: प्रकृतिर्मायेति (Metrik!); lies प्रकृतिरेवेति – 48 a: वा – 53 c: स्वस्थो – Textfolge: 54, 57–58, 55–56. – 55 b: सर्वाचारानुवृत्तिमान् – 58 a: ०कृतिरासुप्त० – 60 d: वसुधैव – 61 (Drutavilambita) c: विभाति न वस्तु०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

पुरातनम् । भ्रात्रोस्त्रिपथगातीरे संवादं मुनिपुत्रयोः ॥ ६२ ॥ अस्त्यस्य जम्बूद्वीपस्य
कस्मिंश्चिद्दिङ्निकुञ्जके । वनव्यूहमहोत्तंसो महेन्द्रो नाम पर्वतः ॥ ६३ ॥ तस्यैकदेशे वि
तते रत्नसानौ मनोरमे । आसीदभ्युदितज्ञानस्तपोराशिरुदारधीः ॥ ६४ ॥ मुनिर्दीर्घत
पा नाम तपोमूर्तिरिवास्थितः । मुनेर्बभूवतुस्तस्य पुत्रौ द्वाविन्दुसुन्दरौ ॥ ६५ ॥ पुण्य
पावननामानौ द्वौ कचाविव वाक्पतेः । स ताभ्यां सह पुत्राभ्यां चिरं कालमुवास ह
॥ ६६ ॥ अथ काले तयोस्तस्य पुत्रयोर्ज्ञानवानभूत् । पुण्यनामा वयोज्येष्ठो गुणज्येष्टश्च
राघव ॥ ६७ ॥ पावनोऽर्धं प्रबुद्धोऽभूत्पूर्वसंध्याम्बुजं यथा । मूर्खादतिगतोऽनाप्तपदं
दोलामिवास्थितः ॥ ६८ ॥ ततो वहत्यकलिते काले कलितकारणे । रतिमुत्सृज्य सं
साराज्ज्ञराजर्जरजीवितः ॥ ६९ ॥ कलनापक्षिणीनीडं देहं दीर्घतपा मुनिः । जहौ गिरि
गुहागेहे भारं वैवधिको यथा ॥ ७० ॥ स शान्तकलनारम्भं चेत्यरिक्तचिदास्पदम् ।
पदं जगाम नीरागं पुष्पगन्ध इवाम्बरम् ॥ ७१ ॥ पितर्युपरते तस्मिन्नूर्ध्वदेहिककर्म
णि । पुण्य एव स्थितोऽव्यग्रः पावनो दुःखमाययौ ॥ ७२ ॥ शोकोपहतचित्तोऽसौ भ्र
मन्काननवीथिषु । ज्यायांसमनवेक्ष्यैव पावनो विललाप ह ॥ ७३ ॥ अथौर्ध्वदेहिकं
कृत्वा पितुः परमधार्मिकः । आययौ विपिने पुण्यः पावनं शोकलालसम् ॥ ७४ ॥
पुण्य उवाच ॥ किं पुत्र घनतां शोकं नयस्यान्ध्यैककारणम् । पिता तव महाप्राज्ञ ग
तः प्रज्ञावतां वरः ॥ ७५ ॥ स्वामेव परमामात्मपदवीं मोक्षनामिकाम् । स्वभावमभि
संपन्ने किं पितर्यनुशोचसि ॥ ७६ ॥ मातापितृसहस्राणि समतीतानि ते सुत । पुत्रबा
न्धववृन्दानि जन्तोर्जन्मनि जन्मनि ॥ ७७ ॥ शोचनीया यदि स्नेहान्मातापितृसुताः
सुत । तदतीता न शोच्यन्ते किमजस्रं सहस्रशः ॥ ७८ ॥ अज्ञानविस्तीर्णमरौ विलो
लं शुभाशुभस्पन्दमयैस्तरंगैः । स्ववासनातापमरीचिवारि परिस्फुरत्येतदनन्तरूपम्
॥ ७९ ॥ पुण्य उवाच ॥ बन्धुमित्रसुतस्नेहद्वेषमोहदशामयः । स्वसंज्ञामात्रकेणैव प्रप
ञ्चोऽयं वितन्यते ॥ ८० ॥ बन्धुत्वे भावितो बन्धुः परत्वे भावितः परः । विषामृतद
शेवेह स्थितिर्भावनिबन्धिनी ॥ ८१ ॥ एकत्वे विद्यमानस्य सर्वगस्य किलात्मनः । अयं
बन्धुः परश्चायमित्यसौ कलना कुतः ॥ ८२ ॥ रक्तमांसादिसंघाताद्देहादेवास्थिपञ्ज
रात् । कोऽहं स्यामिति चित्तेन स्वयं पुत्र विचारय ॥ ८३ ॥ दृष्ट्या तु पारमार्थिक्या
न कश्चित्त्वं न चाप्यहम् । मिथ्याज्ञानमिदं पुण्यः पावनश्चेति वल्गति ॥ ८४ ॥ बभू
वुस्ते सुपुण्यासु स्थलीषु मृगयोनिषु । बहवो बन्धवो मार्गास्तान्कथं नानुशोचसि ॥
८५ ॥ बभूवुस्ते महाभ्रेषु शिखरेषु महीभृताम् । बहवो बन्धवः सिंहाः किं तानपि न
शोचति ॥ ८६ ॥ बभूवाथ दशार्णेषु कपिलो वनवानरः । राजपुत्रस्तुषारेषु पुण्ड्रेषु

66 d: **चिरकाल॰** – 67 c: **तयोर्ज्येष्ठो** – 68 a: **पावनोऽर्ध॰** c: **मौर्ख्यादति॰** d: **॰पदो** – 70 b: Hs. **तीर्थ तपा** – 71 a: **प्रशांत॰** b: **चेत्यमुक्त॰** – 72 a/b: **तस्मिन्नौर्ध्वदैहिक॰** – 74 a: **अथौर्ध्वदैहिकं** – 75 a: **द्दधतां** – 79 (Upendravajrā) – 80 Ohne **पुण्य उवाच ॥** – 82 c/d: **॰यमित्येषा** – 83 a: Hs. **रक्तमांसास्थि॰** – 86 c: **बांधवाः** – 87 a: Lies **बभूविथ** *

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

**वनवायसः ॥ ८७ ॥ हैहयेषु च मातङ्गस्त्रिगर्तेष्वथ गर्दभः । शाल्वेषु सरमापुत्रः पत
त्री सरलद्रुमे ॥ ८८ ॥ एतास्वन्यासु चान्यासु बह्वीषु जनयोनिषु । जातोऽसि जम्बू
द्वीपेऽस्मिन्पुरा शतसहस्रशः ॥ ८९ ॥ अनन्ताः पितरो यान्ति यान्त्यनन्ताश्च मात
रः । इह संसारिणां पुंसां वनपादपपर्णवत् ॥ ९० ॥ भावाभावविनिर्मुक्तं जरामरणव
र्जितम् । संस्मरात्मानमव्यग्रो मा विमूढमतिर्भव ॥ ९१ ॥ सर्वैषणामयकलङ्कविवर्जि
तेन स्वस्थात्मभावकलितेन हृदब्जमध्ये । पुत्रात्मनात्मनि महामतिनामुनैव संत्यज्य
संभ्रममलं परितोषमेहि ॥ ९२ ॥ इत्युपशमप्रकरणे पुण्यपावनोपाख्यानम् ॥ [१९] ॥
श्रीवसिष्ठ उवाच ॥ एवं प्रबोधितस्तेन तदा पुण्येन पावनः । प्रबोधमाप प्राकाश्यं प्र
भात इव भूतलम् ॥ १ ॥ उभावपि ततः सिद्धौ ज्ञानविज्ञानपारगौ । विचेरतुर्वने तस्मि
न्यावदित्थमनिन्दितौ ॥ २ ॥ एवं प्राग्भुक्तदेहनामनन्ता धनबन्धुजाः । आशा किं
गृह्यते ताभ्यः किं वा संत्यज्यतेऽनघ ॥ ३ ॥ चिन्तनेनैधते चिन्ता स्वेन्धनेनेव पाव
कः । नश्यत्यचिन्तनेनैव विनेन्धनमिवानलः ॥ ४ ॥ एषा ब्राह्मी स्थितिः स्वस्था नि
ष्कामा विगतामया । एनां प्राप्य महाबाहो विमूढोऽपि न मुह्यति ॥ ५ ॥ एकं विवेकं
सुहृदमेकां प्रौढसखीं धियम् । आदाय विहरन्नेवं संकटेषु न मुह्यति ॥ ६ ॥ विनिवारि
तसर्वार्थादपहस्तितबान्धवात् । न स्वधैर्यादृते कश्चिदभ्युद्धरति संकटात् ॥ ७ ॥ वैरा
ग्येणाथ शास्त्रेण महत्त्वादिगुणैरपि । यत्नेनापद्विघातार्थं स्वमेवोल्लसयेन्मनः ॥ ८ ॥ न
तत्त्रिभुवनैश्वर्यान्न कोशाद्रत्नधारिणः । फलमासाद्यते चित्ताद्यन्महत्त्वोपबृंहितात् ॥
९ ॥ पूर्णे मनसि संपूर्णं जगत्सर्वं सुधाद्रवैः । उपानद्गूढपादस्य ननु चर्मास्तृतैव भूः
॥ १० ॥ वैराग्यात्पूर्णतामेति मनो नाशावशानुगम् । आशया रिक्ततामेति शरदेव
शिखावलः ॥ ११ ॥ हृदयं शून्यतामेति प्रकटीकृतकोटरम् । अगस्तिपीतार्णववदाशा
विवशचेतसाम् ॥ १२ ॥ न तथा भाति पूर्णेन्दुर्न पूर्णः क्षीरसागरः । न लक्ष्मीवदनं
कान्तं स्पृहाहीनं यथा मनः ॥ १३ ॥ यथाभ्रलेखा शशिनं सुधालेपं मषी यथा । दूष
यत्येवमेवान्तर्नरमाशापिशाचिका ॥ १४ ॥ प्रशमितसकलैषणो महात्मा भव भवब
न्धमपास्य मुक्तचित्तः । मनसि निगडरज्जवः कदाशाः परिगलितासु च तासु को न
मुक्तः ॥ १५ ॥ श्रीवसिष्ठ उवाच ॥ अथ वा रघुवंशाख्यनभःपूर्णनिशाकर । बलिवद्बु
द्धिभेदेन ज्ञानमासादयामलम् ॥ १६ ॥ श्रीराम उवाच ॥ बलिवज्ज्ञानसंप्राप्तिं पुनर्मे
द्बोधवृद्धये । विभो कथय खिद्यन्ते सन्तो नावनतं प्रति ॥ १७ ॥ श्रीवसिष्ठ उवाच ॥**

90 d: **वने** – 92 (Vasantatlilakā) b: **स्वच्छात्म॰** c: Lies **महामणिना॰*** – Kolophon zu Sarga 19 (bei Le, Lf ebenfalls an dieser Stelle) bei LN erst nach 20.16: **इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरणे पुण्यपावनोपाख्यानं नाम विंशः सर्गः ॥ २० ॥** – 20.1 Ohne **श्री॰** – 3 a: Hs. **प्रागुक्त॰** b: **जनबंधुजाः**, lies **घन॰*** c: **किमाशा**; lies **तेभ्यः*** – 4 b: **त्विंध॰**, lies **स्विन्ध॰*** – 4A : **ध्येयत्यागरथारूढः करुणोदारया दृशा । लोकमालोकयन्दीनमातिष्ठोत्तिष्ठ राघव ॥** – 6 d: **संकल्पेषु** – 7 c: **किंचि॰** – 8 d: **स्वमेवोन्नमयेन्मनः** – 11 c: Hs. **रक्तता॰** d: **शरदीव सरोजलम्** – 12 c: **अगस्त्य॰** – 14 a: Hs. **यथांकलेखा**, lies **यथाब्द॰*** – 15 (Puṣpitāgrā) – 16 Ohne **श्री॰**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अस्त्यस्मिञ्जगतः कोशे कस्मिंश्चिद्दिङ्निकुञ्जके । पातालमिति विख्यातो लोको भूमेर
धः स्थितः ॥ १८ ॥ तस्मिन्नसुरदोःस्तम्भधार्यमाणमहाभरे । बभूव दानवो राजा विरो
चनसुतो बलिः ॥ १९ ॥ लीलाविजितनिःशेषभुवनाभोगभूषणः । दशकोटीः स वर्षा
णां दैत्यराज्यं चकार ह ॥ २० ॥ अथ गच्छत्स्वनल्पेषु युगेष्वावर्तवृत्तिषु । सुरासुरम
हौघेषु प्रोत्पतत्सु पतत्सु च ॥ २१ ॥ अजस्रमुपभुक्तेषु त्रैलोक्योदरवर्तिषु । भोगेष्वभ
जदुद्वेगं बलिर्दानवनायकः ॥ २२ ॥ एकदा चिन्तयामास प्रासादशिखरस्थितः । मह
ता मम राज्येन त्रैलोक्याद्भुतकारिणा ॥ २३ ॥ किं वा भवति भुक्तेन भूरिभोगातिभा
रिणा । आपातमात्रमधुरमावश्यकपरिक्षयम् ॥ २४ ॥ भोगोपभोगमात्रं मे किं नामेदं
सुखावहम् । पुनरालिङ्ग्यते कान्ता पुनरेव च भुज्यते ॥ २५ ॥ तमेव भुक्तविरसं व्या
पारौघं पुनः पुनः । दिवसे दिवसे कुर्वन्प्राज्ञ कस्मान्न लज्जसे ॥ २६ ॥ पुनर्दिनं पुना
रात्रिः पुनः कार्यपरंपरा । पुनः पुनरहं मन्ये प्राज्ञस्येयं विडम्बना ॥ २७ ॥ कृतया
प्यनया नित्यं क्रियया कृतकार्यया । कोऽर्थः स्यात्तादृशो येन पुनः कर्म न विद्यते ॥
२८ ॥ एतत्संचिन्तयाम्याशु दध्यौ मत्वेत्यसौ बलिः । अथाभ्युवाचासुरराड्यः सं
स्मृत इति क्षणात् ॥ २९ ॥ पुरा किलेह भगवान्पृष्टोऽभूत्स विरोचनः । पिता मयात्म
तत्त्वज्ञो दृष्टलोकपरावरः ॥ ३० ॥ एते सकलदुःखानां सुखानां च महामते । यत्र सर्वे
भ्रमाः शान्ताः कोऽसौ सीमान्त उच्यताम् ॥ ३१ ॥ क्वोपशान्तो मनोमोहः क्वाती
ताः सकलैषणः । विरामरहितं कुत्र तात विश्रमणं चिरम् ॥ ३२ ॥ मत्तात वितताना
न्दसुन्दरं किंचिदेव मे । तादृक्कथय यत्रस्थश्चिरविश्रान्तिमेम्यहम् ॥ ३३ ॥ मत्पितो
वाच ॥ अस्ति पुत्रातिविततो दृशा विपुलकोटरः । त्रैलोक्यानां सहस्राणि यत्र मान्ति
बहून्यपि ॥ ३४ ॥ अत्र पृथ्वी न नाकाशं सागरा न च नाद्रयः । न वनानि न तीर्था
नि न नद्यो न सरांसि च ॥ ३५ ॥ एक एवास्ति सुमहांस्तत्र राजा महाद्युतिः । सर्वकृ
त्सर्वगः सर्वः सर्वतूष्णीं व्यवस्थितः ॥ ३६ ॥ तेन संकल्पितो मन्त्री सर्वतन्मन्त्रणोन्मु
खः । अघटं घटयत्याशु घटं विघटयत्यलम् ॥ ३७ ॥ भोक्तुं न किंचिच्छक्नोति न च
जानाति किंचन । राजार्थं केवलं सर्वं करोत्यविरतोदयम् ॥ ३८ ॥ स एव सर्वकार्यैक
कर्ता तस्य महीपतेः । राजा केवलमेकान्ते स्वस्थ एवावतिष्ठति ॥ ३९ ॥ अहमुवाच ॥
आधिव्याधिविनिर्मुक्तः कः स देशो महामते । कथमासाद्यते वापि केन वाधिगतः
प्रभो ॥ ४० ॥ कः स तादृग्विधो मन्त्री राजा वापि महाबलः । हेलालूनजगज्जालै
र्योऽस्माभिरपि नोज्जितः ॥ ४१ ॥ मत्पितोवाच ॥ स तत्र मन्त्री बलवान्देवासुरगणैः

20 a: लीलानिर्जित° – 25A: सेयं शिशुजनक्रीडा लज्जायै महतामिह ॥ – 26 c/d: कुर्वन् प्राज्ञः कस्मान्न लज्जते – 28A: भोगादृते किमन्यत्तत्स्याद्द्रव्यमविनाशि यत् ॥ – 29 c/d: °राट् आः संस्मृतमिति – 29A: स्वात्मन्येव मनस्यर्थं सभ्रूभंगं निवेशयन् ॥ – 31 a: पितः (für एते) – 32 c: विराग° – 33 a: यत्रातिवितता° c/d: तत्रस्थश्चिरं – 34 b: देशो – 35 a: यत्र – 36 d: स च तूष्णीं – 37 b: सर्वतो मंत्रणो°, lies सर्वसंमन्त्रणो°*; °न्मुखम् – 40 बलिरुवाच ॥ – 41 d: नो जितः – 42 विरोचनोवाच ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सुत । समेतैर्लक्षगुणितैरपि नाक्रम्यते मनाक् ॥ ४२ ॥ तत्रासिमुसलप्रासवज्रचक्रग
दादयः । हेतयः कुण्ठतां यान्ति दृषदीवोत्पलाहतिः ॥ ४३ ॥ स मन्त्री केवलं तत्र तेनैव
प्रभुणा यदि । जीयते तत्सुजेयोऽसावन्यथा त्वचलाचलः ॥ ४४ ॥ अत्र युक्त्या गृही
तोऽसौ क्षणादायाति वश्यताम् । युक्तिं विना दहत्येष आशीविष इवोद्धतः ॥ ४५ ॥
शृणु कः पुत्र देशोऽसौ पूर्वं प्रकटयामि ते । देशनाम्ना मयोक्तस्ते मोक्षः सकलदुःखहा
॥ ४६ ॥ राजा तु तत्र भगवानात्मा सर्वपदातिगः । तेन मन्त्री कृतः प्राज्ञो मनो नाम
महामतिः ॥ ४७ ॥ विषयान्प्रति भोः पुत्र सर्वानेव हि सर्वथा । अनास्था परमा ह्येषा
सा युक्तिर्मनसो जये ॥ ४८ ॥ एषैव परमा युक्तिरनयैव महामदः । स्वमनोमत्तमात
ङ्गो द्रागित्येव विदम्यते ॥ ४९ ॥ चित्तस्य भोगैर्द्वौ भागौ शास्त्रेणैकं प्रपूरयेत् । गुरुशु
श्रूषया भागमव्युत्पन्नस्य सत्क्रमे ॥ ५० ॥ किंचिद्व्युत्पत्तियुक्तस्य भागं भोगैः प्रपूर
येत् । गुरुशुश्रूषया भागं भागं शास्त्रार्थचिन्तया ॥ ५१ ॥ व्युत्पत्तिमनुयातस्य पूरये
च्चेतसोऽन्वहम् । द्वौ भागौ शस्त्रवैराग्यैर्द्वौ ध्यानगुरुपूजया ॥ ५२ ॥ प्रज्ञाविचारवश
तः सममेव सदा सुत । आत्मावलोकनं तृष्णासंत्यागं च समाहरेत् ॥ ५३ ॥ विचारो
भोगगर्हातो विचाराद्भोगगर्हणम् । अन्योन्यमेते पूर्येते समुद्रजलदाविव ॥ ५४ ॥ दे
शक्रमेण धनमल्पविगर्हणेन तेनाङ्ग साधुजनमर्जय मानपूर्वम् । तत्संगमोत्थविषया
ध्यवहेलनेन सम्यग्विचारविभवेन तवात्मलाभः ॥ ५५ ॥ बलिरुवाच ॥ एतन्मे कथि
तं पूर्वं पित्रा चारुविचारिणा । इदानीं संस्मृतं दिष्ट्या संप्रबोधमहं गतः ॥ ५६ ॥ अ
द्येयं मम संजाता भोगान्प्रत्यरतिः स्फुटम् । दिष्ट्या ब्रह्मसुखं स्वस्थं विशाम्यमृतशीत
लम् ॥ ५७ ॥ अहो नु खलु रम्येयं शमभूः शीतलान्तरा । सर्वा एव शमं यान्ति सुख
दुःखदृशः शमे ॥ ५८ ॥ कोऽहं तावदयं किं स्यादात्मेत्यात्मावलोकिनम् । पृच्छाम्यु
शनसं नाथं नूनमज्ञानशान्तये ॥ ५९ ॥ श्रीवसिष्ठ उवाच ॥ इति संचिन्त्य बलवान्ब
लिरामीलितेक्षणः । दध्यौ कमलपत्राक्षं शुक्रमाकाशमन्दिरम् ॥ ६० ॥ अथ सर्वगता
नन्तचिदात्मा भार्गवः प्रभुः । आनिनाय सदेहं स्वं रत्नवातायनं बलेः ॥ ६१ ॥ अथ
रत्नार्घदानेन मन्दारकुसुमोत्करैः । पादाभिवन्दनेनैवं पूजयामास भार्गवम् ॥ ६२ ॥
बलिरुवाच ॥ भार्गव त्वत्प्रसादोत्था प्रतिभेयं पुरस्तव । नियोजयति मां वक्तुं कार्यं
कर्तुमिवार्कभाः ॥ ६३ ॥ किमिहास्ति कियन्मात्रमिदं किंमयमेव वा । कोऽहं कस्त्वं
किमेते वा लोका इति वदाशु मे ॥ ६४ ॥ श्रीशुक्र उवाच ॥ बहुनात्र किमुक्तेन संग
न्तुं यत्नवानहम् । सर्वदानवराजेन्द्र सारं संक्षेपतः शृणु ॥ ६५ ॥ चिदिहास्ति हि चि
न्मात्रमिदं चिन्मयमेव च । चित्त्वं चिदहमेते च लोकाश्चिदिति संग्रहः ॥ ६६ ॥

45 a: **पुत्र** – 46 a: **यः** – 47 d: **महामते** – 51 c: **भागौ** d: Lies **भागौ** – 53 b: **शममेव** – 55 (Vasantatilakā) c: Hs. **यःसंगमो०**, Ld–f **यत्संगमो०**, lies **सत्संगमो०** (vgl. 3.164); **०विषयाद्यव०** – 57 c: **शमसुखं** – 58 c: **समं** d: Hs. **समे** – 60 Ohne **श्री०** c: **०पत्राक्षः** – 62 c: **०वंदनेनैनं** – 64 b: **किमयमेव** – 65 Ohne **श्री०** b: **खं गंतुं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

भव्योऽसि चेत्तदेतस्मात्सर्वमाप्नोषि निश्चयात् । नो चेत्तद्बह्वपि प्रोक्तं त्वयि भस्मनि हूयते ॥ ६७ ॥ चिच्चेत्यकलिता बन्धस्तन्मुक्ता मुक्तिरुच्यते । चिदचेत्या किलात्मेति सर्वसिद्धान्तसंग्रहः ॥ ६८ ॥ एतन्निश्चयमादाय विलोकय धियेद्धया । स्वयमेवात्मनात्मानमनन्तं पदमाप्स्यसि ॥ ६९ ॥ खं व्रजाम्यहमत्रैते मुनयः सप्त संगताः । केनापि सुरकार्येण वस्तव्यं तत्र वै मया ॥ ७० ॥ श्रीवसिष्ठ उवाच ॥ इत्युक्त्वा भगवाञ्छुक्रः प्रारुरोह नभस्तलम् । बलिस्तु चिन्तयामास चिदात्मैकमिदं जगत् ॥ ७१ ॥ बलिरुवाच ॥ युक्तमुक्तं भगवता चिदेवेदं जगत्त्रयम् । चिदहं चिदिमे लोकाश्चिदाशाश्चिदियं क्रिया ॥ ७२ ॥ दृश्यदर्शननिर्मुक्तः केवलामलरूपवान् । नित्योदितो निराभासो द्रष्टास्मि परमेश्वरः ॥ ७३ ॥ चेत्यनिर्मुक्तचिद्रूपं विश्वं विश्वावपूरकम् । संशान्तसर्वसंवेद्यं संविन्मात्रमहं महत् ॥ ७४ ॥ इति संचिन्तयन्नेव बलिः परमकोविदः । ॐकारादर्धमात्रार्थं भावयन्ध्यानमास्थितः ॥ ७५ ॥ संशान्तसर्वसंकल्पः प्रशान्तकलनागणः । निःशङ्कमतिदूरास्तचेत्यचिन्तकचिन्तनः ॥ ७६ ॥ ध्यातृध्येयध्यानहीनो निर्मनाः शान्तवासनः । बभूवावातदीपाभो बलिः प्राप्तमहापदः ॥ ७७ ॥ प्रशमितैषणया परिपूर्णया मननदोषदशोज्झितयैतया । बलिरराजत निर्मलसत्तया विघनमच्छतयेव शरन्नभः ॥ ७८ ॥ श्रीवसिष्ठ उवाच ॥ अथ ते दानवास्तत्र बलेरनुचरास्तदा । तद्गृहं स्फाटिकं सौधमुच्चैरारुरुहुः क्षणत् ॥ ७९ ॥ निर्विकल्पसमाधाने स्थित्वा चिरमुदारधीः । व्यबुध्यत बलिस्तत्र पुरस्तेषां महामते ॥ ८० ॥ अथ वैरोचनिस्तत्र ध्येयत्यागमयात्मना । मनसा सकलान्येव राजकार्याणि स व्यधात् ॥ ८१ ॥ आपदं संपदं दृष्ट्वा समयैव स पश्यति । नास्तमेति न चोदेति तत्प्रज्ञा सुखदुःखयोः ॥ ८२ ॥ ऊहापोहसहस्राणि भावाभावशतानि च । बलिना परिदृष्टानि क्व समाश्वासमेत्यसौ ॥ ८३ ॥ धावमानमिहामुत्र लुठितं लोकवृत्तिषु । संस्थापय निबध्यैतन्मनो हृदयकोटरे ॥ ८४ ॥ येषु येषु प्रदेशेषु मनो मज्जति बालवत् । तेभ्यस्तेभ्यः समुद्धृत्य तद्धि तत्त्वे नियोजयेत् ॥ ८५ ॥ एवमभ्यागताभ्यासं मनोमत्तमतङ्गजम् । निबध्य सर्वभावेन परं श्रेयोऽधिगम्यते ॥ ८६ ॥ इत्युपशमप्रकरणे बल्युपाख्यानम् ॥ [२०] ॥ श्रीवसिष्ठ उवाच ॥ अथेमं परमं राम विज्ञानाधिगमे क्रमम् । शृणु दैत्येश्वरः सिद्धः प्रह्लादः स्वात्मना यथा ॥ १ ॥ हते त्रिदशवृन्दानां हिरण्यकशिपौ रिपौ । प्रह्लादश्चिन्तयामास शोकसंविग्नमानसः ॥ २ ॥ एते तातादयः सर्वे विष्णुनासुरसत्तमाः । घातिताः क्षुब्धकल्पान्तवातेनेव कुलाचलाः ॥ ३ ॥ अभ्यस्ता बहवस्तेन मिथःप्रेरितपर्वताः । भीमाः समरसंरम्भाः सममस्मत्पितामहैः ॥ ४ ॥ तासु तास्वतिघोरासु विततास्वसुराजिषु । यो न

69 a: एवं निश्चय० d: ०मनंतपद० – 71 Ohne श्री० a/b: भगवाञ्छुक्र आरुरोह d: चिदात्मकमिदं – 74 b: विष्वग्विश्वा० – 76 d (im Schriftsystem der Hs.: ०ाचत्य०): Lies ०चिंत्य० bzw. ०चिन्त्य० – 78 (Drutavilambita) – 79 Ohne श्री० – 81 d: संव्यधात् – 82 c: वोदेति – 84 c/d: निरुध्यैतन्मनो – 86 a: एवमभ्यसताभ्यासं – Kolophon zu Sarga 20: इति श्रीमोक्षोपाय उपशमप्रकरणे बल्युपाख्यानं नाम एकविंशः सर्गः ॥ २१ ॥ – 21.1 Ohne श्री० b: ०गमक्रमम् d: LN stets प्रह्लाद

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

भीत इदानीं स भयमेष्यति का कथा ॥ ५ ॥ तस्मात्तस्यातिवीरस्य हरेराक्रमणे स्फु
टम् । मन्ये तद्व्यतिरेकेण विद्यते न प्रतिक्रिया ॥ ६ ॥ सर्वात्मना सर्वधिया सर्वसंरम्भ
रंहसा । स एव शरणं देवो गतिरस्तीह नान्यथा ॥ ७ ॥ अस्मान्निमेषादारभ्य नाराय
णमजं सदा । संप्रपन्नोऽस्मि सर्वत्र नारायणमयो ह्यहम् ॥ ८ ॥ नमो नारायणायेति
मन्त्रः सर्वार्थसाधकः । नापैति मम हृत्कोशादाकाशादिव मारुतः ॥ ९ ॥ अविष्णुः
पूजयन्विष्णुं न पूजाफलभाग्भवेत् । विष्णुर्भूत्वा यजेद्विष्णुमयं विष्णुरहं स्थितः ॥
१० ॥ श्रीवसिष्ठ उवाच ॥ प्रह्लाद इत्थं संचिन्त्य कृत्वा नारायणीं तनुम् । पुनः संचि
न्तयामास पूजार्थमसुरद्विषः ॥ ११ ॥ वपुषो वैष्णवादस्मान्मनोमूर्तिः परावरा । अयं
प्राणप्रवाहेण बहिर्विष्णुः स्थितोऽपरः ॥ १२ ॥ तदेनं पूजयाम्याशु परिवारसमन्वि
तम् । सपर्यया मनोमय्या सर्वसंभाररम्यया ॥ १३ ॥ प्रह्लाद इति संचिन्त्य संभारभ
रभारिणा । मनसा पूजयामास माधवं कमलाधवम् ॥ १४ ॥ रत्नार्घपात्रपटलैश्चन्दना
दिविलेपनैः । धूपैर्दीपैः पवित्रैश्च नानाविभवभूषणैः ॥ १५ ॥ अथ देवगृहे स्वस्मिन्बा
ह्यार्थैः परिपूर्णया । पूजया पूजयामास दानवेशो जनार्दनम् ॥ १६ ॥ ततस्ततः प्रभृ
त्येव प्रह्लादः परमेश्वरम् । तथैव प्रत्यहं भक्त्या पूजयामास पूर्णया ॥ १७ ॥ अथ तस्मि
न्पुरे दैत्यास्ततः प्रभृति वैष्णवाः । सर्व एवाभवन्भक्त्या राजा ह्याचारकारणम् ॥ १८
॥ जगाम वार्ता गगनं देवलोकमथान्वहम् । विष्णोर्द्वेषं परित्यज्य भक्त्या दैत्याः स्थि
ता इति ॥ १९ ॥ देवा विस्मयमाजग्मुः शक्राद्याः समरुद्गणाः । गृहीता वैष्णवी भक्ति
र्दैत्यैः किमिति राघव ॥ २० ॥ क्षीरोदे भोगिभोगस्थं विबुधा विस्मयाकुलाः । जग्मुर
म्बरमुत्सृज्य हरिमाहवशालिनम् ॥ २१ ॥ देवा ऊचुः ॥ किमेतद्भगवन्दैत्या विरुद्धा
ये सदैव हि । ते हि त्वन्मयतां याता विस्मयो नो विजृम्भते ॥ २२ ॥ क्व किलात्यन्त
दुर्वृत्ता दानवा दलिताद्रयः । क्व पाश्चात्यमहाजन्मलभ्या भक्तिर्जनार्दने ॥ २३ ॥ प्रा
कृतो गुणवाञ्जात इत्येषा भगवन्कथा । अकालपुष्पमालेव सुखायोद्वेजनाय च ॥ २४
॥ क्वाधमः प्राकृतारम्भो हीनकर्ममतिः सदा । वराको दानवस्तुच्छजातिर्भक्तिः क्व
वैष्णवी ॥ २५ ॥ श्रीभगवानुवाच ॥ विबुधा मा विषण्णाः स्थ प्रह्लादो भक्तिमानि
ति । पाश्चात्यं जन्म तस्येदं मोक्षार्होऽसावरिंदमाः ॥ २६ ॥ गुणवान्निर्गुणो जात इत्य
नर्थक्रमं विदुः । निर्गुणो गुणवाञ्जात इत्याहुः सिद्धिदं क्रमम् ॥ २७ ॥ आत्मीयानि
विचित्राणि भुवनान्यमरोत्तमाः । प्रयात नासुखायैषा प्राह्लादी गुणितेह वः ॥ २८ ॥
इत्युक्त्वा भगवांस्तत्र क्षीरोदार्णववीचिषु । अन्तर्धानं ययौ देवस्तटतापिच्छगुच्छवान्
॥ २९ ॥ सोऽपि संपूजितहरिः सुरौघोऽव्रजदम्बरम् । प्रह्लादं प्रति गीर्वाणास्ततः स्नि

5 b: विततास्वसुरराजिषु (2. Aufl.), lies विततासुरराजिषु – 11 Ohne श्री० d: ०द्विषम् – 12 b: ०न्मरुन्मूर्तिः, lies: ०न्मेऽभून्मूर्तिः* (Ld, Lf); परावरः d: Hs. स्थिरो – 13 a: तमेनं – 16 ab: तस्मिन्बाह्यार्थः परि० d: दानवेन्द्रो – 19 b: ०मथारिहन् d: Lies भक्ता*; श्रिता – 22 b: सदैव ते c: Hs. तन्मयतां – 24 c/d: ०मालेवासुखा० – 28 d: गुणितोद्भवा – 29 d: ०गुच्छवत्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ग्धत्वमाययुः ॥ ३० ॥ श्रीवसिष्ठ उवाच ॥ प्रत्यहं पूजयामास देवदेवं जनार्दनम् । मन
सा कर्मणा वाचा प्रह्लादो भक्तिमानिति ॥ ३१ ॥ अथ पूजापरस्यास्य दृश्ये स्थल इ
वाब्जिनी । न विशश्राम चेतोऽस्य भोगरोगानुरञ्जने ॥ ३२ ॥ त्यक्तभोगादिकलनं वि
श्रान्तिमनुपागतम् । चेतः केवलमस्यासीद्दोलायामिव योजितम् ॥ ३३ ॥ प्राह्लादीं
तां स्थितिं कृष्णो देवः क्षीरोदकोटरात् । विवेद सर्वगतया धिया परमकान्तया ॥
३४ ॥ अथ पातालमार्गेण विष्णुराह्लादिताग्रजः । देवपूजागृहं तस्य प्रह्लादस्य समा
ययौ ॥ ३५ ॥ विज्ञायाभ्यागतं देवं पूजया द्विगुणेद्धया । दैत्येन्द्रः पुण्डरीकाक्षमाद
रात्पर्यपूजयत् ॥ ३६ ॥ पूजागृहगतं देवं प्रत्यक्षावस्थितं हरिम् । प्रह्लादः परमः प्रीतो
गिरा तुष्टाव पुष्टया ॥ ३७ ॥ त्रिभुवनभवनाभिरामकोशं सकलकलङ्कहरं परं प्रका
शम् । अशरणशरणं शरण्यमीशं हरिमजमच्युतमीश्वरं प्रपद्ये ॥ ३८ ॥ कुवलयदलशैल
संनिकाशं शरदमलाम्बरकोटरोपमानम् । भ्रमरतिमिरकज्जलाञ्जनाभं सरसिजचक्र
गदाधरं प्रपद्ये ॥ ३९ ॥ विमलमलिकलापकोमलाङ्गं सितदलपङ्कजकुड्मलाभशङ्खम् ।
श्रुतिरणितविरञ्चिचिञ्चिरीकं स्वहृदयपद्मजलाशयं प्रपद्ये ॥ ४० ॥ सितनखघनतारका
वकीर्णं स्मितधवलाननपीवरेन्दुबिम्बम् । हृदयमणिमरीचिवारिगङ्गं हरिशरदम्बरमा
ततं प्रपद्ये ॥ ४१ ॥ त्रिभुवननलिनीसितारविन्दं तिमिरसमानविमोहदीपमग्र्यम् । ज
डतरमजडं चिदात्मतत्त्वं जगदखिलार्तिहरं हरिं प्रपद्ये ॥ ४२ ॥ नवविकसितपद्मरेणु
गौरस्फुटकमलावपुषोपरूषिताङ्गम् । दिनशमसमयारुणाम्बराभं कनकनिभाम्बरसु
न्दरं प्रपद्ये ॥ ४३ ॥ अविरतकृतविश्वसर्गलीलं सततमजातमवर्धनं विशालम् । युगश
तजरठाङ्गजातदेहं तरुदलशायिनमर्भकं प्रपद्ये ॥ ४४ ॥ दितिसुतनलिनीतुषारपातं
सुरनलिनीसततोदितार्कबिम्बम् । कमलजनलिनीजलावपूरं हृदि नलिनीनिलयं विभुं
प्रपद्ये ॥ ४५ ॥ इति गुणबहुलाभिर्वाग्भिरभ्यर्चितोऽसौ हरिरसुरविनाशः श्रीविषण्णा
ङ्गदेशः । जलद इव मयूरं प्रीतिमान्प्रीयमाणं कुवलयदलनीलः प्रत्युवाचासुरेन्द्रम् ॥
४६ ॥ श्रीभगवानुवाच ॥ वरं गुणनिधे दैत्यकुलानर्घ्यमहामणे । गृहाणाभिमतं भूयो
जन्मदुःखोपशान्तये ॥ ४७ ॥ प्रह्लाद उवाच ॥ सर्वसंकल्पफलदः सर्वलोकान्तरस्थि
तः । यदुदारतमं वेत्सि तदेवादिश देव मे ॥ ४८ ॥ श्रीभगवानुवाच ॥ सर्वसंभ्रमसं
शान्त्यै परमाद्यै फलाय च । ब्रह्मविश्रान्तिपर्यन्तो विचारोऽस्तु तवानघ ॥ ४९ ॥ श्री
वसिष्ठ उवाच ॥ इत्युक्त्वा दितिपुत्रेन्द्रं विष्णुरन्तरधीयत । कृतघर्घरनिर्ह्लादस्तरंगस्तो
यधेरिव ॥ ५० ॥ विष्णावन्तर्हित देवे पूजया कुसुमाञ्जलिम् । पाश्चात्यं दानवस्त्यक्त्वा

31 Ohne श्री० – 32 d: भोगत्यागानुरंगतः – 34 b: क्षीरोदमंदिरात् – 35 b: ०ताग्रगः, weitere Lesart: ०ताग्रतः – 36 d: ०रात्प्रत्यपूजयत् – 37 c: सुपरिप्रीतो; lies परमप्रीतो * – 38–44 (Puṣpitāgrā) – 38 प्रह्लाद उवाच ॥ b: परं चकास्ति – 40 c: ०विरिंचिचंचरीकं d: Hs. सुहृदय० – 41 a: ०नखतर० c: ०जालगंगं d: ०मानतं – 42 c: स्फुटतरमजडं – 43 b: ०भूषितांगम् c: ०समयारुणांगरागं – 44 c: ०जरठाभिजात० – 46 (Mālinī) b: ०विनाशी श्रीनिषण्णांसदेशः c: मयूरे – 47 a: कुलनिधे – 48 d: ०दिश मे विभो – 49 b: परमाय, lies परमार्थ०* – 50 Ohne श्री० – 51 b: पूजायै

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मणिरत्नपरिष्कृतम् ॥ ५१ ॥ पद्मासनस्थोऽथ मृदावुपविष्टो वरासने । स्तोत्रपाठं विधा
यात्र चिन्तयामास चिन्तया ॥ ५२ ॥ विचारवानेव भवान्भवत्विति भवारिणा । दे
वेनोक्तोऽस्मि तेनान्तः करोम्यात्मविचारणम् ॥ ५३ ॥ किमहं तावदेव स्यां योऽस्मि
न्भुवनडम्बरे । वच्मि गच्छामि तिष्ठामि प्रयच्छामि हरामि च ॥ ५४ ॥ जगत्तावदि
दं नाहं सवृक्षतृणपर्वतम् । यद्बाह्यं जडमत्यन्तं तत्स्यां कथमहं किल ॥ ५५ ॥ असद
भ्युत्थितो मूकः पवनैः स्फुरति क्षणम् । कालेनाल्पेन विलयी देहो नाहमचेतनः ॥
५६ ॥ जडया कर्णशष्कुल्या कल्प्यमानः क्षणस्थया । शून्याकृतिः शून्यभवः शब्दो
नाहमचेतनः ॥ ५७ ॥ त्वचा क्षणविनाशिन्या प्राप्योऽप्राप्योऽयमन्यथा । चित्प्रसा
दोपलब्धात्मा स्पर्शो नाहमचेतनः ॥ ५८ ॥ दृश्यदर्शनयोर्लीनं क्षयिक्षणविनाशयोः ।
केवले द्रष्टरि क्षीणं रूपं नाहमचेतनम् ॥ ५९ ॥ लब्धात्मा जिह्वया तुच्छो लोलया लो
लसत्तया । स्वल्पस्पन्दो द्रव्यनिष्ठो रसो नाहमचेतनः ॥ ६० ॥ नासयाप्यन्धजडया
क्षयिण्या परिकल्पितः । पेलवो नियताधारो गन्धो नाहमचेतनः ॥ ६१ ॥ निर्ममोऽम
ननः शान्तो गतपञ्चेन्द्रियभ्रमः । शुद्धचेतन एवाहं कलाकलनवर्जितः ॥ ६२ ॥ चेत्य
वर्जितचिन्मात्रमहमेवावभासकः । सबाह्याभ्यन्तरव्यापी निष्कलामलसन्मयः ॥ ६३
॥ आ इदानीं स्मृतं सत्यमेतत्तदखिलं मया । निर्विकल्पचिदाभास एष आत्मास्मि स
र्वगः । अनेन चेतनेनेमे सर्वे घटपटादयः ॥ ६४ ॥ विरञ्चिसदनात्पारे तच्छान्तेऽप्या
हरत्पदम् । प्रसरत्येव मे रूपमद्यापि न निवर्तते ॥ ६५ ॥ अयं नामाहमित्यन्तः कुतो
निरवलम्बना । अपर्यन्ताकृतेरेषा किलासीत्स्वल्पता मम ॥ ६६ ॥ अनन्तानन्दसंभो
गा परोपशमशालिनी । शुद्धेयं चिन्मयी दृष्टिर्जयत्यखिलदृष्टिषु ॥ ६७ ॥ सर्वभावान्त
रस्थाय चेत्यमुक्तचिदात्मने । प्रत्यक्चेतनरूपाय मह्यमेव नमो नमः ॥ ६८ ॥ विचि
त्राः शक्तयः स्वच्छसमया निर्विकारया । चिता क्रियन्ते परया कलङ्कमलमुक्तया ॥
६९ ॥ कालत्रयमुपेक्षिण्या हीनायाश्चेत्यबन्धनैः । चितश्चेत्यमुपेक्षिण्याः समतैवावशि
ष्यते ॥ ७० ॥ याति वाचामगम्यत्वादसत्तामिव शाश्वतीम् । नैरात्म्यसिद्धान्तदशा
मुपयातेव तिष्ठति ॥ ७१ ॥ ईहानीहमयैरन्तर्या चिदावलिता मलैः । सा हि नोत्पिपति
तुं शक्ता पाशबद्धेव पक्षिणी ॥ ७२ ॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन जन्तवः । धरावि
वरमग्नानां कीटानां समतां गताः ॥ ७३ ॥ आत्मनेऽस्तु नमो मह्यमविच्छिन्नचिदा
त्मने । लोकालोकमणे देव चिरेणाधिगतोऽस्यहो ॥ ७४ ॥ परादृष्टोऽसि लब्धोऽसि

52 a/b: ०स्थोऽपि मुदा ह्युपविष्टोऽधरासने c: स्तोत्रपाठविधिप्रांते – 54 a: Hs. तावदेवं d: प्रयते विहरामि च – 55 b: ०तृणवीरुधम् – 56 a/b: असन्नभ्युदितो मूकः पवनेनैव विस्फुरन् । – 57 b: कल्पमानः – 59: Nach 60. – 59 b: ०विनाशिनोः – 60 b: लोलक्षणिकसत्तया – 61 a: नासया गंध० b: क्षयिणा c: नियताकारो – 64 e: मयैव चे० Nach e/f zusätzlich: सूर्यांता अवभासंते दीपेनोत्तमतेजसा । (64A) – 64B: मयैवैताः स्फुरंतीह विचित्रेंद्रियवृत्तयः । तेजसांतःप्रकाशेन यथाग्निकणपंक्तयः ॥ – 65 a: विरिंचि० b: कल्पांते – 66 b: निरवलंबनः – 70 c: ०मुपेक्षित्र्याः; Hs. entstellt (चितायेत्यमु०) – 71 a: सा हि – 72 a/c: Hs. z. T. entstellt. – 73 c: ०लग्नानां – 74 d: ०गतोऽस्म्यहम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

प्रोदितोसि चिराय च । उद्धृतोऽसि विकल्पेभ्यो योऽसि सोऽसि नमोऽस्तु ते ॥ ७५ ॥ मह्यं तुभ्यमनन्ताया तुभ्यं मह्यं शिवात्मने । नमो देवाधिदेवाय पराय परमात्मने ॥ ७६ ॥ गतघनमिव पूर्णमिन्दुबिम्बं गतकलनावरणं स्वमेव रूपम् । स्ववपुषि मुदिते स्वयं स्वसंस्थं स्वयमुदितं स्ववशं स्वयं नमामि ॥ ७७ ॥ तिष्ठन्नपि हि नासीनो गच्छन्नपि न गच्छति । शान्तोऽपि व्यवहारस्थः कुर्वन्नपि न लिप्यति ॥ ७८ ॥ मनांसि क्षोभयत्येष पल्लवानीव मारुतः । वाहयत्यक्षपङ्क्तिं स्वामश्वालीमिव सारथिः ॥ ७९ ॥ एष एव सदान्वेष्यः स्तुत्यो ध्यातव्य एव च । जरामरणसंमोहादनेनोत्तीर्य गम्यते ॥ ८० ॥ सुलभश्चायमत्यन्तं सुजेयश्चात्मबन्धुवत् । शरीरपद्मकुहरे सर्वेषामिव षट्पदः ॥ ८१ ॥ न मे भोगस्थितौ वाञ्छा न मे भोगविर्जने । यदायाति तदायातु यत्प्रयाति प्रयातु तत् ॥ ८२ ॥ एतावन्तमहं कालमज्ञानरिपुणामुना । हृत्वा विवेकसर्वस्वमेकान्तमिव पोथितः ॥ ८३ ॥ मनसा मनसि छिन्ने निरहंकारतां गते । भावेन कलिते भावे स्वस्थस्तिष्ठामि केवलम् ॥ ८४ ॥ निर्भावं निरहंकारं निर्मनस्कमनीहितम् । केवलास्पन्दशुद्धात्मयन्त्रं तिष्ठति मे वपुः ॥ ८५ ॥ तृष्णारज्जुगणं छित्त्वा मच्छरीरकपञ्जरात् । न जाने क्व गतोड्डीय दुरहंकृतिपक्षिणी ॥ ८६ ॥ विद्यमानापि देवश्रीर्न स्थिता त्वयि न स्थिते । वनितारूपलावण्यसत्तेव गतचक्षुषः ॥ ८७ ॥ जय प्रोड्डामराकार जय शान्तिपरायण । जय सर्वागमातीत जय सर्वागमास्पद ॥ ८८ ॥ जय जात जयाजात जय क्षत जयाक्षत । जय भाव जयाभाव जय जेय जयाजय ॥ ८९ ॥ श्रीवसिष्ठ उवाच ॥ इति संचिन्तयन्नेव प्रह्लादः परवीरहा । निर्विकल्पपरानन्दसमाधिं समुपाययौ ॥ ९० ॥ निर्विकल्पसमाधिस्थश्चित्रार्पित इवाबभौ । पञ्चवर्षसहस्राणि पीनाशो दृढदेवदृक् ॥ ९१ ॥ एतावता च कालेन तद्रसातलमण्डलम् । बभूवाराजकं तीक्ष्णमात्स्यन्यायकदर्थितम् ॥ ९२ ॥ अथाखिलजगज्जालक्रमपालनदैवतम् । क्षीरोदसागरे शेषशय्यासनगतो हरिः । इदं संचिन्तयामास त्रैलोक्याम्भोरुहांशुमान् ॥ ९३ ॥ प्रह्लादे पदविश्रान्ते पाताले गतनायके । कष्टं सृष्टिरियं प्रायो निर्दैत्यत्वमुपागता ॥ ९४ ॥ दैत्याभावे सुरश्रेणी निर्जिगीषुपदं गता । शममेष्यत्यपद्वंद्वं मोक्षाख्यं पदमाप्स्यति ॥ ९५ ॥ देवौघे शान्तिमायाते भुवि यज्ञतपःक्रियाः । भविष्यन्त्यफलाः सर्वाः शममेष्यन्त्यसंशयम् ॥ ९६ ॥ क्रियास्वथोपशान्तासु भूर्लोकोऽस्तमुपैष्यति । असंसारप्रसङ्गोऽथ शेषेऽप्यर्थे भविष्यति ॥ ९७ ॥ ततोऽहमपि शून्येऽस्मिन्नष्टचन्द्रार्कतारके । चेतःप्रशान्तिमाधाय स्थितिमेष्यामि तत्पदे ॥ ९८ ॥ अकाण्ड एवमेवं हि जगत्युपशमं गते । नेह श्रेयोऽनुपश्यामि मन्ये जीवन्तु दानवाः ॥ ९९ ॥ दैत्योद्योगेन विबुधास्ततो

75 a: **परामृष्टो** b: **०तोऽस्यचिराय** – 77 (Puṣpitāgrā) – 81 b: **०श्चाप्तबंधुवत्** – 83 d: **०कांतमवपोथितः** – 84 c: **गलिते**; lies **भावेनाकलिते** d: **केवलः** – 85 c/d: **०शुद्धात्मन्यवतिष्ठति** – 87 a: **वस्तुश्री०** b: **स्थिरे** d: Hs. **०सत्येव** – 90 Ohne **श्री०** – 91 d: Lies **पीताशो** ; **पीनांसोऽतिष्ठदेकदृक्** – 92 c: **तीक्ष्णं** – 93 b: **०देहवान्** – 99 a: Lies **एवमेव***; Hs. (**एव ाम ावहि** =) **एवमेवेहि**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यज्ञतपःक्रियाः । तेन संसारसंस्थानमसंसारक्रमोऽन्यथा ॥ १०० ॥ आकल्पमिह वस्त
व्यं देहेनानेन तेन च । एवं हि नियतिर्दैवी निश्चिता परमेश्वरी ॥ १०१ ॥ इति संचि
न्त्य सर्वात्मा निर्गत्य क्षीरसागरात् । प्रह्लादनगरं प्राप्य प्रासादतलमाविशत् ॥ १०२
॥ वैनतेयासनस्थोऽसौ लक्ष्मीविधुतचामरः । स्वायुधादिपरीवारो देवर्षिमुनिवन्दितः ॥
१०३ ॥ महात्मन्संप्रबुध्यस्वेत्येवं विष्णुरुदाहरत् । पाञ्चजन्यं प्रदध्मानो ध्वनयन्ककु
भां गणम् ॥ १०४ ॥ महता तेन शब्देन वैष्णवप्राणजन्मना । बभूव संप्रबुद्धात्मा दा
नवेशः शनैः शनैः ॥ १०५ ॥ ब्रह्मरन्ध्रकृतोत्थाना प्राणशक्तिरथासुरम् । शनैराक्रम
यामास नाडीभ्यः सर्वतोमुखम् ॥ १०६ ॥ प्राणेषु रन्ध्रवक्त्रेषु प्रवृत्तेषु च तस्य चित् ।
चेत्योन्मुखी बभूवान्तः प्राणदर्पणबिम्बिता । चेतनीयोन्मुखी चेत्ये चिन्मनस्तामुपा
ययौ ॥ १०७ ॥ किंचिदङ्कुरिते चित्ते नेत्रे विकसनोन्मुखे । शनैर्बभूवतुस्तस्य प्रातनी
ले यथोत्पले ॥ १०८ ॥ प्राणापानपरामृष्टनाडीविवरसंविदः । वातार्तस्येव पद्मस्य स्प
न्दोऽस्य समजायत ॥ १०९ ॥ निमेषान्तरमात्रेण मनः पीवरतां ययौ । अथासौ विक
सन्नेत्रमनःप्राणवपुर्बभौ ॥ ११० ॥ प्रफुल्लनयनं जातमानसं पीवरस्मृतिम् । उवाचैनं
त्रिलोकेशः पर्जन्य इव बर्हिणम् ॥ १११ ॥ साधो स्मर महालक्ष्मीमात्मीयां स्मर चाकृ
तिम् । अकाण्ड इव किं देहविरामः क्रियते त्वया ॥ ११२ ॥ हेयोपादेयसंकल्पविही
नस्य शरीरगैः । भावाभावैस्तवास्त्यर्थः कस्तिष्ठोत्तिष्ठ संप्रति ॥ ११३ ॥ जीवन्मुक्तेन
भवता राज्य एव हि तिष्ठता । पक्षणीया गतोद्वेगमाकल्पान्तमियं तनुः ॥ ११४ ॥
नोदिता द्वादशादित्या न विलीनाः शिलोच्चयाः । न जगज्ज्वलितं साधो तनुं त्यजसि
किं मुधा ॥ ११५ ॥ कृशोऽतिदुःखी मूढोऽहमेताश्चान्याश्च भावनाः । मतिं यस्यावलु
म्पन्ति मरणं तस्य राजते ॥ ११६ ॥ आशापाशनिबद्धोऽन्तरितश्चेतश्च नीयते । यो वि
लोलमनोवृत्त्या मरणं तस्य राजते ॥ ११७ ॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्य
ते । यः समः सर्वभावेषु जीवितं तस्य शोभते ॥ ११८ ॥ योऽन्तःशीतलया बुद्ध्या रा
गद्वेषविमुक्तया । साक्षिवत्पश्यतीदं हि जीवितं तस्य शोभते ॥ ११९ ॥ येन सम्यक्प
रिज्ञाय हेयोपादेयमुज्झता । चित्तस्यान्तेऽर्पितं चित्तं जीवितं तस्य शोभते ॥ १२० ॥
ग्राह्यग्राहकसंबन्धे क्षीणशान्तिरुदेत्यलम् । स्थितिमभ्यागता शान्तिर्मोक्षनाम्नाभिधी
यते ॥ १२१ ॥ तदुत्तिष्ठासुराधीश सिंहासनमुपाश्रय । यावदाश्वभिषेकं ते स्वयमेव द
दाम्यहम् ॥ १२२ ॥ पाञ्चजन्यरवं श्रुत्वा य इमे समुपागताः । सिद्धाः साध्याः सुरौ
घाश्च कुर्वन्तु तव मङ्गलम् ॥ १२३ ॥ अथैनं हरिराहूतैः क्षीरोदाद्यैर्महाब्धिभिः । गङ्गा
दिभिः सरित्पूरैः सर्वतीर्थजलैस्तथा ॥ १२४ ॥ सुरासुरैः स्तूयमानं स्तूयमानः सुरा

101 b: **पारमेश्वरी** – 103 c: Hs. **स्वायुधाति०** – 104 b: **०दाहरन्** d: Hs. **०यन् कुकुभां** – 105 c: **स प्रबुद्धा०** – 106 b: **प्रवृत्तेष्वथ** – 107 e: **चेत्य०** – 107A: **द्वित्वं मुकुरसंक्रांता मुखश्रीरिव राघव ॥** – 108 a: **चित्रे** d: **प्रांतनीले**; lies **प्रातर्नीले*** – 111 a/b: **जातं मानसं पीवरं स्मृतम्** c: **उवाचैनां** – 112 c: **एव** – 113 c: **०वैस्तवानर्थः** – 114 c: **क्षेपणीया** – 115 d: **वै मुधा** – 118 c: **सर्वभूतेषु** – 120 b: **०मुक्तताः** – 121 b: Lies **क्षीणे*** c: Hs. entstellt (**०गतस्यांत०**) – 123 a: Hs. **पांचयज्ञरवं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सुरैः । अभिषिक्तमुवाचेदं प्रह्लादं मधुसूदनः ॥ १२५ ॥ यावन्मेरुर्धरा यावद्यावच्चन्द्रा
र्कमण्डले । अखण्डितगुणश्लाघी तावद्राजा भवानघ ॥ १२६ ॥ श्रीवसिष्ठ उवाच ॥
इत्युक्त्वा पुण्डरीकाक्षः सनरामरकिंकरः । द्वितीय इव संसारस्तत्रैवान्तर्धिमाययौ ॥
१२७ ॥ श्रीराम उवाच ॥ परे पदे परिणतं पाञ्चजन्यस्वनैर्मनः । कथं प्रबुद्धं भगवन्प्र
ह्लादस्य महात्मनः ॥ १२८ ॥ श्रीवसिष्ठ उवाच ॥ भ्रष्टबीजोपमा भूयोजन्माङ्कुरविव
र्जिता । हृदि जीवद्विमुक्तानां शुद्धा भवति वासना ॥ १२९ ॥ पावनी परमोदारा शुद्ध
सत्त्वानुपातिनी । आत्मध्यानमयी नित्यं सुषुप्तस्थेव तिष्ठति ॥ १३० ॥ अपि वर्षसह
स्रान्ते ते तयैवान्तरस्थया । सति देहे प्रबुध्यन्ते कुतोऽप्युच्छ्रनया शनैः ॥ १३१ ॥ इत्यु
पशमप्रकरणे प्रह्लादचरितम् ॥ [२१] ॥ श्रीवसिष्ठ उवाच ॥ रामापर्यवसानेयं माया
संसृतिनामिका । आत्मचित्तजयेनैव वश्यमायाति नान्यथा ॥ १ ॥ जगज्जन्मप्रपञ्च
स्य वैचित्र्यप्रतिपत्तये । इतिहासमिमं वक्ष्ये शृणुष्वावहितोऽनघ ॥ २ ॥ अस्त्यस्मिन्व
सुधापीठे कोसलो नाम मण्डलम् । तत्राभूद्ब्राह्मणः कश्चिद्गुणी गाधिरिति श्रुतः ॥ ३
॥ किमप्यधिगतं कार्यं संविधाय स चेतसि । बन्धुवृन्दाद्विनिष्क्रम्य तपस्तप्तुं वनं
ययौ ॥ ४ ॥ उत्फुल्लकमलं प्राप सरस्तत्र स विप्रराट् । आकण्ठमम्बुनिर्मग्नस्तपस्तत्र
चचार च ॥ ५ ॥ ययौ मासाष्टकं तस्य मग्नस्य सरसोऽम्भसि । अथैनं तपसा तप्त
माजगामैकदा हरिः ॥ ६ ॥ श्रीभगवानुवाच ॥ विप्रोत्तिष्ठ पयोमध्याद्गृहाणाभिमतं
वरम् । अभीप्सितफलोपेतो जातस्ते नियमः कृतः ॥ ७ ॥ गाधिरुवाच ॥ असंख्येय
जगद्भूतहृत्पद्मकुहरालिने । जगत्त्रयैकनलिनीसरसे विष्णवे नमः ॥ ८ ॥ मायामिमां त्व
द्रचितां भगवन्पारमात्मिकीम् । द्रष्टुमिच्छामि संसारनाम्नीमाश्चर्यकारिणीम् ॥ ९ ॥
श्रीवसिष्ठ उवाच ॥ इमां द्रक्ष्यसि मायां त्वं ततस्त्यजसि चेत्त्यज । इत्युक्त्वान्तर्दधे
विष्णुर्गान्धर्वमिव पत्तनम् ॥ १० ॥ गते विष्णौ समुत्तस्थौ जलात्स ब्राह्मणेश्वरः ।
बभूव परितुष्टात्मा दर्शनेन जगत्पतेः ॥ ११ ॥ अथास्य कतिचित्तस्मिन्दिवसानि ययु
र्वने । हरिसंदर्शनानन्दवतो ब्राह्मणकर्मणा ॥ १२ ॥ एकदारब्धवान्स्नानं सरस्युदित
पङ्कजे । चिन्तयन्वैष्णवं वाक्यं महर्षिरिव मानसे ॥ १३ ॥ अथ स्नानविधावन्तर्जल
मेष चकार ह । अन्तर्जलविधौ तस्मिन्विस्मृतध्यनमन्त्रधीः ॥ १४ ॥ मृतमात्मानमा
त्मीये सदनेऽपश्यदातुरः । प्राणापानप्रवाहेण मुक्तमन्तमपागतम् ॥ १५ ॥ आवृतं
बन्धुभिः खिन्नैर्भार्यया पादयोः श्रितम् । मात्रा गृहीतं चिबुके नवव्यञ्जनलाञ्छिते
॥ १६ ॥ अथ तत्कालकल्लोलप्रलापाकुलचेष्टितैः । नीतं श्मशानमास्थानं वसापङ्क

126 b: ०मंडलम् – 127 Ohne श्री० b: ०किंनरः c: संहार० – 128 Ohne श्री०; Hs. ohne श्रीराम उवाच ॥ – 129 d: वसति – 131 b: तयैवांतरवस्थया – d: कुतोऽत्यु० – Kolophon zu Sarga 21: इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरणे प्रह्लादोपाख्यानं नाम द्वाविंशः सर्गः ॥ २२ ॥ – 22.1 Ohne श्री० a: Hs. त्वामापर्य० d: Hs. क्षेपयामीति, lies क्षयमायाति* (vgl. V 82A) – 2 a: जगन्मायाप्र० c: इतिहासमहं – 4 b: विनिधाय – 5 d: चकार सः – 7 d: नियमक्रमः – 10 Ohne श्री० – 14 a: जल स्यांते विधावंत० b: चचार – 15 d: Lies ०मुपागतम्*; मुक्तमंतर्धिमागतम् – 17 c: Hs. श्मशानमास्यान०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

लङ्कितम् । तत्र ते ज्वलने दीप्ते चक्रुस्तं भस्मसाच्छवम् ॥ १७ ॥ अथापश्यदसौ गाधिः
स्वाधिपीवरया धिया । हूणमण्डलपर्यन्तग्रामोपान्तनिवासिनाम् । श्वपचानां स्त्रियो
गर्भे स्थितमात्मानमाकुलम् ॥ १८ ॥ शनैः पक्वतया काले प्रसूतं मेचकच्छविम् । सं
पन्नं श्वपचागारे शिशुं श्वपचवल्लभम् ॥ १९ ॥ द्वादशाब्दिकतां त्यक्त्वा संस्थितं षो
डशाब्दिकम् । पीवराङ्गमुदारांसं पयोदमिव मेदुरम् ॥ २० ॥ तमाललतयेवाथ स्थितं
श्वपचकान्तया । स्तनस्तबकशालिन्या नवपल्लवहस्तया ॥ २१ ॥ विश्रान्तं वनकुञ्जेषु
सुप्तं गिरिदरीषु च । निलीनं पत्रपुञ्जेषु गुल्मकेषु कृतालयम् ॥ २२ ॥ प्रसूतमथ शैलेषु
पुत्रान्निजकुलाङ्कुरान् । कलत्रवन्तं संपन्नं स्थितं प्रक्षीणयौवनम् ॥ २३ ॥ संस्थितं मठि
कां पर्णैः कृत्वा दूरे मुनीन्द्रवत् । जराजरठतां यान्तं स्वदेहसमपुत्रकम् ॥ २४ ॥ अथा
पश्यदसौ गाधिर्यावत्तस्य कलत्रिणः । तत्कलत्रमशेषेण नीतमादृतमृत्युना ॥ २५ ॥
ततः शोकपरीतात्मा प्रलापविकलाननः । तं विहाय निजं देशं विगतास्थोऽश्रुलोच
नः । विजहार बहून्देशाननास्थचिन्तयान्वितः ॥ २६ ॥ एकदा प्राप कीराणां मण्डले
श्रीमतीं पुरीम् । सामन्तैर्ललनाभिश्च नागरैश्च निरन्तरम् । स्वर्गमार्गोपमं राजमार्गम
स्यामवाप सः ॥ २७ ॥ मणिरत्नकृतागारं तत्र मङ्गलहस्तिनम् । ददर्शामलशैलेन्द्रमिव
संसारचञ्चलम् ॥ २८ ॥ मृते राजनि राजार्थं विहरन्तमितस्ततः । आलोकयन्तमादाय
तं करेण स वारणः ॥ २९ ॥ स्वकटे योजयेन्मेरुस्तटेऽर्कमिव सादरम् । तस्मिन्कटगते
नेदुर्जयदुन्दुभयोऽभितः ॥ ३० ॥ पूरिताशोऽवनौ राजा जयतीति जनस्वनः । उद्ययौ
संप्रबुद्धानां विहगानामिवारवः ॥ ३१ ॥ तं तत्रावरयामासुर्मण्डनार्थं वराङ्गनाः । ता
दृशं तमुपाजग्मुः सर्वाः प्रकृतयस्ततः ॥ ३२ ॥ एवं स श्वपचो राज्यं प्राप कीरपुरा
न्तरे । कीरीकरतलाम्भोजप्रमृष्टचरणाम्बुजः ॥ ३३ ॥ परिविवृतनृपौजाः सर्वदिक्सं
स्थिताज्ञः कतिपयदिवसेहासिद्धदेशव्यवस्थः । प्रकृतिभिरलमूढाशेषराजत्वभारः स
गवल इति नाम्ना तत्र राजा बभूव ॥ ३४ ॥ श्रीवसिष्ठ उवाच ॥ विलासिनीभिर्वलितो
मन्त्रिमण्डलपूजितः । वन्दितः सर्वसामन्तैश्छत्रचामरशोभितः ॥ ३५ ॥ कीरेषु श्वप
चो राजयं वर्षाण्यष्टौ चकार ह । यदृच्छयैकदाथासावतिष्ठत्त्यक्तभूषणः ॥ ३६ ॥ एक
एवाजिरं बाह्यं तादृग्वेषः स निर्ययौ । तत्रापश्यद्घनश्यामं पीनं श्वपचपेटकम् । धूनानं
वल्लरीं तन्त्रीं करपल्लवलीलया ॥ ३७ ॥ एकस्तस्मात्समुत्तस्थौ जरावात्रक्तलोचनः । भोः
कटञ्जेति सहसा वदन्कीरमहीपतिम् । उवाचेदं स कीरेशं हे बन्धो भोः कटञ्जक ॥
३८ ॥ क्व नु स्थितोऽसि दिष्ट्याद्य दृष्टोऽसि चिरबान्धव । क्वासि विश्रान्तवान्कालमे
तावन्तं वनान्तरे ॥ ३९ ॥ श्वपचे प्रवदत्येवं राजा यावत्तया तया । चकार तत्काल

19 a: पुक्कसया – 20 b: वृतं – 22 c: पत्रकुंजेषु – 24 d: स्वदेहमनु पुत्रकम् – 25 d: नीतमाहृत्य मृत्युना – 26 d: विगतः साश्रुलोचनः – 26 e/f: देशान्दुःखितश्चिंतया०, lies देशाननास्थश्चिन्तया०* – 28 a: ०कृतद्वारं – 29 d: सुचारुणा – 30 a/b: स्वकंठे योजयन्मेरुतटे c: कंठगते – 32 a: तत्र वरयामा० – 33 a: परिविसृत० – 34 (Mālinī) – 35 Ohne श्री० – 36 c/d: ०कदा योऽसावति० – 37 e: धुनानं, lies धून्वानं; lies वल्लकीतन्त्रीं*? – 38 d: Hs. entstellt (वदक्षीरमहापतिः) – 40 a: श्वपचोऽग्रे वदत्येवं c: तत्कालतया

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

या चेष्टयैवावधीरणम् ॥ ४० ॥ तावद्वातायनगताः कान्ताः प्रकृतयस्तथा । श्वपचोऽ
यमिति ज्ञात्वा म्लानतामलमाययुः । सत्वरं प्रविवेशान्तःपुरमाम्लानमानवम् ॥ ४१
॥ मन्त्रिणो नागरा नार्यस्ततस्ते तं महीपतिम् । नास्प्राक्षुरपि तिष्ठन्तं गृह एव शवं य
था ॥ ४२ ॥ एक एव बभूवासौ जनमध्यगतोऽपि सन् । अर्थादिगुणनिर्मुक्तः परदेश
इवाध्वगः ॥ ४३ ॥ अयं सर्वे वयं दीर्घं कालं श्वपचदूषिताः । प्रायश्चित्तैर्न शुध्यामः
प्रविशामो हुताशनम् ॥ ४४ ॥ इति निर्णीय नगरे नागरा मन्त्रिणस्तथा । अभितो ज्वा
लयित्वाग्निं प्रविष्टाः सह बन्धुभिः ॥ ४५ ॥ राज्यसज्जनसंपर्कपवित्रीकृतधीरधीः । ग
वलश्चिन्तयामास शोकव्याकुललोचनः । मदर्थमित्यनर्थोऽयं देशेऽस्मिन्स्थितिमागतः
॥ ४६ ॥ किं मे जीवितदुःखेन मरणं मे महोत्सवः । इति निश्चित्य गवलो ज्वलिते
ज्वलने पुरः ॥ ४७ ॥ पतंगवदनुद्वेगमकरोदाहुतिं वपुः । अत्रान्तरेऽनलक्षुब्धो गाधि
र्मोहादबुध्यत ॥ ४८ ॥ श्रीवसिष्ठ उवाच ॥ मुहूर्तद्वितयेनासौ गाधिरासीद्गतभ्रमः ।
कोऽहं किमिव पश्यामि किमकार्षमहं किल । एवं विचारयंश्चित्रमुदस्थदुदकान्तरात्
॥ ४९ ॥ नित्यमेवमनन्तासु भ्रमदृष्टिषु देहिनाम् । चेतो भ्रमति शार्दूलो वनराजिष्वि
वोन्मदः ॥ ५० ॥ अवधार्येति तं चित्तमोहं गाधिर्निनाय सः । दिनानि कतिचित्त
स्मिन्स्वक एवाश्रमे तदा ॥ ५१ ॥ एकदा गाधिमागच्छत्कश्चित्प्रियतरोऽतिथिः । पर
मां तृप्तिमानीतः फलपुष्परसाशनैः ॥ ५२ ॥ अथ वन्दितसंध्यौ तौ कृतजप्यावुभाव
पि । क्रमाच्छयनमासाद्य चक्रतुः पावनीः कथाः ॥ ५३ ॥ पप्रच्छाथातिथिं गाधिः
प्रसङ्गपतितं वचः । किं ब्रह्मन्सुकृशाङ्गस्त्वं किमिति श्रमवानसि ॥ ५४ ॥ अतिथिरु
वाच ॥ अस्त्यस्मिन्वसुधापीठे उत्तराशानिकुञ्जके । कीरो नामेति विख्यातः श्रीमाञ्ज
नपदो महान् ॥ ५५ ॥ तत्राहमवसं मासं पूज्यमानः पुरे जनैः । एकदैकेन तत्रोक्तं क
थाप्रस्तावतः क्वचित् ॥ ५६ ॥ इहाभूच्छ्वपचो राजा वर्षाण्यष्टौ द्विजेति मे । स एवान्ते
परिज्ञातः प्रविष्टो ज्वलनं हठात् । ततो द्विजशतानीह प्रविष्टानि हुताशनम् ॥ ५७ ॥
इति तस्य मुखाच्छ्रुत्वा तस्मान्निर्गत्य मण्डलात् । प्रयागेऽकरवं शुद्ध्यै प्रायश्चित्तमहं
द्विज ॥ ५८ ॥ कृत्वा चान्द्रायणस्यान्ते तृतीयस्यान्ते पारणम् । इहाहमागतस्तेन श्रा
न्तोऽस्म्यतिकृशोऽस्मि च ॥ ५९ ॥ श्रीवसिष्ठ उवाच ॥ इति विप्रमुखच्छ्रुत्वा विस्मयो
द्धुरया धिया । गाधिः संचिन्तयामास मद्वृत्तान्तोऽयीदृशः । तदात्मश्वपचोदन्तं द्रष्टुं
गच्छाम्यखिन्नधीः ॥ ६० ॥ निर्गत्याथ महाबुद्धिर्देशानुल्लङ्घ्य भूरिशः । तत्तादृशनि
जाचारं हूणमण्डलमासदत् ॥ ६१ ॥ तेनैव संनिवेशेन द्विजः श्वपचमन्दिरम् । तत्राप

41 f: Lies ०मानसम् – 42 a/b: नार्यस्ततस्त्वेनं – 43 a: Hs. बभौवासौ c: सार्थादिगण० – 44 a: Lies अये; अथ सर्वे वयं दीर्घ० – 45 a/b: Hs. नगरेर्नागरा d: विविशुः – 46 a: राजा c: एकलश्चिंत० d: ०चेतनः – 47 a: किं च (2. Aufl.) – 49 Ohne श्री० – 50 d: Lies वनराशि० (vgl. वनव्यूह०19.63) – 54 a: सं[2. Aufl.: तं]पप्रच्छातिथिं b: प्रसंगापतितं; lies प्रसङ्गपतिते वचे c: संकृशांग० d: Lies: किमति०*; Hs. श्रमवानिति – 57 d: जवात् – 58 c: प्रयागे स्नानजप्यादि – 59 b: तृतीयस्याद्य – 60 Ohne श्री० – 61 c: तत्तादृशसमाचारं – 62 a: निजं c: तथा०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

श्यदथान्यांश्च संनिवेशानितस्ततः ॥ ६२ ॥ एवंप्रायाः स्मरन्गाधिः प्राक्तनीः श्वपचक्रियाः । विस्मयोत्कम्पितशिरा धातुश्वेष्टं परामृशत् । हूणमण्डलमुत्सृज्य कीरमण्डलमाययौ ॥ ६३ ॥ अथात्मनानुभूतानि दृष्टान्यासेवितानि च । स्थानानि नगरेऽपश्यज्जनेभ्यः श्रुतवांस्तथा ॥ ६४ ॥ एता हि माया महती तेन मे चक्रधारिणा । दर्शितेत्यधुना साधु मया स्मृतमखण्डितम् ॥ ६५ ॥ इति संचिन्त्य निर्गत्य तस्माद्गाधिर्जनास्पदात् । कन्दरं प्राप्य शैलस्य तस्थौ स्वर्गान्तसिंहवत् ॥ ६६ ॥ तत्र संवत्सरं सार्धं पयश्चुलुकभोजनः । तपश्चक्रे महातेजास्तुष्टये शार्ङ्गधन्वनः ॥ ६७ ॥ अथाजगाम शैलेन्द्रकन्दरे द्विजमन्दिरम् । पयोधरवदात्माच्छच्छविश्चक्रगदाधरः ॥ ६८ ॥ श्रीभगवानुवाच ॥ विप्रवर्य त्वया दृष्टा माया मम गरीयसी । तपो गिरितटे कुर्वन्किमन्यदभिवाञ्छसि ॥ ६९ ॥ दत्तार्घं कीर्णकुसुमं प्रणम्याशु प्रदक्षिणैः । विष्णुमाह द्विजो वाक्यमम्भोदमिव चातकः ॥ ७० ॥ देव यैषा त्वया माया दर्शितातितमोमयी । तस्या मर्म न जानामि भ्रमः सत्योऽभवत्कथम् ॥ ७१ ॥ श्रीभगवानुवाच ॥ विप्र पृथ्व्यादि चित्तस्थं न बहिःस्थं कदाचन । स्वप्नभ्रममदाद्यैश्च सर्वैरेवानुभूयते ॥ ७२ ॥ यत्राततं जगज्जालं संस्थितं तेन चेतसा । श्वपचत्वं प्रकटितं यदि तद्विस्मयोऽत्र किम् ॥ ७३ ॥ अपि बुद्धा श्वपचता प्रतिभासवशाद्यथा । तथैवातिथिरायातो दृष्टवानसि संभ्रमम् ॥ ७४ ॥ तथैवोत्थाय गच्छामि प्राप्तोऽहं हूणमण्डलम् । तथैवेदं कटञ्जस्य प्राक्तनं लुठितं गृहम् ॥ ७५ ॥ तथैव कीरनगरं प्राप्तोऽस्मि कथितं च मे । कीरैः श्वपचराजत्वं दृष्टवानित्यसि भ्रमम् ॥ ७६ ॥ काकतालीययोगेन चेतसि श्वपचस्थितिः । सर्वेषां हूणकीराणां तथैव प्रतिबिम्बिता ॥ ७७ ॥ कदाचित्प्रतिभैकैव बहूनामुपजायते । काकतालीयस्थितिवद्विचित्रा हि मनोगतिः ॥ ७८ ॥ योऽसौ कटञ्जको नाम श्वपचो हूणमण्डले । तेनैव संनिवेशेन स तथैवाभवत्पुरा ॥ ७९ ॥ तथैव विधिवैधुर्यं प्राप्य देशान्तरं गतः । बभूव कीरनृपतिः प्रविवेशानलं ततः ॥ ८० ॥ भवतः केवलं चित्ते स्वसंबन्धितया तदा । प्रतिभावा तथारूपा कटञ्जाचारसंस्थितिः ॥ ८१ ॥ अयं सोऽहमिदं तन्म इति मज्जति नात्मवान् । सर्वमेवाहमेवेति तत्त्वज्ञो नावसीदति ॥ ८२ ॥ न गृह्णाति पदार्थेषु विभागानर्थभावनाम् । तेनासौ भ्रममोहेषु तत्त्वज्ञो न निमज्जति ॥ ८३ ॥ ज्ञानस्यापरिपूर्णत्वान्न शक्नोषि मनोभ्रमम् । विनिवारयितुं तेन तेनैवाक्रम्यसे क्षणात् ॥ ८४ ॥

63 a: **एवं जाताः** d: **धातुश्वेष्टां** – 65 a: **एषा** – 66 c: **कंदरां** d: **तत्र च सिंहवत्** – 67 a/b: **सार्धं अपश्चुलुक०** – 68 b: **०मंदिरे** c/d: **०वदच्छात्मछ**[sic]**विश्वक्र०**; lies **०वदात्माच्छशङ्खश्चक्र०*** (Ld) – 70 b: **प्रणम्यांगप्रदक्षिणैः** – 71 **गाधिरुवाच ॥** (2. Aufl.) a: **देव एषा** b: Hs. **०तिमनोमयी** – 72 c: **०भ्रमपदार्थेषु** – 73 a: **यत्रानंतजगज्जालं** – 74 a: **अवबुद्धा** d: **संभ्रमे** – 75 u. 76: Bei Lf am Rand von anderer Hand nachgetragen. – 75 d: **संचितं गृहम्** – 76 b: **प्राप्तोऽसि** c: **कीरे** d: **दृष्टवान्विगतभ्रमम्** – 78 a: Hs. **०भैकेव** b: **बहूनामपि जायते** – 79 c: **सन्नि**[sic]**वेशेन** – 81 a: **तवाभूत्केवलं** c: **प्रतिभाया**, lies **०भाता***; **तथाभूता** – 82 b: **मज्जत्यनात्मवान्** – 82A: **विप्रापर्यवसानेयं माया संसृतिनामिका । आत्मचिंतनयैवेयं** [lies **आत्मचित्तजयेनैव** (vgl. V 1)] **क्षयमायाति नान्यथा ॥** – 83 d: **नावसीदति**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

चित्तं नाभिः किलास्येह मायाचक्रस्य सर्वतः । स्थीयते चेत्तदाक्रम्य तन्न किंचित्प्रबाधते ॥ ८५ ॥ त्वमुत्तिष्ठ गिरेः कुञ्जे दश वर्षाण्यखिन्नधीः । तपः कुरु ततो ज्ञानमनन्ताभमवाप्स्यसि ॥ ८६ ॥ इत्युक्त्वा पुण्डरीकाक्षस्तत्रैवान्तरधीयत । गाधिर्विवेकवशजं वैराग्यं परमागतः ॥ ८७ ॥ जगाम करुणार्द्रात्मा नियमायावनीधरम् । निरस्ताशेषसंकल्पस्तपस्तत्र चकार ह । दश वर्षाणि तेनासावात्मज्ञानमवाप ह ॥ ८८ ॥ अरमत तदनु स्वां प्राप्य सत्तां महात्मा व्यपगतभयशोको भोगभूमावनिच्छुः । सततविततजीवन्मुक्तरूपः प्रशान्तः सकल इव शशाङ्कोऽघूर्णितः पूर्णचेताः ॥ ८९ ॥ इति मोक्षोपाये गाधिवृत्तान्तम् ॥ [२२] ॥ श्रीवसिष्ठ उवाच ॥ एवमेषातिवितता दुर्ज्ञाना रघुनन्दन । महामोहकरी माया विषमा पारमात्मिकी ॥ १ ॥ अतो वच्मि महाबाहो मायेयं विषमान्वहम् । असावधानमनसं योजयत्यतिसंकटे ॥ २ ॥ चित्ताक्रमणमात्रात्तु परमादौषधादृते । प्रयत्नेनापि संसारमहारोगो न शाम्यति ॥ ३ ॥ वर्तमानं क्रमायातं भजद्बाह्यधिया क्षणम् । भूतं भविष्यदभजद्याति चित्तमचित्तताम् ॥ ४ ॥ संकल्पाशानुसंधानवर्जनं चेत्प्रतिक्षणम् । करोषि तदचित्तत्वं प्राप्त एवासि पावनम् ॥ ५ ॥ चेतनं चित्तरक्तं हि प्रत्यक्चेतनमुच्यते । निर्मनस्कस्वभावं तन्न तत्र कलनामलः ॥ ६ ॥ सा सत्यता सा शिवता सावस्था पारमात्मिकी । सर्वज्ञता सा सा तृप्तिर्न तु यन्न मनः क्षतम् ॥ ७ ॥ अविवेकादुपाहृत्य चेतः स्थैर्येण निश्चयैः । बलात्कारेण संयोज्यं शास्त्रसत्पुरुषक्रमे ॥ ८ ॥ प्रलपन्विसृजन्घृह्णन्नुन्मिषन्निमिषन्नपि । निरस्तमननः शान्तः संविन्मात्रपरो भव ॥ ९ ॥ ममेदं तदयं सोऽहमिति संत्यज्य वासना । एकनिष्ठतयान्तःस्थसंविन्मात्रपरो भव ॥ १० ॥ मलसंवेद्यमुत्सृज्य मनो नैर्मल्यमन्थरः । आशापाशमलं छित्त्वा स्वसंवित्तिमयो भव ॥ ११ ॥ अशुभाशुभसंकेतः संशान्ताशाविषूचिकः । नष्टेष्टानिष्टदृष्टिस्त्वं संवित्सारपरो भव ॥ १२ ॥ आत्मतापरते त्यक्त्वा निर्विभागो जगत्स्थितौ । वज्रस्तम्भवदात्मानमवलम्ब्य स्थिरो भव ॥ १३ ॥ तदा संक्षीयते मोहः संसारभ्रमकारणम् । निर्मलायां निराशायां स्वसंवित्तौ स्थितिर्यदा ॥ १४ ॥ स्वभावमालोकयत आनन्दमयसंस्थितेः । रसायनमपि स्वादु राम प्रतिविषायते ॥ १५ ॥ अनात्मध्यानभावेन देहमात्रास्थयानय । पुत्रदारकुटम्बैश्च चेतो गच्छति पीनताम् ॥ १६ ॥ अहंकाराधिकारेण ममतामललीलया । इदं ममेति भावेन चेतो गच्छति पीन

85 c: Lies **स्थिहते** (vgl. DPL). – 86 b: **वर्षाणि खिन्नधीः** d: **०मनंतं समवाप्स्यसि** – 87 d: **परमं गतः** – 88 c/d: **०संकल्पस्तीव्रं तत्राकरोत्तपः** – 89 (Mālinī) b: **०निच्छः** d: **ऽघूर्णितापूर्ण०** – Kolophon zu Sarga 22: **इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरणे गाधिवृत्तांतकथनं नाम त्रयोविंशः सर्गः ॥ २३ ॥** – 23.1 Ohne **श्री०** – 2 d: **संयोजयति संकटे** – 6 a: **चित्तरिक्तं** – c/d: **तु न** – 7 c/d: **तृप्तिर्ननु यत्र** – 8 b: **सोद्यमनिश्चयैः** d: **०क्रमैः** – 9 c: **०मननानंते** (2. Aufl.: **०मननोऽनन्ते**); Hs. **०मनसः** – 10 b: **वासनाः** – 11 a: **मलं** b: **निर्मलयन्परम्** c: **०पाशानलं** – 13 b: **निर्विभावो** c. **यज्ञस्तंभ०** – 14 d: **यदा स्थितिः** – 15 a/b: **०लोकयतः स्वानंद०** – 15A: **दूरादात्मज्ञता याति चित्ते पीवरतां गते । आलोकलक्ष्मीरभितो महामेघ इवोत्थिते ॥** – 16 a: **अनात्मन्यात्मभावेन** b: **०स्थया धिया** c: **०कुटुंबैश्च** – 17 a: **अहंकारविकारेण**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ताम् ॥ १७ ॥ आधिव्याधिविलासेन समाश्वासेन संसृतौ । हेयादेयविभागेन चेतो गच्छति पीनताम् ॥ १८ ॥ स्नेहेन धनलाभेन लाभेन मणियोषिताम् । आपातरमणीयेषु चेतो गच्छति पीनताम् ॥ १९ ॥ दुराशाक्षीरपानेन भोगानिलबलेन च । आस्थादानेन चारे च चित्ताहिर्याति पीनताम् ॥ २० ॥ उद्दालकवदाल्लूनविशीर्णं भूतपञ्चकम् । कृत्वा कृत्वा धिया धीर धीरयान्तर्विचारय ॥ २१ ॥ श्रीराम उवाच ॥ केन क्रमेण भगवन्मुनिनोद्दालकेन तत् । भूतपञ्चकमाल्लूनं कृत्वान्तः प्रविचारितम् ॥ २२ ॥ श्रीवसिष्ठ उवाच ॥ शृणु राम यथा पूर्वं भूतवृन्दविचारणात् । उद्दालकेन संप्राप्ता परमा दृष्टिरक्षता ॥ २३ ॥ गन्धमादनशैलेन्द्रनाम्नी काचित्किल स्थली । विद्यते कीर्णकुसुमा कर्पूरद्रुमधूसरा ॥ २४ ॥ तत्र कस्मिंश्चिदुचिते सानौ सफलपादपे । उद्दालको नाम मुनिरासीदुद्दामतापसः ॥ २५ ॥ प्रथमं तु बभूवासावल्पप्रज्ञोऽविचारवान् । ततः क्रमेण तपसा शास्त्रार्थैर्नियमैर्यमैः ॥ २६ ॥ विवेक आजगामैनमथेदं समचिन्तयत् । किं तत्प्राप्यं प्रधानं स्याद्यद्विश्रान्तौ न शोच्यते ॥ २७ ॥ कदाहं त्यक्तमनने पदे परमपावने । चिरं विश्रान्तिमेष्यामि मेरुशृङ्ग इवाम्बुदः ॥ २८ ॥ कदा शममुपैष्यान्ति ममान्तर्भोगसंपदः । इदं कृत्वेदमप्यन्यत्कर्तव्यमिति चञ्चलाः ॥ २९ ॥ कदा बहुलकल्लोलां नावा परमया धिया । परितीर्णो भविष्यामि मत्तां तृष्णातरंगिणीम् ॥ ३० ॥ ईहितानीहितैर्मुक्तो हेयोपादेयवर्जितः । कदान्तस्तोषमेष्यामि स्वप्रकाशपदस्थितः ॥ ३१ ॥ कदोपशान्तमननो धरणीधरकन्दरे । समेष्यामि शिलासाम्यं निर्विकल्पसमाधिना ॥ ३२ ॥ निरंशध्यानविश्रान्तिमूकस्य मम मूर्धनि । कदा कर्णे करिष्यन्ति कुलायं वनपूतिकाः ॥ ३३ ॥ इति चिन्तापरवशो वन उद्दालको द्विजः । पुनः पुनस्तूपविश्य ध्यानाभ्यासं चकार ह ॥ ३४ ॥ विषयैराल्लूयमाने चित्ते मर्कटचञ्चले । न स लेभे समाधानप्रतिष्ठां प्रीतिदायिनीम् ॥ ३५ ॥ कदाचिद्बाह्यसंस्पर्शपरित्यागादनन्तरम् । तस्यागच्छच्चित्तकपिरान्तरस्पर्शसंचयान् ॥ ३६ ॥ कदाचिदान्तरस्पर्शाद्बाह्यं विषयमाददे । तस्योड्डीय मनो याति कदाचित्त्रस्तपक्षिवत् ॥ ३७ ॥ कदाचिदुदितार्काभं तेजः पश्यति विस्तृतम् । कदाचित्केवलं व्योम कदाचिन्निबिडदं तमः ॥ ३८ ॥ इति पर्याकुलास्वन्तः स लुठन्ध्यानवृत्तिषु । अतिपर्याकुलमना विजहारारतिर्गिरौ ॥ ३९ ॥ समग्रजनदुःप्रापामेकदा प्राप कन्दराम् । स शान्तसर्वसंचारां मुनिर्मोक्षदशामिव ॥ ४० ॥ स तां विवेश धर्मात्मा गन्धमादनकन्दराम् । चकारासनमास्तीर्णैः पत्रैरन्तस्थगुच्छकम् ॥ ४१ ॥ तस्य प्रस्तारयामास पृष्ठे चारु मृगाजिनम् । तत्रोपाविशदावेशं चे

19 a: **धनलोभेन** c: **०रमणीयेन** – 20 c: **आश्वासनेन** (2. Aufl.); **चारेण** – 21 a: **०वदाल्लूनं** b: **पंचभूत कम्** – 22 Ohne **श्री०** (2. Aufl.) – 23 Ohne **श्री०** – 24 a: **०नाम्नः** – 27 a: **विवेकमाजगा०** d: **शोचति** – 29 b: **०संविदः** – 30 a: **कदाहं बहुकल्लोलां** b: Hs. **नावां** – 31 c: **कदाहं स्वस्तिमेष्यामि** d: **०पदे स्थितः** – 33 a: **०विश्रांत०** c: **कदा तार्णं** d: **वनपुत्रिकाः** – 35 a: **विषयैर्नीयमाने तु**, die Hs. hat (mit einer Silbe zuviel) **विषयैना**[sic]**ल्लूयमाने तु** – 39 a: **पर्याकुलं** [2. Aufl.: **०कुल०**] **स्वांतः** – 40 b: **प्राप्य** c: **संशान्त०** – 41 c: **०सनमम्लानैः** – 42 c/d: Nach Ld, Lf (Hs. entstellt); **०दावेशाच्चेतः स तनुतां**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तसस्तनुतां नयन् ॥ ४२ ॥ बुद्धवत्सुदृढाबद्धपद्मासन उदङ्मुखः । पार्ष्णिभ्यां वृषणौ
धृत्वा चकार ब्राह्म्यमञ्जलिम् ॥ ४३ ॥ वासनाभ्यः समाहृत्य मनोमृगमुपस्रुतम् । नि
र्विकल्पसमाध्यर्थं चकारेमां विचारणाम् ॥ ४४ ॥ अयि मूर्ख मनः कोऽर्थस्तव संसा
रवृत्तिभिः । धीमन्तो न निषेवन्ते पर्यन्ते दुःखदां क्रियाम् ॥ ४५ ॥ अनुधावति यो
भोगांस्त्यक्त्वा शमरसायनम् । संत्यक्तमन्दारवनं प्रयाति विषमञ्जरीम् ॥ ४६ ॥ य
दि यासि महीरन्ध्रं ब्रह्मलोकमथापि वा । तन्न निर्वृतिमाप्नोषि विनोपशमनामृतम् ॥
४७ ॥ इमा विचित्राः कलना भावाभावमयात्मिकाः । दुःखायैव तवोग्राय न सुखा
य कदाचन ॥ ४८ ॥ शब्दादिकाभिरेताभिः किं मूर्ख हतवृत्तिभिः ॥ ४९ ॥ यस्मा
त्किंचित्तदाप्नोषि यस्मिन्भजसि निर्वृतिम् । तस्मिंश्चित्तशमे मूर्ख नानुबध्नासि किं प
दम् ॥ ५० ॥ आगत्य श्रोत्रतां मूर्ख व्यर्थोत्थानोपबृंहिताम् । धिया शब्दानुसारिण्या
मृगवन्मा क्षयं व्रज ॥ ५१ ॥ त्वरामागत्य दुःखाय स्पर्शोन्मुखतया तया । मूर्ख मा
बद्धतामेहि गजीलुब्धगजेन्द्रवत् ॥ ५२ ॥ रसनाभावमागत्य गर्धेनान्ध दुरन्धसम् ।
मा नाशमेहि बिडिशपिण्डीलम्पटमत्स्यवत् ॥ ५३ ॥ चाक्षुषीं वृत्तिमाश्रित्य स्त्र्यादि
रूपचयोन्मुखीम् । मा गच्छ दग्धतां मुग्ध कान्तिलुब्धपतंगवत् ॥ ५४ ॥ घ्राणमार्ग
मुपाश्रित्य शरीराम्भोजकोटरे । गन्धोन्मुखतया बन्धं मा समाश्रय भृङ्गवत् ॥ ५५ ॥
कुरङ्गालिपतंगेभमीनास्त्वेकैकशो हताः । सर्वैरेतैस्त्वनर्थैस्तु व्याप्तस्याज्ञ कुतः सुखम्
॥ ५६ ॥ हे चित्त वासनाजालं बन्धाय भवतोऽभितः । यदि शाम्यसि तत्त्यक्त्वा तद
नन्तो जयस्तव ॥ ५७ ॥ करोम्येष किमर्थं वा तवैतदनुशासनम् । विचारणवतः पुंस
श्चित्त त्वमसि नानघम् ॥ ५८ ॥ अनन्तस्यात्मतत्त्वस्य तन्वी मितमनःस्थितिः । न सं
भवति बिल्वान्तर्वासिता दन्तिनो यथा ॥ ५९ ॥ पदाङ्गुष्ठाच्छिरो यावत्कणशः प्रवि
चारितम् । न लब्धोऽसावहं नाम कः स्यादहमिति स्थितः ॥ ६० ॥ भरिताशेषदिक्कुञ्जं
पश्याम्येकं जगत्त्रये । संवेदनमसंवेद्यं सर्वत्र विदितात्मकम् ॥ ६१ ॥ दृश्यते यस्य नेय
त्ता न नामपरिकल्पना । नैकता नान्यता चैव न महत्ता न चाणुता ॥ ६२ ॥ वेदन
त्वात्सुसंवेद्ये मयि त्वं दुःखकारणम् । विवेकजेन बोधेन तदिदं हन्यसे मया ॥ ६३ ॥
इदं मांसमिदं रक्तमिमान्यस्थीनि देहके । इमे ते श्वासमरुतः कोऽसावहमिति स्थितः
॥ ६४ ॥ मांसमन्यदसृक्चान्यदस्थीन्यन्यानि विग्रहे । बोधोऽन्यः स्पन्दनं चान्यत्को

43 a/b: **बुधवत्सुदृढं बध्वा** [sic] **पद्मासनमुदंमुखः** d: **ब्राह्म०** – 44 a: **समुद्धृत्य** b: **०मुपप्लुतम्** – 46 c: Lies **स त्यक्त०***; **०वनः** d: **विषजांगलम्** – 48 c: **भयोग्राय** – 49 a: **शब्दादिगा०** – 50 a: **यस्मात्किंचिदवाप्नोषि** b: **वहसि** d: **नानुधावसि** – 52 a: **त्वक्त्वमा०**, lies **त्वक्तामा०*** c: **बध्यतामेहि** – 53 c: **बडिश०** – 54 b: Nach Le, Lf, BŚ (Hs. leicht entstellt); **प्रभारूप०** c: **मूर्ख** – 56 c/d: **सर्वैरेतैरनर्थैस्तैर्व्याप्त०** – 57 b: Hs. **बद्धस्य** d: **तदानन्तो** (2. Aufl.) – 58 c: **विचारणावतः** d: **०श्चित्तत्वमपि नास्ति यत्** – 59 b: **तन्वी मनसि संस्थितिः** – 60 a: **पादांगुष्ठा०** – 61 d: **विततात्मकम्** – 62 c/d: **नैकता न च नानाता स्थूलता न च नाणुता** – 63 a: Hs. abweichend (**वेदनत्विश्वसंवेद्य** [sic]) – 64 d: **स्थितिः** – 65 b: **चित्त हे** (für **विग्रहे**) d: **स्थितिः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ऽसावहमिति स्थितः ॥ ६५ ॥ इदं घ्राणमियं जिह्वा त्वगियं श्रवणे इमे । इदं चक्षुरयं
स्पन्दः कोऽसावहमिति स्थितः ॥ ६६ ॥ अहमेवेह सर्वत्र नाहं किंचिदपीह वा । इत्येव
सन्मयी दृष्टिर्नेतरो विद्यते क्रमः ॥ ६७ ॥ चिरमज्ञानधूर्तेन पुष्पितोऽस्मीत्यहंतया ।
दिष्ट्येदानीं परिज्ञातो मयैषोऽज्ञानतस्करः । पुनर्न संश्रयाम्येनं स्वरूपार्थापहारिणम्
॥ ६८ ॥ वासनाहीनमप्येतच्चक्षुरादीन्द्रियं स्वतः । प्रवर्तते बहिः स्वार्थे वासना नात्र
कारणम् ॥ ६९ ॥ तस्मान्मूर्खाणीन्द्रियाणि त्यक्त्वान्तर्वासनां निजाम् । कुरुध्वं कर्म
हे सर्वं न दुःखं समवाप्स्यथ ॥ ७० ॥ तृष्णयैव विनष्टाः स्थ व्यर्थमिन्द्रियबालकाः ।
कोशकाराः कुक्रमयस्तन्तुनेव स्वयंभुवा ॥ ७१ ॥ हे चित्त सर्वेन्द्रियकोश तस्मात्सर्वै
न्द्रियैरैक्यमपेत्य नूनम् । आलोच्य चात्मानमसत्स्वरूपं निर्वाणमेकामलबोधमास्थः
॥ ७२ ॥ विषयविषविषूचिकामनन्तां निपुणमहंस्थितिवासनामपास्य । अभिमतपरि
हारमन्त्रयुक्त्या भव विभवो भगवान्भियामभूमिः ॥ ७३ ॥ उद्दालक उवाच ॥ संक
ल्पपादपं तृष्णालतं छित्त्वा मनोवनम् । विततां भुवमासद्य विहरामि यथासुखम् ॥
७४ ॥ पदं तदनुयातोऽस्मि केवलोऽस्मि जयाम्यहम् । निर्वाणोऽस्मि निरंशोऽस्मि नि
रीहोऽस्मि निरीप्सितः ॥ ७५ ॥ स्वच्छतोर्जितता सत्ता हृद्यता सत्यता ज्ञता । आन
न्दितोपशमिता मत्ता च मुदितोदिता ॥ ७६ ॥ पूर्णतोदारता सत्या कान्तिमत्तैकता
नता । सर्वैकता निर्भयता क्षीणद्वित्वविकल्पता ॥ ७७ ॥ एता नित्योदिताः स्वस्थाः
सुन्दर्यः सुभगोदयाः । ममैकात्मरतेर्नित्यं कान्ता हृदयवल्लभाः ॥ ७८ ॥ इति निर्णीय
स तया धिया धवलया मुनिः । बद्धपद्मासनस्तस्थावर्धोन्मीलितलोचनः ॥ ७९ ॥ ॐ
कारमकरोत्तारस्वरमूर्ध्वगतध्वनिम् । सम्यगाहतलाङ्गूलघण्टाकुण्डमिवारवम् ॥ ८०
॥ ओमुच्चारयतस्तस्य संवित्तत्त्वे तदुन्मुखे । यावद् ॐकारमूर्ध्वस्थे वितते विमलात्म
नि ॥ ८१ ॥ सार्धत्र्यंशात्ममात्रस्य प्रथमेंऽशे स्फुटारवे । प्रणवस्य समाक्षुब्धप्राणारणि
तदेहके ॥ ८२ ॥ रेचकाख्योऽखिलं कायं प्राणनिष्क्रमणक्रमः । रिक्तीचकार पीता
म्बुरगस्त्य इव सागरम् ॥ ८३ ॥ अतिष्ठत्प्राणपवनचेतसापूरिताम्बरे । हृदयाग्निर्ज्वल
ज्ज्वालो ददाह निखिलं वपुः ॥ ८४ ॥ यावदित्थमवस्थैषा प्रणवप्रथमे क्रमे । बभूव न
हठादेव हठयोगो हि दुःखदः ॥ ८५ ॥ अथेतरांशावसरे प्रणवस्य समस्थितौ । निःस्प
न्दः कुम्भको नाम प्राणानामभवत्क्रमः ॥ ८६ ॥ न बहिर्नान्तरे नाधो नोर्ध्वं नाशासु
तत्र ते । संक्षोभमगमन्प्राणा अवसन्स्तम्भिता इव ॥ ८७ ॥ दग्धदेहपुरो वह्निः शशा

66 d: **स्थितिः** – 67 a: **अहमेव हि** c: **इत्येवं** – 68 b: **पोथितो** Nach a/b zusätzlich: **वृकेण दृप्तेनाटव्यां पशुपोतो यथा तथा ।** (68A) – 69 c: **स्वार्थं** – 71 d: Hs. **०स्तन्तुनैव** – 72 (Indravajrā) b: **०मुपैत्य** (2. Aufl.) c: **आलोक्य** d: **०मास्व**, lies **०माःस्व*** – 73 (Puṣpitāgrā) d: Hs. entstellt (**भवति भवे भर्गवन् भि०**) – 76 d: **मानिता** (für **मत्ता च**), BŚ **सता च**, lies **सत्ता च**; Le, Lf **सौम्यता निर्विकल्पता** – 77 b: **०कता मता** d: **०विकल्पिता** – 80 c: **०लांगूलं** – 81 a: Hs. **उच्च** [?]**चारय०** c: Lies **०मूर्ध्वस्थं**? – 82 d: **०प्राणे र०** – 83 a: **रेचकाख्येऽखिलं** – 84 b: Lies **०श्वेतसा***; **०श्विद्रसापूरितांबरे** d: **मलिनं** – 85 (vgl. V 91) a: **यावदिच्छम०** – 86 a: Hs. entstellt (**श्लथेंतराशा०**) b: **समास्थितौ** c: **निष्पंदः** – 87 d: **इव संस्तंभिता दृतौ**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

माशनिवत्क्षणात् । अदृश्यत सितं भस्म शारीरं हिमपाण्डुरम् ॥ ८८ ॥ यत्र कर्पूरश
य्यायां सुप्तानीव सुखोचितम् । शरीरास्थीनि लक्ष्यन्ते निःस्पन्दानि शतानि च ॥
८९ ॥ तद्भस्म पवनानीतं सास्थि वायुरयोजयत् । तच्चण्डपवनोद्धूतमावृत्य गगनं क्ष
णात् । शरदीवाभ्रमिहिका क्वापि भस्मास्थिमद्ययौ ॥ ९० ॥ यावदित्थमवस्थैषा प्रणव
स्यापरे क्रमे । बभूव न हठादेव हठयोगो हि दुःखदः ॥ ९१ ॥ अतस्तृतीयावसरे प्रण
वस्येवोपशान्तिः । पूरणात्पूरको नाम प्राणानामभवत्क्रमः ॥ ९२ ॥ अस्मिन्नवसरे प्रा
णाश्चेतनामृतमध्यगाः । व्योम्नि शीतलतामीयुर्हिमसंस्पर्शसुन्दरीम् ॥ ९३ ॥ क्रमाद्ग
गनमध्यस्थाश्चन्द्रमण्डलतां ययुः । कलाकलापसंपूर्णे ते तस्मिंश्चन्द्रमण्डले । रसायन
महाधाराः संपन्नाः प्राणवायवः ॥ ९४ ॥ सा पपात वरा धारा शेषे शारीरभस्मनि ।
उदभूदिन्दुबिम्बाभं चतुर्बाहुधरं शुभम् । उद्दालकशरीरं तन्नारायणतयोदितम् ॥ ९५
॥ रसायनमयाः प्राणास्तच्छरीरमपूरयन् । अन्तः कुण्डलिनीं प्राणाः पूरयमासुराहृ
ताः ॥ ९६ ॥ अथ पद्मासनगतः कृत्वा देहस्थितिं दृढाम् । आलान इव मातङ्गं निबद्धे
न्द्रियपञ्चकम् ॥ ९७ ॥ चिन्तया हृदयं निन्ये चेतो भ्रमरचञ्चलम् । बलात्संरोधया
मास सेतुर्जलमिव द्रुतम् ॥ ९८ ॥ निमिमील दृशावर्धं परिपक्ष्मलपक्ष्मके । निःस्पन्द
तारामधुरे संध्याकाल इवाम्बुजे ॥ ९९ ॥ सौम्यतामनयन्मौनी प्राणापानजवं मुखे ।
इन्द्रियाणीन्द्रियार्थेभ्यः पृथक्चक्रे प्रयत्नतः ॥ १०० ॥ बाह्यान्स्पर्शानशेषेण जहौ दूरे
स धीरधीः । विलीनानन्तरांश्चक्रे स्पर्शानुज्झितदर्शनात् ॥ १०१ ॥ रुरोध गुदसंकोचा
न्नवद्वारानिलानथ ॥ १०२ ॥ आत्मरत्नप्रकाशाढ्यां स्पष्टां कुसुमलाञ्छिताम् । दधार
कंधरां धीरां मेरुशृङ्गशिखामिव ॥ १०३ ॥ बभार हृदयाकाशे मनः संयममागतम् ॥
१०४ ॥ शरदम्भोवदासाद्य विमलामतिसौम्यताम् । दुधावाथ विकल्पौघान्प्रतिभा
समुपेयुषः ॥ १०५ ॥ आगच्छतो यथाकामं प्रतिभासान्पुनः पुनः । अच्छिनन्मनसा
शूरः खड्गेनेव रणे रिपून् ॥ १०६ ॥ विकल्पौघे परालूने सोऽपश्यद्धृदयान्तरे । तमश्छ
न्नविवेकार्कं लोलं कज्जलमेचकम् ॥ १०७ ॥ तदप्युच्छेदयामास सम्यग्ज्ञानविवस्व
ता । तमस्युपरते कान्तं तेजःपुञ्जं ददर्श सः । तं लुलाव स्थलाब्जानां वनं बाल इव द्वि
पः ॥ १०८ ॥ तेजस्युपरत तस्य घूर्णमानं मनो मुनेः । निशाब्जवदगान्निद्रां तामप्याशु

89 c: **दृश्यंते** d: **निष्पंदानि सितानि च** – 90 a: **वायुना नीतं** b: Hs. **सास्थिं** c: Hs. **यच्चण्ड०** – 91 (vgl. V 85) a: **यावदिच्छम०** – 92 a: **ततस्तृ०** b: **प्रणवस्योपशांतिदे** – 93 a: **तस्मिन्न०** – 94 Nach a/b zusätzlich: **धूमा गगनकोशस्थाः शीतलांबुदतामिव ।** (94A) – 95 a: **सा पपातांबराद्धारा** Nach a/b zusätzlich: **रसायनी हरशिरः पतितेव पुरापगा ।** (95A) – 96 c: **ततः कुंडलिनीमंतः** – 97 c: **आलानमिव** d: Lies **निबध्येन्द्रिय०*** – 98 a: **हृदयांभोजे** – 99 c: **निष्पंद०** – 100 b: Hs. **प्राणापानजयोन्मुखे** – 102A: **मुखसंस्थगितः कुंभो रंध्रकोशानिवेतरान् ॥** – 103 a: **आत्मतत्त्व०** b: **०लांछनाम्** c: **वीरो** (für **धीरां**) – 104A: **विंध्यखात इवोन्मत्तगजं युक्तिवशीकृतम् ॥** – 105 a: **शरन्नभोवदा०** – 107 a: **परे लूने** c: Hs. **तमच्छिन्न०** d: **लोल०** – 108 a: Hs. entstellt (**तदंबुछादयामास**) b: **सम्यक्स्वांतर्विवस्वता**; Hs. **०विवस्वतः** e: **तल्लुलाव** – 109 c: Lies **निश्यब्ज०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

लुलाव सः ॥ १०९ ॥ निद्राव्यपगमे तस्य व्योमसंवित्समुद्ययौ । व्योमसंविदि नष्टा
यां मूढं तस्याभवन्मनः । मोहमप्येष मनसस्तं ममार्ज महाशयः ॥ ११० ॥ ततस्तेजस्त
मोनिद्राव्योमादिपरिवर्जिताम् । कामप्यवस्थामासाद्य विशश्राम मनः क्षणम् ॥ १११
॥ विश्रम्याशु पपाताङ्ग संविदं विश्वरूपिणीम् ॥ ११२ ॥ चिरानुसंधानवशात्स्वादना
च्च स्वसंविदः । मनश्चिन्मयतामागाद्धेमनूपुरतामिव ॥ ११३ ॥ चित्तत्वमथ संत्यज्य
चित्तं चित्तत्त्वतां गतम् ॥ ११४ ॥ चेत्यं संत्यज्य चिच्छुद्धा चित्सामान्यमथाययौ ॥
११५ ॥ त्यक्तभूतौघमननं ततो विश्वंभरं महत् । चिदाकाशं ततः शुद्धं संभवद्बोधमा
गतः ॥ ११६ ॥ तत्र प्रापाद्वयानन्दं दृश्यदर्शनवर्जितम् । अनन्तमुत्तमस्वादरसायनमि
वार्णवम् ॥ ११७ ॥ शरीरात्समतीतोऽसौ कामप्यवनिमागतः । सत्तासामान्यरूपा
त्मा बभूवानन्दसागरः ॥ ११८ ॥ बभूवावातदीपाभो लिपिकर्मार्पितोपमः ॥ ११९
॥ द्विजचेतनहंसोऽसावानन्दसरसि स्थिरः । अतिष्ठच्छरदच्छे खे कलापूर्ण इवोडुपः ॥
१२० ॥ अथैतस्मिन्महालोके तिष्ठन्नुद्दालकश्चिरम् । अपश्यद्व्योमगान्सिद्धानमरानपि
भूरिशः ॥ १२१ ॥ आगतानि विचित्राणि सिद्धिजालानि चाभितः । तानि नादरयां
चक्रे सिद्धिवृन्दानि स द्विजः ॥ १२२ ॥ सिद्धिसार्थमनादृत्य तस्मिन्स्वानन्दमन्दिरे ।
अतिष्ठदथ षण्मासान्दिक्तटेऽर्क इवोत्तरे ॥ १२३ ॥ जीवन्मुक्तपदं तत्तु यत्स संप्राप्तवा
न्द्विजः । तत्र सिद्धाः सुराः साध्याः स्थिता ब्रह्महरादयः ॥ १२४ ॥ आनन्दपरिणामि
त्वादनानन्दपदं गतः । नानन्दे न निरानन्दे ततस्तत्संविदाबभौ ॥ १२५ ॥ तत्पदं सा
गतिः शान्ता तच्छ्रेयः शाश्वतं शिवम् । तत्पदं साधवः प्राप्य क्षणं वर्षशतं च वा । दृ
श्यदृष्टिमिमां यान्ति न पुनर्भवकारिणीम् ॥ १२६ ॥ उद्दालकोऽथ षन्मासान्दूरोत्सा
रितसिद्धिभूः । उषित्वोन्मिषितोऽपश्यत्सिद्धांश्चन्द्रवपुर्धरान् । विद्याधरीभिर्वलिता
न्विद्याधरपतीनपि ॥ १२७ ॥ ते तमूचुर्महात्मानमुद्दालकमुनिं तदा । प्रसादेन प्रणा
मान्नो भगवन्नवलोकय । आरुह्येदं विमानं त्वमेहि त्रैविष्टपं पुरम् ॥ १२८ ॥ स्वर्ग एव
हि सीमान्तो जगत्संभोगसंपदाम् । आकल्पमुदितान्भुङ्क्ष्व भोगानभिमतान्विभो ॥
१२९ ॥ एवं कथयतः सिद्धानतिर्थीनित्यसौ मुनिः । परिपूज्य यथान्यायमतिष्ठद्गत
संभ्रमः ॥ १३० ॥ नाभ्यनन्दन्न तत्याज तां विभूतिं स धीरधीः । भोः सिद्धा व्रजते

110 e: **मूढमप्येष** – 111 b: **०मोहादि०** 112 a: **विश्राम्याशु** – 112A: **सेतुरुद्धं सरोवारि प्रतीपं** [lies **प्रतीतं**] **स्वमिवास्पदम् ॥** – 114 b: **चित्तं चित्तत्वमागतम्** – 114A: **अन्यदेव बभूवाशु पंकः कुंभस्थितो यथा ॥** – 115A: **त्यक्तवीच्यादिभेदोऽब्धिर्वाःस**[2. Aufl.: **सा**]**मान्यमिवैकधीः ॥** – 116 a: **त्यक्तभोगौघ०** d: **सोऽभव द्बोध०** – 117 a: **प्रापदथानंदं** c: **०मुत्तमास्वादं** – Textfolge: 118, 120, 119, 121. – 119A : **अवीच्यंबुनिधिप्रख्यो वृष्टमूकांबुदस्थितिः ॥** – 121 a/b: **०लोकेऽतिष्ठदुद्दालक०** – 122 c: Hs. **नादरयांश्चक्रे**; lies **नादरमा चक्रे** – 123 a: Hs. **सिद्ध०** c/d: **षण्मासानद्रिकूट इवोत्तरे** – 125 b: Hs. **गताः** c: **आनंदे**; lies **सा*नन्दा न निरानन्दा** (vgl. 16.6a/Konj.) – 126 a/b: **शंभोस्तच्छ्रेयः** e: **दृश्यदृष्टिं समायांति** – 127 a: **उद्दालकोऽत्र** – 128 c: **प्रणामान्ते** – 129 a: Hs. **सीमांते** c: **०मुचिता०** – 130 d: **०संभ्रमम्** – 131 a: **नाभ्यनंदत तत्याज**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्युक्त्वा स्वव्यापारपरोऽभवत् ॥ १३१ ॥ अथ स्वकर्मनिरतं भोगेष्वरतिमागतम् । तम
पास्य ययुः सिद्धा दिनैः कतिपयैः स्वयम् ॥ १३२ ॥ जीवन्मुक्तः स च मुनिर्विजहार
यथासुखम् । यावदिच्छं वनान्तेषु मुनीनामाश्रमेषु च ॥ १३३ ॥ कदाचिदह्ना मासेन
कदाचिद्वत्सरेण च । कदाचिद्वत्सरौघेण ध्यानासक्तो व्यबुध्यत ॥ १३४ ॥ चित्तत्त्वै
कघनाभ्यासान्महाचित्त्वमुपेत्य सः । चित्सामान्यचिराभ्यासात्सत्तासामान्यमाय
यौ ॥ १३५ ॥ श्रीराम उवाच ॥ आत्मज्ञानदिनैकार्क मत्संशयतृणानल । अज्ञानदाह
शीतांशो सत्तासामान्यमीश किम् ॥ १३६ ॥ श्रीवसिष्ठ उवाच ॥ यदा संक्षीयते चित्त
मभावात्यन्तभावनात् । चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा ॥ १३७ ॥ नूनं
चेत्यांशरहिता चिद्यदात्मनि लीयते । असद्रूपवदत्यच्छा सत्तासामान्यता तदा ॥
१३८ ॥ यदा सर्वमिदं किंचित्सबाह्याभ्यभ्तरात्मकम् । अपलप्य वसेच्चेतः सत्तासा
मान्यता तदा ॥ १३९ ॥ कूर्माङ्गानीव दृश्यानि लीयन्ते स्वात्मनात्मनि । अभाविता
न्येव यदा सत्तासामान्यता तदा ॥ १४० ॥ एतामालम्ब्य पदवीं समस्तभयनाशि
नीम् । उद्दालकोऽसाववसद्यावदिच्छं जगद्गृहे ॥ १४१ ॥ अथ कालेन महता बुद्धिस्तस्य
बभूव ह । विदेहमुक्तस्तिष्ठामि देहं त्यक्त्वेति निश्चला ॥ १४२ ॥ एवं चिन्तितवानद्रेर्गु
हायां पल्लवासने । बद्धपद्मासनस्तस्थावामीलितविलोचनः ॥ १४३ ॥ संयम्य गुदसं
रोधाद्द्वाराणि नव चेतसा । मात्रास्पर्शान्विचिन्वानो भावितस्वात्मचिद्घनः ॥ १४४ ॥
संरुद्धप्राणपवनः समसंस्थानकंधरः । तालुमूलतलालग्नजिह्वामूलोल्लसन्मुखः ॥ १४५
॥ न बहिर्नान्तरे नाधो नोर्ध्वं चापि न शून्यके । संयोजितमनोदृष्टिर्दन्तैर्दन्तान्न सं
स्पृशन् ॥ १४६ ॥ प्राणप्रवाहसंरोधसमस्वस्थाननच्छविः । असंवित्संविदुत्तानरोमक
ण्टकिताङ्गभूः ॥ १४७ ॥ असंवित्संविदभ्यासाच्चित्सामान्यमुपाददे । तदभ्यासादवा
पान्तरानन्दस्पन्दमुत्तमम् ॥ १४८ ॥ तदास्वादनतो लीनचित्सामान्यदशाक्रमम् ।
विश्वंभरमनन्तात्मा सत्तासमान्यमाययौ ॥ १४९ ॥ तत्स्थः समसमाभोगः परां वि
श्रान्तिमागतः ॥ १५० ॥ अनानन्दसमानन्दमुग्धमुग्धमुखद्युतिः । संशान्तानन्दपुल
कः पदं प्राप्यामलं गतः ॥ १५१ ॥ चिरकालं परिक्षीणमननादिभवभ्रमः । बभूव स

132 c: **तमुपास्यं** – 135 b: **०मुपैत्य** (2. Aufl.) – 135A: **समरसपदलाभप्राप्तिसंशांतचेता गलितजनविलापः क्षीणसंदेहदोलः । शरदिनमिव** [lies **शरदि खमिव***] **शान्तं व्याततं चोर्जितं च स्फुटममलमचेतस्तद्वपुस्त्वं** [2. Aufl.: **०द्वपुः स्वं बभार**] **बभार** [lies **०द्वपुः संबभार***] **॥** (Mālinī) – 136 Ohne **श्री०** (2. Aufl.) – 137 Ohne **श्री०** – 140 a: **कूर्मोऽगा०** – 140A: **दृष्टिरेषा हि परमा सदेहादेहयोः सदा । मुक्तयोः संभवत्येव तुर्यातीतपदाभिधा ॥** B: **व्युथितस्य भवत्येषा समाधिस्थस्य चानघ । ज्ञस्य केवलमज्ञस्य न भवत्येव बोधजा ॥** C: **अस्यां दृष्टौ स्थिताः सर्वे भुवि मुक्ता महारसाः** [lies **महाशयाः***] **। अस्मत्प्रभृतयः सर्वे नारदाद्याश्च राघव ॥** D: **ब्रह्मविष्ण्वीश्वराद्याश्च दृष्टावस्यां व्यवस्थिताः ॥** – 143 d: **०वर्धोन्मीलितलोचनः** – 144 b: Hs. **चेतसः** – 145 c: **०मूलांतरालग्न०** d: Lies **०मूलो लसन्मुखः***? – 146 b: **नोर्ध्वमर्थे न** d: **०र्दंतैर्दंतानसंस्पृशन्** – 147 b: **०स्वच्छानन०** c: **अंगचित्संविदुत्थान०** – 148 a: **अंगचित्संविदाभ्यासा०** – 149 c: **०नंतात्म** – 149A: **शुद्धचित्संविदभ्यासाच्चित्सामान्यमुपाययौ ॥** – 150 a: **तस्थौ समशमा०** – 151 a: **अनानंदशमानंद०** d: **०मलं तदा** – 152 a: **चिरकाल०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

महासत्त्वो लिपिकर्मार्पितोपमः ॥ १५२ ॥ उपशशाम शनैर्दिवसैरसौ कतिपयैः स्व
पदे विमलात्मनि । तरुरसः शरदन्त इवामले रविकरौजसि जन्मदशातिगः ॥ १५३
॥ गतसकलविकल्पो निर्विकाराभिरामो सकलमलविकारोपाधिनिर्मुक्तमूर्तिः । विग
लितमुखमाद्यं तत्सुखं प्राप यस्मिंस्तृणमिव जलराशावुह्यते शक्रलक्ष्मीः ॥ १५४ ॥
अपरिमितनभोऽन्तर्व्यापि दिग्व्यापि पूर्णं भुवनभरणशीलं भूरिभव्योपसेव्यम् । क
थनगुणमतीतं सत्यमानन्दमाद्यं सुखममृतमनन्तं ब्रह्मणोऽसौ बभूव ॥ १५५ ॥ इति
मोक्षोपाय उद्दालकोपाख्यानम् ॥ [२३] ॥ श्रीवसिष्ठ उवाच ॥ क्रमेणानेन विहरन्वि
चार्यात्मानमात्मना । विश्रान्तिमेहि वितते पदे पद्मदलेक्षण ॥ १ ॥ शास्त्रार्थगुरुचेतो
भिस्तावत्तावद्विचार्यते । सर्वदृश्यक्षयाभ्यासाद्यावदासाद्यते परम् ॥ २ ॥ वैराग्याभ्या
सशास्त्रार्थप्रज्ञागुरुयमक्रमैः । पदमासाद्यते पुण्यं प्रज्ञयैवैकया तथा ॥ ३ ॥ संप्रबोध
वती तीक्ष्णा कलङ्करहिता मतिः । सर्वसामग्र्यहीनापि प्राप्यं प्राप्नोति शाश्वतम् ॥
४ ॥ श्रीराम उवाच ॥ भगवन्भूतभव्येश कश्चिज्ज्ञातसमाधिकः । प्रबुद्ध इव विश्रान्तो
व्यवहारपरोऽपि सन् ॥ ५ ॥ कश्चिदेकान्तमाश्रित्य समाधिनियतः स्थितः । तयोस्तु
कतरः श्रेयानिति मे भगवन्वद ॥ ६ ॥ श्रीवसिष्ठ उवाच ॥ इमं गुणसमाहारमनात्म
त्वेन पश्यतः । अन्तःशीतलता यासौ समाधिरिति कथ्यते ॥ ७ ॥ दृश्यैर्मम न संब
न्ध इति निश्चित्य शीतलः । कश्चित्संव्यवहारस्थः कश्चिद्ध्यानव्यवस्थितः ॥ ८ ॥ द्वावे
तौ राम सुसमावेव चेत्परिशीतलौ । अन्तःशीतलता या स्यात्तद्धनं तत्तपःफलम् ॥ ९
॥ समाधिस्थानकस्थस्य चेतश्चेद्वृत्तिचञ्चलम् । तत्तस्य यत्समाधानं सममुन्मत्ततावण्ड
वैः ॥ १० ॥ उन्मत्ततावण्डवस्थस्य चेतश्चेत्क्षीणवासनम् । तदस्योन्मत्तनृत्यं तु समं बुद्ध
समाधिना ॥ ११ ॥ व्यवहारी प्रबुद्धो यः प्रबुद्धो यो वने स्थितः । द्वावेतौ सुसमौ नून
मसंदेहपदं गतौ ॥ १२ ॥ अकर्तृ कुर्वदप्येतच्चेतः प्रतनुवासनम् । दूरंगतमना जन्तुः
कथासंश्रवणे यथा ॥ १३ ॥ अकुर्वदपि कर्त्रेव चेतः प्रघनवासनम् । निष्पन्दाङ्गमपि
स्वप्ने श्वभ्रपातस्थिताविव ॥ १४ ॥ चेतसो यदकर्तृत्वं तत्समाधानमुत्तमम् । तं विद्धि
केवलीभावं सा शुभा निर्वृतिः परा ॥ १५ ॥ चेतश्चलाचलत्वेन परमं कारणं स्मृतम् ।
ध्यानाध्यानदृशोस्तेन तदेवानङ्कुरं कुरु ॥ १६ ॥ अवासनं स्थिरं प्रोक्तं मनो ध्यानं तदेव
च । स एव केवलीभावः शान्तं तत्रैव सत्सदा ॥ १७ ॥ तनुवासनमत्युच्चैःपदायोद्यत

153 (Drutavilambita) – 154 (Mālinī) b: **निखिलभयविनाशोपाधि०** d: **०वूह्यते** – 155 (Mālinī) c: **कथि तगुण०** d: Hs. **ब्राह्मणो**; lies **सुखम्** [...] **ब्रह्मणोऽस्य बभूव** (vgl. 142b: **बुद्धिस्तस्य बभूव**) – Kolophon zu Sarga 23: Hs. **उद्दालके**; **इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरण उद्दालकोपाख्यानं नाम चतुर्विंशः सर्गः ॥ २४ ॥** – 24.1 Ohne **श्री०** d: Hs. **०लेक्षणः** – 2 d: **पदम्** – 3 d: **प्रज्ञयैवैकयाथवा** – 5 Ohne **श्री०** (2. Aufl.) a: **०भव्यज्ञ** b: Hs. **कश्चिज्ज्ञान०** – 6 b: **०नियमस्थितः** d: Hs. entstellt (**इतिमेरुवनंवदा**) – 7 Ohne **श्री०** – 8 c/d: **व्यवहारे स्थितः कश्चित्क०** – 9 a/b: **राम सुखिनावंतश्चेत्परि०** c/d: **स्यात्तदनंत तपः०** d: Lies **सत्तपः०** – 10 a: **०स्थानसंस्थस्य** c: Hs. **नसमाधानं**, lies **तत्समाधानं*** – 17 d: **शांततैव च तत्सदा** – 18 a: Hs. entstellt (**०वासनमबुद्धैः**) – 18A: **अवासनं मनः कर्तुं** [lies **मनोऽकर्तृ*** (vgl. B)] **पदं तस्मादवाप्यते ॥**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मुच्यते ॥ १८ ॥ घनवासनमेतत्तु चेतः कर्तृत्वभावनम् । सर्वदुःखप्रदं तस्माद्वासनास्त
नुतां नयेत् ॥ १९ ॥ चेतसा संपरित्यज्य सर्वभावात्मभावनाम् । यथा तिष्ठसि तिष्ठ
त्वं तथा शैले गृहेऽथ वा ॥ २० ॥ गृहमेव गृहस्थानां सुसमाहितचेतसाम् । शान्ताहं
कृतिदोषानां विजना वनभूमयः ॥ २१ ॥ यथा विपणिगा लोका विहरन्तोऽप्यसत्स
माः । असंबन्धात्तथा ज्ञस्य ग्रामोऽपि विपिनोपमः ॥ २२ ॥ अन्तर्मुखमना नित्यं सु
प्तो बुद्धो व्रजन्पठन् । पुरं जनपदं ग्राममरण्यमिव पश्यति । सर्वमाकाशतामेति नित्य
मन्तर्मुखस्थितेः ॥ २३ ॥ अन्तःशीतलतायां तु लब्धायां शीतलं जगत् । अन्तस्तृष्णो
पतप्तानां दावदाहमयं जगत् ॥ २४ ॥ द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः ।
अन्तःकरणतत्त्वस्य भागा बहिरिव स्थिताः ॥ २५ ॥ यश्चात्मरतिरेवान्तः कुर्वन्कर्मे
न्द्रियैः क्रियाः । न वशो हर्षशोकाभ्यां स समाहित उच्यते ॥ २६ ॥ आत्मवत्सर्व
भूतानि परद्रव्याणि लोष्टवत् । स्वभावादेव न भयाद्यः पश्यति स पश्यति ॥ २७ ॥
अद्यैव मृतिरायातु कल्पान्तनिचयेन वा । नासौ कलङ्कमाप्नोति हेम पङ्कगतं यथा
॥ २८ ॥ सर्वं प्रशान्तमजमेकमनादिमध्यमाभास्वरं स्वदनमात्रमचेत्यचिह्नम् । सर्वं
प्रशान्तमिति शब्दमयी तु दृष्टिर्बोधार्थमेव हि मुधैव तदोमितीदम् ॥ २९ ॥ श्रीवसिष्ठ
उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् । किरातेशस्य सुरघोर्वृत्तान्तं विस्म
यास्पदम् ॥ ३० ॥ हिमाद्रेः शृङ्गमस्तीह कैलासो नाम पर्वतः । तस्य हेमजटा नाम कि
राताः संस्थिताः स्थले ॥ ३१ ॥ आसीत्तेषामुदारात्मा राजा परपुरंजयः । सुरघुर्नाम ब
लवान्सुरघोरारिदर्पहा ॥ ३२ ॥ स चक्रे राजकार्याणि निग्रहानुग्रहक्रमैः । तज्जाभ्यां
सुखदुःखाभ्यां मतिस्तस्याभ्यभूयत ॥ ३३ ॥ किमार्तं पीडयाम्येनं तिलान्यन्त्रमिवौ
जसा । सर्वेषामेव भूतानां ममेवार्तिः प्रजायते ॥ ३४ ॥ अथ वा निग्रहं प्राप्तं करोम्ये
तेन वै विना । वर्तते न प्रजैवेयं विना वारि सरिद्यथा । इति दोलायितं चेतो न विश
श्राम भूपतेः ॥ ३५ ॥ अथैकदा गृहं तस्य माण्डव्यो मुनिराययौ । तमसौ पूजयामा
सा पप्रच्छ च माहामुनिम् ॥ ३६ ॥ भवदागमनेनास्मि मुने निर्वृतिमागतः । अद्य ति
ष्ठाम्यहं नाथ धन्यानां धुरि धर्मतः ॥ ३७ ॥ भगवन्सर्वधर्मज्ञ चिरं विश्रान्तवानसि ।
तदमुं संशयं छिन्द्धि ममार्कस्तिमिरं यथा ॥ ३८ ॥ महतां संगमेनार्तिः कस्य नाम न
नश्यति । संदेहं तु परामार्तिमाहुरार्तिविदो जनाः ॥ ३९ ॥ मन्निग्रहानुग्रहजा मद्भृत्य
वपुषि स्थिताः । कर्षन्ति मामलं चिन्ता गजं हरिनखा इव ॥ ४० ॥ तद्यथा समतो
देति सूर्यांशुरिव सर्वगः । मतौ मम मुने मान्य तथा करुणया कुरु ॥ ४१ ॥ स्वयत्नेन

19 d: ०द्वासनां तनुतां – 20 a: Lies चेतसः – 22 c: Hs. entstellt; lies असंबन्धास्तथा* – 23 b: व्रजन्न टन् f: Hs. सर्वमंतर्मु० – 24A: भवत्यखिलजंतूनां यदंतस्तद्बहिःस्थितम् ॥ – 26 a: यस्त्वात्म० – 28 b: कल्पांतो निश्चयेन (2. Aufl.) – 29 (Vasantatilakā) b: ०मचिंत्यचित्तम्; Hs. स्वदनमाश्र० – 30 Ohne श्री० – 31 d: संस्थितास्तले – 32 d: ०न्सुरयोधादिदर्पहा – 34 a: किमर्थं [2. Aufl.: किमत्र] पीडयाम्येवं, lies किमार्तां पीडयाम्येनां b: Hs. ०न्यत्र इवौजसा d: ममैषार्तिः, lies ममैवार्तिः* – 35 c: प्रजा चेयं – 40 a: सन्नि० – 41 c/d: त्वत्तो मम मुने मान्यो नान्योऽस्ति करुणां कुरु

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

स्वसंस्थेन स्वेनोपायेन भूपते । एषा मनःपेलवता हिमवत्प्रविलीयते ॥ ४२ ॥ स्वविचा
रणयैवाशु शाम्यत्यन्तर्मनोमलः । कोऽहं कथमिदं किं वा कथं मरणजन्मनी ॥ ४३
॥ विचारयान्तरेवं त्वं महत्तामलमेष्यसि । विचारेण परिज्ञातस्वभावस्य सतस्तव ॥
४४ ॥ मनः स्वरूपमुत्सृज्य सममेष्यति विज्वरम् । तिष्ठदेव मनोरूपं परित्यक्ष्यति ते
ऽनघ ॥ ४५ ॥ कृपणं हि मनो राजन्पेलवेऽपि निमज्जति । कार्ये गोष्पदतोयेऽपि जी
र्णाङ्गो मशको यथा ॥ ४६ ॥ तावत्तावन्महाबाहो स्वयं संत्यज्यतेऽखिलम् । यावद्याव
त्परालोकः परमात्मैव शिष्यते ॥ ४७ ॥ यावत्सर्वं न संत्यक्तं तावदात्मा न लभ्यते ।
सर्ववस्तुपरित्यागे शेषमात्मेति कथ्यते ॥ ४८ ॥ यावदन्यन्न संत्यक्तं तावत्सामान्य
मेव हि । वस्तु नासाद्यते साधो स्वात्मलाभे तु का कथा ॥ ४९ ॥ आत्मावलोकनार्थं
तु तस्मात्सर्वं परित्यजेत् । सर्वं किंचित्परित्यज्य यच्छिष्टं तत्परं पदम् ॥ ५० ॥ सक
लकारणकार्यपरंपरामयजगद्गतवस्तु विजृम्भितम् । अलमपास्य मनः स्ववपुस्ततो वि
परिभूय च यच्छुभमस्ति तत् ॥ ५१ ॥ श्रीवसिष्ठ उवाच ॥ इत्युक्त्वा भगवानेनं सुर
घुं राघुनन्दन । ययौ स्वमेव रुचिरं माण्डव्यो मौनमण्डलम् ॥ ५२ ॥ गते वरमुनौ रा
जा गत्वैकान्तमनिन्दितम् । धिया संचिन्तयामास को नामाहमिति स्वयम् ॥ ५३ ॥
देहमात्रमहं मन्ये हस्तपादादिसंयुतम् । तदेतत्तावदाश्वन्तरलमालोकयाम्यहम् ॥ ५४
॥ तदत्र तावन्मांसास्थि नाहमेतदचेतनम् । कर्मेन्द्रियाणि नैवाहं न च कर्मेन्द्रियाणि
मे । जडान्यसत्स्वरूपाणि न च बुद्धीन्द्रियाणि च ॥ ५५ ॥ नाहमेवं शरीरादि शिष्ट
मालोकयाम्यहम् । शेषा विकल्परहिता विशुद्धा चिदहं स्थितः ॥ ५६ ॥ ब्रह्मणीन्द्रे
यमे वायौ सर्वभूतगणे तथा । स एष भगवानात्मा तन्तुर्मुक्तास्विव स्थितः ॥ ५७ ॥
चिच्छक्तिरमला सैषा चेत्यामयविवर्जिता । भरिताशेषदिक्कुञ्जा भैरवाकारधारिणी
॥ ५८ ॥ सर्वभावगता सूक्ष्मा भावाभावविवर्जिता । आब्रह्मभुवनान्तःस्था सर्वशक्ति
समुद्गिका ॥ ५९ ॥ सर्वं किंचिदिदं दृश्यं दृश्यते यज्जगद्गतम् । चिन्निष्पन्दांशमात्रं
तन्नान्यत्किंचन शाश्वतम् ॥ ६० ॥ विगतरञ्जननिर्विषयस्थितिर्गतभवभ्रम ईहितवर्जि
तः । स्थिरसुषुप्तकलाभिगतस्ततः शमसमं निवसाम्यहमात्मनि ॥ ६१ ॥ श्रीवसिष्ठ उ
वाच ॥ इति हेमजटाधीशो लेभे पदमानुत्तमम् । विवेकाध्यवसायेन ब्राह्मण्यमिव गा
धिजः ॥ ६२ ॥ न निर्घृणो दयावान्नो तद्द्वद्वीनोऽथ मत्सरः । न सुधीर्नासुधीर्नार्थी ना
नर्थी स बभूव ह ॥ ६३ ॥ शृणु तस्याथ सुरघोः प्रबुद्धस्य सतस्तदा । पर्णादस्य च राज
र्षेः संवादमिममद्भुतम् ॥ ६४ ॥ बभूव पारसीकानां पार्थिवः परवीरहा । परिघो नाम

43 b: **०मलम्** – 44 a: **०यांतरेव** b: **महता०** – 45 b: **शम०** – 47 Textfolge: cd/ab (vgl. jedoch V 2). – 48 d: **शेष अत्मेति** – 50 c/d: **सर्वं ह्येतत्परित्यज्य यावच्छिष्टं परं पदम्** – 51 (Drutavilambita) a/b: **०परं पारामपि जग०** c/d: **स्ववपुस्ततः परिविधूय च यच्छुभमस्तु तत्** – 52 Ohne **श्री०** c: Hs. **रचितं** – 54 c: **न मे तत्ताव०** – 55 e: **जडान्यतत्स्व०** f: **बुद्धीद्रियाण्यहम्** – 56 c/d: **शेषो विकल्परहितो विशुद्धश्चिदहं ततः** – 57 a: **ब्रह्मांडे च यथा वायुः** c: **एव** – 58 c: **०कुंभा** – 61 (Drutavilambita) d: Hs. **शममिमं**; lies **सम समं*** – 62 Ohne **श्री०** – 62A: **सुषुप्तपदधर्मिण्या चित्तवृत्त्या व्यराजत ॥** – 63 b: **न द्वंद्वी नाप्यमत्सरी**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

विख्यातः परिघः स्यन्दने यथा । बभूव परमं मित्रं सुरघो रघुनन्दन ॥ ६५ ॥ कदा चित्परिघस्याभूदकाण्डं मण्डले महत् । विनेशुर्जनतास्तत्र बह्व्यः क्षुत्क्षतजीविताः ॥ ६६ ॥ तद्दुःखं परिघो दृष्ट्वा प्रतीकारेष्वशक्तिमान् । संतत्याजाखिलं राज्यं जगाम तपसे वनम् ॥ ६७ ॥ तपश्चरञ्शान्तमतिः शुष्कपर्णान्यभक्षयत् । ततः प्रभृति पर्णाद इति ख्यातिमसौ ययौ ॥ ६८ ॥ ततो वर्षसहस्रेण तपसा दारुणात्मना । प्रापदभ्यासवशतो ज्ञानमात्मप्रसादजम् ॥ ६९ ॥ बभूव विगतद्वंद्वो नीरसः समदर्शनः । विजहार याथाकामं त्रिलोकीमठिकामिमाम् ॥ ७० ॥ एकदा तस्य सदनं हेमचूडपतेर्ययौ । ते तत्र प्राक्तने मैत्रे अन्योन्यमिदमूचतुः ॥ ७१ ॥ परमानन्दमायातं चेतस्त्वद्दर्शनेन मे । अहो नु बत कल्याणैः फलितं मम पावनैः ॥ ७२ ॥ परिघ उवाच ॥ ज्ञानमेतन्मया प्राप्तं त्वया ज्ञानं यथानघ ॥ ७३ ॥ कच्चित्करोषि समया सुप्रसन्नगभीरया । दृष्ट्या सुभग कार्याणि कार्याण्येव नराधिपः ॥ ७४ ॥ आधिव्याधिविहीनेयं कच्चित्कायलता तव । न पातरमणीयेषु कच्चिद्भोगेषु मज्जसि ॥ ७५ ॥ कच्चित्संकल्परहितं परविश्रमणास्पदम् । परमोपशमं श्रेयः समाधिमनुतिष्ठसि ॥ ७६ ॥ सुरघुरुवाच ॥ योऽज्ञो महात्मा सततं तूष्णीं व्यवहरंश्च वा । असमाहितचित्तोऽसौ कदा भवति मे वद ॥ ७७ ॥ नित्यप्रबुद्धचित्तास्तु कुर्वन्तोऽपि जगत्क्रियाः । आत्मैकतत्त्वतन्निष्ठाः सदैव सुसमाधयः ॥ ७८ ॥ बद्धपद्मासनस्यापि कृतब्रह्माञ्जलेरपि । अविश्रान्तस्वभावस्य कः समाधिः कथं च वा ॥ ७९ ॥ तत्त्वावबोधो भगवान् सर्वाशातृणपावकः । प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः ॥ ८० ॥ समाहिता नित्यतृप्ता यथाभूतार्थदर्शनी । साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः ॥ ८१ ॥ अक्षुब्धा निरहंकारा द्वंद्वेष्वननुपातिनी । प्रोक्ता समाधिशब्देन मेरोः स्थिरतरा स्थितिः ॥ ८२ ॥ निश्चिन्ता विगताभीष्टा हेयोपादेयवर्जिता । प्रोक्ता समाधिशब्देन परिपूर्णा मनोगतिः ॥ ८३ ॥ न विस्मरति सर्वत्र यथा सततगो गतिम् । न विस्मरति निश्चेत्यं चिन्मात्रं प्राज्ञधीस्तथा ॥ ८४ ॥ नित्यं समाहितधियः सुसमा महान्तस्तिष्ठन्ति कार्यपरिणामविभेदमुक्ताः । तेनासमाहितसमाहितभेदभङ्ग्या नित्योदितः क्व नु बतोत्तम वाक्प्रपञ्चः ॥ ८५ ॥ परिघ उवाच ॥ राजन्नूनं प्रबुद्धोऽसि प्राप्तवानसि तत्पदम् । सशीतलान्तःकरणो गम्भीरप्रकटाशयः ॥ ८६ ॥ निर्मलो विततः पूर्णो गताहंकारविप्लवः । सर्वत्र लक्ष्यसे स्वस्थो राजन्सर्वत्र राजसे ॥ ८७ ॥ अलमिति विततैर्वचःप्रपञ्चैरियमुचितेह सुखाय

65 e: **स बभूव परं** f: Hs. **०नन्दनः** – 66 a/b: **०स्यासीदकाण्डं मंडलं** – 67 c: **स तत्याजा०** – 70 b: **नीरुजः** – 71 b: **हेमचूडापतिर्ययौ** c: **मित्रे** – 74 a: **सुधिया**; Hs. **०त्करोमि** c: **दृष्ट्वा** d: **कर्माण्येव नराधिप** – 75 b: **तव** fehlt bei der Hs. c: **आपातरमणीये तु** d: **कच्चिद्भोगे न**; Hs. **मज्जति** – 77 a: **महात्मन् सततं**; lies **यो ज्ञो** * b: Hs. **व्यवहरन् सदा** (Korr. am Rand: **हृदा**) – 78 a/b: **०चित्तत्वात्कुर्वंतो** – 80 a: **भगवन्** d: **न च**; Hs. **०मवस्थितः** – 81 b: **०दर्शिनी** – 83 a: Hs. **निश्चिता** – 83A: **न विस्मरत्यविरतं यथा कालः कलागतिम् । न विस्मरत्यविरतं स्वात्मानं प्राज्ञधीस्तथा ॥** – 84 c: **निश्चित्य** – 85 (Vasantatilakā) b: **०विभागमुक्ताः** d: **मिथ्योदितः क्व नु स उत्तम** – 86 c: **संशीतलां०** – 87 b: **०विक्लवः** – 88 (Puṣpitāgrā)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

दृष्टिरेका । उपशमितरसं समं मनोऽन्तर्यदि मुदितं तदनुत्तमा प्रतिष्ठा ॥ ८८ ॥ उप
शमप्रकरणे सुरघूपाख्यानम् ॥ [२४] ॥ श्रीवसिष्ठ उवाच ॥ सुरघुः परिघश्चैव विचा
र्येति जगत्क्रम् । मिथः प्रपूजितौ तुष्टौ स्वव्यापारपरौ गतौ ॥ १ ॥ यो नित्यमध्यात्म
मयो नित्यमन्तर्मुखः सुखी । नित्यं चिदनुसंधानः स न शोकेन बाध्यते ॥ २ ॥ आ
शापाशशतैर्बद्धं भोगोलुपसुलालसम् । व्यूढदुःखमहाभारं मोहपल्वलशायिनम् ॥ ३
॥ रोगदंशावलीदष्टं जुष्टं तृष्णावरत्रया । कुकर्मकर्दमालिप्तं संसारारण्यचारिणम् । अ
लब्धशीतलच्छायं गमागमपरिक्षतम् ॥ ४ ॥ राम जीवबलीवर्दमिमं संसारपल्वलात् ।
परमं यत्नमास्थाय चिरमुत्तारयेद्बलात् ॥ ५ ॥ महानुभावसंपर्कात्संसारार्णवलङ्घने । यु
क्तिः संप्राप्यते राम स्फुटा नौरिव नाविकात् ॥ ६ ॥ यस्मिन्देशे मरौ तज्ज्ञो नास्ति
सज्जनपादपः । सफलः शीतलच्छायो न तत्र निवसेद्बुधः ॥ ७ ॥ मनोमात्रेण सुहृदा
सदैव सहवासिना । सह किंचित्परामृश्य भवत्यात्मा समुद्धृतः ॥ ८ ॥ एतावतैव दे
वेशः परमात्मावगम्यते । काष्ठलोष्टसमत्वेन देहो यदवलोक्यते ॥ ९ ॥ परिपूर्णार्णव
प्रख्यो न वाग्गोचरमेति नः । नोपमानमुपादत्ते नानुधावति रञ्जनम् ॥ १० ॥ केवलं
चित्प्रकाशांशे कलिताः स्थिरतां गताः । तुर्या चेत्प्राप्यते दृष्टिस्तत्तया सोपमीयते ॥
११ ॥ अदूरगतसादृश्या सुषुप्तस्योपलक्ष्यते । सावस्था भरिताकारा गगनश्रीरिवात
ता ॥ १२ ॥ मनोऽहंकारविलये सर्वभावान्तरस्थिता । समुदेति परानन्दा या तनुः पा
रमेश्वरी ॥ १३ ॥ सा स्वयं योगसंसिद्ध्या सुषुम्णाधारभाविनी । न गम्या वचसां राम
हृद्येवेहानुभूयते ॥ १४ ॥ मनसैव मनश्छित्त्वा सा स्वयं लभ्यते स्थितिः ॥ १५ ॥ श्रीव
सिष्ठ उवाच ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् । संवादं सुहृदोः सह्यसानौ भा
सविलासयोः ॥ १६ ॥ अस्त्युत्सेधजिताकाशः पीठेन जितभूतलः । तलेन जितपाता
लः सह्यो लोकोत्तरो गिरिः ॥ १७ ॥ तत्रोत्तरे तटे सानावानमत्फलपादपे । अत्रेर
स्त्याश्रमः श्रीमान्सिद्धश्रमहरो महान् ॥ १८ ॥ महत्यत्र्याश्रमे तस्मिंस्तापसौ द्वौ बभू
वतुः । तयोरथैकास्पदयोस्तत्राभूतां सुतावुभौ ॥ १९ ॥ विलासभासनामानौ वृद्धिमा
ययतुः क्रमात् । एकं द्वित्वमिवापन्नं सममासीत्तयोर्मनः । जग्मतुर्देहमुत्सृज्य ततस्तु

a: **अलमति०** b: **०मुदितेह** – Kolophon zu Sarga 24: Hs. mit **इति** am Rand; **इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरणे सुरघूपाख्यानं नाम पंचविंशः सर्गः ॥ २५ ॥** – 25.1 Ohne **श्री०** – 3 b: **भोगोलप०** – 4 a: Hs. **०दृष्टं** b: **कृष्टं** f: **गमागमपिपासितम्** – 5 b: **०पल्वलात्** – 7 a: **गिरौ** – 7A: **न धनानि न मित्राणि न शास्त्राणि न बांधवाः । नराणामुपकुर्वंति मग्नस्वात्मसमुद्धृतौ ॥** – 10 b: **सः** – 11 a: **०काशांश०** b: **कलिता स्थिरतां गता** – 12 b: **सुषुप्तिः सोपलक्ष्यते** – 14 a: **०संसिद्धा** b: **सुषुप्तादूरभाविता** – 14A: **अखिलमिदमनंतमात्मतत्त्वं दृढपरिणामिनि चेतसि स्थितोऽतः । बहिरुपशमिते चराचरात्मा स्वयमनुभूयत एव देवदेवः ॥** B: **तदनु विषयवासनाविनाशस्तदनु शुभः परमस्फुटप्रकाशः । तदनु च समतावशात्स्वरूपे परिणमनं महतामचिंत्यरूपम् ॥** (A und B Puṣpitāgrā). – 15 b: Ersetzt durch **यद्यात्मा नावलोक्यते । तन्न नश्येज्जगद्दुःखं मनश्छेदे सुखात्मधीः ॥** (15A) – 16 Ohne **श्री०** – 17 a: **अत्यु०** – 18 a: **तत्रोत्तरनदे** – 19 Nach a/b zusätzlich: **कौचिदेव नभोमार्गे इव शुक्रबृहस्पी ।** (19A) – 20 Nach a/b zusätzlich: **आस्तामन्योन्यसुस्निग्धौ सुरक्ताविव दंपती ।** (20A)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

पितरौ तयोः ॥ २० ॥ तत्रोर्ध्वदेहिकं कृत्वा चक्राते परिदेवनम् । विरक्तौ विपिने का
लं क्षपयामासतुः पृथक् ॥ २१ ॥ जग्मुर्दिनानि मासाश्च वर्षाण्यथ तयोस्तदा । तावेक
दा संघटितावन्योन्यमिदमूचतुः ॥ २२ ॥ विलास उवाच ॥ जीविताग्र्यद्रुमफल हृदा
श्वासामृताम्बुधे । जगत्यस्मिन्महाबन्धो भास स्वागतमस्तु ते ॥ २३ ॥ कच्चित्ते विज्व
रा बुद्धिः कच्चिज्ज्ञातस्त्वमात्मवान् । कच्चित्फलितविद्यस्त्वं कच्चित्कुशलवानसि ॥ २४
॥ भास उवाच ॥ साधो स्वागतमिद्धाङ्ग दिष्ट्या दृष्टोऽसि मानद । कुशलं तु कुतोऽस्मा
कं संसारे तिष्ठतामिह ॥ २५ ॥ यावन्नाधिगतं ज्ञेयं यावत्क्षीणा न चित्तभूः । यावत्ती
र्णो न संसारस्तावन्नः कुशलं कुतः ॥ २६ ॥ आशा यावदशेषेण न लूनाश्चित्तसंभवाः ।
वीरुधो दात्रकेणेव तावन्नः कुशलं कुतः ॥ २७ ॥ यावन्नाधिगतं ज्ञानं यावन्न समतो
दिता । यावन्नाभ्युदितो बोधस्तावन्नः कुशलं कुतः ॥ २८ ॥ आत्मलाभं विना साधो
विना ज्ञानमहौषधम् । उदेति पुनरेवेयं दुःसंसृतिविषूचिका ॥ २९ ॥ बहुविधसुखदुः
खमध्यपाती विततजरामरणप्रपातभग्नः । जगदुदरगिरौ लुठञ्जनोऽयं गतरसपर्णवदे
ति जर्जरत्वम् ॥ ३० ॥ इत्युपशमप्रकरणे भासविलाससंवादः ॥ [२५] ॥ श्रीवसिष्ठ
उवाच ॥ एवं तौ कुशलप्रश्नं कृतवन्तौ परस्परम् । कालेनासाद्य विमलं ज्ञानं मोक्षमा
वापतुः ॥ १ ॥ अतो वच्मि महाबाहो यथा ज्ञानेतरा गतिः । नास्ति संसारसरणौ स
ङ्गबद्धस्य चेतसः ॥ २ ॥ असक्तं निर्मलं चित्तं मुक्तं संसार्यपि स्फुटम् । सक्तं तु दीर्घत
पसा युक्तमप्यतिबन्धवत् ॥ ३ ॥ अन्तःसंसक्तिनिर्मुक्तो जीवो मधुरवृत्तिमान् । बहिः
कुर्वन्नकुर्वन्वा कर्ता भोक्ता हि न क्वचित् ॥ ४ ॥ श्रीराम उवाच ॥ कीदृशो भगवन्स
ङ्गः कथं बन्धाय वा नृणाम् । कश्च मोक्षाय कथितः कथं चैष चिकित्स्यते ॥ ५ ॥ व
सिष्ठ उवाच ॥ देहदेहिविभागैकपरित्यागेन भावनात् । देहमात्रे तु विश्वासः सङ्गो ब
न्धार्ह उच्यते ॥ ६ ॥ अनन्तस्यात्मतत्त्वस्य सपर्यन्तस्य निश्चये । यत्सुखार्थित्वमान्तः
स सङ्गो बन्धार्ह उच्यते ॥ ७ ॥ सर्वमात्मेदमखिलं किं वाञ्छामि त्यजामि किम् ।
इत्यसङ्गस्थितिं विद्धि जीवन्मुक्ततनुस्थिताम् ॥ ८ ॥ नाहमस्ति न चान्योऽस्ति मा भव
न्तु भवन्तु वा । सुखान्यसक्त इत्यन्तः कथ्यते मुक्तिभाङ्नरः ॥ ९ ॥ नाभिनन्दति नै
ष्कर्म्यं न कर्मस्वनुरज्यते । सुसमो यः फलत्यागी सोऽसंसक्त इति स्मृतः ॥ १० ॥ स
र्वकर्मफलादीनां मनसैव न कर्मणा । निपुणो यः परित्यागः सोऽसंसङ्ग इति स्मृतः
॥ ११ ॥ असंसङ्गेन सकलाश्चेष्टा नानाविजृम्भिताः । चिकित्सिता भवन्त्यङ्ग श्रेयः

21 a: तत्रौर्ध्वदैहिकं – 21A: तपसा शुष्कसर्वांगावनास्थामागतौ पराम् ॥ – 22 b: वर्षाण्यपि तयोस्तथा c/d: संघटिताविदमन्योन्यमूचतुः – 23 a: Hs. जीवितांग्र० – 23A: एतावंतो दिनानल्पा [lies दिनावल्यो *] मद्वि योगवता त्वया । वद क्व क्षपिताः साधो कच्चित्ते सफलं तपः ॥ – 25 a: स्वागतमद्यांग c: कुशलं च – 30 (Puṣ-pitāgrā) – Kolophon zu Sarga 25: इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरणे भासविलाससंवादो नाम षड्विंशः सर्गः ॥ २६ ॥ – 26.1 Ohne श्री० – 2 c: संसारतरणे – 3 d: Hs. ०बन्धनात् – 4 d: न हि – 5 (2. Aufl. ohne श्री०) b: कश्च – 6 (Auch Hs. ohne श्री०) – 7 b: सपर्यंतत्वनिश्चये c: यः सुखा० – 8 b: गृह्णामि त्यजामि d: जीवन्मुक्तत्वमुत्थिम् (lies ०मुत्थितम्) – 10 b: ०स्वनुरुध्यते – 11 d: सोऽसंसक्त

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

संपद्यन्ति च ॥ १२ ॥ कृमिकीटत्वमायान्ति जायमानाः पुनः पुनः । यदिमा जन
ता जीर्णास्तत्संसक्तिविजृम्भितम् ॥ १३ ॥ भूतानि यदनन्तानि तरंगिणि तरंगवत् ।
उत्पद्योत्पद्य लीयन्ते तत्संक्तिविजृम्भितम् ॥ १४ ॥ सक्तिर्हि द्विविधा प्रोक्ता वन्द्या
वन्ध्या च राघव । आत्मतत्त्वावाबोधेन हीना देहादिवस्तुजा । भूयःसंसारदा सक्ति
र्दृष्टा वन्ध्येति कथ्यते ॥ १५ ॥ आत्मतत्त्वावबोधेन सत्यभूतविवेकजा । वन्द्या हि
कथ्यते सक्तिर्भूयःसंसरवर्जिता ॥ १६ ॥ शङ्खचक्रगदाहस्तो देवो विविधयेहया । व
न्द्यसंसक्तिवशतः परिपाति जगत्त्रयम् ॥ १७ ॥ विज्ञानगतयः सिद्धलोकपालास्तथैव
च । वन्द्यसंसक्तिवशतस्तिष्ठन्ति जगतां गणे ॥ १८ ॥ वन्ध्यसक्तिमतामेता रम्यान्तः
पुरभूमयः । रचिता रौरवावीचिकालसूत्रादिनामिकाः ॥ १९ ॥ वन्ध्यसक्तिं जनं दुः
खशुष्कमिन्धनसंचयम् । ज्वलतां नरकाग्नीनां विद्धि तेन ज्वलन्ति ते ॥ २० ॥ विद्या
दृशि प्रोदयमागतेन क्षयं त्वविद्याविषये गतेन । सर्वत्र संसक्तिविवर्जितेन स्वचेतसा
तिष्ठति यः स मुक्तः ॥ २१ ॥ सर्वदा सर्वसंस्थेन सर्वेण सह तिष्ठता । सर्वकर्मकरेणापि
मनः कार्यं विजानता ॥ २२ ॥ न सक्तमिह चेष्टासु न चिन्तासु न वस्तुषु । नाकाशे
नाप्यधो नोर्ध्वे न दिक्षु न विदिक्षु च ॥ २३ ॥ न बहिर्विपुलाभोगे न चैवेन्द्रियवृत्ति
षु । नाभ्यन्तरे न च प्राणे न मूर्धनि न तालुनि ॥ २४ ॥ न भ्रूमध्ये न नासान्ते न
मुखे न च तारके । नान्धकारे न चाभासे न चास्मिन्हृदयाम्बरे ॥ २५ ॥ न जाग्रति
न च स्वप्ने न सुषुप्ते न निर्मले । नासिते न च वा पीते रक्तादौ शबले न च ॥ २६ ॥
न चले न स्थिरे नादौ न मध्ये नेतरत्र च । न दूरे नान्तिके नाङ्गे न पदार्थे न चात्म
नि ॥ २७ ॥ न शब्दस्पर्शरूपेषु न मोहानन्दवृत्तिषु । न गमागमचेष्टासु न कालकल
नासु च ॥ २८ ॥ केवलं चिति विश्रम्य किंचिच्चेत्यावलम्बिनि । सर्वत्र नीरसमिव ति
ष्ठत्यात्मरसे मनः ॥ २९ ॥ तत्रस्थोऽपि गतासङ्गो जीवोऽजीवत्वमागतः । व्यवहारमि
मं सर्वं मा करोतु करोतु वा ॥ ३० ॥ अथ वा तमपि त्यक्त्वा चेत्यांशं शान्तचिद्घ
नः । जीवस्तिष्ठति संशान्तो ज्वलन्मणिरिवात्मनि ॥ ३१ ॥ आत्मारामा महात्मानः
प्रबुद्धाः परमोदयाः । बहिः पिच्छाग्रतरलाः स्वान्तर्मेरुरिवाचलाः ॥ ३२ ॥ चित्ते
चेत्यदशाहीने या स्थितिः क्षीणचेतसः । सोच्यते शान्तकलना जाग्रत्येव सुषुप्तता ॥
३३ ॥ एषैव राम सौषुप्ती स्थितिरभ्यासयोगतः । प्रौढा सती तुर्यमिति कथिता तत्त्व
कोविदैः ॥ ३४ ॥ अस्यां तु तुर्यावस्थायां स्थितिं प्राप्याविनाशिनीम् । आनन्दैकान्त

14 d: ०विजृंभणम् – 15 a: संसक्तिर्द्विविधा b: वंध्या वंद्या e/f: सक्तिर्दृढा Nach a/b zusätzlich: वंध्या सर्वत्र मूढानां वंद्या तत्त्वविदां निजा । (15A) – 16 b: सत्यभूता वि० – 17 b: देहो – 18 a/b: सिद्धा लोक० – 18A: मनः पतति भोगेषु गृध्रो मांसलवेष्विव । वंध्यसंसक्तिवशतो व्यर्थया रम्यशंकया ॥ – 21 (Upajāti) – 22 वसिष्ठ उवाच ॥ – 23 c/d: नोर्ध्वं न दिक्षु विततासु च – 25 b: Hs. तालुके – 26 b: न सुप्ते न च निर्मले – 27 c: नाग्रे – 28 b: मोहमदवृत्तिषु – 29 b: ०लंब्यपि d: तिष्ठत्वात्मरसं – 30 a: तत्रस्थो वि० d: न करोतु – 30A: अकुर्वन्नपि कुर्वन्वा जीवः स्वात्मरतिः क्रियाः । क्रियाफलैर्न संबंधमायाति खमिवांबुदैः ॥ – 31 c: ०स्तिष्ठतु – 32 c/d: ०तरला अंतर्मेरु० – 33 b: ०चेतसाम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

शीलत्वादनान्दपदं गतः ॥ ३५ ॥ अनानन्दमहानन्दकलातीतस्ततोऽपि हि । मुक्त इ
त्युच्यते योगी तुर्यातीतपदं गतः ॥ ३६ ॥ परिगलितसमस्तजन्मपाशः सकलविली
नमनोमयाभिमानः । परमरसमयीं प्रयाति सत्तां जलगतसैन्धवखण्डवन्महात्मा ॥
३७ ॥ वसिष्ठ उवाच ॥ जडाजडदृशोर्मध्ये यत्तत्त्वं पारमार्थिकम् । तदेव बहुशः प्रो
क्तं बृहदारण्यकादिषु ॥ ३८ ॥ दृश्यदर्शनसंबन्धे यत्सुखं पारमार्थिकम् । अनुभूति
मयं तस्मात्सारं ब्रह्मेति कथ्यते ॥ ३९ ॥ दृश्यदर्शनसंबन्धे सुखसंविदनुत्तमा । दृश्य
संवलिता बन्धस्तन्मुक्ता मुक्तिरुच्यते ॥ ४० ॥ दृश्यदर्शनसंबन्धे यानुभूतिरनामया ।
तामवष्टभ्य तिष्ठन्तं सौषुप्ती भजते स्थितिः । सैव तुर्यत्वमायाति तस्यां दृष्टौ तु राघव
॥ ४१ ॥ नात्मा स्थूलो न चैवाणुर्न प्रत्यक्षो न चेतरः । न चेतनो न च जडो न चैवा
सन्न सन्मयः ॥ ४२ ॥ नाहं नान्यो न चैवैको न चानेकोऽपि राघव । सर्वातीतं पदं
राम यन्न किंचिदिवेह तत् ॥ ४३ ॥ न मोक्षो नभसः पृष्ठे न पाताले न भूतले । सर्वा
शासंक्षये चेतःक्षयो मोक्ष इतीष्यते ॥ ४४ ॥ मोक्षो मेऽस्त्विवति चिन्तापि जाता चेदु
त्थितं मनः । मननोत्थे मनस्युच्चैर्बन्धः सांसारिको दृढः ॥ ४५ ॥ प्राप्तानुत्तमविश्रा
न्तेर्लब्धालब्धपदस्य हि । गोष्पदं पृथिवी मेरुः स्थाणुराशाः समुद्गिकाः । तृणं त्रिभु
वनं राम नैराश्यालंकृताकृतेः ॥ ४६ ॥ आपत्करञ्जपरशुं पराया निर्वृतेः पदम् । पुष्प
गुच्छं शमतरोरालम्बस्व निराशताम् ॥ ४७ ॥ परव्यसनिनी नारी व्यग्रापि गृहक
र्मणि । तदेवास्वादयत्यन्तर्नवसङ्गरसायनम् ॥ ४८ ॥ एवं तत्त्वे परे शुद्धे धीरो विश्रा
न्तिमागतः । तदेवास्वादयत्यन्तर्बहिर्व्यवहरन्नपि ॥ ४९ ॥ असंसर्गात्पदार्थानामन्तः
शान्तिर्विमुक्तता । सत्यसत्यपि देहे सा संभवत्यनघाकृतेः । जीवन्मुक्तो गतस्नेहः सस्ने
हो बन्ध उच्यते ॥ ५० ॥ नापीक्षते भविष्यच्च वर्तमाने न तिष्ठति । न संस्मरत्यतीतं
च सर्वमेव करोति च ॥ ५१ ॥ अनुबन्धपरे जन्तावसंसक्तमनाः सदा ॥ ५२ ॥ भक्ते
भक्तिपराधीनः शठे शठ इव स्थितः । बालो बालेषु वृद्धेषु वृद्धो धीरेषु धीर्यवान् ॥
५३ ॥ धीरधीरुदितानन्दः पेशलः पुण्यकीर्तनः । प्राज्ञः प्रसन्नमधुरो दैन्यादपगता
शयः ॥ ५४ ॥ अपि शीतरुचावर्के सुकृष्णेऽपीन्दुमण्डले । अप्यधः प्रसरत्यग्नौ जीव

37 (Puṣpitāgrā) b: ०लीनतमोमया० – 38 (Auch Hs. ohne श्री०) b: पारामात्मिकम् – 41 c/d: तिष्ठ त्वं सौषुप्तीं भज ते स्थितिम् – 42 d: चैषोऽसन्न b: वानेको – 43 Nach a/b zusätzlich: यदिदं दृश्यतां प्राप्तं मनःषष्ठेंद्रियाश्रयम् । (43A) – 45 a/b: चिंतांतर्जाता c: Hs. मनसोक्ते – 45A: आत्मन्यतीते सर्वस्मात्सर्वरूपेऽथ वा तते । को बंधः कश्च वा मोक्षो निर्मूलं मननं कुरु ॥ B: अध्यात्मरतिराशांतः पूर्णः पावनमानसः । निर्मृष्टकामपंकांकश्छिन्नबंधनिजभ्रमः । द्वंद्वदोषभयान्मुक्तस्तीर्णसंसारसागरः ॥ – 46 a/b: ०विश्रांतिर्लब्धालभ्य० d: Hs. तु भुवनं – Textfolge: 46a/b, 46A, 47, 46c–f, 47A/B, 48. – 46A: अनिवृत्त[lies त्ति*]पदं प्राप्तः कर्मणा मनसा गिरा । सर्वाप्तिवाञ्छितारंभो न किंचिदभिवंञ्छति ॥ – 47A: शरीराद्व्यतिरिक्तं ज्ञं पश्यतः प्रविवेकिनः । विकर्तितांगकस्यापि न किंचित्प्रविकर्तितम् ॥ B: अनुभूतो गुडः स्वादुरपि दाहविकर्तनैः । न शक्यतेऽन्यथा कर्तुं तत्त्वालोकस्तथात्मनः ॥ – 50 f: Lies बद्ध* – 50A (für 50e/f): यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते । सस्नेहजीवितो बद्धो मुक्त एव तृतीयकः ॥ – 51 a: Hs. नापेक्षते – 53 a: भक्तसमाचारः (2. Aufl.) d: धैर्यवान् LN zusätzlich: युवा यौवनवृत्तेषु दुःखितेषु स दुःखधीः ॥ (53A) – 55 b: सुतप्ते

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

न्मुक्तो न विस्मयी ॥ ५५ ॥ चिदात्मन इमा इत्थं प्रस्फुरन्तीह शक्तयः । इत्यस्याश्चर्य
कालेषु नाभ्युदेति कुतूहलम् ॥ ५६ ॥ श्रीराम उवाच ॥ येन प्रस्पन्दते चित्तं येन न
स्पन्दतेऽथ वा । तद्ब्रह्मन्ब्रूहि मे येन चिकित्सेयं तदेव हि ॥ ५७ ॥ वसिष्ठ उवाच ॥
द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव । योगस्तत्त्वविरोधो हि ज्ञानं सम्यगवे
क्षणम् ॥ ५८ ॥ चित्तं प्राणपरिस्पन्दमाहुरागमभूषणाः । तस्मिन्संरोधिते नूनमुपशा
न्तं भवेन्मनः । मनःस्पन्दोपशान्त्यायं संसारः प्रविलीयते ॥ ५९ ॥ शास्त्रसज्जसंपर्क
वैराग्याभ्यासयोगतः । अनास्थायां कृतास्थायां पूर्वं संसारवृत्तिषु ॥ ६० ॥ यथाभिवा
ञ्छितध्यानाच्चिरमेकतयोदितात् । एकतत्त्वघनाभ्यासात्प्राणस्पन्दो निरुध्यते ॥ ६१
॥ पूरकादिनिजायामदृढाभ्यासादखेदजात् । एकान्तध्यानसंयोगात्प्राणस्पन्दो निरु
ध्यते ॥ ६२ ॥ ॐकारोच्चारणप्रान्ते शब्दतत्त्वानुभावनात् । सुषुप्ते संविदो जाते प्राण
स्पन्दो निरुध्यते ॥ ६३ ॥ तालुमूलगतां यत्नाज्जिह्वयाक्रम्य घण्टिकाम् । ऊर्ध्वरन्ध्रगते
प्राणे प्राणस्पन्दो निरुध्यते ॥ ६४ ॥ द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलाम्बरे । संविद्दृ
शोः प्रशाम्यन्त्योः प्राणस्पन्दो निरुध्यते ॥ ६५ ॥ अभ्यासादूर्ध्वरन्ध्रेण तालूर्ध्वद्वा
दशान्तगे । प्राणे गलितसंवित्तौ प्राणस्पन्दो निरुध्यते ॥ ६६ ॥ भ्रूमध्ये तारकालोके
शान्तावस्तुमुपागते । चेतने केतने बद्धे प्राणस्पन्दो निरुध्यते ॥ ६७ ॥ झगित्येव यदु
द्भूतं ज्ञानं तस्मिन्दृढाश्रिते । असंस्पृष्टविकल्पांशे प्राणस्पन्दो निरुध्यते ॥ ६८ ॥ चिरं
कालं हृदेकान्तव्योमसंवेदनात्मनः । अवासनमनोध्यानात्प्राणस्पन्दो निरुध्यते ॥
६९ ॥ एभिः क्रमैस्तथान्यैश्च नानासंकल्पकल्पितैः । नानादेशिकवक्त्रस्थैः प्राणस्पन्दो
निरुध्यते ॥ ७० ॥ अभ्यासाद्दृढतां यातो वैराग्यपरिलाञ्छितः । यथावासनमायामः
प्राणानां सफलः स्मृतः ॥ ७१ ॥ विकल्पसंक्षयाज्जन्तोः पदं तदवशिष्यते । यतो वा
चो निवर्तन्ते समग्रं कलनान्विताः ॥ ७२ ॥ अनाद्यन्तावभासात्मा परमात्मेह वि

56 b: प्रसरंतीह c: ०जालेषु – 56A: यथा जलपरिस्पंदाद्व्यतिरिक्त इवांभसः । दृश्यते वर्तुलावर्तश्चित्तस्पंदात्तथा जगत् ॥ B: यथा व्योम्नीक्षणस्पंदात्पिच्छमौक्तिकमंडलम् । दृश्यते सदिवासत्यं चित्तस्पंदात्तथा जगत् ॥ – 57 Ohne श्री० d: Hs. चिकित्स्येनं – 58 (Auch Hs. ohne श्री०) a: चित्तनाशाय c: योगस्तद्वृत्तिरोधो Vor a/b: 58A: यथा शौक्ल्यं हिमे राम तिले तैललवो यथा । दृष्टौ राघव संसृष्टौ चित्तस्पंदौ तथैव हि ॥ – 59A: सूर्यालोकपरिस्पंदशांतौ व्यवहृतिर्यथा ॥ श्रीराम [2. Aufl. ohne श्री] उवाच ॥ B: अनिशं चरतां देहगेहे गहनगामिनाम् । प्राणादीनां परिस्पंदो वायुना [lies वायूनां*] रोध्यते कथम् ॥ वसिष्ठ उवाच ॥ – 60 d: Lies अनास्थायाः कृतास्थायाः – 62 a/b: पूरकाद्यनिलायामादृढा० c: ०ध्यानयोगाच्च – 63 a: ०प्रान्त० – 65 c: संविद्दृशि प्रशाम्यंत्यां – 67 a/b: ०लोकशांतावंतमुपागते b: Lies शान्तावस्तमुपागते c: Hs. बुद्धे – 68 a: झटित्येव b: ०ढायिते – 69 a: चिरकालं हृदैकांत० b: ०संवेदनान्मुनेः – Textfolge: 70, 70A–C, 74, 71. – 70A: अभ्यासेन निराबाधमेतास्ता योगयुक्तयः । उपायतामुपायांति भव्यस्य भवभेदने ॥ B: अभ्यासेन परिस्पंदे प्राणानां क्षयमागते । मनः प्रशममायाति निर्वाणमवशिष्यते ॥ श्रीराम [2. Aufl. ohne श्री] उवाच ॥ C: योगयुक्तस्य चित्तस्य शम एवं निरूपितः । सम्यग्ज्ञानमिदानीं मे कथयानुग्रहात्प्रभो ॥ वसिष्ठ उवाच ॥ – 72 d: समग्र० – 72A: इमा घटपटाकारपदार्थशतशक्तयः[lies पंक्तयः*] । आत्मैव नान्यदस्तीति निश्चयः सम्यगीक्षणम् ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

द्यते । इत्येकनिश्चयः स्फारः सम्यग्ज्ञानं विदुर्बुधाः ॥ ७३ ॥ यथाभूतार्थदर्शित्वमेता
वद्भुवनत्रये । यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता ॥ ७४ ॥ वसिष्ठ उवाच ॥ अ
थेदं परमं राम शृणु मोक्षपदप्रदम् । मुनिना वीतहव्येन यथा स्थितमशङ्कितम् ॥ ७५
॥ वीतहव्यो मुनिर्नाम विन्ध्यकाननकन्दरे । उषित्वा सुचिरं कालं क्रियाकाण्डपरा
यणः ॥ ७६ ॥ अस्मात्क्रियाक्रमाद्घोरात्संसारभ्रमदायिनः । आधिव्याधिमयाकारा
त्कालेनोद्वेगमाययौ ॥ ७७ ॥ निर्विकल्पसमाध्यर्थं संत्यज्य सकलाः क्रियाः । विवेश
रम्भारचितं निजपर्णोटजान्तरम् ॥ ७८ ॥ तत्रासने समे शुद्धे स्वास्तीर्णहरिणाजिने ।
बद्धपद्मासनस्तस्थौ पाष्ण्योरधिकराङ्गुलिः ॥ ७९ ॥ संजहारालसालोकं दिग्विकीर्णम
नः शनैः । बाह्यानाभ्यन्तरांश्चैव स्पर्शान्पर्यजहत्क्रमात् । इदमाकलयामास मनसा
विगतेन सः ॥ ८० ॥ अहो नु चञ्चलमिदं प्रत्याहृतमपि क्षणात् । न मनः स्थैर्यमाया
ति तरंप्रौढपर्णवत् ॥ ८१ ॥ चिदात्मा भगवान्सर्वं साक्षित्वेना करोत्यजः । हन्तेन्द्रि
यगणा यूयं किं निरर्थकमाकुलाः ॥ ८२ ॥ भीतः पान्थ इवाहिभ्यः पुष्कसेभ्य इव
द्विजः । दूरे तिष्ठति चिन्मात्रमिन्द्रियेभ्यो ह्यनामयम् ॥ ८३ ॥ संकल्पोन्मुखता सेयं
दुःखदा संविदः स्मृतिः । कलनारहिते देवे निजे मनसि वा जडे । संवित्संवेद्यनिर्मु
क्ता सारस्तन्नाम नेतरत् ॥ ८४ ॥ इति निर्णीय स मुनिर्वीतहव्यो विवासनः । बलाच्चे

73 c: इत्येष – 74A: सर्वमात्मैव निर्दिष्टौ भावाभावौ क्व वा स्थितौ । क्व बंधमोक्षकलने किमन्यद्राम शोच्यते ॥ B: न चेत्यमन्यन्नो चित्तं ब्रह्मैवेदं विजृंभते । सर्वमेकं परं ब्रह्म को मोक्षः का च बंधता ॥ C: ब्रह्मेदं प्रहिताकारं बृहद्बृहदवस्थितम् । दूरादस्तमितद्वित्वं भवात्मैव त्वमात्मना ॥ D: सम्यगालोकिते रूपे काष्ठपाषाणवाससाम् । मनागपि न भेदोऽस्ति क्वासि संकल्पनोन्मुखः ॥ E: आदावंते च संशांतं स्वरूपमविनाशि यत् । वस्तूनामात्म नश्चैतत्तन्मयो भव राघव ॥ F (vgl. 19.47): द्वैताद्वैतसमुद्भेदाजरा[lies मुद्भेदैर्जरा]मरणविभ्रमैः । स्फुरत्यात्मभि रात्मैव चित्तै[lies चित्रै*]रब्धिद्वीचिभिः ॥ G: शुद्धमात्मानमालिंग्य नित्यमंतःस्थया धिया । यः स्थितस्तं कमा त्मेहं भोगो बंधयितुं [lies बाधयितुं] क्षमः ॥ H: कृतस्फारविचारस्य मनो भोगादयोऽरयः । मनागपि न भिंदंति शैलं मंदानिला इव ॥ I (Vasantatilakā): नानात्वमस्ति कलनासु न वस्तुनोऽतर्नानाविधासु सरसीषु जलादिवा न्यत् । इत्येकनिश्चयमयः पुरुषो विमुक्त इत्युच्यते समवलोकितसम्यगर्थः ॥ – 75 (Auch Hs. ohne श्री०) a/b: अथेमामपरां राम शृणु दृष्टिं पदप्रदाम् – 77 a/b: आत्मक्रियाक्रमाद्घोरसंसार० c: Hs. ०महाकारा० – 80 a: संजहारांजसा लोकं b: दिग्विकीर्णं मनः d: Lies ०जहात्क्रमात्*; स्पर्शान्परिहरन्क्रमात् e: इदमालो कयामास f: विगतैनसा Nach c/d zusätzlich: ततः स्वमनसः स्थैर्यं वांछमानस्तदा मुनिः । (80A) – 81 वीत हव्य उवाच ॥ a: अहो न c: मनः स्थैर्यं ततो नैति – 81A: घटात्पटमुपायाति पटाच्छकटमुत्कटम् । चित्तम र्थेषु चलति पादपेष्विव मर्कटः । पंचद्वाराणि मनसश्चक्षुरादीन्यमून्यलम् ॥ B: तेनात्मना बहुज्ञेन निर्ज्ञाताश्चक्षुर ादयः । मनागपि न संबद्धाः [LVb संबंधः] पातालद्युतलादिवत् ॥ C: चित्त चारण चार्वाक चतुर्दिक्कुक्षिभिक्षुक । व्यर्थं खेदमनास्थाय नेदं विहर हे जगत् ॥ D: अहं चेतनमित्येवमसत्या तव वासना । अत्यंतभिन्नयोरैक्यं नास्ति चिन्मनसोः शठ ॥ E: जीवः सोऽस्म्यहमित्येषा व्यर्थाहंकारदुर्मतिः । अहंकारादयं सोऽस्मीत्येतां संरब्धतां त्यज । मिथ्यैव जाता दुःखाय न सत्या सत्यवर्जिता ॥ F: एतावदेव ते रूपं साधो यदविचारणम् । विचारेणो पशांतं त्वमालोकेन तमो यथा ॥ G: नित्यं पूर्वमभूताय नास्ति रूपाय संप्रति [vielleicht चित्तं पूर्वमभूतं यत्ते रूपं नास्ति संप्रति] । भविष्यते च नोदर्के स्वमनः स्वस्ति ते स्थितिः [lies तेऽस्त्वितः*] ॥ H: परिनिर्वामि शांतो ऽस्मि दिष्ट्यास्मि विगताज्वरः । स्वात्मन्येवावतिष्ठेऽहं तुर्यरूपपदे स्थितः ॥ – 83 b: पुक्कसेभ्य – 84 d: देहे मनसि – 85 वसिष्ठ उवाच ॥ c: बलाच्चित्तं d: Lies ०वित्थं; तस्थावस्पंदितेंद्रियः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तः समाधाय तस्थावित्स्थं जितेन्द्रियः । अन्तरेव शशामास्य क्रमेण प्राणसंततिः ॥
८५ ॥ घ्राणप्रान्तगताल्पाल्पसमालोक इवेक्षणे । अर्धकुड्मलितैः पद्मैः श्रियमाययतुः
समाम् ॥ ८६ ॥ समकायशिरोग्रीवास्थानकः स महामतिः । आसीच्छैलादिवोत्की
र्णश्चित्रार्पित इवाथ वा ॥ ८७ ॥ तथावतिष्ठतस्तस्य संवत्सरशतत्रयम् । कोटरे विन्ध्य
कच्छस्य ययावर्धमुहूर्तवत् ॥ ८८ ॥ तत्र केनापि कालेन कायस्तस्य महामतेः । प्रावृ
डोघविनुन्नेन पङ्केनोर्वीतले कृतः ॥ ८९ ॥ शतत्रयेण वर्षाणां सोऽबुध्यत माहामतिः ।
संविदेवास्य तं देहं जग्राहोर्वीनिपीडितम् । न तु प्राणमयः स्पन्दः प्राणसंचरनं विना
॥ ९० ॥ उत्पत्तिप्रौढिमासाद्य कलना हृदयाम्बरे । स्वमनोरूपिणी तस्य हृद्येवानुबभूव
सा ॥ ९१ ॥ केवलाकानने कान्ते कदम्बस्य तरोस्तले । मुनित्वं शतमब्दानां जीवन्मु
क्तात्म निर्मलम् ॥ ९२ ॥ विद्याधरत्वं वर्षाणां शतमाधिविवर्जितम् । युगपञ्चकमिन्द्र
त्वं प्रणतं सुरचारणैः ॥ ९३ ॥ कल्पमेकं गणत्वं स चन्द्रमूलेश्वकार ह । प्रतिभासवशा
देतद्वीतहव्योऽनुभूतवान् ॥ ९४ ॥ अनन्तरमनन्तात्म वीतहव्याभिधं मनः । इच्छां
कदाचित्सकलप्राग्जन्मालोकनेऽकरोत् ॥ ९५ ॥ अशेषान्स ददर्शाथ नष्टानष्टान्स्वदे
हकान् । अनष्टां तामपश्यत्स वीतहव्याभिधां तनुम् ॥ ९६ ॥ यदृच्छयैव प्रोद्धर्तुं मग्ने
देहेऽभवन्मतिः ॥ ९७ ॥ अथैवं चिन्तयामास कायोऽयं पङ्कपीडितः । एतदुद्धरणा
याहं प्रविशामि रविं प्रभुम् ॥ ९८ ॥ तदीयः पिङ्गलो देहमुद्धरिष्यति मे ततः । इत्य
सौ मुनिरादित्यं विवेशानिलरूपधृक् । पुर्यष्टकवपुर्भूत्वा भस्त्रापिण्डमिवानिलः ॥ ९९
॥ भगवान्रविरप्येनं हृद्गतं मुनिनायकम् । दृष्ट्वा पिङ्गलमग्रस्थमादिदेशाथ कार्यवित् ॥
१०० ॥ भानुनाथाभ्यनुज्ञातं वीतहव्याभिधं मनः । विवेश पिङ्गलाकारं विन्ध्यकन्द
रगामिनम् ॥ १०१ ॥ पिङ्गलोऽसौ नभस्त्यक्त्वा गत्वा तां विन्ध्यकन्दराम् । उद्धार
धराकोशान्नखनिष्कृत्तभूतालः ॥ १०२ ॥ कलेवरं मुनेः कान्तं मृणालमिव सारसः ॥
१०३ ॥ मौनं पुर्यष्टकमथ स्वं विवेश कलेवरम् । जगाम पिङ्गलो व्योम मुनिश्च विमलं
सरः ॥ १०४ ॥ वीतहव्यो ममज्जाशु सरस्युद्भिन्नपङ्कजे । तत्र स्नात्वा जपं कृत्वा पूज
यित्वा दिवाकरम् । मनोभूषितया तन्वा पूर्ववत्पुनराबभौ ॥ १०५ ॥ मैत्र्या तथा सम
तया परया च शक्त्या सत्प्रज्ञया मुदितया कृपया श्रिया च । युक्तो मुनिः सकलस
ङ्गविमुक्तचेता विन्ध्ये सरित्तटगतो दिवसानि रेमे ॥ १०६ ॥ श्रीवसिष्ठ उवाच ॥ चेत

85A: **ज्वालाजालपरिस्पंदो दग्धेंधन इवानलः** [lies **इवानले***] **॥** – 86 b: Lies **०समालोके** d: **समम्** – 87 a: **०ग्रीव०** c: Hs. **०च्छिला०** – 88 a: **तथैव तिष्ठत०** c: **विंध्यकक्षस्य** – 89 b: **महामुनेः** c: **प्रावृडौघ०** – 90 a: **वर्षत्रययशतेनैवं** b: **माहाद्युतिः** e: **प्राणमय०** f: **प्राणसंयमनं** Nach a/b zusätzlich: **देहो नैव चचालास्य धराकोटरपीडितः ।** (90A) Nach e/f zusätzlich: **नाभूत्प्राणपरिस्पंदः सर्वच्छिद्रावरोधतः ॥** (90B) – 91 b: **हृदयांतरे** c: **यस्य** – 92 a: **कैलासकानने** – 94 b: **चंद्रमौलेश्व०** – 96 c: **०पश्यन्नु** – 97 a/b: **तद्दिदृक्षयैवोद्धर्तुं मग्नदेहे** – 100 d: **०दिदेशाशु** – 102 b: **तां गत्वा** d: **०निष्कृष्ट०** Nach a zusätzlich: **कुंजकंदरसुंदरम् । प्राप विंध्यवनं प्रावृण्णताभ्रांबरभास्वरम् । ददर्श मुनिदेहं तं** (102A) – 106 (Vasantatilakā) a: **तया**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

साकलयामास दृष्टलोकपरावरः । पूर्वमेवेन्द्रियगणो मया परिहृतः स्फुटम् । शेषेऽनु
बद्धसंधानस्तिष्ठाम्यहमतः परम् ॥ १०७ ॥ उदितोऽस्तं गत इव अस्तं गत इवोदितः ।
समः समरसाभासस्तिष्ठामि स्वच्छतां गतः ॥ १०८ ॥ एवं सिद्धः स भगवान्वीतह
व्यो महातपाः । विजहार चिरं कालं जीवन्मुक्ततया तया ॥ १०९ ॥ हेयादेयसमास
ङ्गत्यागादानदृशोः क्षये । वीतहव्यमुनेरासीदिच्छानिच्छातिगं मनः ॥ ११० ॥ विदेह
केवलीभावे सीमान्ते जन्मकर्मणाम् । संसारसङ्गसंत्यागरसासवनवेच्छया ॥ १११ ॥
एकदा स मुनीशानो विवेश गिरिकन्दराम् । बद्धपद्मासनं स्थित्वा तत्रोवाचात्मनात्म
नि ॥ ११२ ॥ राग नीरागतां गच्छ द्वेष निर्द्वेषतां व्रज । भवद्भ्यां सुचिरं कालमिह प्र
क्रीडितं मया ॥ ११३ ॥ इमामपि परां पुण्यां निर्वाणपदवीमहम् । येन विस्मारितस्त
स्मै सुखायास्तु नमो नमः ॥ ११४ ॥ त्वदुत्तप्तेन हे दुःख मयात्मान्विष्ट आदरात् ।
तस्मात्त्वदुपदिष्टोऽयं मार्गो मम नमोऽस्तु ते ॥ ११५ ॥ एकाकिन्यैव शुष्यन्त्या प्रशा
न्ते मयि दीनया । त्वया दुःखं न कर्तव्यं मातस्तृष्णे व्रजाम्यहम् ॥ ११६ ॥ एते भव
न्तः सहजाः प्राक्तनाः सुहृदो मया । क्रमेणाद्योत्कृताः प्राणाः स्वस्ति वोऽस्तु व्रजाम्य
हम् ॥ ११७ ॥ श्रीवसिष्ठ उवाच ॥ एवं कलितवानन्तः प्रशान्तमननैषणः । शनैरुच्चा
रयंस्तारं प्रणवं प्राप्तभूमिकः ॥ ११८ ॥ सबाह्याभ्यन्तरान्भावान्स्थूलान्सूक्ष्मतरानपि ।
त्रैलोक्यसंभवांस्त्यक्त्वा संकल्पैकविनिर्मितान् ॥ ११९ ॥ सह प्रणवपर्यन्तदीर्घनिःस्व
नतन्तुना । जहाविन्द्रियतन्मात्रजालं गन्धमिवानिलः ॥ १२० ॥ ततो जहौ तमोमात्रं
प्रतिभातमिवाम्बरे । उत्तिष्ठत्प्रस्फुरद्रूपं प्राज्ञः कोपलवं यथा ॥ १२१ ॥ प्रतिभातं तत
स्तेजो निमेषार्धं विचार्य सः । जहौ बभूव च तदा न तमो न प्रकाशनम् ॥ १२२ ॥
तामवस्थामथासद्य मनसा तन्मनस्तृणम् । मनागपि प्रस्फुरितं निमेषार्धादशातयत्
॥ १२३ ॥ ततोऽङ्ग संविदं स्वस्थां प्रतिभासमुपागताम् । सद्योजातशमज्ञानसमानक
लनामलाम् ॥ १२४ ॥ निमेषार्धार्धभागेन कालेन कलितां प्रभुः । जहौ चितश्चेत्यद
शां स्पन्दशक्तिमिवानिलः ॥ १२५ ॥ पश्यन्तीपदमासाद्य सत्तामात्रात्मकं ततः । सु
षुप्तपदमालम्ब्य तस्थौ मेरुरिवाचलः । सुषुप्तस्थैर्यमासद्य तुर्यरूपमुपाययौ ॥ १२६ ॥

107 Ohne **श्री॰** a: Hs. **चेतसः** b: Hs. **॰पराभवः** f: **॰स्तिष्ठाम्यचलश्रृंगवत्** Vor a/b zusätzlich: **कदाचिच्छ ममाधातुं पुनरेव मनो मुनिः ।** (107A) Nach c/d: **इदानीं चिंतया नार्थः पुनश्चिंतितया मम ।** (107B) und **अस्ति नास्तीति कलनां भंक्त्वा मृद्वीं लतामिव ।** (107C) – 108A: **प्रबुद्धोऽपि सुषुप्तस्थः सुषुप्तस्थः प्रबुद्धवान् । तुर्यमालंब्य कायांतस्तिष्ठामि स्तंभितस्थितिः ॥** B: **इति संचिंत्य संधाने** [lies **स ध्याने***] **पुनस्तस्थौ दिनानि षट् । ततः प्रबोधमापन्नः क्षणं सुप्त इवाध्वगः ॥** – 109 a: **ततः** – 111 d: BŚ **॰वरेच्छया** c/d: **॰संत्यागे वांछामापातिशायिनीम्** – 112 b: **॰कंदरम्** – c: **॰पद्मासनः** – 113A: **भोगा नमोऽस्तु युष्मभ्यं जन्मकोटिशतान्यहम् । भवद्भिर्लालितो लोके लालकैरिव बालकः ॥** – 115 d: **मम मार्गो** – 115A: **कार्य मित्र मयाद्य त्वं त्यज्यसे चिरबांधवः । अधिगम्यात्मविज्ञानं स्वस्य नाशः कृतस्त्वया ॥** – 116 a: **एकाकिन्या वि॰** d: **मातस्तृष्णे नमोऽस्तु ते** – 116A: **क्षंतव्याः काम भगवन् विपरीतापराधजाः । दोषा उपशमैकांतं व्रजाम्यादिश मंगलम् ॥** B: **नमः सुकृतदेवाय भवतेऽस्तु त्वया पुरा । नरकेभ्यः समुत्तार्य स्वर्गेऽहमभियोजितः ॥** – 118 Ohne **श्री॰** – 119d: **॰विकल्पितान्** – 123 d: **निमेषार्धादथापतत्** – 124 a: **स्वच्छां** c: **॰शिशुज्ञान॰** – 126 d: **गिरिरिवाचलः** e: **सुषुप्ते**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

निरानन्दोऽथ सानन्दः सच्चासच्चापि तत्र सः । अचिन्मयश्चिन्मयश्च नेति नेति यदु
च्यते ॥ १२७ ॥ ततं तत्संबभूवासौ यद्गिरामप्यगोचरः । यच्छून्यवादिनां शून्यं ब्रह्म
ब्रह्मविदां तथा ॥ १२८ ॥ विज्ञानमात्रं विज्ञानविदां यदमलास्पदम् । पुरुषः सांख्यदृ
ष्टीनामीश्वरो योगवादिनाम् ॥ १२९ ॥ शिवः शैवमतस्थानां कालः कालैकवादिनाम् ।
आत्मात्मकस्तद्विदुषां नैरात्म्यं तादृशात्मनाम् । मध्यं माध्यमिकानां च सर्वं सुसम
चेतसाम् ॥ १३० ॥ यत्सर्वशास्त्रसिद्धान्तो यत्सर्वहृदयानुगम् । यत्सर्वं सर्वगं सार्वं य
त्तत्तत्सदसौ स्थितः ॥ १३१ ॥ तदनुत्तमनिःस्पन्दिदीपं यत्तेजसामपि । स्वानुभूत्यैक
मानं च यत्तत्तत्सदसौ स्थितः ॥ १३२ ॥ यदेकं चाप्यनेकं च साञ्जनं च निरञ्जनम् ।
यत्समं चासमं चैव यत्तत्तत्सदसौ स्थितः ॥ १३३ ॥ अजमजरमनाद्यमाद्यमेकं पदम
मलं सकलं च निष्कलं च । स्थित इति स तदा नभःस्वरूपादपि विमलस्थितिरीश्वरः
क्षणेन ॥ १३४ ॥ त्रिंशद्वर्षसहस्राणि स्फुरित्वा स यथासुखम् । वीतहव्यः शशामैव न
पुनर्मनसे मुनिः ॥ १३५ ॥ इत्युपशमप्रकरणे वीतहव्योपाख्यानम् ॥ [२६] ॥ श्रीराम
उवाच ॥ जीवन्मुक्तशरीराणां कथमात्मविदां वर । शक्तयो नेह दृश्यन्ते आकाशग
मनादिकाः ॥ १ ॥ श्रीवसिष्ठ उवाच ॥ अनात्मवानमुक्तोऽपि नभोविहरणादिकम् ।
द्रव्यकर्मक्रियाजालशक्त्या प्राप्नोति राघव ॥ २ ॥ नात्मज्ञस्यैष विषय आत्मज्ञो ह्या
त्मवान्स्वयम् । आत्मनात्मनि संतृप्तो नाविद्यामनुधावति ॥ ३ ॥ ये केचन जगद्भावा
स्तानविद्यामयान्विदुः । कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति ॥ ४ ॥ यस्तु वा
भावितात्मापि सिद्धिजालानि वाञ्छति । स सिद्धिसाधकैर्द्रव्यैस्तानि साधयति क्र
मात् ॥ ५ ॥ द्रव्यमन्त्रक्रियाकालयुक्तयः साधुसिद्धिदाः । परमात्मपदप्राप्तौ नोपकुर्व
न्ति काश्चन ॥ ६ ॥ सर्वेच्छाजालसंशान्तावात्मलाभोदयो हि यः । स कथं सिद्धिवा
ञ्छायां मग्नचित्तेन लभ्यते ॥ ७ ॥ श्रीराम उवाच ॥ ब्रह्मन्नतिचिरं कालं कथं जीव
न्ति योगिनः । एतं मे संशयं छिन्द्धि सर्वब्रह्मविदां वर ॥ ८ ॥ श्रीवसिष्ठ उवाच ॥ प्रा
णानां स्पन्दनात्स्पन्दस्तच्छान्तौ ते दृषत्समाः । यतः स्थिता धारणया तन्न नश्यन्ति
योगिनः ॥ ९ ॥ सबाह्याभ्यन्तरः स्पन्दश्चित्तजो वातजोऽपि वा । न यस्य विद्यते तस्य
दूरस्थौ विकृतिक्षयौ ॥ १० ॥ सबाह्याभ्यन्तरे शान्ते स्पन्दे पवनचेतसोः । धातवः सं

127 a: निरानंदोऽपि – 128 a: ततस्तत्सं° b: °गोचरम् – 132 a/b: यदनुत्तमनिष्पंदं दीपकं तेजसामपि c: °भूत्येक° – 133 c: यत्सर्वं चाप्यसर्वं च d: यद्यत्तत्सदसौ; Hs. स्थितं – 134 (Puṣpitāgrā) a: अजममर° b: Lies परममलं (vgl. ST) d: °रीश्वरो बभूव – 135 c/d: शशामैवम° – Kolophon zu Sarga 26: इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरणे वीतहव्योपाख्यानं नाम सप्तविंशः सर्गः ॥ २७ ॥ – 27.1 Ohne श्री° (2. Aufl.) – 2 Ohne श्री° a: अनात्मविदमु° c/d: द्रव्यमंत्रक्रियाकालशक्त्याप्नोत्येव – 3 b: ह्यात्मदृक्स्वयम् – 3A: आत्मवानिह सर्वस्मादतीतो विगतैषणः । आत्मन्येव हि संतुष्टो न करोति न चेहते ॥ – 6 b: °शक्तयः – 6A: आत्मज्ञस्य तु पूर्णस्य नेच्छा संभवति क्वचित् । यस्येच्छा विद्यते काचित्स सिद्धिं साधयत्यलम् ॥ – 8 Ohne श्री° (2. Aufl.) c: एतन्मे – 9 Ohne श्री° b: Hs. °स्तस्यांतो c: धारणायां – 10 b: वातजोऽथ

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

स्थितिं देहे न त्यजन्ति कदाचन ॥ ११ ॥ ये हि विज्ञातविषया वीतरागा महाधियः । विच्छिन्नग्रन्थयः सर्वे ते स्वतन्त्रास्तनौ स्थितौ ॥ १२ ॥ श्रीराम उवाच ॥ विवेकाभ्युद याच्चित्तस्वरूपेऽन्तर्हिते मुनेः । मैत्र्यादयो गुणाः कुत्र जायन्ते योगिनां वद ॥ १३ ॥ श्रीवसिष्ठ उवाच ॥ द्विविधश्चित्तनाशोऽस्ति सरूपोऽरूप एव च । जीवन्मुक्तः सरूपः स्यादरूपो देहमुक्तजः ॥ १४ ॥ चित्तसत्तेह दुःखाय चित्तनाशः सुखाय तु ॥ १५ ॥ प्राकृतं गुणसंभारं ममेति बहु मन्यते । यत्तु चित्तमतत्त्वज्ञं दुःखितं जीव उच्यते ॥ १६ ॥ सुखदुःखाद्यवष्टब्धमस्मीत्येव विनिश्चलम् । विद्यमानं मनो विद्धि संसारद्रुमदो हदम् ॥ १७ ॥ चेतसः कथिता सत्ता मया रघुकुलोद्वह । अस्य नाशमिदानीं त्वं शृणु प्रश्नविदां वर ॥ १८ ॥ सुखदुःखदशा धीरं साम्यान्न प्रोद्धरन्ति यम् । निःश्वासा इव शैलेन्द्रं चित्तं तस्य मृतं विदुः ॥ १९ ॥ आपत्कार्पण्यमुत्साहो मदो मान्द्यं महोत्सवः । यं नयन्ति न वैरूप्यं तस्य नष्टं मनो विदुः ॥ २० ॥ मनस्तां मूढतां विद्धि यदा नश्य ति सानघ । चित्तनाशाभिधानं हि तदा सत्यमुदेत्यलम् ॥ २१ ॥ मैत्र्यादिभिर्गुणैर्युक्तं भवत्युत्तमवासनम् । भूयोजन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः ॥ २२ ॥ सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते ॥ २३ ॥ अरूपस्तु मनोनाशो यो मयोक्तो रघूद्वह । विदेहमुक्त एवासौ विद्यते निष्कलात्मकः ॥ २४ ॥ समग्राग्र्यगुणाधारमपि सत्त्वं प्र लीयते । विदेहमुक्तावमले पदे परमपावने ॥ २५ ॥ विदेहमुक्तिविषये तस्मिन्सत्त्वक्रि यात्मके । चित्तनाशे विरूपाख्ये न किंचिदपि विद्यते ॥ २६ ॥ न गुणा नागुणास्तत्र न श्रीर्नाश्रीर्न लोलता । न चोदयो नास्तमयो न हर्षामर्षसंविदः ॥ २७ ॥ न तेजो न तमः किंचिन्न संध्यादिर्न रात्रयः । न सत्ता नापि वासत्ता न च सत्यं हि तत्पदम् ॥ २८ ॥ ये हि पारं गता बुद्धेः संसाराम्भोनिधेस्तथा । तेषां तदास्पदं स्फारं पवनाना मिवाम्बरम् ॥ २९ ॥ संशान्तदुःखमजडात्मकमेकसुप्तमानन्दमन्थरमपेतरजस्तमो यत् । आकाशकोशतनवोऽतनवो महान्तस्तस्मिन्पदे गलितचित्तलवा वसन्ति ॥ ३० ॥ श्रीराम उवाच ॥ ब्रह्मन्संसृतिमृद्वीकालताया वितताकृतेः । किं बीजमत्र बीजस्य तस्य किं बीजमुच्यते । अथ तस्यापि किं बीजं बीजं तस्यापि किं भवेत् ॥ ३१ ॥ सर्वमे तत्समासेन पुनर्बोधाभिवृद्धये । सिद्धये ज्ञानसारस्य वद मे वदतां वर ॥ ३२ ॥ श्रीव सिष्ठ उवाच ॥ अन्तर्लीनघनारम्भशुभाशुभमहाङ्कुरम् । संसृतिव्रततेर्बीजं शरीरं विद्धि राघव ॥ ३३ ॥ भावाभावदशाकोशं दुःखरत्नसमुद्गकम् । बीजमस्य शरीरस्य चित्तमा

12 d: स्थिताः – 13 Ohne श्री० (2. Aufl.) – 14 Ohne श्री० c: जीवन्मुक्तौ स्वरूपः d: देहमुक्तिजः – 15A: चित्तसत्तां क्षयं नीत्वा चित्तनाशमुपानयेत् ॥ – 16 d: Hs. दुःखिवज्जीव – 18 c: तस्य – 21 b: ०ति राघव d: सत्वमु० [2. Aufl.: सत्त्वमु०] – 23 b: तत्र हि – 23A: वसंत इव मंजर्यो भांति [2. Aufl.: भ्रान्ति] मैत्र्यादयो गुणाः ॥ – 25 c: विदेहमुक्ते विमले – 26 b: तस्मिंश्चित्तलयात्मके – 28 d: मध्यं – 29 b: संसा राडंबरस्य च – 30 (Vasantatilakā) b: Hs. ०जरस्तमो – 31 Ohne श्री० (2. Aufl.) c: बीजमथ – 32 b: पुनर्बोधविवृद्धये – 33 Ohne श्री० a: ०र्लीनसमारंभ०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

शावशानुगम् ॥ ३४ ॥ द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः । एकं प्राणपरिस्पन्दो द्वितीयं दृढभावना ॥ ३५ ॥ सती सर्वगता संवित्प्राणस्पन्देन बोध्यते । संवित्संरोधनं श्रेयः परमं विद्धि राघव ॥ ३६ ॥ संवित्समुदितैवाशु याति संवेद्यमादरात् । संवेदना दनन्तानि ततो दुःखानि चेतसः ॥ ३७ ॥ सुप्ता पुनरबोधाय संवित्संतिष्ठते यदा । ल ब्धं भवति लब्धव्यं तदा तदमलं पदम् ॥ ३८ ॥ तस्मात्प्राणपरिस्पन्दैर्वासनानोदनै स्तथा । नो चेत्संविदमुच्छूनां करोषि तदजो भवान् ॥ ३९ ॥ संविदुच्छूनतां विद्धि चित्तं तेनेदमाततम् । अनर्थजालमालूनविशीर्णजनजीवकम् ॥ ४० ॥ योगिनश्चित्त शान्त्यर्थं कुर्वन्ति प्राणरोधनम् । प्राणायामैस्तथा ध्यानैः प्रयोगैर्युक्तिकल्पितैः ॥ ४१ ॥ चित्तोपशान्तिफलदं परमं साम्यकारणम् । सुभगं संविदः स्वास्थ्यं प्राणसंरोधनं विदुः ॥ ४२ ॥ ज्ञानवद्भिः प्रकटितामनुभूतां च राघव । चित्तस्योत्पत्तिमपरां वास नाजनितां शृणु ॥ ४३ ॥ दृढभावनया त्यक्तपूर्वापरविचारणम् । यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥ ४४ ॥ भावितं तीव्रसंवेगादात्मना यत्तदेव सः । भवत्याशु महाबाहो विगतेतरसंस्मृतिः ॥ ४५ ॥ तादृग्रूपो हि पुरुषो वासनाविवशीकृतः । संप श्यति यदेवं तत्सद्वस्त्विति विमुह्यति ॥ ४६ ॥ वासनावेगवैवश्यात्स्वरूपं प्रजहाति तत् । भ्रान्तं पश्यति दुर्दृष्टिः सर्वं गदवशादिव ॥ ४७ ॥ असम्यग्दर्शनं यत्स्याद्यदना त्मात्मभावनम् । यदवस्तुनि वस्तुत्वं तच्चित्तं विद्धि राघव ॥ ४८ ॥ दृढाभ्यासपदार्थै कभावनादतिचञ्चलम् । चित्तं संजायते जन्मजरामरणकारणम् ॥ ४९ ॥ यदा न भा व्यते किंचिद्धेयोपादेयरूपि यत् । स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते ॥ ५० ॥ अवासनत्वात्सततं यदा न मनुते मनः । अमनस्ता तदोदेति परमोपशमप्रदा ॥ ५१ ॥ यदा न भाव्यते भावः क्वचिज्जगति वस्तुनि । तदा हृदम्बरे शून्ये कथं चित्तं प्रजायते ॥ ५२ ॥ एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव । यद्भावनं वस्तुनोऽन्तर्व स्तुत्वेन रसेन वा ॥ ५३ ॥ न कांचित्कलनायोग्यां दृशं भावयतस्ततः । आकाशको शस्वच्छस्य कुतश्चित्तोदयो भवेत् ॥ ५४ ॥ यदभावनमास्थाय यदभावस्य भावनम् । यद्यथावस्तुदर्शित्वं तदचित्तत्वमुच्यते ॥ ५५ ॥ सर्वमन्तः परित्यज्य शीतलाशयवर्ति यत् । वृत्तिस्थमपि तच्चित्तमसद्रूपमुदाहृतम् ॥ ५६ ॥ घना न वासना यस्य पुनर्जनन कारिणी । जीवन्मुक्तः समः स्वस्थचक्रभ्रमवदास्थितः ॥ ५७ ॥ भ्रष्टबीजोपमा येषां पुनर्जननवर्जिता । वासना रसनिर्हीना जीवन्मुक्ता हि ते स्थिताः ॥ ५८ ॥ सत्त्वरूप परिप्राप्तचित्तास्ते ज्ञानपारगाः । अचित्ता इति कथ्यन्ते देहान्ते व्योमरूपिणः ॥ ५९

34A: चित्तादिदमुदेत्युच्चैः सदसच्चांगजालकम् । यथा चैतत्स्वयं स्वप्नसंभ्रमेष्वनुभूयते ॥ – 35 d: दृढवासना – 35A: यदा प्रस्पंदते प्राणो नाडीसंस्पर्शनोद्यतः । तदा संवेदनमयं चित्तमाशु प्रजायते ॥ – 39 b: ०चोदनै० – 45 d: Hs. ०संसृतिः – 46 c/d: प्रपश्यति यदेवैतत्स० – 47 d: मदवशा० – 48 a/b: असम्यग्दर्शने यद्यदना त्मन्यात्मभावने – 49 a: दृढाभ्यासं – 53 c/d: Hs. वस्तुनांतर्वस्तु० d: च – 54 a: Hs. कांचित्किलना० a/b: न किंचित्कलनायोग्यं दृश्यं भावयतः स्वतः – 55 a: Lies ०मास्थाया – 57 c/d: जीवन्मुक्तः स तत्त्वस्थ श्चक्र० – 58 d: स्मृताः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ द्वे बीजे राम चित्तस्य प्राणस्पन्दनवासने । एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि न श्यतः ॥ ६० ॥ वासनावशतः प्राणस्पन्दस्तेन च वासाना । जायते चित्तबीजस्य तेन बीजाङ्कुरक्रमः ॥ ६१ ॥ वासनाप्राणपवनस्पन्दयोरनयोर्द्वयोः । संवेद्यं बीजमित्युक्तं स्फुरतस्तौ यतस्ततः ॥ ६२ ॥ संवेद्यसंपरित्यागात्प्राणस्पन्दनवासने । समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः ॥ ६३ ॥ संविदं विद्धि संवेद्यबीजं धीर तया विना । न संभवति संवेद्यं तैलहीनस्तिलो यथा ॥ ६४ ॥ न बहिर्नान्तरे किंचित्संवेद्यं विद्यते पृथक् । संवित्स्फुरन्ती संकल्प्य संवेद्यं पश्यति स्वतः ॥ ६५ ॥ संवेद्यं संविदो राम मार्जनीयं प्रयत्नतः ॥ ६६ ॥ तदमार्जनमात्रं हि महासंसारतां गतम् । तत्प्रमार्जनमात्रं तु मोक्ष इत्यनुभूयते ॥ ६७ ॥ संवेदनमनन्ताय दुःखाय जननात्मने । असंवित्तिरजाड्यस्था सुखाय सुमहात्मने ॥ ६८ ॥ अजडो गलितानन्दस्त्यक्तसंवेदनोद्भवः । असंवेद्यप्रबुद्धात्मा यः स सत्यं रघूद्वह ॥ ६९ ॥ श्रीराम उवाच ॥ अजडश्चाप्यसंवित्तिः कीदृशो भवति प्रभो । असंवित्तौ च जाड्यं तत्कथं वा विनिवार्यते ॥ ७० ॥ श्रीवसिष्ठ उवाच ॥ यः सर्वत्रानवस्थास्थो विश्रान्तास्थो न कुत्रचित् । जीवो न विन्दते किंचिदसंविद जडो हि सः ॥ ७१ ॥ संविद्वस्तुदशालम्बः यस्य चेह न विद्यते । सोऽसंविदजडः प्रोक्तः कुर्वन्कार्यशतान्यपि ॥ ७२ ॥ संवेद्येन हृदाकाशो मनागपि न लिप्यते । यस्यासावजडोऽसंविज्जीवन्मुक्तश्च कथ्यते ॥ ७३ ॥ यदा न भाव्यते किंचिन्निर्वासनतयात्मनि । बालमूकादिविज्ञानमिव च स्थीयते स्थिरम् ॥ ७४ ॥ तदा जाड्यविनिर्मुक्तमसंवेदनमाततम् । आश्रितं भवति प्राज्ञ यस्माद्भूयो न लिप्यते ॥ ७५ ॥ समस्तवासनात्यागान्निर्विकल्पसमाधितः । नीलत्वमिव खात्स्फार आनन्दः संप्रवर्तते ॥ ७६ ॥ योगिनस्तत्र लीनस्य निःसंवेदनसंविदः । तन्मयत्वादनाद्यन्ते तदप्यन्तर्विलीयते ॥ ७७ ॥ गच्छंस्तिष्ठन्स्पृशञ्जिघ्रन्नपि तेन स उच्यते । अजडो गलितानन्दस्त्यक्तसंवेदनः सुखी ॥ ७८ ॥ एतां दृष्टिमवष्टभ्य कष्टया यत्नचेष्टया । तरेद्दुःखाम्बुधेः पारमपारगुणसागरः ॥ ७९ ॥ अथास्याः संविदो राम सन्मात्रं बीजमुच्यते । सन्मात्राद्यदुदेत्येषा प्राकाश्यमिव तेजसः ॥ ८० ॥ द्वे रूपे तत्र सत्ताया एकं नानाकृति स्थितम् । द्वितीयमेकरूपं तु विभागोऽयं तयोः शृणु ॥ ८१ ॥ घटता पटता तत्ता त्वत्ता मत्तेति कथ्यते । सत्तारूपं विभागेन यत्तन्नानाकृति स्मृतम् ॥ ८२ ॥ विशेषं संपरित्यज्य सन्मात्रं यदलेपकम् । एकरूपं माहारूपं सत्तायास्तत्पदं विदुः ॥ ८३ ॥ कालसत्ता कलासत्ता वस्तुसत्तेयमित्यपि । विभागकलनां त्यक्त्वा सन्मात्रैकपरो भव ॥ ८४ ॥ कालसत्ता स्वस

65 c: संवित्स्फुरति – 66 Fehlt (vgl. 66B); statt dessen: 66A: स्वप्ने यथात्ममरणं तथा देशांतरस्थितिः । स्वचमत्कारयोगेन संवेद्यं संविदस्तथा ॥ B: पूर्वदृष्टमदृष्टं वा यदस्याः प्रतिभासते । संविदस्तत्प्रयत्नेन मार्जनीयं विजानता ॥ – 68 d: सुखायाजननात्मने – 69 b: °संवेदनो भव d: यस्तु स त्वं रघूद्वह – 70 Ohne श्री° (2. Aufl.) a/b: असंवित्तिरजाड्यस्था कीदृशी – 71 Ohne श्री° – 72 b: स यस्येह न विद्यते – 73 a: हृदाकाशं d: °ज्जीवन्मुक्तः स उच्यते – 76 a/b: °वासनां त्यक्त्वा नि° c: Hs. बालत्वमिव c/d: खे स्फारमानंदित्वं प्रवर्तते – 79 b: Hs. कष्टयन्नावचेष्टया d: °सागरम् – 80 a: अथास्यां

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

त्ता च प्रोन्मुक्तकलना सती । यद्यप्युत्तमसद्रूपा तथाप्येषा न वास्तवी ॥ ८५ ॥ विभा
गकलना यत्र विभिन्नपददायिनी । नानाताकारणं दृष्ट्वा तत्कथं पावनं भवेत् ॥ ८६
॥ सत्तासामान्यमेवैकं भावयन्केवलं वपुः । परिपूर्णपरानन्दी तिष्ठाभरितदिग्भरः ॥
८७ ॥ सत्तासामान्यमात्रस्य या कोटिः कोविदेश्वर । सैवास्य बीजतां याता तत एत
त्प्रवर्तते ॥ ८८ ॥ सत्तासामान्यपर्यन्तं यत्तत्कलनयोज्झितम् । पदमाद्यमनाद्यन्तं तस्य
बीजं न विद्यते ॥ ८९ ॥ संवित्संलीयते तत्र निर्विकारं च तिष्ठति । भूयो नावर्तते दुः
खे तत्र लब्धपदः पदे ॥ ९० ॥ तद्धेतुः सर्वहेतूनां तस्य हेतुर्न विद्यते । स सारः सर्वसा
राणां तस्मात्सारो न विद्यते ॥ ९१ ॥ तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः । इमा
स्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥ ९२ ॥ तदमलमजरं तदात्मतत्त्वं तदवगतावु
पशान्तिमेति चेतः । अवगतविततैकतत्स्वरूपो भवभयमुक्तपदोऽसि तच्चिराय ॥ ९३
॥ श्रीराम उवाच ॥ एतानि तानि प्रोक्तानि त्वया बीजानि मानद । कतमस्य प्रयोगे
ण शीघ्रं तत्प्राप्यते पदम् ॥ ९४ ॥ श्रीवसिष्ठ उवाच ॥ एतेषां दुःखबीजानां प्रोक्तं य
द्यन्मयोत्तरम् । तस्य तस्य प्रयोगेण शीघ्रमासाद्यते पदम् ॥ ९५ ॥ सत्तासामान्यको
टिस्थे द्रागित्येव पदे यदि । पौरुषेण प्रयत्नेन बलात्संत्यज्य वासनाम् ॥ ९६ ॥ स्थितिं
बध्नासि तत्त्वज्ञ क्षणमप्यक्षयात्मिकाम् । क्षणेऽस्मिन्नेव तत्साधुपदमासादयस्यलम् ॥
९७ ॥ सत्तासामान्यरूपे वा करोषि स्थितिमङ्ग चेत् । तत्किंचिदधिकेनेह यत्नेनाप्नो
षि तत्पदम् ॥ ९८ ॥ संवित्तत्त्वे कृतध्यानो यदि तिष्ठसि राघव । तद्यत्नेनाधिकेनोच्चैरा
सादयसि तत्पदम् ॥ ९९ ॥ संवेद्ये केवले ध्यानं न कार्यं रघुनन्दन ॥ १०० ॥ वासना
संपरित्यागे यदि यत्नं करोषि वा । तत्ते शिथिलतां यान्ति सर्वाधिव्याधयः क्षणात् ॥
१०१ ॥ पूर्वेभ्यस्तु प्रयत्नेभ्यो विषमोऽयं हि संस्मृतः । दुःसाधो वासनात्यागः सुमेरू
न्मूलनादपि ॥ १०२ ॥ यावद्विलीनं न मनो न तावद्वासनाक्षयः । न क्षीणा वासना
यावच्चित्तं तावन्न शाम्यति ॥ १०३ ॥ यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः । या
वन्न चित्तोपशमो न तावत्तत्त्ववेदनम् ॥ १०४ ॥ यावन्न वासनानाशस्तावत्तत्त्वागमः
कुतः । यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षयः ॥ १०५ ॥ तत्त्वज्ञानं मनोनाशो वास
नाक्षय एव च । मिथः कारणतां गत्वा दुःसाधानि स्थितान्यतः ॥ १०६ ॥ तस्माद्रा
घव यत्नेन पौरुषेण विवेकिना । भोगेच्छां दूरतस्त्यत्वा त्रयमेतत्समाश्रयेत् ॥ १०७ ॥
त्रय एते समं यावन्न स्वभ्यस्ता मुहुर्मुहुः । तावन्न पदसंप्राप्तिर्भवत्यपि समाशतैः ॥

86 c: **नानात्वकारणं**; Hs. **दृष्ट**, lies **दृष्टा*** – 87 b: **विभुम्** d: **तिष्ठापूरित॰** – 89 a: **॰पर्यंते** – 90 a: **तत्र सत्ता लयं याति** c: **दुःखं** d: **लब्धपदः पुनः** – 91 c: Hs. **संसारः** – 93 (Puṣpitāgrā) c: Hs. **॰विमतैक॰** – 94 Ohne **श्री॰** (2. Aufl.) d: **शीघ्रमासाद्यते** – 95 Ohne **श्री॰** – 96 d: **वासनाः** – 97 a: Hs. **बध्नाति** d: Hs. **॰सादयत्यलम्** – 100A (vgl. 102c/d): **संवेद्ये वासनात्यागः सुमेरून्मूलनादपि ॥** B (vgl. 103): **यावद्विलीनं न मनो न तावद्वासनाक्षयः । न क्षीणा वासना ध्यानं न संभवति राघव ॥** C: **सर्वत्र संभवादस्याः संवित्तेरेव सर्वदा ॥** – 102 c: **दुःसाध्यो** – 103 c/d: **यावत्तावच्चित्तं न शाम्यति** – 104 b: **न तावच्चित्तसंशयः** – 106 d: **दुःसाध्यानि** – 107 b: **विवेकतः** c: **दूरतः कृत्वा** – 108 c: **तत्त्वसंप्राप्ति॰**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

१०८ ॥ वासनाक्षयविज्ञानमनोनाशा महामते । समकालचिराभ्यस्ता भवन्ति फल
दा मुनेः ॥ १०९ ॥ एकैकशो निषेव्यन्ते यद्येते चिरमप्यलम् । तन्न सिद्धिं प्रयच्छन्ति
मन्त्राः संकीलिता इव ॥ ११० ॥ त्रिभिरेभिश्चिराभ्यस्तैर्हृदयग्रन्थयो दृढाः । निःशङ्क
मेव त्रुट्यन्ति बिसच्छेदाद्गुणा इव ॥ १११ ॥ जन्मान्तरशताभ्यस्ता राम संसारसंस्थि
तिः । सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥ ११२ ॥ वासनासंपरित्याग
समं प्राणनिरोधनम् । विदुस्तत्त्वविदस्तस्मात्तदप्येवं समाहरेत् ॥ ११३ ॥ वासनासंप
रित्यागाच्चित्तं गच्छत्यचित्तताम् । प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु ॥ ११४
॥ प्राणायामसमाभ्यासैर्युक्त्या च गुरुदत्तया । आसनाशनयोगेन प्राणस्पन्दो निरु
ध्यते ॥ ११५ ॥ असङ्गव्यवहारित्वाद्भवभावनवर्जनात् । शरीरनाशदर्शित्वाद्वासना
न प्रवर्तते ॥ ११६ ॥ वासनाभिभवे नष्टे न चित्तं संप्रवर्तते ॥ ११७ ॥ यः प्राणपवन
स्पन्दश्चित्तस्पन्दः स एव हि । प्राणस्पन्दजये यत्नः कर्तव्यो धीमतोच्चकैः ॥ ११८ ॥
उपविश्योपविश्यैकचित्तकेन मुहुर्मुहुः । न शक्यते मनो जेतुं विना युक्तिमनिन्दि
ताम् । अङ्कुशेन विना मत्तं यथा दुष्टमतङ्गजम् ॥ ११९ ॥ अध्यात्मविद्याधिगमः सा
धुसंगम एव च । वासनासंपरित्यागः प्राणस्पन्दनिरोधनम् । एतास्ता युक्तयः पुष्टाः
सन्ति चित्तजये किल ॥ १२० ॥ सतीषु युक्तिष्वेतासु हठान्नियमयन्ति ये । चेतस्ते
दीपमुत्सृज्य विनिघ्नन्ति तमोऽञ्जनैः ॥ १२१ ॥ विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो
जयम् । ते निबध्नन्ति नागेन्द्रमुन्मत्तं बिसतन्तुभिः ॥ १२२ ॥ संवेद्यवर्जितमनुत्तममा
द्यमेकं संवित्पदं विकलनं कलयन्महात्मन् । हृद्येव तिष्ठ कलनारहितः क्रियां तु कुर्व
न्नकर्तृपदमेत्य समोदितश्रीः ॥ १२३ ॥ श्रीवसिष्ठ उवाच ॥ मनागपि विचारेण चेत
सस्तस्य निग्रहः । मनागपि कृतो येन तेनाप्तं जन्मनः फलम् ॥ १२४ ॥ विचारकणि
का यैषा हृदि स्फुरति पेलवा । एषैवाभ्यासयोगेन प्रयाति शतशाखताम् ॥ १२५ ॥
अगृहीतमहापीठं विचारकुसुमद्रुमम् । चिन्तावात्या विधुन्वन्ति न स्थिरस्थितिसुस्थि
तम् ॥ १२६ ॥ गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा । न विचारपरं चेतो य
स्यासौ मृत उच्यते ॥ १२७ ॥ किमिदं स्याज्जगत्किं स्यादहमित्यनिशं शनैः । विचार
याध्यात्मदृशा स्वयं वा सज्जनैः सह ॥ १२८ ॥ विचारोऽध्यात्मविज्ञानं ज्ञाने सङ्गं वि
दुर्बुधाः । ज्ञेयं तस्यान्तरे वास्ति माधुर्यं पयसो यथा ॥ १२९ ॥ अपवित्रमपथ्यं च

109 c: समकालं समभ्यस्ता d: Hs. मुने – 110 d: संकीर्तिता – 115 a: ०दृढाभ्यासै० – 116a: निःसंग० – 117A: संशांतपवनस्पंदे यथा पांसुर्नभःस्थले ॥ – 119 e: मत्तो f: ०मतंगजः – 120 e: एतास्तु – 120A: आभिस्तज्जीयते क्षिप्रं धाराभिरिव भूरजः ॥ – 121 d: Hs. तमो घनैः – 122A: मतिराल्नशीर्णांगी यदीया पेलवांगिका । न क्वचियाति विश्वासं मृगी ग्रामगता यथा ॥ B: कालं यज्ञतपोदानतीर्थदेवार्चनभ्रमैः । चिरमाधिशतोपेताः क्षपयंति मृगा इव ॥ C: तस्मादेतां परित्यज्य दुर्दृष्टिं रघुनंदन । शुद्धां संविदमाश्रित्य वीतरागः स्थिरो भव ॥ – 123 (Vasantatilakā) d: शमोदित० – 124 Ohne श्री० b: चेतसः स्वस्य – 126 a: आगृहीतं महापीठं c: Hs. चिंत्या० – 127 d: मृत एव सः – 129 a: ०विद्यानां b: ज्ञानमंग – 129A: सम्यग्ज्ञानसमालोकः पुंसो [lies ०लोकपुंसो] ज्ञेयसमः स्वयम् । न बिभेति न चादत्ते वैवश्यं न च दीनताम् । भवत्यापीतमैरेयः सदा मदमयो यथा ॥ B: समं चिद्रूपममलं ज्ञेयं ब्रह्म परं [1. Aufl. परां] विदुः । ज्ञानाभिगममात्रेण

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

विषसंपर्कदूषितम् । भुक्त्वा जरयति क्षिप्रं क्लिष्टं नष्टं च मृष्टवत् ॥ १३० ॥ विषप्रति
विषाकल्कक्षीरेषु सलिलेऽन्धसि । असक्तबुद्धिस्तत्त्वज्ञो भवत्यास्वादने समः ॥ १३१ ॥
जीवितस्यापहर्तारं दातारं चैकरूपया । दृष्ट्या प्रसादमाधुर्यशालिन्या परिपश्यति ॥
१३२ ॥ स कस्यचिन्नो कदाचिदक्षस्य विषयस्थितौ । ददाति प्रसरं साधुराधिप्रोज्झि
तया धिया ॥ १३३ ॥ अतत्त्वज्ञमविश्रान्तमलब्धात्मानमस्थितिम् । निगिरन्तीन्द्रि
याण्याशु हरिणा इव पल्लवम् ॥ १३४ ॥ सङ्गः कारणमर्थानां सङ्गः संसारकारणम् ।
सङ्गः कारणमाशानां सङ्गः कारणमापदाम् ॥ १३५ ॥ सङ्गत्यागं विदुर्मोक्षं सङ्गत्या
गादजन्मता ॥ १३६ ॥ श्रीराम उवाच ॥ सर्वसंशयनीहारशरन्मारुत हे मुने । सङ्गः
किमुच्यते ब्रूहि समासेन मम प्रभो ॥ १३७ ॥ श्रीवसिष्ठ उवाच ॥ भावाभावपदार्था
नां हर्षामर्षविकारदा । मलिना वासना यैषा सा सङ्ग इति कथ्यते ॥ १३८ ॥ जीव
न्मुक्तशरीराणां न पुनर्जन्मकारिणीम् । मुक्तां हर्षविषादाभ्यामसङ्गां वासनां विदुः ॥
१३९ ॥ अजीवन्मुक्तरूपाणां दीनानां मूर्खचेतसाम् । कथ्यते सङ्गशब्देन वासना भ
वकारिणी ॥ १४० ॥ हर्षामर्षविषादाभ्यां यदि गच्छसि नान्यताम् । वीतरागभयक्रो
धस्तदसङ्गोऽसि राघव ॥ १४१ ॥ दुःखैर्न म्लानिमायासि यदि हृष्यसि नो सुखैः ।
आशावैवश्यमुत्सृज्य तदसङ्गोऽसि राघव ॥ १४२ ॥ संपद्यापदि चैवात्मा यदि ते ल
क्ष्यते समः । यथाप्राप्तानुवर्ती च तदसङ्गोऽसि राघव ॥ १४३ ॥ सदा समग्रेऽपि हि
वस्तुजाते समाशयो ह्यन्तरदीनसत्त्वः । यदेव किंचित्प्रकृतं तदेव कुर्वन्नसङ्गं सुखमा
स्व राम ॥ १४४ ॥ [२७] ॥ इति मोक्षोपाय उपशमप्रकरणे ॥ श्रीवसिष्ठ उवाच ॥
दिक्कालाद्यनवच्छिन्नमदृष्टोभयकोटिकम् । चिन्मात्रमक्षयं शान्तमेकं ब्रह्मास्ति नेतरत्
॥ १ ॥ इति मत्वाहमित्यन्तर्मुक्तामुक्तवपुर्महान् । एकरूपः प्रशान्तात्मा मौनी स्वात्म
सुखो भव ॥ २ ॥ यावदज्ञानकलना यावदब्रह्मभावना । यावदास्था जगज्जाले तावच्चि
त्तादिकल्पना ॥ ३ ॥ नास्ति चित्तं न चाविद्या न मनो न च जीवकः । एताश्च कलना
राम कृता ब्रह्मण एव ताः ॥ ४ ॥ देहे यावदहंभावो दृश्येऽस्मिन्यावदात्मता । यावन्म
मेदमित्यास्था तावच्चित्तादिविभ्रमः ॥ ५ ॥ अन्तर्मुखतया सर्वं चिद्वह्नौ त्रिजगत्तृणम् ।
जुह्वतोऽन्तर्निवर्तन्ते मुनेश्चित्तादिविभ्रमाः ॥ ६ ॥ चिदात्मासि निरंशोऽसि पारावार
विवर्जितः । रूपं स्मर निजं स्फारं मास्मृत्या संमितो भव ॥ ७ ॥ य एवातितरां शत्रुः

तत्स्वयं संप्रसीदति ॥ – 130 b: विषसिक्तं मलाद्यपि d: क्लिन्नं; Hs. पृष्टवत् – 132 a: ०तस्यापि हर्तारं c: दृशा – 134 b: Hs. ०मस्थितम् – 136A: संगं त्यज त्वं भावानां जीवन्मुक्तो भवानघ ॥ – 137 (2. Aufl.), 138 Ohne श्री० – 139 a/b: ०शरीराणामपुनर्जन्मकारिणी c/d: मुक्ता हर्षविषादाभ्यां शुद्धा भवति वासना – 140 b: मूढचेतसाम् – 140A: हर्षामर्षविषादानां यदि गच्छसि वश्यताम् । ततो हर्षविषादाभ्यां बंधनी वासना भवेत् ॥ – 141 a: Lies ०विषादेभ्यो*; मुक्तो हर्षविषादाभ्यां (vgl. 139c) – 142 a: ग्लानि० – 143 a: संपद्विपदि – 144 (Upajāti) a: समस्ते d: ०संगः – Kol. nach Sarga 27 (Hs. ohne Sarga-Kol.): इति श्रीवाल्मीकीये मोक्षोपाय उपशमप्रकरण आकाशगत्यभावादिनिरूपणं नामाष्टाविंशः सर्गः ॥ २८ ॥ समाप्तमिदमुपशमप्रकरणम् ॥ ५ ॥ – 28.1 Ohne श्री० (2. Aufl.) c/d: Hs. शांतात्मकं d: ब्रह्मास्मि – 4 b: नास्ति जीवकः – 4A: ब्रह्मैवैकमनाद्यंतमब्धिवत्प्रतिजृंभते ॥ – 7 a: चिदात्मासि निरंशोऽस्मि

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सत्वरं मारणोद्यतः । तदेवाकृत्रिमं मित्रं यः पश्यति स पश्यति ॥ ८ ॥ समूलकाषं क
षति नदी तट इव द्रुमम् । यः सौहृदं मत्सरं च स हर्षामर्षदोषहा ॥ ९ ॥ अध्यात्म
शास्त्रमन्त्रेण तृष्णाविषविषूचिका । क्षीयते भावितेनान्तः शरदा मिहिका यथा ॥
१० ॥ यत्रोपादेयरूपत्वं भावितं स्वेन चेतसा । तद्वचोऽन्तर्विशत्युच्चैस्तप्ते क्षेत्रे यथा
पयः ॥ ११ ॥ तर्जनं गर्जनं मूढाद्धनुर्दण्डगुणादिव । श्रूयते मरणायैव चिद्बोधपरिव
र्जितम् ॥ १२ ॥ तस्मिन्यदधमे दत्तं तत्त्यक्तं सान्द्रकर्दमे । तेन सार्धं कथा या तत्कौ
लेयाह्वानमम्बरे ॥ १३ ॥ अज्ञत्वमापदां निष्ठा का हि नापदजानतः । इयं संसारसर
णिर्वहत्यज्ञप्रसादतः ॥ १४ ॥ यदेव गोष्पदादूरं ज्ञधियः पेलवं जगत् । तदेवापारपर्य
न्तमगाधममहात्मनः ॥ १५ ॥ संवेद्येनापरामृष्टं शान्तं सर्वात्मकं च यत् । तत्संविद
विदाभासमस्तीह कलनोज्झितम् ॥ १६ ॥ समुदेति स्वभूस्तस्मात्कला कलनरूपिणी ।
सूक्ष्मा मध्या तथा स्थूला चेति सा कथ्यते त्रिधा ॥ १७ ॥ सत्त्वं रजस्तम इति चैषैव
प्रकृतिः स्मृता । एषैव संसृतिर्जन्तोरस्याः पारं परं पदम् ॥ १८ ॥ अत्र ते ये त्रयः प्रो
क्ता गुणास्ते त्रिविधाः स्मृताः । नवधैवं विभक्तेयमविद्या गुणरूपिणी ॥ १९ ॥ ऋषयो
मुनयः सिद्धा नागा विद्याधराः सुराः । इति भागमविद्यायाः सात्त्विकं विद्धि राघव
॥ २० ॥ सात्त्विकस्यास्य भागस्य नागा विद्याधरास्तमः । रजस्तु मुनयः सिद्धाः सत्त्वं
देवा हरादयः ॥ २१ ॥ भाग एष त्वविद्याया एवं विद्यात्वमागतः । शुद्धं सत्त्वं ह्यवि
द्याया भागो विद्येति कथ्यते ॥ २२ ॥ राजसी तामसी चेति सृष्टिरेवं त्रिधा त्रिधा ॥
२३ ॥ श्रीराम उवाच ॥ मौर्ख्यमत्यन्तघनतामागतं समवस्थितम् । स्थावरादितनुं प्रा
प्तं कीदृशं भवति प्रभो ॥ २४ ॥ श्रीवसिष्ठ उवाच ॥ अमनस्त्वमसंप्राप्तं मनस्त्वादपि
विच्युतम् । तटस्थं रूपमाश्रित्य स्थितैषा स्थावरेषु चित् ॥ २५ ॥ श्रीराम उवाच ॥ म
नस्त्वाद्विच्युता यत्र संस्थिता स्थावरेषु चित् । तत्रादूरस्थितां मुक्तिं मन्ये वेदविां वर
॥ २६ ॥ श्रीवसिष्ठ उवाच ॥ बुद्धिपूर्वं विचार्येदं यथावस्त्ववलोकनात् । सत्तासामा
न्यबोधो यः स मोक्षः स्यादनन्तकः ॥ २७ ॥ परिज्ञाय परित्यागो वासनानां य उत्त
मः । सत्तासामान्यरूपत्वात्तत्कैवाल्यं परं विदुः ॥ २८ ॥ अन्तः सुप्ता स्थिता मन्दा
यत्र बीज इवाङ्कुरः । वासना तत्सुषुप्तत्वं विद्धि जन्मप्रदं पुनः ॥ २९ ॥ अन्तः संलीन

8 b: मरणो० (2. Aufl.) c: तमेवा० – 9 c: Hs. तत्सौहृदं – 11 a: यत्रोपादेयवाक्यत्वं – 11A: अपर्यालोचितात्मार्था अपरामृष्टसंविदः । स्पंदंते चेतनोन्मुक्तास्तृणवन्मूढबुद्धयः ॥ B: सर्वेषामेव चैतेषां स्थितैवैषा चिदव्यया । किं त्वबोधवशादस्याः परां कृपणतां गताः ॥ – 13 c/d: या सा कौलेय० – 14 a: Hs. अन्यत्व० b: Hs. ०दज्ञानतः – 15 a: गोष्पदाकारं – 16 c/d: तत्सच्चिदानंदमयमस्तीह – 17 a: स्वतस्तस्मा० d: कल्प्यते – 19 a: अत्र ये तु b: गुणास्तेऽपि त्रिधा c: नवधैव – 23A: मौर्ख्यपिंडः स्थावरादिः प्राप्तस्तामससीमताम् ॥ – 24 Ohne श्री० (2. Aufl.) b: समुपस्थितम् – 25 (2. Aufl.), 26 Ohne श्री० – 26A: वसिष्ठ उवाच ॥ सुप्तपुर्यष्टका यत्र चित्स्थिता सुखदायिनी । मूकांधजडवत्तत्र सत्तामात्रेण तिष्ठति ॥ B: श्रीराम [2. Aufl. nur राम] उवाच ॥ सत्ताद्वैततया यत्र संस्थिता स्थावरेषु चित् । तत्रादूरस्थितां मुक्तिं मन्ये वेदविां वर ॥ [vgl. V 26] – 27 Ohne श्री० – 28 b: Hs. यदुत्तमः d: ०त्कैवल्यपदं – 28A: विचार्यार्यैः सहालोक्य शास्त्राण्यध्यात्मभावनात् । सत्तासामान्यनिष्ठत्वं तत्तद्ब्रह्म परं विदुः ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मननं परितः सुप्तवासनम् । सुषुप्तं जडधर्मित्वाज्जन्म दुःखशतप्रदम् ॥ ३० ॥ स्थावरा
दय एते हि समस्ता जडधर्मिणः । सुषुप्तपदमारूढा जन्मयोग्याः पुनः पुनः ॥ ३१ ॥
यत्रास्ति वासनाबीजं तत्सुषुप्तं न सिद्धये । निर्बीजा वासना यत्र तत्तुर्यं सिद्धिदं स्मृ
तम् ॥ ३२ ॥ वासनायास्तथा वह्नेरृणव्याधिद्विषामपि । स्नेहवैरविषाणां च शेषः स्व
ल्पोऽपि बाधते ॥ ३३ ॥ चिच्छक्तिर्वासनाबीजरूपिणी सर्वदेहिनाम् । अस्या अदर्शनं
यत्तदविद्येत्युच्यते बुधैः ॥ ३४ ॥ अविद्यायास्तु भागेन प्रधानेनेतरं दहेत् । तावद्याव
न्मिथो घर्षाद्द्वयं शाम्येच्छिवं भवेत् ॥ ३५ ॥ एतावदेवाविद्यात्वं नेदं ब्रह्मेति निश्चयः ।
एष एव क्षयोऽस्या यद्ब्रह्मेदमिति निश्चयः ॥ ३६ ॥ निश्चयो यो हरादीनां वर्तते हृदि
निर्मलः । ऋषीणां नारदादीनां स ते भवतु राघव ॥ ३७ ॥ श्रीराम उवाच ॥ येनैते
भगवन्धीरा निश्चयेन महाधियः । विशोकाः संस्थितास्तन्मे ब्रह्मन्ब्रूहि सतत्त्वतः ॥
३८ ॥ श्रीवसिष्ठ उवाच ॥ यदिदं किंचिदाभोगि जगज्जालं प्रदृश्यते । तत्सर्वममलं
ब्रह्म बृंहयैतद्व्यवस्थितम् ॥ ३९ ॥ ब्रह्म चिद्ब्रह्म भुवनं ब्रह्म भूतपरंपरा । ब्रह्माहं ब्रह्म म
च्छत्रुर्ब्रह्म मन्मित्रबान्धवाः ॥ ४० ॥ अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् । अन्धं
भुवनमन्धस्य प्रकाशं तु सचक्षुषः ॥ ४१ ॥ सर्वमेव हि ब्रह्मेति भाविते ब्रह्म वै पुमान् ।
पीतेऽमृतेऽमृतमयः को नाम न भवेत्किल ॥ ४२ ॥ आभासमात्रममलं सर्वभूतावबो
धकम् । सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनुभूयते ॥ ४३ ॥ असंस्तुताध्वगालोके मनस्य
न्यत्र संस्थिते । या प्रतीतिरनागस्का तच्चिद्ब्रह्मास्ति सर्वगः ॥ ४४ ॥ सर्वसंकल्पफलदं
सर्वतेजःप्रकाशकम् । सर्वोपादेयसीमान्तं चिदात्मानमुपास्महे ॥ ४५ ॥ प्रशान्तसर्व
संकल्पं विगताखिलकौतुकम् । विरताशेषसंरम्भं चिदात्मानमुपास्महे ॥ ४६ ॥ इति
निश्चयवन्तस्ते महान्तो विगतैनसः । सत्याः सत्ये पदे शान्ते समे सुखमवस्थिताः ॥
४७ ॥ इति पूर्णधियो धीराः समनीरागचेतसः । न निन्दन्ति न नन्दन्ति जीवितं
मरणं तथा ॥ ४८ ॥ श्रीराम उवाच ॥ सम्यग्ज्ञानविलासेन वासनाविलयोदये । जी
वन्मुक्तपदे ब्रह्मन्वद विश्रम्यते कथम् ॥ ४९ ॥ श्रीवसिष्ठ उवाच ॥ संसारोत्तरणे यु
क्तिर्योगशब्देन कथ्यते । आत्मज्ञानं प्रकारोऽस्य प्राणानां संयमस्तथा ॥ ५० ॥ प्रका
रौ द्वावपि प्रोक्तौ योगशब्देन यद्यपि । तथापि रूढिमायातः प्राणयुक्तावसौ भृशम् ॥
५१ ॥ असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः । द्वौ प्रकारौ ततो देवो जगाद
परमः शिवः ॥ ५२ ॥ तत्प्रोक्तं भवते ज्ञानं योगक्रममथो शृणु । अत्र ते कथयिष्यामि

30 c: जडधर्मत्वा० – 31A: यथा बीजेषु पुष्पाणि मृदो राशौ घटा यथा । तथांतः संस्थिताः साधो स्थावरेषु स्ववासनाः ॥ – 33 c: ०वैरि०, Hs. ०वैरं – 33A: निर्दग्धवासनाबीजः सत्तासामान्यरूपवान् । सदेहोऽपि विदेहो वा न भूयो दुःखभाग्भवेत् ॥ – 34 c: अस्यास्त्वदर्शनं – 37 b: हृदि तिष्ठति निर्मलः – 38 Ohne श्री० (2. Aufl.) d: ब्रह्मन्प्रब्रूहि तत्त्वतः – 39 Ohne श्री० (2. Aufl.) d: बृंहदेतद्व्य० – 41 d: सुचक्षुषः – 44 a: Hs. ०गालोगे d: ०द्ब्रह्मास्मि – 46 c: विगता० – 48 c: न नंदंति न निंदंति – 49 Ohne श्री० (2. Aufl.) Nach a/b zusätzlich: जीवन्मुक्तपदे ब्रह्मन्नूनं विश्रांतवानहम् । प्राणस्पंदनिरोधेन वासनाविलयोदये । (49A) – 50 Ohne श्री० c: ०ज्ञानप्र० – 52 c: प्रकारौ द्वौ

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

वृत्तान्तं परमाद्भुतम् ॥ ५३ ॥ अहं कदाचिदास्थाने स्वर्गेऽतिष्ठं शतक्रतोः । कथाप्रसङ्गे
कस्मिंश्चिदथ तत्राभ्युवाच ह । शातातपो नाम मुनिः प्रस्तावे चिरजीविनाम् ॥ ५४
॥ मेरोरीशानकोणस्थे पद्मरागमये दिवि । अस्ति कल्पतरुः श्रीमान्शृङ्गे सर्वमनोहरे ॥
५५ ॥ तस्य कल्पतरोर्मूर्ध्नि दक्षिणे स्कन्धकोटरे । कलधौतलताप्रोते विद्यते विमला
लयः । तस्मिन्निवसति श्रीमान्भुशुण्डो नाम वायसः ॥ ५६ ॥ स यथा जगतां कोशे
जीवतीह सुराश्चिरम् । चिरजीवी तथा स्वर्गे न भूतो न भविष्यति ॥ ५७ ॥ स दीर्घा
युः स नीरोगः स श्रीमान्स महामतिः । स विश्रान्तमतिः शान्तः स कान्तः काल
कोविदः । इति तेन भुशुण्डोऽसौ भूयः पृष्टेन वर्णितः ॥ ५८ ॥ कथावसरसंशान्तावथ
याते सुरव्रजे । भुशुण्डविहगं द्रष्टुमहं यातः कुतूहलात् ॥ ५९ ॥ भुशुण्डः संस्थितो यत्र
मेरोः शृङ्गे तमुत्तमे । कल्पद्रुमहमद्राक्षं निमेषार्धेन राघव ॥ ६० ॥ तस्य कक्षेषु कुञ्जेषु
लतापत्रेषु पर्वसु । पुष्पेष्वालयसंलीनान्विहगान्दृष्टवानहम् ॥ ६१ ॥ निशानाथकला
खण्डमृणालशकलैर्धितान् । विरञ्चिरथ हंसानां पोतकान्सामगायिनः ॥ ६२ ॥ उद्गी
र्णमन्त्रनिचयान्स्वाहाकारनिभस्वनान् । शुकान्काश्यानवाञ्छयामाञ्छिशूञ्छिखिशि
खाशिखान् ॥ ६३ ॥ गौरीरक्षितबर्हौघान्कौमारान्वरबर्हिणः । स्कन्दोपन्यस्तनिःशेष
शैवविज्ञानकोविदान् ॥ ६४ ॥ तत्र पश्याम्यहं यावदेकत्र स्कन्धकोटरे । अपरिक्षुभि
ताकाराः सभायां वायसाः स्थिताः ॥ ६५ ॥ तेषां मध्ये स्थितः श्रीमान्भुशुण्डः प्रोन्न
ताकृतिः । परिपूर्णमना मानी समः सर्वाङ्गसुन्दरः ॥ ६६ ॥ प्राणस्पन्दावधानेन नित्य
मन्तर्मुखः सुखी । प्रसन्नगम्भीरमनाः पेशलः स्निग्धमुग्धवाक् ॥ ६७ ॥ अथ तस्याह
मपतं दीप्यमानवपुः पुरः । चुक्षोभ वायसः स्थाननीलोत्पलसरः क्षणम् ॥ ६८ ॥ अश
ङ्कितमपि प्राप्तं ददर्श मामनन्तरम् । भुशुण्डस्तु वसिष्ठोऽयं प्राप्त इत्यवबुद्धवान् ॥ ६९
॥ पत्रपुञ्जात्समुत्तस्थौ मेघशाव इवाचलात् । हे मुने स्वागतमिति प्रोवाच मधुराक्षरम्
॥ ७० ॥ संकल्पमात्रजाताभ्यं कराभ्यां कुसुमाञ्जलिम् । मह्यमाशु तदैवादान्मेघो है
ममिवोत्करम् ॥ ७१ ॥ इदमासनमित्युक्त्वा नवं कल्पतरुच्छदम् । उपानिन्ये महाबु
द्धिः स्वयमेव खगाधिपः ॥ ७२ ॥ तस्मिन्कल्पलतापुञ्ज उपविष्टोऽहमासने ॥ ७३ ॥

54 Nach a/b zusätzlich: **श्रुतवान्नारदादिभ्यः कथास्ताश्चिरजीविनाम् ।** (54A) – 55 b: **पद्मरागमयोद्धिदि** d: **०मनोरमे** – 56 d: **विमलाशयः** f: Hs. **०न्भुसंड०** – 56A: **वीतरागो बृहत्कोशो ब्रह्मेव निजपंजरे** [lies **०पंकजे** *] **॥** – 57 b: Hs. **जीवंतीह** c: **चिरंजीवी** – 58 e: Hs. **भुसुंडो** – 58A: **यथा च देवदेवानां** [lies **यथावदेव देवानां** *] **सभायां सत्यमुक्तवान् ॥** – 59 c: Hs. **भुसंड०**; **भुशुंडं विहगं** – 60 a: Hs. **भुसंडः** b: **शृंगोत्तमोत्तमे** c: Nach Lf, Hs. **कल्पांगम०** c/d: **कल्पद्रुमस्थमद्राक्षं शाखाचक्रमिव स्थितम्** – 61 a: **कच्छेषु** c: Hs. **पुण्ये०** – 62 c: **विरिंचि०** – 63 b: Hs. **०निजस्वनान्** c/d: **शुकान्काकान्कोकिलांश्च पक्षिणोऽन्यान नेकशः** – 64 a: **गौरीकबरबर्हौघा०** – 65 a/b: **यावदेकांते** – 66 b: Hs. **भुसंडः** c: **मौनी** – 67 d: **स्निग्ध वाक्सुधीः** – 68 c: **वायसं स्थानं**; lies **वायसास्थानं** * – 69 b: Hs. **दर्शनात्मानमंतरं** c: Hs. **भुसंड०** d: Hs. **इत्यवबुद्धिमान्** – 70 d: Hs. **मधुराकृतिः** – 70A (= 74c/d) **मामुवाच महातेजाः सौहार्दान्मधुराक्षरम् ॥** – 73 a/b: **०पुंजे ह्युपविष्टो** b: Hs. **उपविष्टं महासने** Vor a/b zusätzlich: **समंतात्खगवृंदेषु दर्शनोन्मुखदृष्टिषु ।** (73A)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अथ पाद्यादि संपाद्य भुशुण्डस्तुष्टमानसः । मामुवाच महातेजाः सौहार्दान्मधुराक्षरम् ॥ ७४ ॥ अहो भगवतास्माकं प्रसादो दर्शितश्चिरात् । दर्शनामृतसेकेन यत्सिक्ताः सद्रुमा वयम् ॥ ७५ ॥ किमर्थमद्यागमनक्लेशेनात्मा कदर्थितः । वचनश्रवणोत्काना माज्ञां नो दातुमर्हसि ॥ ७६ ॥ त्वत्पाददर्शनादेव सर्वं ज्ञातं महामुने । चिरजीवितचर्चाभिर्वयं वः स्मृतिमागताः ॥ ७७ ॥ ज्ञातत्वदागमोऽप्येवं त्वां पृच्छामीह यन्मुने । भवद्वाक्यामृतास्वादवाञ्छा तत्प्रतिजृम्भते ॥ ७८ ॥ इत्युक्तवानसौ पक्षी भुशुण्डश्चिरजीवितः । त्रिकालामलसंवेदी तत्र प्रोक्तमिदं मया ॥ ७९ ॥ श्रीवसिष्ठ उवाच ॥ विहंगम महाराज सत्यमेतत्त्वयोच्यते । द्रष्टुमभ्यागतोऽस्म्यद्य त्वामेव चिरजीविनम् ॥ ८० ॥ तदेनं संशयं छिन्द्धि भगवन्मम तत्त्वतः । कस्मिन्कुले भवाञ्जातो ज्ञातज्ञेयः कथं भवान् ॥ ८१ ॥ कियदायुश्च ते साधो वृत्तं स्मरसि किं च वा । केनायं वा निवासस्ते निर्दिष्टो दीर्घदर्शिना ॥ ८२ ॥ अथ राम भुशुण्डोऽसौ न प्रहृष्टो न मन्दधीः ॥ ८३ ॥ यत्पृच्छसि मुने सर्वं शृणु त्वं कथयाम्यहम् । इत्युक्त्वा विहगाधीशः सर्वं कथितवानिदम् ॥ ८४ ॥ भुशुण्ड उवाच ॥ अस्त्यस्मिञ्जगति ज्येष्ठः सर्वनाकनिवासिनाम् । देवदेवो हरो नाम देवदेवाभिवन्दितः ॥ ८५ ॥ शिरःखुराः खुरकराः करदन्ता मुखोदराः । ऋक्षोष्ट्राजेभवक्त्राश्च प्रमथा यस्य लालकाः ॥ ८६ ॥ यथा गणास्तथैवान्याः परिवारोऽस्य मातरः । वसन्ति गिरिकूटेषु व्योम्नि लोकान्तरेषु च । अटवीषु श्मशानेषु शरीरेषु च देहिनाम् ॥ ८७ ॥ जया च विजया चैव जयन्ती चापराजिता । सिद्धा रक्ता च शुक्ला च उत्पला चेति देवताः ॥ ८८ ॥ सर्वासामेव मातॄणामष्टावेताश्च नायिकाः । आसामनुगतास्त्वल्पास्तासामनुगताः पराः ॥ ८९ ॥ तासां मध्ये महार्हाणां मातॄणां मुनिनायक । अलम्बुषेति विख्याता माता मानद विद्यते ॥ ९० ॥ वज्रासितुण्डश्चण्डाख्य इन्द्रनीलाचलोपमः । तस्यास्तु वाहनं काको वैष्णव्यो गरुडो यथा ॥ ९१ ॥ इत्यष्टैश्वर्ययुक्तास्ता मातरो रुद्रचेष्टिताः । कदाचिन्मिलिता व्योम्नि सर्वाः केनापि हेतुना ॥ ९२ ॥ उत्सवं परमं चक्रुः परमर्द्धिप्रकाशकम् । जहसुर्ननृतुश्चैव पपुरुच्चैर्जगुस्तथा ॥ ९३ ॥ इत्युत्सवे वर्तमाने तासां वाहास्ततथोत्तमाः । तथैव मत्ता जहसुर्ननृतुः पपुरासवम् ॥ ९४ ॥ तत्रैकत्रासवोन्मत्ताः क्वचिन्ननृतुरम्बरे । रथहंस्यः सिता ब्राह्म्यः काकश्चालम्बुषारथः ॥ ९५ ॥ संजातरतयस्तत्र सर्वहंस्यो मदाकुलाः । रेमिरे सह

74 a: अर्घ्यपाद्यादि b: Hs. भुसुंड० d: सौहार्दमधुराक्षरम् – 75 भुशुंड उवाच ॥ c: ०मृतमेघेन – 76 a: ०गमनं c: Hs. वचनं – 77 b: मया मुने – 78 a: Hs. ०गमेऽप्येवं b: यत्त्वां पृच्छाम्यहं मुने d: ०वांछैव मयि जृंभते – 79 b: Hs. भुसुंड० – 80 Ohne श्रीवसिष्ठ उवाच ॥ – 81 a: तदेवं – 82 b: Hs. स्मरति किंचन – 83 b: वक्रधीः – 84 b: शृणु तत्कथया० Nach a/b zusätzlich: भवादृशामिमामाज्ञां को विलंघयितुं क्षमः । (84A) – 85 Hs. भुसुंड a: श्रेष्ठः – 86 c: Hs. entstellt – 87 b: परिवारा हि मातरः e: अवटेषु Nach a/b zusätzlich: नृत्यंति मातरस्तस्य पुरो भूतगणा नताः । (87A) – 88 c: रक्ताऽलंबुषा च – 89 b: ०मष्टावेतास्तु c: ०नुगतास्त्वन्या० – 90 c: Hs. अलंबुसेति – 91 a: वज्रास्थि०, lies वज्राग्नि०* c: वाहनः d: वैष्णव्या – 92 b: रौद्र० – 93 b: परमार्थप्रकाशकम् – 94 a/b: Hs. वर्तमानेऽस्त्यासां – 95 c: स्थिता; lies ब्राह्म्याः d: Hs. ०श्चालम्बुसा० – 96 b: सर्वा हंस्यो

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

काकेन चण्डकेनाथ तास्तदा ॥ ९६ ॥ अथ ता गर्भधारिण्यो बभूवुरतितोषिताः । दे
व्यश्च कृतनृत्यास्ताः प्रशान्तमदतां यताः । सर्वाः संतुष्टमनसः स्वां स्वामुपययुर्दिशम्
॥ ९७ ॥ अन्तर्वत्न्यो बभूवुस्ता ब्राह्म्या हंस्यो मुनीश्वर । वृत्तान्तं कथयामासुर्ब्राह्म्या
देव्या यथास्थितम् ॥ ९८ ॥ हे वत्साः सांप्रतं वत्सवत्यो मे रथकर्मणि । न समर्था
भवत्यो हि स्वैरं चरत सांप्रतम् ॥ ९९ ॥ इति गर्भालसा हंसीरुक्त्वा देवी दयापरा ।
निर्विकल्पसमाधाने ब्राह्मी तस्थौ यथासुखम ॥ १०० ॥ हंस्यो विपक्वगर्भास्ताः सुवते
स्म यथाक्रमम् । वैरञ्चे सरसि स्फारे तनयानेकविंशतिः ॥ १०१ ॥ एवं ताभ्यस्तु हंसी
भ्यो जाता वयमिमे मुने । भ्रातरश्चण्डतनया वायसा एकविंशतिः ॥ १०२ ॥ मातृ
भिः सह हंसीभिर्ब्राह्मी भगवती ततः । चिरमाराधितास्माभिः समाधिविरता सती ॥
१०३ ॥ प्रसादपरया काले भगवत्या ततस्वयम् । तथाज्ञानुगृहीताः स्मो यथा मुक्ता
वयं स्थिताः ॥ १०४ ॥ संतृप्तमनसः शान्ताः क्वैकान्ते ध्यानसंस्थितौ । तिष्ठाम इति
निश्चित्य पितुः पार्श्वं वयं गताः ॥ १०५ ॥ वन्दित्वा पितरं तत्र नत्वा देवीमालम्बु
षाम् । तया दृष्टाः प्रसादेन प्रोक्तवन्तस्तदा वयम् ॥ १०६ ॥ तात ज्ञातमलं ज्ञेयं ब्राह्म्या
देव्याः प्रसादतः । किं त्वेकान्ते स्थितेः स्थानमभिवाञ्छाम उत्तमम् ॥ १०७ ॥ तेना
यं सर्वबाधानामगम्यः कल्पपादपः । कथितः स्थानमस्माकं ज्ञानिना सर्वदर्शिना ॥
१०८ ॥ ततः कृतनमस्कारास्तस्माद्देशाद्विनिर्गताः । इमं कल्पतरुं प्राप्य तिष्ठामो वि
गतज्वराः ॥ १०९ ॥ अद्य मे फलितं पुण्यैश्चिरकालोपसंभृतैः । निर्विघ्नमेव पश्यामि
यद्भवन्तं मुनीश्वर ॥ ११० ॥ रसायनमयी शान्ता परमानन्ददायिनी । नानन्दयति
कं नाम साधुसंगतिचन्द्रिका ॥ १११ ॥ नातः परतरं किंचिन्मन्ये कुशलमात्मनः ।
सन्तो यदनुगम्यन्ते संत्यक्तसकलैषणाः ॥ ११२ ॥ अधिगतपरमात्मनोऽपि मन्ये भ
वदवलोकनशान्तदुष्कृतस्य । मम सफलमिहाद्य जन्म साधो सकलभयापहरो हि सा
धुसङ्गः ॥ ११३ ॥ श्रीवसिष्ठ उवाच ॥ इत्युक्त्वार्घ्यं च पाद्यं च भूयो दत्तवति स्वयम् ।
भुशुण्डविहगे तस्मिन्निदं रामाहमुक्तवान् ॥ ११४ ॥ भ्रातरस्ते विहंगेश तादृक्सत्त्वा म
हाधियः । इह कस्मान्न दृश्यन्ते त्वमेवैको हि दृश्यते ॥ ११५ ॥ भुशुण्ड उवाच ॥ ति
ष्ठतामिह नः कालो भूयानतिगतो मुने । युगानां पङ्क्तयः क्षीणाः कल्पानां च तथानघ
॥ ११६ ॥ एतावताथ कालेन सर्व एव ममानुजाः । तनूस्तृणमिव त्यक्त्वा शिवे परि
णताः पदे ॥ ११७ ॥ दीर्घायुषो महान्तोऽपि सन्तोऽपि बलिनोऽपि च । सर्व एव नि
गीर्यन्ते कालेनाकलितात्मना ॥ ११८ ॥ अहमुवाच ॥ कल्पान्तेषु महाबुद्धे वहत्स्वग्न्य

97 d: **ययुः** (1. Aufl. nur **युः**), lies **गताः*** Nach c/d zusätzlich: **ततो देव्यो हरश्चैव परिवारसमन्विताः ।** (97A) – 98 b: **ब्राह्म्यो** – 99 a: **वत्स्यः** c: **भवंत्यो** – 101 a: **हंस्योऽपि पक्व०** c: Hs. **वैयते**, lies **वैरिञ्चे*** d: Lies **०विंशतिम्*** – 104 c: **तथैवानुगृहीताः** – 105 a/b: **शांतास्त्वेकांते** d: **पार्श्वे** – 106 b: Hs. **०मलंबुसां** c: Hs. **तथा** – 107 c: Hs. **हि त्वे०**; **त्वेकांतस्थितेः** – 108 c: **कथितं** – 110 d: **मुनीश्वरम्** – 113 (Puṣpitāgrā) – 114 Ohne **श्री०** c: Hs. **भुसंड०** – 115 b: **तादृक्तत्त्वा** d: **दृश्यसे** (nur 2. Aufl.) – 116 Hs. **भुसंड** b: Hs. **भूयानिति गतो** d: **च महामते** – 117 a: **एतावता च** – 118 b: **ऽपि वा**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

म्बुवायुषु । प्रतपत्सु तथार्केषु कथं तिष्ठसि विज्वरः ॥ ११९ ॥ भुशुण्ड उवाच ॥ यदा
शाम्यति कल्पान्ते व्यवहारो जागद्गतः । कृतघ्न इव सन्मित्रं तदा नीडं त्यजाम्यहम्
॥ १२० ॥ प्रपतन्ति यदादित्या व्योमाङ्गणगतो ह्यहम् । वारुणीं धारणां बद्ध्वा तदा
तिष्ठामि धीरधीः ॥ १२१ ॥ यदा शकलिताद्रीन्द्रा वान्ति प्रलयवायवः । पार्वतीं धा
रणां बद्ध्वा खे तिष्ठाम्यचलं तदा ॥ १२२ ॥ जगत्समग्रं मेर्वादि यात्येकार्णवतां यदा ।
वायवीं धारणां बद्ध्वा खं प्लुवेऽचलधीस्तदा ॥ १२३ ॥ महाप्रलयसंपत्तौ तत्त्वान्ते विम
ले पदे । सुषुप्तावस्थया तावत्तिष्ठाम्यचलरूपया ॥ १२४ ॥ यावत्पुनः कमलजः सृष्टि
कर्मणि तिष्ठति । तत्र प्रविश्य ब्रह्माण्डं तिष्ठामि विहगालये ॥ १२५ ॥ मत्संकल्पवशे
नैव कल्पे कल्पे पुनः पुनः । अस्मिन्नथ गिरेः शृङ्गे तरुरित्थं भवत्ययम् ॥ १२६ ॥ अह
मुवाच ॥ यथा तिष्ठसि पक्षीन्द्र धारणाभिरखण्डितः । कल्पान्तेषु तथा कस्मान्नान्ये
तिष्ठन्ति योगिनः ॥ १२७ ॥ भुशुण्ड उवाच ॥ ब्रह्मन्नियतिरेषा हि दुर्लङ्घ्या पारमेश्व
री । मयेदृशेन वै भाव्यं भाव्यमन्यैस्तु तादृशैः ॥ १२८ ॥ अहमुवाच ॥ ज्ञानविज्ञान
वान्धीरो योगयोग्यमनोगतिः । किं किं स्मरसि कल्याणश्चित्रमत्र जगत्त्रये ॥ १२९ ॥
भुशुण्ड उवाच ॥ बृहत्तरशिलावृक्षामजाततृणवीरुधम् । अशैलवनवृक्षौघां संस्मरामि
धरामधः ॥ १३० ॥ दशवर्षसहस्राणि दशवर्षशतानि च । भस्मभारभरापूर्णां संस्मरा
मि धरामधः ॥ १३१ ॥ चतुर्युगान्तमपरां नीरन्ध्रां वनपादपैः । चतुर्युगान्तमपरां नी
रन्ध्रैरचलैर्वृताम् ॥ १३२ ॥ अनगस्त्यामिमामेकविन्ध्यपर्वततां गताम् । चतुर्युगान्त
मपरां संस्मरामि जगत्कुटीम् ॥ १३३ ॥ सुरापब्राह्मणं तात निषिद्धसुरशूद्रकम् । स्वैर
वृत्तिसतीकं च कंचित्सर्गं स्मराम्यहम् ॥ १३४ ॥ जन्मेन्दुभास्करादीनामिन्द्रोपेन्द्र
व्यवस्थितिम् । हिरण्याक्षापहरणं वराहोद्धरणं क्षितेः ॥ १३५ ॥ कल्पनं पार्थिवानां च
वेदानयनमेव च । मन्दरोन्मूलनं चाब्धेरमृतार्थं च मन्थनम् ॥ १३६ ॥ अजातपक्षो
गरुडः सागराणां च संभवः । इत्यादिका याः स्मृतयः स्वल्पातीतजनक्रमाः । बालैर
पि हि तास्तात स्मर्यन्ते तासु को ग्रहः ॥ १३७ ॥ ततो जगति जातेषु भगवन्युष्मदा
दिषु । भरद्वाजपुलस्त्यात्रिनारदेन्द्रमरीचिषु ॥ १३८ ॥ गौरीसरस्वतीलक्ष्मीगायत्र्या
द्यासु भूरिषु । इत्याद्यतनसर्गेषु स्मरणे गणनैव का ॥ १३९ ॥ मुने ते ब्रह्मपुत्रस्य जन्मा

119 c: Lies **प्रपतत्सु*** 120 Hs. **भुसंड** c: **मन्मित्रं** d: Hs. **व्रजाम्यहम्** – 120A: **आकाश एव तिष्ठामि विगताखिलकल्पनम्** [lies **०नः***] **। स्तब्धप्रकृतिसर्वांगो मनो निर्वासनं यथा ॥** – 121 a: **प्रतपंति** – 122 b: Hs. **प्रचलवायवः** c: Lies **पार्थिवीं*** – 123 a: **जगद्गलति** d: **संप्लुवे** – 124 a: **ब्रह्मांडपारमासाद्य** – 126 a: Hs. **०वशेनेव** c: **अस्मिन्नेव** – 127 **वसिष्ठ उवाच ॥** – 128 Hs. **भुसुंड** d: **०मन्यैश्च** – 128A: **न शक्यते चालयितुमवश्यं भवितव्यता । यद्यथा तत्तथैतद्धि स्वभावस्यैष निश्चयः ॥** – 129 **वसिष्ठ उवाच ॥** a: **०वान्वीरो** c/d: **कल्याण चित्रमस्मिञ्जगत्त्रये** – 130 Hs. **भुसुंड** b: Lies **०वीरुधाम्*** d: **स्मरामीमां धरामधाः** – 131 c: Hs. **०भारपरापूर्णां** – 132 a: Hs. **चतुर्युगांतं चरमं** b: Hs. **नीरंध्रं घनपादपैः** – 135 d: **वाराहो०** – 136 d: **०तार्थे** – 137 b: **सागराणां समुद्भवः** d: **०जगत्क्रमाः** – 138A: **सनत्कुमारभृग्वीशस्कंदेभवदनादिषु ॥** – 139 c: **तथाद्यतन०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ष्टममिदं किल । संस्मराम्यष्टमे सर्गे तस्मिंस्त्वं मम संगतः ॥ १४० ॥ कदाचिज्जायसे
व्योम्नः कदाचिज्जायसे जलात् । कदाचिज्जायसे शैलात्कदाचिज्जायसेऽनलात् ॥
१४१ ॥ अन्तर्धानगतान्वेदान्वारपञ्चकमुद्धृतान् ॥ १४२ ॥ स्मरामि द्वादशं चेदममृ
ताम्भोधिमन्थनम् । वारत्रयं हिरण्याक्षो नीतवान्वसुधामधः ॥ १४३ ॥ रेणुकात्मक
तां यातं षष्ठं वारमिमं हरिम् । शतं कलियुगानां च हरेर्बुद्धस्य शासनम् ॥ १४४ ॥ त्रिं
शत्त्रिपुरविक्षोभान्द्वौ दक्षाध्वरसंक्षयौ । बाणार्थमष्टौ संग्रामान् ज्वरप्रमथनत्रयम् ॥
१४५ ॥ युगं प्रति धियां पुंसां न्यूनाधिकतया मुने । क्रियाङ्गपाठवैचित्र्ययुक्तान्वेदा
न्स्मराम्यहम् ॥ १४६ ॥ एकार्थानि समग्राणि बहुपाठानि मेऽनघ । पुराणानि प्रवर्त
न्ते निर्वृतानि युगं प्रति ॥ १४७ ॥ इतिहासं महाश्चर्यमन्यद्रामायणाभिधम् । ग्रन्थल
क्ष्यप्रमाणं च ज्ञानशास्त्रं स्मराम्यहम् ॥ १४८ ॥ वाल्मीकिनाम्ना जीवेन तेनैवान्येन
वा कृतम् । एतच्च द्वादशं वारं निर्मितं विस्मृतिं गतम् ॥ १४९ ॥ द्वितीयमेतस्य समं
भारतं नाम नामतः । व्यासाभिधेन जीवेन तेनैवान्येन वा कृतम् । एतत्तु सप्तमं वारं
निर्मितं विस्मृतिं गतम् ॥ १५० ॥ राक्षसक्षतये विष्णोर्महीमवतरिष्यतः । अधुनैका
दशं जन्म रामनाम्नो भविष्यति ॥ १५१ ॥ वसुदेवगृहे विष्णोर्भुवो भारनिवृत्तये । अ
धुना षोडशं जन्म भविष्यति मुनीश्वर ॥ १५२ ॥ जगन्मयी भ्रान्तिरियं न कदाचि
न्न विद्यते । विद्यते न कदाचिच्च जलबुद्बुदवत्स्थिता ॥ १५३ ॥ दृश्यभ्रान्तिरदृष्टेयमन्तः
स्था संविदात्मनि । जायते लीयते चाशु लोला वीचिरिवाम्भसि ॥ १५४ ॥ नेहाभूदु
त्तरा पूर्वं ककुब्नायं च भूधरः । दिगुत्तराभूदन्यैव पूर्वमेष महीधरः ॥ १५५ ॥ अर्का
दिऋक्षसंचारान्मेर्वादेः स्थानकाद्दिशाम् । संस्थानमन्यथा तस्मिन्स्थिते यान्ति दिशो
ऽन्यथा ॥ १५६ ॥ कलौ कृतयुगाचारान्कृते कलियुगस्थितीः । त्रेतायां द्वापरे चैव वि
पर्यासं स्मराम्यहम् ॥ १५७ ॥ श्रीवसिष्ठ उवाच ॥ अथासौ वायसः श्रेष्ठो जिज्ञासार्थ
मिदं मया । भूयः पृष्टो महाबाहो कल्पवृक्षलताग्रके ॥ १५८ ॥ चरतां जगतः कोशे
व्यवहारवतामपि । कथं विहगराजेन्द्र देहं मृत्युर्न बाधते ॥ १५९ ॥ भुशुण्ड उवाच ॥
जानन्नपि हि सर्वज्ञ ब्रह्मञ्जिज्ञासयैव माम् । पृच्छसि प्रभवो नित्यं भृत्यं वाचालयन्ति
हि ॥ १६० ॥ तथापि यत्पृच्छसि मां तत्ते प्रकथयाम्यहम् । आज्ञाचरणमेवाहुर्मुख्य
माराधनं सताम् ॥ १६१ ॥ दोषमुक्ताफलप्रोता वासनातन्तुसंततिः । हृदि न ग्रथिता

142 अंतर्धानं गता धात्री वारपंजकमुद्धृता । – 142A: मुने पंचसु सर्गेषु कूर्मेणैव पयोदधेः ॥ – 144 a: Lies रेणुकात्मजतां* a/b: रेणुकाजन्मतां यातः षष्ठवारमयं हरिः d: हरेर्बुद्धदशाशतम् – 145 c/d: संग्रामानध्वर प्रमथत्रयम् Nach a/b zusätzlich: दश शक्रविघातांश्च चंद्रमौलेः स्मराम्यहम् । (145A) – 146 a: Lies धियं* – 147 b: चानघ d: निवृत्तानि – 148 c: ग्रंथं लक्षप्रमाणं – 149 d: क्रियते विस्मृतिं – 150 e: एतच्च f: क्रियते विस्मृतिं Nach a/b zusätzlich: स्मरामि प्राक्तनं व्यासकृतं जगति विस्मृतम् । (150A) – 153 b: न कदाचन विद्यते c: विद्यते तु – 154 a: ०भ्रांतिरनिष्टेय० b: संविदात्मनः – 155 c: ०दन्यत्र – 156 b: ०न्मेर्वादिस्थान० – 157 a/b: Hs. ०चाराः कृते b: ०स्थितिम् – 158 Ohne श्री० – 160 Hs. भुसंड b: ब्रह्मजिज्ञासयैव – 161 b: प्रकटया०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यस्य मृत्युस्तं न जिघांसति ॥ १६२ ॥ विश्वासवृक्षक्रकचाः सर्वदेहलताघुणाः । आध
यो यं न भिन्दन्ति मृत्युस्तं न जिघांसति ॥ १६३ ॥ शरीरतरुसर्पौघाश्रितार्पितशिरः
सटाः । आशा यं न दहन्त्यन्तर्मृत्युस्तं न जिघांसति ॥ १६४ ॥ रागद्वेषविषापूर्णः स्व
मनोबिलमन्दिरः । लोभव्यालो न भुङ्क्ते यं मृत्युस्तं न जिघांसति ॥ १६५ ॥ पीताशेष
विवेकाम्बुः शरीराम्भोधिवाडवः । न निर्दहति यं कोपस्तं मृत्युर्न जिघांसति ॥ १६६
॥ यन्त्रं तिलानां क्वथितं राशिमुग्रमिवाकुलम् । यं पीडयति नानङ्गस्तं मृत्युर्न जिघांस
ति ॥ १६७ ॥ एकस्मिन्निर्मले येन पदे परमपावने । संश्रिता चित्तविश्रान्तिस्तं मृत्युर्न
जिघांसति ॥ १६८ ॥ एते ब्रह्मन्महादोषाः संसारव्याधिहेतवः । न मनागपि लुम्पन्ति
चित्तमेकसमाहितम् ॥ १६९ ॥ आधिव्याधिसमुत्थानि चलितानि महाभ्रमैः । न वि
लुम्पन्ति दुःखानि चित्तमेकसमाहितम् ॥ १७० ॥ अन्धीकृतहृदाकाशाः कामक्रोध
विकारजाः । चिन्ता न परिहिंसन्ति चित्तमेकसमाहितम् ॥ १७१ ॥ ये दुरर्था दुरार
म्भा दुर्गुणा दुरुदाहृताः । दुष्क्रमास्ते न कृन्तन्ति चित्तमेकसमाहितम् ॥ १७२ ॥
यदुदर्कहितं सत्यमनपायि गतभ्रमम् । दुरीहितदिशोन्मुक्तं तत्परं कारयेन्मनः ॥
१७३ ॥ यदद्दृष्टमशुद्धेन चिरवैधुर्यदायिना । अनेकत्वपिशाचेन तत्परं कारयेन्मनः
॥ १७४ ॥ आत्मचिन्ता समस्तानां दुःखानामन्तकारिणी । युष्मदादिषु सुप्रापा दु
ष्प्रापा चास्मदादिषु ॥ १७५ ॥ समस्तकलनातीतं परां कोटिमुपाश्रितम् । पदमासा
दयन्त्येतत्कथं सामान्यबुद्धयः ॥ १७६ ॥ आत्मचिन्तासमानानां विविधानां मुनी
श्वर । आत्मचिन्तावयस्यानां मध्यदेकतमा मया ॥ १७७ ॥ सर्वदुःखक्षयकरी सर्व
सौभाग्यवर्धनी । कारणं जीवितस्येह प्राणचिन्ता समाश्रिता ॥ १७८ ॥ इत्युक्तवन्तं
विहगं भुशुण्डं पुनरस्पृहम् । जानन्नपीदमव्यग्रः पृष्टवानहमादरात् ॥ १७९ ॥ सर्वसं
शयविच्छेदिन्नत्यन्तचिरजीवित । यथार्थं ब्रूहि मे साधो प्राणचिन्ता किमुच्यते ॥
१८० ॥ भुशुण्ड उवाच ॥ पश्यामीदं हि भगवन्देहगेहं मनोरमम् । तत्रोर्ध्वाधो द्विसं
केतौ प्रसृतावनिलौ मुने ॥ १८१ ॥ प्राणापानाविति ख्यातौ प्रकटौ तौ वरानिलौ ।
तयोरनुसरन्नित्यं मुने गतिमहं स्थितः ॥ १८२ ॥ शीतोष्णवपुषोर्नित्यं नित्यमम्बरपा
न्थयोः । कलेवरमहायन्त्रवाहयोः श्रमहीनयोः ॥ १८३ ॥ हृदाकाशार्कशशिनोरग्नीषो
मस्वरूपयोः । तयोर्ममानुसरतः प्राणापानाभिधानयोः ॥ १८४ ॥ गतिं शरीरमरुतो
रशरीरमरुद्वयोः । जाग्रत्स्वप्नसुषुप्तेषु सदैव समरूपयोः । सुषुप्तसंस्थितस्यैव ब्रह्मन्गच्छ

164 b: ०श्रिंतार्पितशिरःफटाः c: दहत्यंत० – 165 a: विषाघूर्णः – 167 a: कठिनं – 169 c: मनागपि न – 171 b: कामकोप० – 173 b: ०मनुपाधि c: ०दशोन्मुक्तं – 174 a: यदमृष्टम० – 177 a: Hs. ०समस्तानां d: Hs. यया – 178 b: ०वर्धिनी c: Hs. जीवितव्यस्य – 179 b: Hs. भुसंडं; भुशुंड पुनरप्यहम् d: पृष्टवान्क्रीडया मुनिः – 180 शातातप उवाच ॥ (2. Aufl.) – 181 Hs. भुसंड a: यस्येदं भगवन्सर्वं Vor a/b zusätzlich: श्रृणु प्राणसमाधानं वक्ष्यमाणमिदं मया । (181A) – 181B: देहस्य मध्ये हृत्पद्मं तत्रैतौ समवस्थितौ ॥ – 182 d: गतिरहं – 185 a/b: गतिः शरीरमरुतोः सशरीर० e/f: ०स्थितस्येव ब्रह्म वांछंति वासनाः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

न्ति वासराः ॥ १८५ ॥ सहस्रविनिकृत्ताङ्गाद्बिसतन्तुलवादपि । दुर्लक्ष्या विद्यमाना
पि गतिः सूक्ष्मतरानयोः ॥ १८६ ॥ प्राणोऽयमनिशं ब्रह्मन्स्पन्दशक्तिः सदागतिः ।
सबाह्याभ्यन्तरे देहे प्राणोऽयमूर्ध्वगः स्थितः । अपानोऽप्यनिशं ब्रह्मन् अपानोऽयम
वाक्स्थितः ॥ १८७ ॥ जाग्रतः स्वपतश्चैव प्राणायामोऽयमुत्तमः । प्रवर्तते यस्तज्ज्ञस्य
तं तावच्छ्रेयसे शृणु ॥ १८८ ॥ बाह्योन्मुखत्वं प्राणानां यद्धृदम्बुजकोटरात् । स्वरसे
नास्तयत्नानां तं वीरा रेचकं विदुः ॥ १८९ ॥ द्वादशाङ्गुलपर्यन्तं बाह्यमाक्रमतामधः
। प्राणानामङ्गसंस्पर्शो यः स पूरक उच्यते ॥ १९० ॥ बाह्यात्परापतत्यन्तरपाने यत्न
वर्जितः । योऽङ्गप्रपूरकः स्पर्शो विदुस्तमपि पूरकम् ॥ १९१ ॥ अपानेऽस्तं गते प्राणो
यावन्नाभ्युदितो हृदि । तावत्सा कुम्भकावस्था योगिभिर्यानुभूयते ॥ १९२ ॥ पूरकः कु
म्भकश्चैव रेचकश्च द्विधा स्थितः । मृदन्तरस्था निःष्पंसघटवद्या स्थितिर्बहिः ॥ १९३ ॥
द्वादशाङ्गुलपर्यन्ते नासाग्रसमसंमुखे । व्योम्नि नित्यमपानस्य तं विदुः कुम्भकं बुधाः
॥ १९४ ॥ अत्रैवास्तं गते प्राणे यावन्नापान उद्गतः । तावत्पूर्णसमावस्थं बहिष्ठं कुम्भ
कं विदुः ॥ १९५ ॥ यस्तदन्तर्मुखत्वं स्यादपानस्योदयं विना । तं बाह्यरेचकं विद्याच्चि
न्त्यमानं विमुक्तिदम् ॥ १९६ ॥ द्वादशान्ताद्यदुत्थाय रूपपीवरता परा । अपानस्य ब
हिष्ठं तमपरं पूरकं विदुः ॥ १९७ ॥ बाह्यानाभ्यन्तरांश्चैव कुम्भकादीननारतम् । प्राणा
पानस्वभावांस्तान् बुद्ध्वा भूयो न जायते ॥ १९८ ॥ अष्टाविति महाबुद्धे रात्रिंदिवमनु
स्मृताः । स्वभावा देहवायूनां कथिता मुक्तिदा मया ॥ १९९ ॥ अव्यग्रमस्मिन्व्यापारे
बाह्यं परिहरन्मनः । दिनैः कतिपयैरेव पदमाप्नोति केवलम् ॥ २०० ॥ एतां दृष्टिमवष्ट
भ्य ये स्थिताः स्थिरबुद्धयः । प्राप्तं प्राप्तव्यमखिलं तैरखिन्नास्त एव हि ॥ २०१ ॥ प्राण
स्याभ्युदयो ब्रह्मन्पद्मयन्त्राद्धृदि स्थितात् । द्वादशाङ्गुलपर्यन्ते प्राणोऽस्तं यात्ययं बहिः
॥ २०२ ॥ अपानस्योदयो बाह्याद्द्वादशान्तान्महामुने । अस्तंगतिरथाम्भोजमध्ये हृद
यसंस्थिते ॥ २०३ ॥ अपानश्चन्द्रमा देहमाप्याययति बाह्यतः । प्राणः सूर्योऽग्निरथ वा
पचत्यन्तरिदं वपुः ॥ २०४ ॥ अपानशशिनोऽन्तःस्था कला प्राणविवस्वता । यत्र ग्र
स्ता तदासाद्य न भूयो जन्मभाङ्नरः ॥ २०५ ॥ प्राणार्कस्य तथान्तःस्था यत्रापानसि
तांशुना । ग्रस्ता तत्पदमासद्य न भूयः परिशोच्यते ॥ २०६ ॥ प्राणो गतागते कुर्वन्सं

187 Zwischen e und f nochmals b und c. f: त्वपानो – 188 b: Hs.॰यामो य उत्तमः c: योऽभिज्ञस्य
– 189 b: यद्वृदंबुज॰ d: Lies धीरा* c/d: ॰यत्नानामन्तस्थं रेचकं – 190 b: ॰क्रमतां ततः – 191 c:
॰प्रपूरणः – 193 a/b: रेचकः पूरकश्चैव कुंभकश्च त्रिधा स्थितः c: निष्पन्न॰, lies निष्पन्द॰* – 194A: बाह्यो
न्मुखस्य वायोर्या नासिकाग्रावधिर्गतिः । तं बाह्यपूरकं त्वाद्यं विदुर्योगविदो जनाः ॥ B: नासाग्रादपि निर्गत्य
द्वादशांतावधिर्गतिः । या वायोस्तं विदुर्धीरा अपरं बाह्यपूरकम् ॥ – 195 a: बहिरस्तं c: Hs. तत्तत्पूर्णासमा
वस्थां d: Lies बहिःष्ठं – 196 a: Lies यत्तदन्त॰* a/b: अंतर्मुखत्वं वायोर्यदपानोदयरूपकम् – 197 a:
द्वादशांतात्समुत्थाय c: Lies बहिःष्ठं – 198 d: रुध्वा – 199 a: अष्टावेते – 200 b: परिजहन्मनः –
200A: एतदभ्यसतः पुंसो बहिर्विषयवृत्तिषु । न बध्नाति रतिं चेतः श्वदृतौ ब्राह्मणो यथा ॥ – 201A: तिष्ठता
गच्छता नित्यं जाग्रता स्वपताथ वा । एषा चेत्क्रियते दृष्टिस्तन्न बंधनमाप्यते ॥ – 206 d: न भूयो जन्मभा
ङ्नरः – 207 a: गतागती b: सूर्यचंद्रताम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

धत्ते चन्द्रसूर्यताम् ॥ २०७ ॥ प्राणभक्षोन्मुखेऽपाने प्राणे वापानभक्षके । उभयोरन्त
रालस्थं न भूयो जायते मनः ॥ २०८ ॥ प्राणक्षयस्योपान्तस्थमपानक्षयकोटिगम् । अ
पानप्राणयोर्मध्यं चिदात्मानमुपास्महे ॥ २०९ ॥ अपानोऽस्तं गतो यत्र प्राणो नाभ्यु
दितः क्षणम् । कलाकलङ्करहितं तच्चित्तत्त्वमुपास्महे ॥ २१० ॥ नापानोऽभ्युदितो यत्र
प्राणश्चास्तमुपागतः । नासाग्रगगनावर्तं तच्चित्तत्त्वमुपास्महे ॥ २११ ॥ यदखिलकलना
कलङ्कहीनं परिवलितं च सदा कलागणेन । अनुभवविभवं पदं तदग्र्यं सकलसुरप्रण
तं परं प्रबद्ये ॥ २१२ ॥ भुशुण्ड उवाच ॥ एषा हि चिति विश्रान्तिर्मया प्राणसमाधि
ना । क्रमेणानेन संप्राप्ता स्वयमात्मनि निर्मले ॥ २१३ ॥ न भूतं न भविष्यं च चिन्त
यामि कदाचन । दृष्टिमालम्ब्य तष्ठामि वर्तमानामिहात्मना ॥ २१४ ॥ इदमद्य मया
लब्धमिदं प्राप्स्यामि सुन्दरम् । इति चिन्ता न मे तेन चिरं जीवाम्यनामयः ॥ २१५
॥ न स्तौमि न च निन्दामि क्वचित्किंचित्कदाचन । आत्मनोऽन्यस्य वा साधो तेन
जीवाम्यनामयः ॥ २१६ ॥ न तुष्यति शुभप्राप्तौ नाशुभेष्वपि खिद्यते । मनो मम स
मं नित्यं तेन जीवाम्यनामयः ॥ २१७ ॥ परमं त्यागमालम्ब्य सर्वमेव सदैव हि । जी
वनादि मया त्यक्तं तेन जीवाम्यनामयः ॥ २१८ ॥ प्रशान्तचापलं वीतशोकमस्तस
मीहितम् । मनो मम मुने शान्तं तेन जीवाम्यनामयः ॥ २१९ ॥ अयं बन्धुः परश्चायं
ममायमयमन्यतः । इति ब्रह्मन्न जानामि तेनास्मि चिरजीवितः ॥ २२० ॥ आशापाश
विनुन्नायाश्चित्तवृत्तेः समाहितः । संस्पर्शं न ददाम्यन्तस्तेन जीवाम्यनामयः ॥ २२१ ॥
सुखितोऽस्मि समासीनो दुःखितो दुःखिते जने । सर्वस्य प्रियमित्रं च तेन जीवाम्य
नामयः ॥ २२२ ॥ आपद्यचलधीरोऽस्मि जगन्मित्रं च संपदि । भावाभावेषु नैवास्मि
तेन जीवाम्यनामयः ॥ २२३ ॥ एतत्ते कथितं ब्रह्मन्यथास्मि चिरजीवितः । त्वदाज्ञा
मात्रसिद्ध्यर्थं धार्ष्ट्येन ज्ञानपारग ॥ २२४ ॥ श्रीवसिष्ठ उवाच ॥ अहो नु चित्रं भवता
कथितं भूषणं श्रुतेः । तदस्तु तव कल्याणं प्रविशात्मगुहां शुभाम् ॥ २२५ ॥ मध्या
ह्नसमयोऽयं मे व्रजामि सुरमन्दिरम् ॥ २२६ ॥ अनुव्रज्याकदर्थेन खगेन्द्रालमिति ब्रु
वन् । विष्टरादहमुत्थाय नभः खगवदाप्लुतः ॥ २२७ ॥ व्योम्नि योजनमात्रे तु मदनुव्र
ज्ययोगतः । मया निवारितः कृच्छ्राद्दुस्त्यजा संगतिः सताम् ॥ २२८ ॥ याते कृत
युगस्यादौ पुनस्तेनास्मि संगतः ॥ २२९ ॥ पुनरद्याष्टमे वर्षे तत्रैवोपरि भूभृतः । मिलि
तोऽभूद्भुशुण्डो मे तथैवाजररूपवान् ॥ २३० ॥ इति संकथितं वृत्तं भुशुण्डोदन्तमुत्त

208 d: **नरः** – 209 a/b: **प्राणक्षयसमीपस्थ अपानोदयकोटिगः** – 211 a: Hs. **अपानो** b: Hs. **नाशाग्रगमनावर्त्तं** – 212 (Puṣpitāgrā) b: **परिकलितं**; Hs. **०गुणेन** – 213 **भुशुण्ड उवाच ॥** fehlt in 2. Aufl.; Hs. **भुसुंड** a: Hs. **स्थितिविश्रांति०** – 214 a: **भविष्यच्च** – 218 c: **जीवितादि** – 219 a: **०चालनं** – 220 b: **०मन्यथा** – 222 a: Lies **सुखासीनो***; **सुखितोऽस्मि सुखपन्ने** – 225 Ohne **श्री०** Nach a/b zusätzlich: **आत्मोदंतः प्रकथितः परं विस्मयकारणम् ।** (225A) – 228 b: Hs. **०व्रज्यमागतः** – 229A: **संगतोऽहं भुशुंडेन मेरोः शृंगद्रुमेऽभवम् ॥** B: **अथ राम कृते क्षीणे त्रेता संप्रति वर्तते । मध्ये त्रेतायुगस्यास्य जातस्त्वं रिपुसूदन ॥** – 230 a: **पुनरप्यष्टमे** (c: so auch Hs.) – 231 a: **चित्रं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मम् । श्रुत्वा विचार्य चैवान्तर्यद्युक्तं तत्समाचर ॥ २३१ ॥ इति निर्वाणप्रकरणे भुशु
ण्डोपाख्यानम् ॥ [२८] ॥ श्रीवसिष्ठ उवाच ॥ आभासमात्रमेवेदमित्थं संप्रति भास
ते । अयं नामाहमित्यन्तरसदेव शरीरकम् ॥ १ ॥ सुखतल्पगतो येन स्वप्नदेहेन दिक्त
टान् । परिभ्रमसि हे राम स देहस्ते क्व संस्थितः ॥ २ ॥ दीर्घस्वप्नमिमं विद्धि दीर्घं वा
चित्तविभ्रमम् । दीर्घं वापि मनोराजयं संसारं रघुनन्दन ॥ ३ ॥ आभासमात्रमेवेदं
चिन्मात्रकमिदं जगत् । इत्यन्यः कलनात्यागः सम्यगालोकनं विदुः ॥ ४ ॥ अवश्य
मेव च तया मर्तव्यमिति निश्चयः । इत्यात्ममरणप्राप्तौ किं मुधा परितप्यते ॥ ५ ॥
अवश्यमेव जातेन किंचित्सुविभवादिकम् । प्राप्तव्यं पुरुषेणेति लाभेष्वर्थस्य को मदः
॥ ६ ॥ प्रविभागं परित्यज्य तदर्थपटलं त्यज । आभासमात्रं सामान्यमिदमालोकया
नघ ॥ ७ ॥ आभासमात्रकं राम चिन्तामर्षकलङ्कितम् । ततस्तदपि संत्यज्य निराभा
सो भवोत्तम ॥ ८ ॥ रागो द्वेषश्च सर्पौ द्वौ न निलीनौ मनोबिले । यस्य कल्पतरोस्तेन
किं नामाङ्ग न लभ्यते ॥ ९ ॥ ये हि प्राज्ञैकनियता विदग्धाः शास्त्रशालिनः । रागद्वे
षमयास्ते वै गर्दभास्ते धिगस्तु तान् ॥ १० ॥ इदं संसारचक्रं हि नाभौ संकल्पमात्र
कम् । संरोधितायां वहनाद्रघुनन्दन रुध्यते ॥ ११ ॥ क्षोभितायां मनोनाभ्यामिदं सं
सारचक्रकम् । प्रयत्नाद्रोधितमपि प्रवहत्येव वेगतः ॥ १२ ॥ परं पौरुषमाश्रित्य बलं
प्रज्ञां च युक्तितः । नाभिं संसारचक्रस्य चित्तमेव निरोधयेत् ॥ १३ ॥ प्रज्ञासौजन्ययु
क्तेन शास्त्रसंवलितेन च । पौरुषेण न यत्प्राप्तं न तत्क्वचन लभ्यते ॥ १४ ॥ भवप्रदम
कल्याणं धैर्यसर्वस्वहारिणम् । मनःपिशाचमुत्सृज्य योऽसि सोऽसि स्थिरो भव ॥ १५
॥ चित्तयक्षदृढक्रान्तं न शास्त्राणि न बन्धवः । शक्नुवन्ति परित्रातुं गुरवो न च मान
वम् ॥ १६ ॥ भोगा भोगा बहिष्कार्या आर्यस्यानुसरेत्पदम् । प्रविचार्य महार्थं स्वमेक
मात्मानमाश्रयेत् ॥ १७ ॥ अत्रेमामपरां दृष्टिं महामोहविनाशिनीम् । शृणु या कथि
ता पूर्वं मम कैलासकन्दरे । संसारदुःखशान्त्यर्थं देवेनार्धेन्दुमौलिना ॥ १८ ॥ अस्ती
न्दुकरसंभारभासुरः पारगो दिवः । कैलासो नाम शैलेन्द्रो गौरीरमणमन्दिरम् ॥ १९
॥ तत्रास्ते भगवान्देवो हरश्चन्द्रकलाधरः । तं पूजयन्महादेवं तस्मिन्नेव गिरौ पुरा ॥
२० ॥ कदाचिदवसं गङ्गातटे विरचिताश्रमः । तपोऽर्थं तापसाचारे चिराय रचित
स्थितिः ॥ २१ ॥ सिद्धसंघातवलितः कृतशास्त्रार्थसंग्रहः । पुष्पार्थं स्यूतपुटिकः पुस्त

Kolophon zu Sarga 28: इति श्रीवाल्मीकीये मोक्षोपाये निर्वाणप्रकरणे भुशुंडोपाख्यानं नाम एकोनत्रिंशः सर्गः ॥ २९ ॥ – 29.1 Ohne श्री° (2. Aufl.) – 1A: मांसास्थिमयनिर्माणदेहोऽहमिति विभ्रमम् । त्यज संकल्पनिर्माणदेहाः संति सहस्रशः ॥ – 2A: जागरायां मनोराज्ये येन स्वर्गपुरांतरम् । परिभ्रमसि मेरुं वा स देहस्ते क्व संस्थितः ॥ – 4 b: न सन्नासज्जगत्त्रयम् c: इत्यन्यकलनात्यागं – 5 a: हि मया – 6 d: लाभेष्वर्थेषु – 7 b: पदार्थपटलव्रजे c: °मात्रे – 8 a/b: आभासमात्रमखिलं वित्तामर्शकलंकितम् – 9 b: विलीनौ c/d: °तरोस्तस्मात्किं – 10 a: ये प्रज्ञागर्वमापन्ना c: रागद्वेषमया मान्य° – 14 b: Hs. शास्त्रांशावलितेन – 15 a: भय° – 16 b: बांधवाः – 16A: संशांतचित्तवेतालं गुरुशास्त्रार्थबांधवाः । शक्नुवंति समुद्धर्तुं स्वल्पपंकान्मृगं यथा ॥ 17 c/d: Hs. प्रविचार्य महाश्चर्यमेकमात्मानमाश्रय – 19 b: परमो – 21 c: Hs. तापसाचारं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

कव्यूहसंग्रही ॥ २२ ॥ एवंगुणविशिष्टस्य कैलासवनकुञ्जके । तपः प्रचरतो राम मम कालोऽभ्यवर्तत ॥ २३ ॥ अथैकदा कदाचित्तु बहुलस्याष्टमे दिने । गते श्रावणपक्षस्य रात्र्यग्रे क्षयमागते ॥ २४ ॥ दिक्षु संशान्तरूपासु काष्ठमौनस्थितास्विव । खड्गच्छेद्या न्धकारेषु कुञ्जेषु गहनेषु च ॥ २५ ॥ एतस्मिन्समये तत्र यामार्धे प्रथमे गते । समाधिं तनुतां नीत्वा स्थितोऽहं बाह्यमग्नदृक् ॥ २६ ॥ अपश्यं कानने तेजो झगित्येव समुत्थितम् । शुभ्राभ्रशतसंकाशं चन्द्रबिम्बगणोपमम् ॥ २७ ॥ प्रकटीकृतदृक्तेजस्तदालोक्य मया स्मयात् । अन्तःप्रकाशशालिन्या बुद्धिदृष्ट्यावलोकितम् ॥ २८ ॥ यावत्पश्यामि तं सानुं प्राप्तश्चन्द्रकलाधरः । गौरीकरार्पितकरो नन्दिप्रोत्सारिताग्रतः ॥ २९ ॥ शिष्यानुद्बोध्य तत्रस्थान् गृहीत्वार्घ्यं सुसंयतः । अगमं सुमनास्तस्य दृष्टिपूतमहं पुरः ॥ ३० ॥ तत्र पुष्पाञ्जलिं दत्त्वा दूरादेव त्रिलोचनः । दत्तार्घ्येण मया देवः संप्रणम्याभिनन्दितः ॥ ३१ ॥ ततश्चन्द्रप्रभासख्या ऋद्ध्या शीतलया तया । दृशा सर्वार्तिहारिण्या चिरमस्म्यास्पदीकृतः ॥ ३२ ॥ पुष्पसानूपविष्टाय तस्मै त्रैलोक्यसाक्षिणे । अर्घं पुष्पं तथा पाद्यमभ्युपेत्यार्पितं मया ॥ ३३ ॥ मन्दारपुष्पाञ्जलयो विकीर्णा बहवः पुनः ॥ ३४ ॥ ततो भगवती गौरी तादृश्यैव सपर्यया । संपूजिता सखीयुक्ता गणमण्डलिका तथा ॥ ३५ ॥ पूजान्ते पूर्णशीतांशुरश्मिशीतलया गिरा । तत्रोपविष्टं प्रोवाच मामर्धेन्दुकलाधरः ॥ ३६ ॥ ब्रह्मन्प्रशमशालिन्यः प्राप्तविश्रान्तयः परे । कच्चित्कल्याणकारिण्यः संविदस्ते स्थिराः पदे ॥ ३७ ॥ कच्चित्तपस्ते निर्विघ्नं कल्याणमनुवर्तते ॥ ३८ ॥ एवंवादिनि देवेशे सर्वलोकैककारणे । गिरानुनयशालिन्या मयोक्तं रघुनन्दन ॥ ३९ ॥ त्र्यक्षानुस्मृतिकल्याणवतामिह महेश्वर । न किंचिदपि दुष्प्रापं न च काश्चन भीतयः ॥ ४० ॥ त्वदनुस्मरणानन्दपरिपूरितचेतसाम् । न ते सन्ति जगत्कोशे प्रणमन्ति न ये पुरः ॥ ४१ ॥ ते देशास्ते जनपदास्ता दिशस्ते च पर्वताः । त्वदनुस्मरणैकान्तधियो यत्र स्थिता जनाः ॥ ४२ ॥ फलं भूतस्य पुण्यस्य वर्तमानस्य सेचनम् । तनोति चैष्यतो बीजं त्वदनुस्मरणं प्रभो ॥ ४३ ॥ ज्ञानामृतैककलशो धृतिज्योत्स्नानिशाकरः । अपवर्गपुरद्वारं त्वदनुस्मरणं प्रभो ॥ ४४ ॥ त्वदनुस्मरणोदारचिन्तामणिमता मया । सर्वासामापदां मूर्ध्नि दत्तं भूतपते पदम् ॥ ४५ ॥ इत्युक्त्वा सुप्रसन्नं तं भगवन्तं महेश्वरम् । अवोचं प्रणतो भूत्वा यद्राम तदिदं शृणु ॥ ४६ ॥ भगवंस्त्वत्प्रसादेन पूर्णा मे सकला दृशः । किं तु पृच्छामि देवेश संदेहं तत्त्वनिर्णयम् ॥ ४७ ॥ ब्रूहि प्रसन्नया बुद्ध्या त्यक्तोद्वेगमनामयम् । सर्वपापक्षयकरं सर्वकल्याणवर्धनम् । देवार्चनविधानं

23 d: Lies ऽत्यवर्तत*; **समकालोऽस्य वर्तत** – 24 a: **अथैकः स** – 27 d: **चश्चदिन्दुगणोपमम्** – 28 a: **प्रकटीकृतदिक्कुञ्जं** d: **बुद्धिदृष्ट्या विलोकितम्** – 29 d: **०ताग्रगः** – 30 b: Hs. **गृहीत्वार्थं** – 31 c: Hs. **दत्तार्घेण**; **दत्त्वार्घ्येण** d: **०वंदितः** – 34A: **नानाविधैर्नमस्कारैः स्तोत्रैश्चाभ्यर्चितः शिवः ॥** – 38A: **कच्चित्प्राप्यं मनः प्राप्तं** [lies ०त्प्राप्यमनुप्राप्तं*] **कच्चिच्छाम्यंति भीतयः ॥** – 40 a: **त्वदनुस्मृतकल्याण०** c: **न च किंचन** – 41 b: Hs. **०परिपूर्णित०** – 43 d: **विभो** – 44 b: Hs. **०ज्योत्स्नादिवाकरः** – 47 b: **दिशः** c: **किं नु** d: **तत्र निर्णयम्**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तत्कीदृशं भवति प्रभो ॥ ४८ ॥ ईश्वर उवाच ॥ शृणु ब्रह्मविदां श्रेष्ठ देवार्चनमनुत्त
मम् । न देवः पुण्डरीकाक्षो न च देवस्त्रिलोचनः ॥ ४९ ॥ न देवो देहरूपो हि न देव
श्चित्तरूपकः । अकृत्रिममनाद्यन्तं देवनं देव उच्यते ॥ ५० ॥ आकारादिपरिच्छिन्ने
मिते वस्तुनि तत्कुतः । अकृत्रिममनाद्यन्तं देवनं चिच्छिवं विदुः ॥ ५१ ॥ अज्ञातशि
वतत्त्वानामाकाराद्यर्चनं कृतम् । योजनाध्वन्यशक्तस्य क्रोशाध्वा परिकल्पते ॥ ५२
॥ चिद्व्योमैव किलास्तीह पारावारविवर्जितम् । सर्वत्रासंभवच्चेत्यं यत्कल्पान्तेषु शि
ष्यते ॥ ५३ ॥ बोधः साम्यं शम इति पुष्पाण्यग्र्याणि तत्र च । शिवं चिन्मात्रममलं
पूज्यं पूजाविदो विदुः ॥ ५४ ॥ शमबोधादिभिः पुष्पैर्देव आत्मा यदर्च्यते । तत्तु देवा
र्चनं विद्धि नाकारार्चनमर्चनम् ॥ ५५ ॥ अकृत्रिममनाद्यन्तमद्वितीयमखण्डितम् ।
अबहिःसाधनासाध्यं सुखं तस्मादवाप्यते ॥ ५६ ॥ संवित्सर्वकलातीता सर्वभावान्त
रस्थिता । नित्यं सदसतोमरध्ये सत्तासामान्यरूपिणी । महासत्तात्मतां प्राप्ता देवश
ब्देन कथ्यते ॥ ५७ ॥ विकल्पकलिता सैव चित्स्वरूपपरिच्युता । जाड्यं क्रमात्प्राप
यन्ती प्रयाति कलनापदम् ॥ ५८ ॥ देशकालादिशक्तीनामुल्लासैर्वलिता क्रमात् । जी
वो भूत्वा भवत्याशु बुद्धिः पश्चादहं मनः ॥ ५९ ॥ मनस्त्वं समुपायाता संसारमवल
म्बते ॥ ६० ॥ इयमस्मीति भावेन देहास्था परिपातिनी । मग्ना मोहमहापङ्के दुःखाद्दुः
खं व्रजत्यधः ॥ ६१ ॥ दुष्टसंकल्पमात्रेण यदिदं दुःखमागतम् । तदसंकल्पमात्रेण क्ष
यि कात्र कदर्थना ॥ ६२ ॥ यत्किंचिदपि संकल्प्य नरो दुःखे निमज्जति । न किंचि
दपि संकल्प्य सुखमक्षयमश्नुते ॥ ६३ ॥ स्वविवेकानिलैः कृत्वा संकल्पजलदक्षयम् ।
परां निर्मलतामेति शरदीव नभोऽन्तरम् ॥ ६४ ॥ स्वसंकल्पनकालुष्यं विनिवार्यात्म
नात्मनः । परं प्रसादमासाद्य परमानन्दभाग्भव ॥ ६५ ॥ सर्वशक्तिमयो ह्यात्मा शक्ति
मण्डलताण्डवैः । संसारं तन्निवृत्तिं च सर्वमासादयत्यलम् । समचिन्मात्ररूपस्य सर्व
स्यानाकृतेरपि ॥ ६६ ॥ इच्छासत्ता व्योमसत्ता कालसत्ता तथैव च । तथा नियतिस
त्ता महासत्ता च सुव्रत ॥ ६७ ॥ ज्ञानशक्तिः क्रियाशक्तिः कर्तृताकर्तृतापि च । इत्या
दिकानां शक्तीनामन्तो नास्ति परात्मनः ॥ ६८ ॥ उल्लासशक्त्या संसारः सर्वतः स वि
जृम्भते । निरोधशक्त्या निःशेषमयमायाति संक्षयम् ॥ ६९ ॥ पूजाक्रमेषु सर्वेषु देह
दाहं पवित्रकम् । त्याज्यं देहावबोधात्म ग्राह्यं यत्नात्पवित्रकम् ॥ ७० ॥ ततस्त्रिभुवना
धारं नित्यं ध्यानेन पूजयेत् । चिद्रूपं सूर्यलक्षाभं समस्ताभासभासनम् ॥ ७१ ॥ अन्तः
स्थचित्प्रकाशं स्वमहंतासारमाश्रयेत् । अपारपरमाकाशविपुलाभोगकंधरम् ॥ ७२ ॥

49 महेश्वर – 51A: देवः कः स्यादिति त्वेतत्प्रथमं तावदुच्यते । तदेव देवशब्देन कथ्यते तत्प्रपूज्यते ॥ – 52 d: परिकथ्यते, lies परिकल्प्यते* – 53 a: Hs. चिद्व्योमेह d: कल्पांतेषु च शिष्यते – 54 a: शमश्चेति b: तस्य तैः – 58 c: क्रमाद्भावयंती d: कलनास्पदम् – 60A: चंडालोऽस्मीति मननाच्चंडालत्वमिव द्विजः ॥ – 61 a: बोधेन b: देहस्था d: व्रजत्यसौ – 62 a: पुष्टं संकल्प० d: कदर्थिता – 63 d: सुखमव्यय० – 64 c: ०मेहि – 65 d: ०नंदवान्भव – 69 b: संप्रवर्तते – 70 b: देहदाहे c: त्याज्यदेहा० – 70A: एष देवः स परमः पूज्य एष सदा सताम् । पूजनं ध्यानमेवांतर्नान्यदस्त्यस्य पूजनम् ॥ – 71 a: तस्मात्त्रि० – 72 b: स्वं महतां सारमाशये

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अनन्ताधस्तनाकाशकोशपादसरोरुहम् । अनन्तदिक्तटाभोगे भुजमण्डलमालितम् ॥
७३ ॥ नानाविधमहालोकगृहीतपरमायुधम् । हृत्कोशकोणविश्रान्तब्रह्माण्डौघपरम्प
रम् ॥ ७४ ॥ प्रकाशपरमाकाशपारगापारविग्रहम् । ब्रह्मेन्द्रहरिरुद्रेशप्रमुखामरमण्डि
तम् ॥ ७५ ॥ इमां भूतश्रियं तस्य रोमालीं प्रविचिन्तयेत् ॥ ७६ ॥ विविधारम्भका
रिण्यस्त्रिजगज्जन्तुरज्जवः । इच्छाद्याः शक्तयस्तस्य चिन्तनीयाः शरीरगाः ॥ ७७ ॥
एष देवः स परमः पूज्य एष सदा सताम् । चिन्मात्रमनुभूत्यात्मा सर्वगः सर्वसंश्रयः
॥ ७८ ॥ अनन्तैकपदाधारः सत्तामात्रैकविग्रहः । विवर्तितजगज्जालकालोऽस्य द्वार
पालकः ॥ ७९ ॥ सर्वत्रेक्षणशक्त्याढ्यं सर्वत्र घ्राणशक्तिकम् । सर्वत्र स्पर्शनमयं सर्व
तो रसनान्वितम् ॥ ८० ॥ सर्वत्र श्रवणाकीर्णं सर्वत्र मननान्वितम् । सर्वतो मनना
तीतं सर्वत्र परमं शिवम् । इति संचिन्त्य देवेशमर्चयेद्विधिवत्ततः ॥ ८१ ॥ स्वसंविदा
त्मा देवोऽयं नोपहारेण पूज्यते । नित्यमक्लेशलभ्येन शीतलेनाविनाशिना । एकेनैवा
मृतेनैष बोधेन स्वेन पूज्यते ॥ ८२ ॥ एतदेव परं ध्यानं पूजैषैव परा स्मृता । यदनार
तमन्तःस्थशुद्धचिन्मात्रवेदनम् ॥ ८३ ॥ पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छञ्श्वसन्स्व
पन् । प्रलपन्विसृजन्गृह्णञ्शुद्धसंविन्मयो भवेत् ॥ ८४ ॥ ध्यानोपहार एवात्मा ध्यान
मस्य महार्चनम् । विना तेनेतरेणायमात्मा लभ्यत एव नो ॥ ८५ ॥ ध्यानेनानेन सु
मते निमेषांस्तु त्रयोदश । मूढोऽपि पूजयित्वेशं गोप्रदानं लभेत वै ॥ ८६ ॥ पूजयि
त्वा निमेषाणां शतमेकमिति प्रभुम् । अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ८७
॥ पूजयित्वा स्वमात्मानं घटिकार्धं त्विति प्रभुम् । अश्वमेधसहस्रस्य फलं प्राप्नोति मा
नवः ॥ ८८ ॥ ध्यानबल्युपहारेण स्वयमात्मानमात्मना । घटिकां पूजयेद्यस्तु राजसूय
फलं लभेत् ॥ ८९ ॥ मध्याह्नपूजनादित्थं राजसूयैकलक्षभाक् । दिवसं पूजयित्वैवं परे
धाम्नि वसेन्नरः । एषोऽसौ परमो योग इयं सा परमा क्रिया ॥ ९० ॥ बाह्यसंपूजनं प्रो
क्तमेतदुत्तममात्मनः । तदिदानीं प्रवक्ष्येऽहमन्तःपूजनमात्मनः ॥ ९१ ॥ नित्यमेव श
रीरस्थमिमं ध्यायेत्परं शिवम् । शयानमुत्थितं चैव व्रजन्तमथ वा स्थितम् ॥ ९२ ॥
स्पृशन्तमभितः स्पृश्यं त्यजन्तमथ वाभितः । भुञ्जानं संत्यजन्तं च भोगानाभोगपी
वरान् ॥ ९३ ॥ प्रवाहपतितार्थस्थसंबोधस्नानशुद्धिमान् । नित्यावबोधार्हणया बोधलि
ङ्गं प्रपूजयेत् ॥ ९४ ॥ मनो मननशक्तिस्थं प्राणापानान्तरोदितम् । हृत्कण्ठतालुमध्य
स्थं भ्रूनासापुटपीठगम् । षट्त्रिंशत्पदकोटिस्थमुन्मन्यन्तदशातिगम् ॥ ९५ ॥ स्वदेहे
संविदाभासो देवोऽयमिति भावयेत् ॥ ९६ ॥ विचित्राः शक्तयो बह्व्यो नानाचारा

73 c: ०टाभोग० d: ०मंडितम् – 74 c: Hs. हृत्कोणकोश० – 75 Nach a/b zusätzlich: अध ऊर्ध्वं चतुर्दिक्षु विदिक्षु च निरंतरम् । (75A) – 76 b: रोमालिं – 77 b: ०जगद्यंत्ररज्जवः – 78 b: एव c: चिन्मात्रो ह्यनुभूतात्मा – 79 a: अनंतः स पराधारः c: ०जगज्जालः – 80 b: सर्वतो c: सर्वतः – 84 b: ०न्गच्छन्स्वपन् श्वसन् – 86 c: Hs. पूजयित्वेवं d: गोप्रदानफलं लभेत् – 89 d: राजसूयं लभेत सः – 91 b: Hs. ०मेषदुत्तम० c: इदानीं संप्र० – 94 b: ०स्वबोध० – 95 f: Hs. ०मुन्मनांतिदशा० – 95A: सहस्रपादावयवः सकेशनखदंतकः ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मनोदृशाम् । उपासते मामनिशं पत्न्यः कान्तमिवोत्तमम् ॥ ९७ ॥ मनो मद्द्वारपालो
ऽयं निवेदितजगत्त्रयम् । चिन्तेयं मे प्रतीहारी द्वारस्था शुद्धरूपिणी ॥ ९८ ॥ ज्ञानानि
च विचित्राणि भूषणान्यङ्गगानि मे । कर्मेन्द्रियाणि द्वाराणि बुद्धीन्द्रियगणैः सह ॥
९९ ॥ अयं सोऽहमनन्तात्मा व्यवच्छेदोज्झिताकृतिः । तिष्ठामि भरितैकात्मा पूर्णः
सर्वावपूरकः ॥ १०० ॥ समः समसमाचारः समाभासः समाकृतिः । सौम्यतामलमा
याति पूजयित्वैवमव्ययम् ॥ १०१ ॥ समया समया बुद्ध्या चिन्मात्रं देहचित्परम् ।
यथाप्राप्तक्रमोत्थेन सर्वार्थेन समर्चयेत् ॥ १०२ ॥ मनागपि न कर्तव्यो यत्नोऽत्रापूर्व
वस्तुनि । कामसंसेवनेनाथ पूजयेच्चेतनं शिवम् ॥ १०३ ॥ भक्ष्यभोज्यान्नपानेन नाना
विभवशालिना । शयनाशनयागेन यथाप्रप्तेन वै बहिः ॥ १०४ ॥ सुखेन सर्वरूपेण सं
बुद्धात्मानमर्चयेत् । आधिव्याधिपरीतेन मोहसंरम्भशालिना । सर्वोपद्रवदुःखेन प्राप्ते
नात्मानमर्चयेत् ॥ १०५ ॥ दारिद्र्येणाथ राज्येन स्वप्रवाहगतात्मना । विचित्रचेष्टापु
ष्पेण बुद्धात्मानं समर्जयेत् ॥ १०६ ॥ भोगानामनिषिद्धानां निषिद्धानां च सर्वदा ।
भोगेन वाथ रागेण स्वात्मानं बुद्धमर्चयेत् ॥ १०७ ॥ नष्टं नष्टमुपेक्षेत प्राप्तं प्राप्तमुपा
हरेत् । निर्विकारतयैतद्धि परमार्चनमात्मनः ॥ १०८ ॥ सुखं वा यदि वा दुःखं प्रवा
हपतितं भवेत् । सर्वमात्ममयं कुर्यान्नित्यात्मार्चापरो नरः ॥ १०९ ॥ सर्वदा सर्वरूपेण
सर्वाकारविकारिणा । सर्वं ब्रह्मेति निश्चित्य नित्यात्मार्चाव्रतं चरेत् ॥ ११० ॥ सर्व एव
शिवप्राप्तिहेतुर्भक्तिमतामिह । संविन्मार्गोऽयमाह्लाददुःखमोहैस्त्रिधास्थितः ॥ १११ ॥
न वाञ्छता न त्यजता ज्ञेन प्राप्ताः स्वभावतः । सरितः सागरेणेव भोक्तव्या भोगभू
तयः ॥ ११२ ॥ उद्वेगो नानुगन्तव्यास्तुच्छातुच्छासु दृष्टिषु ॥ ११३ ॥ देशकालक्रिया
योगाद्यदुपैति शुभाशुभम् । अविकारगृहीतेन तेनैवात्मानमर्चयेत् ॥ ११४ ॥ आत्मा
र्चनविधानेऽस्मिन्प्रोक्ता द्रव्यश्रियस्तु याः । एकेनैव समेनैता रसेन परिभाविताः ॥
११५ ॥ नाम्ला न कट्व्यो नो तिक्ता न कषायाश्च काश्चन । चित्रैरपि रसैर्दिग्धा मधु
रा एव ताः किल ॥ ११६ ॥ समता मधुरा रम्या रसशक्तिरतीन्द्रिया । तया यद्भावि
तं चेत्यममृतं तत्क्षणाद्भवेत् ॥ ११७ ॥ समतामृतरूपेण यद्यज्जगति विभाव्यते । तत्त
दायाति माधुर्यं परमिन्दोरिव च्युतम् ॥ ११८ ॥ पूर्णेन्दुनेव पूर्णेन भाव्यं समसमत्वि
षा । स्वच्छेन चिद्घनैकेन ज्ञेनाप्युपलरूपिणा ॥ ११९ ॥ देशकालकरणक्रमोदितैः सर्वव
स्तुसुखदुःखविभ्रमैः । नित्यमर्चितशरीरनायकस्तिष्ठ शान्तसकलेहया धिया ॥ १२०

98 a: मे द्वार० – 101 a: समरसाचारः – 102 a: समया सर्वया b: देववित्परम् – 103 c: ०संवेदनेनाथ – 104 c/d: शयनासनयानेन यथाप्रप्तेन चार्चयेत् – 104A: कांतान्नपानसंभोगसंभारादिविलासिना ॥ – 106 b: प्रवाहपतितात्मना d: शुद्धात्मानं प्रपूजयेत् – 107 c: त्यागेन चाथ – 109 a/b: आपातरमणीयं यत्तथापातसुदुःसहम् – 110 b: यत्सर्वत्र स्थितं हितम् – 111 Felt bei LN. – 112 Hs. entstellt (c/d: सागरेणैवभोक्तव्याभोक्तव्याभोगभूमयः) – 113A: व्योम्ना चित्रपदार्थेषु पतितापतितेष्विव ॥ – 117 a: रस्या c/d: चेत्थममृतं – 118 b: यद्यन्नाम (metr. korrekt), lies यद्यज्जगति भाव्यते * – 120 (Rathoddhatā) d: ०सकलेच्छया

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ ईश्वर उवाच ॥ अविद्यां श्रेष्ठया श्रेष्ठः क्षालयन्निह तिष्ठति । मलं मलेनापहरन्युक्ति
ज्ञो रजको यथा ॥ १२१ ॥ अकारणान्यविद्यांशाः श्रेष्ठाः कारणतां गताः । क्रमाद्गुरू
पदेशाद्या आत्माज्ञानस्य सिद्धये ॥ १२२ ॥ क्रमे गुरूपदेशानां वृत्ते शिष्यावबोधने ।
अनिर्देश्योऽप्यदृश्योऽपि स्वयमात्मा प्रसीदति ॥ १२३ ॥ शास्त्रार्थैर्बुध्यते नात्मा गुरो
र्वाचा न वानघ । बुध्यते स्वयमेवैष स्वबोधवशतः स्वतः ॥ १२४ ॥ गुरूपदेशशास्त्रार्थै
र्विना चात्मा न बुध्यते । एतत्संयोगसत्तैव स्वात्मज्ञानप्रकाशिनी ॥ १२५ ॥ गुरुशा
स्त्रार्थशिष्याणां चिरसंयोगसत्तया । अहनीव जनाचार आत्मज्ञानं प्रवर्तते ॥ १२६ ॥
एवं देवार्चनं नित्यं ज्ञः कुर्वन्मुनिनायक । यत्रास्मदादयो भृत्यास्तत्प्रयाति परं पदम्
॥ १२७ ॥ अविद्यमानमेवेदं विद्यमानं व्यवस्थितम् । आभासमात्रं त्रिजगन्नान्यदस्ति
मुनीश्वर ॥ १२८ ॥ योऽसौ ब्रह्मादिशब्दार्थः संविदं विद्धि केवलाम् । सा वेद्यमिव ग
च्छन्ती याति चिन्नामयोग्यताम् ॥ १२९ ॥ क्षणाद्भावितवेद्यत्वादहंतामनुगच्छति ॥
१३० ॥ अस्या अहंतारूपाया देशतां कालतां गताः । संपद्यन्ते स्वयं शून्यरूपिण्यः
सख्य एव ताः ॥ १३१ ॥ ताभिः संवलिता साधोः सत्ता जीवाभिधानिका । भूत्वा बु
द्धित्वमायाति नित्यमज्ञपदे स्थिता ॥ १३२ ॥ शब्दशक्त्या क्रियाशक्त्या ज्ञानशक्त्या
नुगम्यते । मिलित्वैष गणः क्षिप्रं स्मृतिं समनुकल्पयेत् ॥ १३३ ॥ मनो भवति शून्या
त्म बीजं संकल्पशाखिनः । आतिवाहिकदेहोक्तिभाजनं तद्विदुर्बुधाः ॥ १३४ ॥ परा
मर्शैकरूपिण्यो ह्यनन्तास्तस्य शक्तयः । व्योमादिरूपतामेत्य ततस्तत्त्वानि तन्वते ॥
१३५ ॥ शून्य एव हि वेताल इवेत्थं चित्तवासना । उदितेयं जगन्नाम्नी तच्छान्तौ शा
न्तिरक्षता ॥ १३६ ॥ अहंतायां जगति च मृगतृष्णाजलेऽपि वा । सास्थस्तं धिग्धतनरं
नोपदेश्यस्त्वसाविह ॥ १३७ ॥ जीवं विवेकिनमथोपदिशन्ति तज्ज्ञा नो बालमुद्भ्रम
मसन्मयमार्यमुक्तम् । अज्ञं प्रशास्ति किल यः कनकावदातां स स्वप्नदृष्टपुरुषाय सुतां
ददाति ॥ १३८ ॥ ईश्वर उवाच ॥ यथा पृष्टं मुने प्रोक्तं त्वयि कल्याणमस्तु ते । देशं
प्रयामोऽभिमतमागच्छोत्तिष्ठ पार्वति ॥ १३९ ॥ इत्युक्त्वा नीलकण्ठोऽसौ त्यक्तपुष्पा
ञ्जलौ मयि । ततार परिवारेण सममम्बरकोटरम् ॥ १४० ॥ ततः प्रभृति तेनैव क्रमे
णार्चनमात्मनः । अद्य यावद्गतव्यग्रः कुर्वन्नहमवस्थितः ॥ १४१ ॥ अनेनार्चाविधानेन
मयेमा राम वासनाः । अखिन्नेनातिवाह्यन्ते व्यवहारपरा अपि ॥ १४२ ॥ यथाप्रा
प्तैः क्रियाचारकुसुमैरात्मनोऽर्चनम् । व्युच्छिन्नमव्युच्छन्नं मे न कदाचिदहर्निशम् ॥
१४३ ॥ ग्राह्यग्राहकसंबन्धः सामान्यः सर्वदेहिषु । योगिनः सावधानत्वं यत्तदर्चन

121 b: **क्षालयन्नेव** – 122 a: **अहेतवोऽप्यविद्यांशाः** d: **आत्मज्ञानस्य** – 123 b: **प्रवृत्ते शिष्यबोधनम्** – 124 b: **गुरोर्वचनतो न च** – 127 c: Hs. **अत्रा०** – 128 b: **विद्यमानमिव स्थितम्** – 130A: **पुमान्भावनया स्वप्ने वनवारणतामिव ॥** – 132 a: **सैव** – 132A: **जीवशक्तिस्तथाभूता निश्चयैकविलासिनी ॥** – 133 d: **०कल्पयन्** – 134 a: **शुद्धात्म** – 135 d: **जगन्नाना विभाति तत्** – 137 b: **०जले च यः** c: Hs. **आश्वस्तं चिद्घनतरं** – 138 (Vasantatilakā) a: **०नमिहोपदिशंति** – 139 Hs. **श्रीईश्वर** – 140 **वसिष्ठ उवाच ॥** – 142 c: **अखिन्नेनेव वाह्यंते** – 143 a: **यथाप्राप्तक्रियाचार०** b: Hs. **विच्छिन्नम०** – 144 b: **सर्वजंतुषु**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मात्मनः ॥ १४४ ॥ दृष्ट्यानया रघुपते सङ्गमुक्तेन चेतसा । संसारविरलारण्ये विहरा स्मिन्न खिद्यसे ॥ १४५ ॥ श्रीराम उवाच ॥ इदानीं संशयो ब्रह्मन्विनिवृत्तो विशेषतः । ज्ञातं ज्ञातव्यमखिलं जाता स्थितिरकृत्रिमा ॥ १४६ ॥ परामभेद्यामपरैर्दलिताशामत ङ्गजाम् । संसारसमरे सम्यग्धीरतामागतं मनः ॥ १४७ ॥ परिगलितविकल्पनामुपेतं प्रगलितवाञ्छमदीनसारसत्त्वम् । त्रिजगति यदतिप्रसन्नरूपं प्रमुदितमन्तरमुत्तरं मनो मे ॥ १४८ ॥ इति निर्वाणप्रकरणे पूजोपाख्यानम् ॥ [२९] ॥ श्रीराम उवाच ॥ तव वाक्यसुधासेकैर्न तृप्तिरुपजायते । भूयः कथय मे ब्रह्मन्कांचित्तत्त्वमयीं कथाम् ॥ १ ॥ श्रीवसिष्ठ उवाच ॥ यथा प्राप्तिक्षणे वस्तु प्रथमे पुष्टये तथा । न प्राप्त्येकक्षणादूर्ध्व मिति को नानुभूतवान् ॥ २ ॥ वाञ्छाकाले यथा वस्तु तुष्टये नान्यदा तथा ॥ ३ ॥ वाञ्छाक्षणे तु या तुष्टिस्तत्र वाञ्छैव कारणम् । तुष्टिस्त्वतुष्टिपर्यन्ता तस्माद्वाञ्छां परि त्यज ॥ ४ ॥ आशा यातु निराशत्वमभावं यातु भावनम् । अमनस्त्वं मनो यातु तवा सङ्गेन जीवतः ॥ ५ ॥ वासनारहितैरन्तरिन्द्रियैराहर क्रियाः । न विक्रियामवाप्नोषि खवत्क्षोभशतैरपि ॥ ६ ॥ चित्तोन्मेषनिमेषाभ्यां संसारप्रलयोदयौ । वासनाप्राणसं रोधादनिमेषं मनः कुरु ॥ ७ ॥ प्राणोन्मेषनिमेषाभ्यां संसृतेः प्रलयोदयौ । तमभ्यास प्रयोगाभ्यामुन्मेषरहितं कुरु ॥ ८ ॥ मौर्ख्योन्मेषनिमेषाभ्यां कर्मणां प्रलयोदयौ । त द्विलीनं कुरु बलाद्गुरुशास्त्रार्थसंगमैः ॥ ९ ॥ असंवित्स्पन्दमात्रेण याति चित्तमचित्त ताम् । प्राणानां वा निरोधेन तदेव च परं पदम् ॥ १० ॥ दृश्यदर्शनसंबन्धे यत्सुखं पारमार्थिकम् । तदन्तैकान्तसंविच्त्या ब्रह्मदृष्ट्या मनःक्षयः ॥ ११ ॥ यत्र नाभ्युदितं चित्तं तद्वै सुखमकृत्रिमम् । क्षयातिशयनिर्मुक्तं नोदेति न च शाम्यति ॥ १२ ॥ ज्ञस्य चित्तं न चित्ताख्यं ज्ञचित्तं सत्यमुच्यते । नानार्थान्यत्वभाक्किंत्तिं वेधात्ताम्रसुवर्णवत् ॥ १३ ॥ चित्तं ज्ञत्वमुपायातं किंचित्कालं जगत्स्थितौ । विहृत्य तुर्यावस्थायां तुर्याती तं भवत्यतः ॥ १४ ॥ ब्रह्मैव भूरिभुवनभ्रमविभ्रमौघैरित्थं स्थितं सममनेकतयैकमेव । सर्वात्म संभवति नेतरदङ्ग किंचिच्चित्तादिकस्य न हृदीव हि संनिवेशः ॥ १५ ॥ श्री वसिष्ठ उवाच ॥ अत्रेमामवबोधाय विस्मयोल्लासकारिणीम् । अपूर्वां चैव संक्षेपाद्राम रम्यां कथां शृणु ॥ १६ ॥ योजनानां सहस्राणि विपुलं विमलं स्फुटम् । युगैरप्यजरद्रू पमस्ति बिल्वफलं महत् ॥ १७ ॥ पुराणमपि बालेन्दुदलमार्दवसुन्दरम् । महाकल्पा न्तवात्याया अपि वेगैरचालितम् ॥ १८ ॥ योजनायुतकोटीनां कोटिलक्षशतैरपि ।

146 Ohne श्री० (2. Aufl.) c: Hs. ज्ञानं d: तृप्तिरकृत्रिमा – 148 (Puṣpitāgrā) b: प्रशमित० d: ०मंतरनुत्तमं – Kolophon zu Sarga 29: इति श्रीयोगवासिष्ठसारे [!] मोक्षोपाये निर्वाणप्रकरणे देवपूजोपाख्पानं नाम त्रिंशः सर्गः ॥ ३० ॥ – 30.1 Ohne श्री० (2. Aufl.) – 2 Ohne श्री० b: प्रथमं तुष्टये c: Hs. प्राप्तैक० – 3 b: तदा – 3A: तस्मात्क्षणसुखे सक्तिं बालो बध्नाति नेतरः ॥ – 5 b: भावना – 6 b: ०हरन्क्रियाम् – 8 b: Hs. = 9b – 9 d: ०संयमैः – 10 d: तदेव परमं – 11 (a/b = 26.39a/b) a: Hs. दृश्ये दर्शन० – b: सुखमनुत्तमम् – 13 d: बोधात्ताम्रं – 14 a: चित्तं चित्तत्वमायाति d: भवत्युत – 15 (Vasantatilakā) a/b: ०भ्रमोच्चैरित्थं c: सर्वात्मकं भवति d: ०च्चित्तादिकं च न – 16 Ohne श्री० b: ०शालिनीम्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

वैपुल्येनापरिच्छेद्यं मूलमाद्यं जगत्स्थितेः ॥ १९ ॥ यस्य बिल्वफलस्योच्चैर्ब्रह्माण्डानि समीपतः । हरन्ति लीलां शैलाधो राजिकाकणपद्धतेः ॥ २० ॥ न कदाचन पाकेन पातान्तेन समेति यत् । सदैव पक्कमप्यङ्ग जरसा यन्न बाध्यते ॥ २१ ॥ समस्तफलसारस्य तस्य मज्जास्ति विसृताः । तस्याः परममज्जा तु यासौ स्वात्मचमत्कृतिः ॥ २२ ॥ संविच्छत्तया तया तत्र ततस्तरलरूपया । निज एव समे रूपे दृगित्थं संप्रसारिता ॥ २३ ॥ इदं व्योम महानन्तमियं कालमहाकला । इयं नियतिरित्युक्ता क्रियेयं स्पन्दरूपिणी ॥ २४ ॥ ब्रह्माण्डमण्डपीपिण्डमिदमाशाक्रमो ह्ययम् । इत्यादिस्तस्य बिल्वस्य निजमज्जाचमत्कृतिः ॥ २५ ॥ श्रीराम उवाच ॥ भगवन्सर्वसारज्ञ त्वयैषा बिल्वरूपिणी । महाचिद्घनसत्तेह कथितेति मतिर्मम ॥ २६ ॥ चिन्मज्जारूपमखिलमहंतातीतमाततम् । न मनागपि भेदोऽस्ति द्वैतैक्यकलनात्मकः ॥ २७ ॥ यथा ब्रह्माण्डकूष्माण्डमज्जा मेर्वादिसंस्थितिः । तथा चिद्बिल्वमज्जेयं ब्रह्माण्डादिजगत्स्थितिः ॥ २८ ॥ इति निर्वाणप्रकरणे बिल्वनिदर्शनम् ॥ [३०] ॥ श्रीवसिष्ठ उवाच ॥ अथेममिन्दुवदन चित्रां विस्मयकारिणीम् । वर्ण्यमानां मया रम्यामन्यामाख्यायिकां शृणु ॥ १ ॥ स्निग्धा स्पष्टा मृदुस्पर्शा महाविस्तारशालिनी । निबिडा नित्यनीरन्ध्रा क्वचिदस्ति महाशिला ॥ २ ॥ तस्यामन्तः प्रफुल्लानि पद्मानि सुबहून्यपि । अन्योन्यप्रोतपत्राणि मिथो विवलितानि च । मिथश्चोपरि रूढानि गूढानि प्रकटानि च ॥ ३ ॥ तेषां च निकटे सन्ति शङ्खाः शतसहस्रशः । चक्रौघाश्च महाकाराः पद्मवत्संनिवेशिनः ॥ ४ ॥ श्रीराम उवाच ॥ चिच्छिलैषा त्वयोक्ता मे यस्यामन्तर्जगत्स्थितम् । घनत्वैकात्मकत्वादिवशादेषा शिलैव चित् ॥ ५ ॥ अप्यत्यन्तघनाङ्गायाः सुनीरन्ध्राकृतेरपि । विद्यतेऽन्तर्जगद्वृन्दं व्योम्नीव विपुलानिलः ॥ ६ ॥ द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः । सन्ति तस्यां शिला सा च सुषिरा न कदाचन ॥ ७ ॥ सुषुप्तावस्थया चक्रपद्मलेखाः शिलोदरे । यथा स्थिताश्चितेरन्तस्तथेयं जगदावली ॥ ८ ॥ इति शिलाख्यायिका ॥ [३१]

20 a: तस्य – 21 b: तत् c: Hs. सदैवापक्क० – 22 b: फलस्यास्य महाकृतेः c/d: अंतर्मज्जत्वमायाति संविच्छक्तिचमत्कृतिः – 24 b: कालमयी कला c: नियतिरुद्युक्ता – 25 a/b: ब्रह्मांडमंडपमिदमिमा आशाः क्रमो ह्ययम् – c: इति सा तस्य – 26 Ohne श्री० (2. Aufl.) – 27 b: ०महंतादीदमाततम् – Kolophon zu Sarga 30: इति श्रीनिर्वाणप्रकरणे बिल्वोपाख्यानं नामैकत्रिंशः सर्गः ॥ ३१ ॥ – 31.1 Ohne श्री० – 3 d: विघटितानि Nach a/b zusätzlich: सरस्यामिव रम्याणि संत्यनंतानि राघव । (3A) Nach e/f zusätzlich: ऊर्ध्वमूलान्यधोमूलान्यमूलानीतराणि च ॥ (3B) – 4A: श्रीराम [2. Aufl. ohne श्री०] उवाच ॥ सत्यमेतन्मया दृष्टा तादृशी सा महाशिला । शालग्रामे हरेर्मूर्ध्नि विद्यते तादृशी शिला ॥ – 5 वसिष्ठ उवाच ॥ a: मयोक्ता ते b: ०त्स्थितिः – 6 d: विपुलोऽनिलः – 7 a: ०राकाश० (2. Aufl.: ०शः) d: न मनागपि – 7A: शंखपद्मादिकं लोकं पाषाणे लिप्यते तथा । भूतं भवद्भविष्यच्च चिच्छिला शालभंजिका ॥ B: उपलोंऽतःसंनिवेशो [lies ०संनिवेशे] नानात्माप्येकपिंडताम् [lies ०पिण्डकः (vgl. ST)] । तथा चिद्विश्वगर्भाऽपि न मुंचत्येकपिंडताम् ॥ C: यथा पद्मः शिलाकोशादभिन्नस्तद्वपुर्मयः । तथा सर्गश्चितो रूपादभिन्नः सर्वदैव हि ॥ D: शिलांतः पद्मलेखाली मरीचांतश्चमत्कृतिः [lies मरीच्यंतश्च०] । नोदेति नास्तमायाति यथा सर्गस्तथा चितौ ॥ E: यथा पुरंध्र्यां मर्त्योऽतर्मज्जा वा बिल्वगा यथा । तथानंतविकाराढ्या चितौ ब्रह्मांडमंडली ॥ – 8 c/d: ०रंतः स्थितेयं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ श्रीराम उवाच ॥ जगत्सहस्रनिर्माणमहिम्नो दर्पणस्य च । पुर्यष्टकस्य भगवन् रूपं कथय कीदृशम् ॥ १ ॥ श्रीवसिष्ठ उवाच ॥ ज्ञत्वकर्तृत्वभोक्तृत्वसाक्षित्वाद्यभिपातिनी । या संविज्जीव इत्युक्ता तद्धि पुर्यष्टकं विदुः ॥ २ ॥ पुर्यष्टकविवेकः ॥ श्रीवसिष्ठ उवाच ॥ पुण्डरीकाक्षनिर्दिष्टामसंसङ्गगतिं शुभाम् । यामालिङ्ग्य महाबाहो जीवन्मुक्तमना मुनिः ॥ ३ ॥ पाण्डोः पुत्रोऽर्जुनो नाम सुखं जीवितमात्मनः । क्षपयिष्यति निर्दुःखं तथा क्षपय जीवितम् ॥ ४ ॥ श्रीराम उचाच ॥ भविष्यति कदा ब्रह्मन्सोऽर्जुनः पाण्डुनन्दनः । कीदृशीं च हरिस्तस्य कथयिष्यत्यसक्तताम् ॥ ५ ॥ श्रीवसिष्ठ उवाच ॥ भगवान्स यमः किंचिद्गते प्रतिचतुर्युगे । तपः प्रकुरुते भूतदलनोत्थाद्यशङ्कया । कदाचिदष्टौ वर्षाणि दश द्वादश वापि च ॥ ६ ॥ उदासीनवदासीने तस्मिन्नियमसंस्थिते । न हिनस्ति जगज्जाले मृत्युर्भूतानि कानिचित् ॥ ७ ॥ तेन नीरन्ध्रभूतौघं निःसंचारं महीतलम् । भवति प्रावृषि स्वेदी कुञ्जरो मशकैरिव ॥ ८ ॥ अथ तानि विचित्राणि भूतानि बहुयुक्तिभिः । क्षपयन्ति सुरा राम भुवो भारनिवृत्तये ॥ ९ ॥ एवं युगसहस्राणि व्यवहारशतानि च । समतीतान्यनन्तानि भूतानि च जगन्ति च ॥ १० ॥ वैवस्वतोऽद्य तु यमो स एष पितृनायकः । अनेन त्वधुना साधो परिक्षीणेषु केषुचित् ॥ ११ ॥ युगेष्वथ विघाताय वर्षाणि द्वादशात्मना । व्रतचर्येह कर्तव्या दूरास्तजनकर्षणा ॥ १२ ॥ तेनेयमुर्वी नीरन्ध्रा भूतैर्मर्त्तैरमृत्युभिः । दीना प्रघनगुल्मेव भारभूतैर्भविष्यति ॥ १३ ॥ भूर्भारपरिभूताङ्गी हरिं शरणमेष्यति । हरिर्देहद्वयेनाथ महीमवतरिष्यति ॥ १४ ॥ वसुदेवसुतस्त्वेको द्वितीयः पाण्डवोऽर्जुनः । धृतराष्ट्रसुतैः सार्धं संग्रामेऽत्यन्तदारुणे ॥ १५ ॥ अर्जुनः स्वजनान्दृष्ट्वा तान्सर्वान्मरणोन्मुखान् । विषाद

8A: यथा यत्र यदाकारं तथा तत्र तदेव हि । ब्रह्म सर्वात्मकं सर्वं सुषुप्तस्थमिव स्थितम् ॥ B: भूरिभावविकाराढ्यो योऽयं जगदुरुभ्रमः । सुषुप्तमेव तद्विद्धि शिलिांतः पंकंजादिवत् ॥ C (Vasantatilakā): नित्यं सुषुप्तपदमेव जगद्विलासः सम्यक्प्रशांतसमचिद्घन आत्मनीदृक् । पद्मं शिलांत इव सर्गदशास्त्वसारा दृष्टा न देहमुपयाति [2. Aufl.: ०यान्ति] कदाचिदेव ॥ – Kolophon zu Sarga 31: इति श्रीयोगवासिष्ठसारे [!] निर्वाणप्रकरणे शिलोपाख्पानं नाम द्वात्रिंशः सर्गः ॥ ३२ ॥ – 32.1 Ohne श्री० (2. Aufl.) b: तु – 1A (vor 1a–d): ज्ञातं ज्ञातव्यमखिलं दृष्टं द्रष्टव्यमक्षतम् । लीलयेदं तु पृच्छामि भूयो बोधाभिवृद्धये ॥ – 2 Ohne श्री० – 2A–D (vor 2a–d): A: अनाद्यन्तं जगद्बीजं यद्ब्रह्मास्ति निरामयम् । तदेव कलनायुक्तमत्र जीव इति स्मृतः ॥ B: नृरूपं शुद्धचिन्मात्रं कलाकलनवर्जितम् । कलनोन्मुखतां यातमत्र जीव इति स्मृतः ॥ C: स जीवः खलु देहेऽस्मिंश्चिनोति स्पंदते स्फुटम् । अहंभावादहंकारो मननान्मन उच्यते ॥ D: बोधनिश्चयतो बुद्धिरिंद्रदृष्टेस्तथेंद्रियम् । देहभावनया देहो घटभावनया घटः । एष एव स्वभावात्मा जनैः पुर्यष्टकं स्मृतः ॥ – 2E (nach 2): पुर्यष्टकवशेनैव स्वप्नात्स्वप्नांतरं यथा । असत्यमेव पश्यंति जनास्तद्वदिदं जगत् ॥ – 3 Zwischentitel und nachfolgende Sprecherangabe fehlen. b: ०संसक्तिमतिं – 4 a: सुतोऽर्जुनो – 5 Ohne श्री० (2. Aufl.) – 6 Ohne श्री० a/b: यमः कदाचिद्भगवान्गते d: ०दलनात्पापशंकया – 6A: कदाचित्पंच सप्तापि कदाचित्षोडशापि वा ॥ – 8 c: Lies खेदी – 11 a/b: वैवस्वतो नाम यमो य एष – 12 a: युगेष्वघवि० b: द्वादशात्मनि – 13 b: भूतैर्मर्त्यैर० c: ०गुल्मैव – 14 a: भूभार० d: महानव० (2. Aufl.) – 15 a/b: वसुदेवसुतस्त्वेको वासुदेव इति श्रुतः । देहो भविष्यति हरेर्द्वितीयः पांडुनंदनः ॥ – 15A: उपेष्यंत्यर्जुनेनैते [lies उपैष्यंत्य०] योद्धुं तद्बांधवो [2. Aufl.: तद्बन्धवो] ऽखिलाः ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मेष्यत्युद्योगं युद्धाय न करिष्यति ॥ १६ ॥ तमर्जुनाभिधं देहं प्राप्तकार्यैकसिद्धये । हरिर्बुद्धेन देहेन बोधयिष्यति युक्तिभिः ॥ १७ ॥ संविद्वपुः स्फारमलब्धदोषमजोऽसि नित्योऽसि निरामयोऽसि ॥ १८ ॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः । अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ १९ ॥ योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय । ब्रह्मार्पितसमाचारो ब्रह्मैव भवसि क्षणात् ॥ २० ॥ ईश्वरार्पितसर्वार्थ ईश्वरात्मा निरामयः ॥ २१ ॥ संन्यस्तसर्वसंकल्पः समः शान्तमना मुनिः । संन्यासयोगयुक्तात्मा ज्ञानवान्मोक्षवान्भव ॥ २२ ॥ अर्जुन उवाच ॥ सङ्गत्यागस्य भगवंस्तथा ब्रह्मार्पणस्य च । ईश्वरार्पणरूपस्य संन्यासस्य च सर्वशः । तथा ज्ञानस्य योगस्य विभागः कीदृशः प्रभो ॥ २३ ॥ श्रीभगवानुवाच ॥ सर्वसंकल्पसंशान्तावेकान्तघनवासनम् । नकिंचिद्भावनाकारं तद्ब्रह्म परमं विदुः ॥ २४ ॥ तदुद्योगं विदुर्ज्ञानं योगं च कृतबुद्धयः । ब्रह्म सर्वं जगदहं चेति ब्रह्मार्पणं विदुः ॥ २५ ॥ कर्मणां यः फलत्यागस्तं संन्यासं विदुर्बुधाः । त्यागः संकल्पजालानामसंसङ्गः प्रकथ्यते ॥ २६ ॥ समस्तकलनाजालस्येश्वरैकत्वभावनम् । गलितद्वैतनिर्भासमेतदेवेश्वरार्पणम् ॥ २७ ॥ मन्मना भव मद्भक्तो मद्यायी मां नमस्कुरु । मामेवैष्यसि युक्त्यैवमात्मानं तत्परायणम् ॥ २८ ॥ सामान्यं परमं चैव द्वे रूपे विद्धि मेऽनघ । पाण्यादियुक्तं सामान्यं भजन्ते मूढबुद्धयः । परं रूपमनाद्यन्तं यन्ममैकमनामयम् ॥ २९ ॥ निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः । द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमाव्ययं तत् ॥ ३० ॥ यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ ३१ ॥ निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् । यथाप्राप्तानुवर्ती च भव भूषितभूतलः ॥ ३२ ॥ अपि स्फुटति विन्ध्याद्रौ वाति वा प्रलयानिले । गुरुशास्त्रानुगो मार्गः परित्याज्यो न धीमता ॥ ३३ ॥ अज्ञानादात्मनः साधो सत्तामायाति वासना । आत्मज्ञानान्महाबोधाद्विलयं याति वासना ॥ ३४ ॥ इति गदितवति त्रिलोकनाथे क्षणमिव मौनमुपस्थिते पुरस्तात् । अथ मधुप इवासिताब्जखण्डे वचनमुपेष्यति तत्र पाण्डुपुत्रः ॥ ३५ ॥ परिगलितसमस्तशोकभारा परमुदयं भगवन्मतिर्गतेयम् । मम तव वचनेन लोकभर्तुर्दिनपतिना परिबोधिताब्जिनीव ॥ ३६ ॥ इति निर्वाणप्रकरणेऽर्जुनोपाख्यानम् ॥ [३२] ॥ श्रीवसिष्ठ

17A (halbe Upajāti): **अनंतमव्यक्तमनादिमध्यमात्मानमालोकय राजसिंह ॥** – 18 (halbe Upajāti) – 19 (unregelmässige Upajāti) a: Hs. **न जायसे न म्रियते क॰** – 21A: **ईश्वरः सर्वभूतात्मा भव भूषितभूतलः ॥** – 22 d: **कुर्वन्मुक्तमतिर्भव** – 23A: **क्रमेण कथयैतन्मे महामोहनिवृत्तये ॥** – 24 a/b: **॰शांतौ प्रशांतघनवासनम्** – 26 c/d: **॰जालानामसंग इति कथ्यते** – 27 a/b: Lies **॰जाल ईश्वरैक॰** – 28 b: **मद्याजी** c: **युक्त्वैव॰** d: **मत्परायणः** – 29 a: **चेति** d: **शंखचक्रगदाधरम्** – 29A: **ब्रह्मात्मपरमात्मादिशब्दे नैतदुदीर्यते ॥** B: **यावदप्रतिबुद्धस्त्वमनात्मज्ञतयास्थितः । तावच्चतुर्भुजाकारदेवपूजापरो भव ॥** C: **तत्क्रमात्संप्रबुद्धस्त्वं ततो ज्ञास्यसि तत्परम् । मम रूपमनाद्यंतं येन भूयो न जायसे ॥** – 30 (Indravajrā) – 34 c: **आत्मज्ञाने महा॰** – 35 (Puṣpitāgrā) – 36 (Puṣpitāgrā) **अर्जुन उवाच ॥** b: **परमुदयन्भग॰** (2. Aufl.) – Kolophon zu Sarga 32: **इति श्रीनिर्वाणप्रकरणे अर्जुनोपाख्पानं नाम त्रयस्त्रिंशः सर्गः ॥ ३३ ॥**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

उवाच ॥ अथ राघव वक्ष्येऽहमितिहासमिमं शृणु । यद्वृत्तं कस्यचिद्भिक्षोः क्वचिन्मन
नशालिनः ॥ १ ॥ आसीत्कश्चिन्महाभिक्षुः समाध्यभ्यासतत्परः ॥ २ ॥ समाध्यभ्या
सशुद्धं तत्तस्य चित्तं क्षणेन यत् । चिन्तयत्याशु तद्याम गच्छत्यम्भिव वीचिताम् ॥
३ ॥ कदाचित्स समाधाननिरतोऽतिष्ठदेकधीः । कंचित्संचिन्तयामास स्वासनस्थः
क्रियाक्रमम् ॥ ४ ॥ तस्य चिन्तयतो जाता प्रतिभेयमथ स्वतः । भावयाम्याशु लीला
र्थं सामान्यजनवृत्तिताम् ॥ ५ ॥ इति संचिन्त्य चेतोऽस्य स्थितं किंचिन्नरान्तरम् ॥
६ ॥ तेन चित्तनरेणाथ कृतं नामात्मवाञ्छया । जीवटोऽस्मीति सहसा काकतालीय
वत्स्थितम् ॥ ७ ॥ जीवटो विजहाराथ स स्वप्नमयपत्तने । तत्र पानं पपौ मत्तो मदनि
द्रामवाप च ॥ ८ ॥ स्वप्ने ददर्श विप्रत्वं पाठानुष्ठानतुष्टिमत् । द्विजोऽपश्यत्स्वयं स्वप्ने
सामन्तत्वमथात्मनि ॥ ९ ॥ स सामन्तः कृताहारः कदाचिद्घननिद्रया । अपश्यद्राज
तां स्वप्ने ककुब्वलयपालिनीम् ॥ १० ॥ स कदाचिन्नृपः स्वस्थः सुष्वापास्तमितेहितः ।
अपश्यदात्मनि स्वप्ने सुरस्त्रीत्वमनिन्दितम् ॥ ११ ॥ सा सुरस्त्री रतिश्रान्त्या निद्रां गा
ढामुपागता । अपश्यदात्मनि स्वप्ने मृगीत्वमतिचञ्चलम् ॥ १२ ॥ सा मृगी लोलनय
ना कदाचिन्निद्रया हृता । स्वप्ने ददर्श वल्लीत्वं स्वाभ्यासादृढमात्मनि ॥ १३ ॥ साप
श्यदन्तःसंवित्त्या स्फुटं लवनमात्मनः । अनुभूय ददर्शाथ स्वात्मानं भ्रमरं स्थितम् ।
स बभूव सरोजिन्यां व्यसनी तु मधुव्रतः ॥ १४ ॥ तामाजगाम नलिनीं परिलोलयि
तुं गजः । नलिन्या स तया सार्धं तत्र चूर्णत्वमाययौ ॥ १५ ॥ ददर्शात्मानमव्यग्रं म
त्तहस्तितयोदितम् । शुष्कसागरगम्भीरे गजः खाते पपात ह ॥ १६ ॥ बभूव वल्लभो
राज्ञो बद्ध्वा तेनाशु शिक्षितः । क्वचित्समरसंमर्दे घातितोऽस्तमुपाययौ ॥ १७ ॥ गण्ड
स्थभ्रमराभ्यासाद्गजो भूयोऽप्यभूदुलिः । पुनः करिखुराक्रान्त्या पद्मिन्या चूर्णतां य
यौ ॥ १८ ॥ पार्श्वस्थहंससंवित्त्या बभूव कलहंसकः । कलहंसश्चिरतरं योनिष्वन्यासु
संलुठन् । ब्रह्मसारसतां यातो विजहार यासुखम् ॥ १९ ॥ स कदाचिद्ददर्शाथ रुद्रं रु

33.1 Ohne श्री० (2. Aufl.) d: किंचिन्मनन० – 2A: नित्यं स्वव्यवहारेण क्षपयत्यखिलं दिनम् ॥ – 3 b: Hs. क्षणेन तु c. यद्भावं – 4 a: कदाचिच्च b: ०विरतो – 5 b: ०भेयमिति – 6A: स्पंदसंस्थानसंत्यागमात्रेणावर्ततेंऽब्विव ॥ – 7 a: चिंतानरेणाथ d: काकतालीयवांछितम् – 8 b: स्वप्नपुरुषश्चिरम् Nach a/b zusätzlich: स्वप्ननिर्माणनगरे कस्मिंश्चित्पुरवीथिषु ॥ (8A) – 9 b: Hs. पाकानुष्ठानतुष्टिदम् Nach a/b zusätzlich: A: प्रतिभामात्रसंपन्नं चित्ते देशांतराप्तिवत् ॥ B: कदाचित्स द्विजश्रेष्ठस्त्वहर्व्यापारनिष्ठया । सुष्वापांतर्व्यवहृतिर्बीजावस्थामिव [lies ०जतायामिव*] द्रुमः ॥ – 11 c: अपश्यत्स्वात्मनि – 12 a: रतिश्रांता – 13 b: युता d: Hs. स्वभ्यासा०; ०साद्गूढमात्मनि – 13A: तिर्यंचोऽपि प्रपश्यंति स्वप्नं चित्ते स्वभावतः । दृष्टानां च श्रुतानां च चेतःस्मरणमक्षतम् ॥ B: सा बभूव लता पुष्पफलपल्लवशालिनी । वनदेवीवनक्रीडालतागृहविलासिनी ॥ – 14 b: लंबन० e: Lies सा f: व्यसनी बिसनालगः Vor a/b zusätzlich: बीजांतःस्थांकुराकारसमज्ञेयाधिरूढया । (14A) Nach a/b zusätzlich: कंचित्कालं सुषुप्तस्थकलया जडतां घनाम् । (14B) – 14C: क्वचिदेव रतिं याति चेतो जडमतेरपि ॥ – 15 Nach a/b zusätzlich: रम्यवस्तुक्षयायैव मूढानां जृंभते पदम् । (15A) – 16 a: ददर्शात्मानमामोदम० Vor a/b zusätzlich: भ्रमरो वारणालोकाद्वारणालोकभावनात् । (16A) – 19 f: विजहार स सारसः Nach c/d zusätzlich: यदृच्छया कदाचित्तु जातः पद्मजसारसः । (19A)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

द्रपुरे खगः । तत्र बुद्धिरभूत्तस्य रुद्रोऽहमिति निश्चिता । रुद्रभूतवपुस्तत्र विजहार यद्द
च्छया ॥ २० ॥ रुद्रस्त्वनुचरज्ञानविलासैकतया तया । स्वमशेषमुदन्तं तमपश्यत्प्रा
क्तनं धिया ॥ २१ ॥ निरावरणविज्ञानवपुः स भगवान्हरः । उवाच स्वयमेकान्ते स्वस्व
प्नशतविस्मितः ॥ २२ ॥ अहो नु चित्रा मायेयं बत विश्वविमोहिनी । असत्यैवापि स
द्रूपा सुरूढा मरुवारिवत् ॥ २३ ॥ एवं संभ्रान्तरूपासु संसारारण्यभूमिषु । बह्वीष्वह
मतिश्रान्तस्वशून्यास्विव भूरिशः ॥ २४ ॥ कस्मिंश्चिदभवं सर्गे त्वहं जीवटनामकः ।
कस्मिंश्चिद्ब्राह्मणश्रेष्ठः कस्मिंश्चिद्वसुधाधिपः ॥ २५ ॥ एवं योनिशतं गच्छन्यातोऽहमिह
रुद्रताम् ॥ २६ ॥ अथ वर्षसहस्राणि चतुर्युगशतान्यपि । समतीतान्यनन्तानि देवानु
चरितानि च ॥ २७ ॥ तत्तान्सर्वान्समाचारानुत्थायालोकयाम्यहम् ॥ २८ ॥ इति
संचिन्त्य रुद्रोऽसौ तं देशं प्रजगाम ह । यत्र भिक्षुर्विहारस्थः सुप्तः शव इव स्थितः ॥
२९ ॥ बोधयित्वाथ तं भिक्षुं चेतसा चेतनेन च । योजयामास सस्मार भिक्षुरुप्यात्म
नो भ्रमम् ॥ ३० ॥ अथ रुद्रस्तथा भिक्षुर्द्वावेवोत्थाय जग्मतुः । क्वापि जीवटसंसारं चि
दाकाशैककारणम् ॥ ३१ ॥ तं प्रबोध्य नियुज्याशु चेतसा चेतनेन च । एकरूपास्त्रि
रूपास्ते रुद्रभिक्षुकजीवटाः । जग्मुर्विप्रादिसंसारं तैश्च संमिलितास्तथा ॥ ३२ ॥ दिव्य
ज्ञाना विरेजुस्ते रुद्रांशाः शतमुत्तमम् ॥ ३३ ॥ तेन रुद्रेण तां मायामवलोक्य तथोदि
ताम् । स्वांशास्तामेव संसारस्थितिं संप्रेषिताः पुनः ॥ ३४ ॥ प्रययुः स्वास्पदं तेऽपि जी
वटब्राह्मणादयः ॥ ३५ ॥ स्वकलत्रैः समं देहं क्षपयित्वा स्वकालतः । रुद्रेण सह संग
म्य विविशुस्तत्परं पदम् ॥ ३६ ॥ श्रीराम उवाच ॥ भिक्षुसंकल्परूपास्ते जीवटब्राह्म

20 f: यथेच्छया Nach e/f zusätzlich: तैस्तैः शिवपुराचारैर्गणगोष्ठीविलासिभिः । (20A) – 21 a/b: रुद्रस्त्वनुत्तमज्ञानविलासिन्या तया ततः – 22 d: Hs. स स्वप्न० – 23 a: अहो विचित्रा c: Hs. असत्येवापि d: सुदृढा – 24 a: एवमत्यंतचित्रासु c/d: बह्वीष्वहमिति भ्रांतस्त्वशून्या० – 26 b: ऽहमिति Vor a/b zusätzlich: हंसः पद्मवने भूत्वा विंध्यकक्षे च वारणः । (26A) – 27 a: अत्र b: ०शतानि च d: दिनानु० – 28 a: तांस्तान्सर्वान्स्वसंसारा० – 28A: सम्यगालोकदानेन तेभ्य एव करोम्यहम् ॥ – 29 b: तं सर्गे – 30 c: द्योतयामास – 30A: रुद्रमात्मानमालोक्य जीवटादिमयं तथा । बोधादविस्मयार्होऽपि स भिक्षुर्विस्मयं ययौ ॥ – 31 d: Hs. ०काशैककोणगम् – 32 a: नियोज्याशु e/f: ०संसारांस्तैश्च Nach a/b zusätzlich: बोधयंतस्त्रयोऽप्यासन्विस्मिता अप्यविस्मिताः । (32A) – 33A: रुद्रेण प्रेषिताः सर्वे ते प्रति स्वं स्वमालयम् ॥ – 36 b: ०त्वाथ कालतः c: ततो रुद्रेण संगत्य Zwischen a/b und c/d zusätzlich: 36A: रुद्रेण सह ते सर्वे देहांते रुद्रमाप्नुवन् ॥ B: वसिष्ठ उवाच ॥ सर्वमस्ति चितः कोशे यद्यथालोकयत्यसौ । चित्तथा तदवाप्नोति सर्वात्मत्वादसंशयम् ॥ C: यत्स्वप्ने दृश्यते यच्च संकल्पैरवलोक्यते । तत्तथा विद्यते तत्र सर्वकालं तदात्मकम् ॥ D: संकल्पस्वप्नगं वस्तु यया च दशयाप्यते । परमाभ्यासयोगाभ्यां विना त्वेतन्न लभ्यते ॥ E: येषां तु योगविज्ञानदृष्टयः फलिताः स्थिताः । सर्वं सर्वत्र पश्यंति त एते शंकरादयः ॥ F: सर्वं ह्यभिमतं कार्यमेकनिष्ठस्य सिध्यति । दक्षिणां ककुभं पश्यन्कः प्राप्नोत्युत्तरां दिशम् ॥ G: संकल्पार्थपरैरेव संकल्पार्थोऽवगम्यते । अग्रस्थार्थपरैरेव अग्रस्थार्थोऽवगम्यते ॥ H: अग्रस्थे बुद्धिसंस्थे यः संकल्पं प्राप्तुमिच्छति । तदासावेकनिष्ठत्वाभावात्तन्नाशयेद्द्वयम् ॥ I: इह विद्याधरोऽहं स्यामहं स्यामिह वैदिकः । इत्येकज्ञानसाफल्यं दृष्टांतस्त्वर्थसिद्धये ॥ K: तस्मादेकार्थनिष्ठत्वाद्भिक्षुजीवेन रुद्रताम् । प्राप्य रुद्रात्मना लब्धा संकल्पार्थस्य सत्यता ॥ L: भिक्षुसंकल्पजीवास्ते प्रत्येकं तत्पृथग्जगत् । पश्यंति रुद्ररूपत्वात्प्राप्ताः सर्वे च सत्यताम् ॥ M: एवं ते भिक्षुसंकल्पाज्जीवटब्राह्मणादयः । रुद्रविज्ञानवशतः स्वसंकल्पपुरीर्गताः ॥ – 37 Ohne श्री० (2. Aufl.) a/b: एवं ते भिक्षुसंकल्पाज्जीवट०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

णादयः । कथं सत्यत्वमायाताः संकल्पार्थे क्व सत्यता ॥ ३७ ॥ श्रीवसिष्ठ उवाच ॥ ए
कः सहस्रं भवति यथा चैष जनार्दनः । अंशावतारलीलाभिः कुरुते जागतीं स्थितिम्
॥ ३८ ॥ एवं ते भिक्षुसंकल्पाज्जीवटब्राह्मणादयः । संशुद्धसंविदेकांशाः सत्या इव कि
ल स्थिताः ॥ ३९ ॥ इति निर्वाणप्रकरणे स्वप्नशतरुद्रियम् ॥ [३३] ॥ श्रीवसिष्ठ उवाच
॥ सुषुप्तमौनवान्भूत्वा त्यक्त्वा चित्तविलासिताम् । कलनामलनिर्मुक्तस्तिष्ठावष्टब्धत
त्पदः ॥ १ ॥ श्रीराम उवाच ॥ वाङ्मौनमक्षमौनं च काष्ठमौनं च वेद्म्यहम् । सुषुप्तमौ
नं मौनेश ब्रह्मन्ब्रूहि किमुच्यते ॥ २ ॥ श्रीवसिष्ठ उवाच ॥ द्विविधः प्रोच्यते राम मु
निर्मुनिवरैरिह । एकः काष्ठतपस्वी स्याज्जीवन्मुक्तस्तथेतरः ॥ ३ ॥ अभावितायां शुष्का
यां क्रियायां बद्धनिश्चयः । हठाज्जितेन्द्रियग्रामो मुनिः स्यात्काष्ठतापसः ॥ ४ ॥ यथा
भूतमिदं बुद्ध्वा भावितात्मात्मनि स्थितः । लोकोपमोऽपि तृप्तोऽन्तर्यः स मुक्तो मुनिः
स्मृतः ॥ ५ ॥ एतयोर्यो भवेद्भावः शान्तयोर्मुनिनाथयोः । चित्तनिश्चयरूपात्मा मौन
शब्देन कथ्यते ॥ ६ ॥ वाङ्मौनं वचसां रोधो बलादिन्द्रियनिग्रहः । अक्षमौनं परित्या
गश्चेष्टानां काष्ठसंस्थितम् ॥ ७ ॥ प्रस्फुरच्चित्तकलनमेनं मौनत्रयं स्थितम् । एतेषां म्ला
नमौनानां विषयः काष्ठतापसः ॥ ८ ॥ अविभागमनायासं यदनाद्यन्तमास्थितम् । ध्या
यतोऽध्यायतश्चैव सौषुप्तं मौनसंमतम् ॥ ९ ॥ यथाभूतमिदं बुद्ध्वा जगन्नानात्वविभ्र
मम् । यदास्थितमसंमोहं सौषुप्तं मौनसंगतम् ॥ १० ॥ अनेकसंविद्रूपात्म शिवमेवेद
माततम् । इत्यास्थितमनन्तं यत्सौषुप्तं मौनसंगतम् ॥ ११ ॥ सम्यग्ज्ञानावबोधेन नि
त्यमेकसमाधिना । संख्ययैव प्रबुद्धा ये ते सांख्या योगिनः स्मृताः ॥ १२ ॥ प्राणाद्य
निलसंशान्तौ युक्त्या ये पदमागताः । अनामयमनाद्यन्तं ते स्मृता योगयोगिनः ॥
१३ ॥ उपादेयं तु सर्वेषां शान्तं पदमकृत्रिमम् । यत्सांख्यैः प्राप्यते स्थानं परं योगैस्त
देव हि ॥ १४ ॥ यत्र प्राणमनोवृत्तिरत्यन्तं नोपलभ्यते । वासनावागुरा क्रान्ता तद्वि
द्धि परमं पदम् ॥ १५ ॥ मनो मुधैवाभ्युदितमसदेवानवेक्षणात् । स्वप्नस्थमरणाकारं प्रे
क्ष्यमाणं न विद्यते ॥ १६ ॥ एकतत्त्वघनाभ्यासात्प्राणाणं विलयस्ततः । मनोविनिग्रह
श्चेति मोक्षशब्दार्थसंग्रहः ॥ १७ ॥ एकार्थाभ्यसनप्राणरोधचेतःपरिक्षयाः । एकस्मि
न्नेव संसिद्धे संसिध्यन्ति परस्परम् ॥ १८ ॥ अविनाभाविनी नित्यं जन्तूनां प्राणचे
तसी । कुसुमामोदवन्मिश्रे तिलतैल इव स्थिते ॥ १९ ॥ आधाराधेयवच्चैते एकाभावे

Kolophon zu Sarga 33: इति श्रीयोगवासिष्ठसारे [!] मोक्षोपाये निर्वाणप्रकरणे शतरुद्रोपाख्यानं नाम चतुस्त्रिंशः सर्गः ॥ ३४ ॥ – 34.1 Ohne श्री० – 2 Ohne श्री० (2. Aufl.) – 3 Ohne श्री० – 5 a: Hs. तथाभूत० – 6 a: एतयोर्योऽभवद्भावः – 7 d: काष्ठसंज्ञकम्, lies ०संज्ञितम्* – 8 a/b: ०नमेतन्मौन० c: हठमौनानां – 9 d: मौनमुच्यते; lies मौनमङ्ग तत्* – 10 c: ०मसंदेहं d: मौनमुच्यते; lies मौनमङ्ग तत्* – 11 a/b: Hs. entstellt (०पात्मांशैकवमेवदसाततं) d: Siehe 10d. – 11A: आकाशं नैव चाकाशं सर्वमस्ति च नास्ति च । इति स्थितं समं शांतं यत्तन्मौनं सुषुप्तवत् ॥ B: सुषुप्तमौनं योगीशैर्द्विविधैः प्राप्यते खलु । सांख्ययोगिन एके स्युरपरे योगयोगिनः ॥ – 12 b: सुसिद्धैकसमाधिनः c/d: संख्ययैवावबुद्ध्येयुस्ते – 16 c: स्वप्ने स्वमरणा० d: प्रेक्षमाणं – 17 a/b: ०नाभ्यासः प्राणाणं विलयस्तथा – 18 b: ०चित्तपरिक्षयाः – 19 d: Lies तिलतैले* – 20 a: ०वच्चैव

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

विनश्यतः । कुरुतश्च स्वनाशेन कार्यं मोक्षाख्यमुत्तमम् ॥ २० ॥ एकस्मिन्सुदृढे तत्त्वे तावद्भावं विभावयेत् । भावो भावत्वमायाति स्वाभ्यासाद्यावदाततः ॥ २१ ॥ यदेकतानं भवति चेतस्तद्भवति क्षणात् । शान्ताशेषविशेषौघं चिराभ्यासस्वभावतः ॥ २२ ॥ श्रीवसिष्ठ उवाच ॥ संसृतिस्वप्नविश्रान्तौ वेतालोदाहृतानिमान् । प्रश्नानाकर्णय शुभान्प्रसङ्गात्स्मृतिमागतान् ॥ २३ ॥ अस्ति विन्ध्यमहाटव्यां वेतालो विपुलाकृतिः । स किंचिन्मण्डलं गर्वादाजगाम जिघांसया ॥ २४ ॥ स वेतालोऽवसत्पूर्वं कस्मिंश्चित्सज्जनास्पदे । बहुबल्युपहारेण नित्यतृप्ततया सुखी ॥ २५ ॥ निर्निमित्तं निरागस्कं पुरोऽप्यभ्यागतं न सः । क्षुधितोऽपि नरं हन्ति सन्तो हि न्यायदेशकाः ॥ २६ ॥ स कालेनाटवीगेहाज्जगाम नगरान्तरम् । नानायुक्त्या नरं भोक्तुं क्षुधा समभिनोदितः ॥ २७ ॥ तत्र प्राप स भूपालं रात्रिचर्याविनिर्गतम् । तमाह घनघोरेण शब्देनोग्रनिशाचरः ॥ २८ ॥ राजंल्लब्धोऽसि भीमेन वेतालेन मयाधुना । क्व गच्छसि विनष्टोऽसि भव भोजनमद्य मे ॥ २९ ॥ राजोवाच ॥ भो रात्रिंचर निर्न्यायं मां चेदत्सि बलादिह । तत्ते सहस्रशो मूर्धा स्फुटिष्यति न संशयः ॥ ३० ॥ वेताल उवाच ॥ न त्वामद्म्यहमन्यायं न्यायोऽयं हि मयोच्यते । राजासि सकलाशाश्च पूरणीयास्त्वयार्थिनाम् ॥ ३१ ॥ ममैतामर्थितां राजन्संभवार्थां प्रपूरय । प्रश्नानिमान्मयोक्तांस्त्वं सम्यग्व्याख्यातुमर्हसि ॥ ३२ ॥ कस्य सूर्यस्य रश्मीनां ब्रह्माण्डान्यणवः कृशाः । कस्मिन्स्फुरन्ति पवने महागगनरेणवः ॥ ३३ ॥ स्वप्नात्स्वप्नान्तरं गच्छञ्शतशोऽथ सहस्रशः । त्यजन्न त्यजति स्वच्छं कः स्वरूपं प्रभास्वरम् ॥ ३४ ॥ रम्भास्तम्भो यथा पत्रमात्रमेवं पुनः पुनः । अन्तरन्तस्तथान्तश्च तथा कोऽणुः स एव हि ॥ ३५ ॥ ब्रह्माण्डाकाशभूतौघसूर्यमण्डलमेरवः । अपरित्यजतोऽणुत्वं कस्याणोः परमाणवः ॥ ३६ ॥ कस्यानवयवस्यैव परमाणुमहागिरेः । शिलान्तर्निबिडैकान्तरूपा मज्ज्ञा जगत्त्रयी ॥ ३७ ॥ श्रीवसिष्ठ उवाच ॥ इत्युक्तवति वेताले वक्तुं प्रश्नान्विहस्य सः । उवाच वचनं राजा दन्तांशुशबलाम्बरः ॥ ३८ ॥ एष चित्सूर्य इत्युक्तः सर्वमेव तपत्यसौ । विज्ञानात्मैष परमो भास्करो भाविभास्करः ॥ ३९ ॥ इमे ये भुवनाभोगास्तस्यैव त्रसरेणवः । विज्ञानपरमार्कस्य भासा भान्ति भवन्ति च ॥ ४० ॥ कालसत्ता नभःसत्ता स्पन्दसत्ता च चिन्मयी । शुद्धचेतनसत्ता च सर्वमित्यादि पावनम् ॥ ४१ ॥ परमात्ममहावायौ रजः स्फुरति चञ्चलम् ॥ ४२ ॥ जगदाख्यमहास्वप्ने स्वप्नात्स्वप्नान्तरं व्रजन् । रूपं त्यजति नो शान्तं ब्रह्म शान्तत्वबृंहितम् ॥ ४३ ॥ रम्भास्तम्भो यथा पत्रमात्रमेवान्तरान्तरम् । अन्तरन्तस्तथेदं

21 d: ०दाततम् c: Lies भावोऽभाव०* – 23 Ohne श्री० – 24 c: कंचिन्मं० – 26 d: ०दर्शकाः – 27 a/b: ०गेहो जगाम c: न्याययुक्त्या – 29 वेताल उवाच ॥ – 30 c: सहस्रधा – 32 a: ०मर्थनां b: प्रपूरयन् d: सम्यगाख्या० – 33 b: ब्रह्मांडानि कृशाणवः – 35 b: ०मात्रमेव – 36 a: ब्रह्माण्डाकारभूतौ च – 37 c: Hs. ०रूपो – 38 Ohne श्री० d: दन्तांशुधवलाम्बरम् – 39 राजोवाच ॥ a: चित्सूर्य उदितः b: सर्वमेतत्तपत्यसौ d: भाविताशयः – 41 b: स्पंदसत्ताथ – 42 a: Hs. ०कायौ ; परमात्ममये वायौ – 42A: कुसुमांग इवामोदस्तदतद्रूपकं स्वतः ॥ – 43 a: जगदाख्ये – 44 b: ०मात्रमेवोत्तरोत्तरम् c: अंतरंतस्तथैवेदं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

हि विश्वं ब्रह्म विवर्त्यपि ॥ ४४ ॥ सूक्ष्मत्वादप्यलभ्यत्वात्परमात्मा परोऽणुकः । अन
न्तत्वादसावेव प्राप्तो मेर्वादिमूलताम् ॥ ४५ ॥ परमाणुवदाभाति मेर्वादि पुरतोऽस्य
तु । परोऽणुरेषोऽलभ्यत्वात्पूरकत्वान्महागिरिः ॥ ४६ ॥ अस्य विज्ञप्तिमात्रस्य मज्जा
मात्रं जगत्त्रयी । विज्ञानमात्रमध्यं हि विद्धि साधो जगत्त्रयम् ॥ ४७ ॥ इति राजमुखा
च्छ्रुत्वा वेतालः शान्तिमाययौ । भावितात्मतया तत्र विचारोत्थितया तया ॥ ४८ ॥
उपशान्तवपुर्भूत्वा गत्वैकान्तमनिन्दितम् । बभूवाविरलध्यानी विस्मृत्य विषमां क्षु
धाम् ॥ ४९ ॥ इति निर्वाणप्रकरणे वेतालाख्यायिका ॥ [३४] ॥ श्रीवसिष्ठ उवाच ॥
संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना । प्रवाहपतितं कुर्वन्निरिच्छं तिष्ठ शान्तधीः
॥ १ ॥ आकाशविशदं कृत्वा मनसैव मनो मुनिः । तिष्ठैकशमशान्तात्मा सर्वत्र सम
दर्शनः ॥ २ ॥ स्थिरबुद्धेरमूढस्य यथाप्राप्तानुवर्तिनः । राज्ञो भगीरथस्येव दुःसाधमपि
सिध्यति ॥ ३ ॥ श्रीराम उवाच ॥ यथा चित्तचमत्कृत्या राज्ञो गङ्गावतारणम् । भगी
रथस्य संपन्नं तन्मे कथय भो प्रभो ॥ ४ ॥ श्रीवसिष्ठ उवाच ॥ आसीद्भगीरथो नाम
राजा परमधार्मिकः । संकल्पानन्तरं प्रापुर्यथाभिमतमर्थिनः । चन्द्रप्रसन्नवदनाद्यस्मा
च्चिन्तामणेरिव ॥ ५ ॥ गङ्गासोपानपद्धत्या येन पातालवासिनः । योजिता ब्रह्मणो
लोके बान्धवा लोकबन्धुना ॥ ६ ॥ यौवने वर्तमानस्य तस्य भूमीपतेरपि । प्रविचार
यतो लोके यात्रां पर्याकुलामिमाम् । सविचारचमत्कारविचारकणिकोदभूत् ॥ ७ ॥
एकान्ते चिन्तयामास महीपतिरसावथ । जगद्यात्रामिमां नित्यमसमञ्जससंकुलाम्
॥ ८ ॥ पुनर्दिनं पुनः श्यामा दानादानशतं पुनः । तदेव शुष्कं विरसं लभ्यते कर्म कु
र्वता ॥ ९ ॥ येन प्राप्तेन लोकेऽस्मिन्नाप्राप्तमवशिष्यते । तत्कृतं सुकृतं मन्ये शेषं कर्म
विषूचिका ॥ १० ॥ पुनः पुनः पर्युषितं कर्म कुर्वन्न लज्जते । मूढबुद्धिरमूढस्तु किं कुर्या
त्किल बालवत् ॥ ११ ॥ अथैकदोद्विग्नमनाः कदाचित्त्रितुलं गुरुम् । एकान्ते संसृतेर्भी
तः समपृच्छद्भगीरथः ॥ १२ ॥ जरामरणमोहादिरूपाणां भयकारिणाम् । भगवन्सर्व
दुःखानां कथमन्तः प्रजायते ॥ १३ ॥ त्रितुल उवाच ॥ चिरसाम्यात्मनोत्थेन निर्वि
भागविलासिना । राजञ्ज्ञेयावबोधेन पूर्णेन भरितात्मना । क्षीयन्ते सर्वदुःखानि त्रुट्य
न्ति ग्रन्थयोऽभितः ॥ १४ ॥ संशयाः शममायान्ति सर्वकर्माणि चानघ । ज्ञेयं तु वि
दुरात्मानं संशुद्धं ज्ञप्तिरूपिणम् ॥ १५ ॥ श्रीभगीरथ उवाच ॥ चिन्मात्रं सर्वगं शान्त

46 b: तत् – 46A: सर्वावयवरूपोऽपि निरस्तावयवः पुमान् ॥ – 47 b: जगत्त्रयम् Vor a/b zusätzlich: विज्ञप्तिमात्रसारत्वात्सर्वाधिष्ठानरूपिणः । (47A) – 49 d: विरलां – Kolophon zu Sarga 34: इति श्रीयोगवासिष्ठसारे [!] मोक्षोपाये निर्वाणप्रकरणे वेतालोपाख्पानं नाम पंचत्रिंशः सर्गः ॥ ३५ ॥ – 35.1 Ohne श्री° a: सर्वतश्चित्तं d: °न्निरिच्छस्तिष्ठ – 2 c: Hs. उत्तिष्ठैकशमः (mit überzähliger Silbe) – 3 d: दुःसाध्यमपि – 4 Ohne श्री° (2. Aufl.) c/d: Hs. संबंधं तां मे d: वै – 5 Ohne श्री° Nach a/b zusätzlich: भुवः समुद्रयुक्ताया मंडलीतिलकोपमः । (5A) – 7 c: लोक° e: सुविराग° Nach e/f zusätzlich: वयस्यपि च तारुण्ये दैवाद्वल्ली मराविव । (7A) – 9 a: Hs. पुनर्दिवं – 11 b: Hs. लज्जसे – 15 a: संशया विलयं यान्ति d: संशुद्ध° – 15A: स च सर्वगतो नित्यं नास्तमेति न चोदयम् ॥ – 16 Ohne श्री°

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मस्ति निर्मलमच्युतम् । देहादि नेतरत्किंचिदिति वेद्मि मुनीश्वर ॥ १६ ॥ किं त्वत्र प्र
तिपत्तिर्मे स्फुटतामेति न प्रभो ॥ १७ ॥ ज्ञानेन ज्ञेयनिष्ठत्वमेति चेतो हृदन्तरे ॥ १८
॥ असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
१९ ॥ आत्मनोऽनन्ययोगेन सद्भावनमनारतम् । विविक्तदेशसेवित्वमरतिर्जनसंसदि
॥ २० ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यद
तोऽन्यथा ॥ २१ ॥ रागद्वेषक्षयकरात्संसारव्याधिभेषजात् । अहंभावोपशान्तौ तु रा
जञ्ज्ञानमवाप्यते ॥ २२ ॥ श्रीभगीरथ उवाच ॥ शरीरेऽस्मिंश्चिरारूढो गिरौ तरुरिव
स्वयम् । अहंभावो महाभोगो वद मे त्यज्यते कथम् ॥ २३ ॥ त्रितुल उवाच ॥ पौरु
षेण प्रयत्नेन त्यक्त्वा भोगौघभावनम् । गत्वा विकसितां सत्तामहंकारलयं व्रजेत् ॥
२४ ॥ यन्त्रणापञ्जरं यावद्भग्नं लघ्वादिनाखिलम् । अकिंचनत्वशेषेण स्फुटा तावदहं
कृतिः ॥ २५ ॥ सर्वमेतद्धिया त्यक्त्वा यदि तिष्ठसि निश्चलः । तदहंकारविलये त्वमेव
परमं पदम् ॥ २६ ॥ शान्ताशेषविशेषणो विगतभीः संत्यक्तसर्वैषणो गत्वा नूनमकिं
चनत्वमरिषु त्यक्त्वा समग्रां श्रियम् । शान्ताहंकृतिरस्तदेहकलनस्तेष्वेव भिक्षामटन्
मामप्युज्झितवानलं यदि भवस्युच्चैस्तदुच्चैरसि ॥ २७ ॥ श्रीवसिष्ठ उवाच ॥ अथ त
स्य गुरोर्वक्त्रादित्याकर्ण्य भगीरथः । मनस्याहितकर्तव्यः स्वव्यापारपरोऽभवत् ॥ २८
॥ ततः कतिपयेष्वेव वासरेषु गतेषु सः । अग्निष्टोममखं चक्रे सर्वत्यागैकसिद्धये ॥
२९ ॥ गोभूम्यश्वहिरण्यादि ददौ धनमशेषतः । द्विजदेवादिबन्धुभ्यो गुण्यागुण्यवि
चारवान् ॥ ३० ॥ दिवसत्रयमात्रेण सर्वमेव परित्यजन् । स्ववस्त्रमात्रशेषोऽसावासीद्रा
जा भगीरथः ॥ ३१ ॥ अथ सर्वार्थरिक्तं तत्खिन्नप्रकृतिपौरुषम् । सीमान्तिने तृणमिव
राज्यं स्वमरये ददौ ॥ ३२ ॥ आक्रान्ते द्विषता राज्ये मुनिः सद्मनि मण्डले । अधोवा
सोऽवशेषोऽसौ निर्जगाम स्वमण्डलात् ॥ ३३ ॥ यत्र न ज्ञायते नाम्ना यत्र न ज्ञायते मु
खात् । तत्र ग्रामेष्वरण्येषु दुरेषूवास धैर्यवान् ॥ ३४ ॥ इत्यल्पेनैव कालेन प्रशान्तसक
लैषणः । परमेण शमेनासौ प्राप विश्रान्तिमात्मनि ॥ ३५ ॥ भ्रमन्द्वीपानि भूपीठे क
दाचित्कालयोगतः । स्वल्पेन शत्रुणाक्रान्तं स्वमेव प्राप तत्पुरम् ॥ ३६ ॥ पौरांश्च म
न्त्रिणश्चैव शमी भिक्षामयाचत ॥ ३७ ॥ विविदुस्ते ततः पौरा मन्त्रिणश्च भगीरथम् ।
पूजयामासुरथ तं सविषादं सपर्यया ॥ ३८ ॥ प्रभो राज्यं गृहाणेति प्रार्थितोऽप्यरि

17A: एतावन्मात्रसंवित्तिः स्यामहं सर्वदा कथम् ॥ – 18 b: हृदंबरे – 18A: ततः सर्ववपुर्भूत्वा भूयो जीवो न जायते ॥ – 20 b: तद्भावन॰ – 21 a: ॰ज्ञाननिष्ठत्वं d: स्यादितोऽन्यथा – 22 a/b: ॰करं संसार॰ b: ॰भेषजम् c/d: अहंकारोपशांतौ तद्राज॰ – 23 Ohne श्री॰ b: स्वके c: महाभाग – 24 c/d fehlt bei der Hs. – 25 a: यंत्राणां पंजरं b: लज्ञादि॰ – 26 d: Lies त्वमेषि – 27 (Śārdūlavikṛīḍita) – 28 Ohne श्री॰ – 30 c: द्विजदेवार्त॰ d: गुण्यागुण्यं विचारयन् – 32 a/b: तु खिन्नप्रकृतिपौरकम् – 33 b: मुनिसद्मनि – 34 c: ग्रामे अरण्येषु d: पुरेषूवास – 36 c: अवशः शत्रुणा॰ – 37 a/b पौराणां मंत्रिणां चैव शनैर्भिक्षा॰ Vor a/b zusätzlich: नानागारांश्च तत्रासौ प्रवाहपतितांश्च तान् । (37A) – 38 a: विविदुस्तं नृपं पौरा

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

णा मुनिः । नाददेऽनादृताशेषस्तृणमप्यशनादृते ॥ ३९ ॥ कतिचिद्दिवसांस्तत्र नीत्वा न्यत्र जगाम सः । भगीरथोऽयं हा कष्टमिति लोकेन शोचितः ॥ ४० ॥ अथान्यत्रो पशान्तात्मा परिविश्रान्तधीः सुखी । आत्मारामः कदाचित्तु स प्राप त्रितुलं गुरुम् ॥ ४१ ॥ स्वमेव स्वागतं कृत्वा तेन सार्धं भगीरथः । किंचित्कालमुवासाद्रौ वने ग्रामे पुरे जने ॥ ४२ ॥ समतामुपयातौ तौ गुरुशिष्यौ समौ स्थितौ । कलयामासतुः स्वस्थौ विनोदं देहधारणम् ॥ ४३ ॥ किमर्थं धार्यते देहः किं वानेनोज्झितेन नः । यथाक्रमं यथाचारं तिष्ठत्वेष यथास्थितम् ॥ ४४ ॥ इति निश्चित्य तिष्ठन्तौ तौ वनाद्वनगामि नौ । न ननन्दतुरानन्दं न सुःखं न च मध्यमम् ॥ ४५ ॥ धनानि नारीविभवानैश्वर्यं चाष्टधोदितम् । सिद्धैरप्यर्पितं तुष्टैर्मेनाते जर्जरं तृणम् ॥ ४६ ॥ अथैकदा पुरे श्रेष्ठे क स्मिंश्चिन्मण्डलान्तरे । अनपत्यं नृपं मृत्युरहरत्स्वमिवामिषम् ॥ ४७ ॥ तत्र प्रकृतयः खिन्ना नष्टदेशक्रमान्नृपम् । अन्विष्यन्ति स्म संयुक्तं गुणलक्ष्म्या विशालया ॥ ४८ ॥ तं भगीरथमासाद्य स्थितं भिक्षाचरं मुनिम् । परिज्ञाय समानीय सैन्यं चक्रुर्महीपतिम् ॥ ४९ ॥ भगीरथः क्षणेनैव प्रावृषीवाम्बुना सरः । वलितः सेनया गुर्व्या समारोहन्म तङ्गजम् ॥ ५० ॥ भगीरथो जगन्नाथो जयतीति जनारवैः । नीरन्ध्रतामुपाजग्मुर्गिरी न्द्राणां महागुहाः ॥ ५१ ॥ तत्र तत्पालयन्तं तं राज्यं राजानमादृताः । जग्मुः प्रकृत यः प्राच्याः प्राहुरित्थं मृताधिपाः ॥ ५२ ॥ राजन्नस्माकमधिपो यस्त्वया स पुरा कृ तः । मृत्युना विनिगीर्णोऽसौ मत्स्येनेवामिषं मृदु ॥ ५३ ॥ तत्तत्पालयितुं राज्यं प्रसा दं कर्तुमर्हसि ॥ ५४ ॥ इति संप्रार्थितो राजा तदङ्गीकृत्य तद्वचः । सप्तसागरचिह्ना याः स बभूव भुवः पतिः ॥ ५५ ॥ समः शान्तमना मौनी वीतरागो विमत्सरः । प्रा प्तकार्यैककरणैः सस्तिरोहितविस्मयः ॥ ५६ ॥ इति निर्वाणप्रकरणे भगीरथोपाख्या नम् ॥ [३५] ॥ श्रीवसिष्ठ उवाच ॥ इदं पूर्णं परित्यज्य क्रोडीकृत्य ततः स्वयम् । शा न्त आत्मनि तिष्ठ त्वं शिखिध्वज इवाचलः ॥ १ ॥ श्रीराम उवाच ॥ कोऽसौ शिखि ध्वजो नाम कथं वा लब्धवान्परम् । एतन्मे कथय ब्रह्मन्भूयो बोधाभिवृद्धये ॥ २ ॥ श्रीवसिष्ठ उवाच ॥ द्वापरे पूर्वमभवदतीते सप्तमे मनौ । मालवानां पुरे श्रीमाञ्छिखि ध्वज इतीश्वरः ॥ ३ ॥ धैर्यौदार्यदयायुक्तः क्षमाशमदयान्वितः । शूरः शुभसमाचारो

39 c/d: **नाददे नावृताशेषं तृण०** – 41 c: **कदाचिच्च** – 43 d: **विषादं देहधारणे** – 44 a: **किमयं** b: **नौ** (2. Aufl.) – 45 d: **न दुःखं**; lies **नासुःखं** * – 46 a/b: **वाजिविभवाद्यैश्वर्यं** c: Hs. **पुष्टै०** – 47 a: **पुरश्रेष्ठे** – 48 b: **०क्रमा नृपम्** – 49 d: **सैन्ये** – 50 c: Hs. **बलिनः** – 52 c: **आजग्मुः प्राक्प्रकृतयः** – 54 a: **तत्त्वं पालयितुं** – 54A: **अप्रार्थितोपयातानां त्यागोऽर्थानां च नोचितः ॥** – 55 **वसिष्ठ उवाच ॥** – 56 c/d: **०कार्यैककरणरतिराहित०**; lies **०कार्यैककरणः स तिरोहित०** * – 56A: **अथ वर्षसहस्राणि तपस्तप्त्वा सुदारुणम् । स्व पितामहोत्तारणे भुवि गंगामयोजयत् ॥** B: **भगीरथे महीपतौ यशःप्रचारवीथिका । तदादि मार्गगा तु सा मही तलं बभूव ह ॥** (vgl. BN 6.76.17c/d) – Kolophon zu Sarga 35: **इति श्रीलघुयोगवासिष्ठे मोक्षोपाये निर्वा णप्रकरणे भा**[sic]**गीरथोपाख्पानं नाम षट्त्रिंशः सर्गः ॥ ३६ ॥** – 36.1 Ohne **श्री०** a: **पूर्वं** b: **मनःखगम्** – 2 Ohne **श्री०** (2. Aufl.) b: **०न्पदम्** d: **बोधविवृद्धये** – 3 Ohne **श्री०** – 4 a: **०दयासत्य०** b:Lies **०दमा न्वितः** *; **क्षमादमशमान्वितः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मानी गुणगणाकरः ॥ ४ ॥ सुराष्ट्राधिपतेः कन्यां चूडालां नाम नामतः । उपयेमे स
तीमात्मसदृशीं स शिखिध्वजः ॥ ५ ॥ अवर्धत तयोः प्रीतिरन्योन्यार्पितचेतसोः ।
नित्यमेवाभियुक्तत्वात्प्रियत्वाच्चेष्टितस्य च ॥ ६ ॥ मिथः कलाकलापस्य कोविदौ तौ
बभूवतुः ॥ ७ ॥ एवं बहूनि वर्षाणि मिथुनं निर्भरस्पृहम् । रेमे यौवनलीलाभिरनन्ता
भिर्दिने दिने ॥ ८ ॥ अथ यातेषु बहुषु वर्षेष्वावृतिशालिषु । शनैर्गच्छति तारुण्ये भि
न्नकुम्भादिवाम्भसि ॥ ९ ॥ पातः पक्वफलस्येव मरणं दुर्निवारणम् । हिमाशनिरिवा
म्भोजे जरा निपततोन्मुखी ॥ १० ॥ आयुर्गलत्यविरतं जलं करतलादिव । प्रावृषीव
लतातुम्बी तृष्णैका दीर्घतां गता ॥ ११ ॥ शैलनद्या रय इव संप्रयात्येव यौवनम् । सु
खानि प्रपलायन्ते शरा इव धनुश्च्युताः ॥ १२ ॥ रम्भागर्भ इवासारो व्ययहारो वि
रागदः ॥ १३ ॥ तदिह स्यान्न संसारे तादृक्षमतिशोभनम् । यदासाद्य पुनश्चेतो दशासु
न विदूयते ॥ १४ ॥ इति निर्णीय युग्मं तत्संसारव्याधिभेषजम् । चिरं विचारयामास
शास्त्रमध्यात्मसंमतम् ॥ १५ ॥ आत्मज्ञानैकमन्त्रेण संसृत्याख्या विषूचिका । संशा
म्यतीति निश्चित्य तावास्तां तत्परायणौ ॥ १६ ॥ तच्चित्तौ तद्गतप्राणौ तन्निष्ठौ तद्विदा
श्रयौ । तद्विदेकार्चनपरौ तदीहौ तौ विरेजतुः ॥ १७ ॥ तत्रैवातिघनाभ्यासौ बोधय
न्तौ परस्परम् । तत्प्रीतौ तत्समारम्भौ निरारम्भौ बभूवतुः ॥ १८ ॥ अथ साविरतं
राम रमणीयपदक्रमात् । श्रुत्वाध्यात्मविदां वक्त्राच्छास्त्रार्थांस्तारणक्षमान् ॥ १९ ॥ इ
त्थं विचारयामास स्वमात्मानमहर्निशम् । अव्यापृता व्यापृता वा धिया सुधवलेद्ध
या ॥ २० ॥ प्रेक्षे तावत्स्वमात्मानं किमहं स्यामिति स्वयम् ॥ २१ ॥ देहस्तावज्जडो मू
ढो नाहमित्येव निश्चयः । कर्मेन्द्रियगणश्चास्य न भिन्नो जड एव सः ॥ २२ ॥ बुद्धी
न्द्रियगणोऽप्येवं जड एवेति दृश्यते । प्रेर्यते मनसा यस्माद्यष्ट्येव भुवि लोष्टकः ॥ २३
॥ मनश्चैव जडं मन्ये संकल्पात्मकशक्तिमत् । क्षेपणैरिव पाषाणः प्रेर्यते बुनिश्चियैः ॥
२४ ॥ बुद्धिर्निश्चयरूपैव जडा सत्येव निश्चयः । खातेनेव सरिन्नूनमहंकारेण बाध्यते
॥ २५ ॥ अहंकारोऽपि निःसारो जड एव शवात्मकः । जीवेन जन्यते यक्षो बालेनेव
भ्रमात्मकः ॥ २६ ॥ जीवश्च कलनाकारो वातात्मा हृदये स्थितः । सुकुमारोऽन्तरन्येन
केनापि परिजीवति ॥ २७ ॥ आ अहो ज्ञातमेतेन चेत्योल्लेखकलङ्किना । जीवो जीव
ति जीर्णेन चिद्रूपेणात्मरूपिणा ॥ २८ ॥ चेत्यभ्रमवता जीवश्चिद्रूपेणैव जीवति ॥ २९
॥ असत्यजडचेत्यांशचयनाच्चिद्वपुर्जडम् । महाजलगतो ह्यग्निरपि रूपं स्वमुज्झति ॥
३० ॥ एवं चिद्रूपमप्येतच्चेत्योन्मुखतया स्वयम् । जडं शून्यमसत्कल्पं चैतन्येन प्रबो

7A: **स्वरूपमेवमेवैतौ** [lies **०पमेक०** *] **दधतुर्मित्रतां गतौ ॥** – 9 a: Hs. **वातेषु** b: Lies **०वृत्ति०*** c: **शनैर्गलति** – 10 d: **निपतितो०**; lies **निपतनो०*** – 13 b: Hs. **इवाभारो** – 17 b: **तद्विधाश्रयौ** c: **तदा तदर्चनपरौ** – 18 c: Hs. **तत्प्रीततौ समारम्भौ** d: **चिरारंभौ** – 19 a/b: Hs. **रामारमणीय०** – 20 d: **धवलयेद्धया** – 21 **चूडालोवाच ॥** – 21A: **कस्यायमागतो मोहः कथमभ्युदितः क्व वा ॥** – 22 c/d: **०गणश्चास्मादभिन्नो** – 24 a: **मनस्त्वेवं** – 25 b: Lies **सेत्येव*** c: **सरित्कूल०** d: **चाल्यते** – 26 b: Lies **एवावशात्माकः*** – 29A: **आमोदः पवनेनेव खातेनेव सरिद्रयः ॥** – 30 c/d: **ह्यग्निरिव रूपं समुज्झति**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ध्यते ॥ ३१ ॥ अहो नु चिरकालेन ज्ञातं ज्ञेयमनामयम् ॥ ३२ ॥ एते हि चिद्विलासा न्ता मनोबुद्धीन्द्रियादयः । असन्तः सर्व एवाहो अवधानं विना स्थिताः ॥ ३३ ॥ महाचिदेकैवास्तीह शान्ता सत्तेति योच्यते । निष्कलङ्का समा शुद्धा निरहंकाररूपिणी ॥ ३४ ॥ शुद्धसंवेदनाकारा शिवं चिन्मात्रमक्षतम् । सद्ब्रह्मपरमात्मादिनामभिर्याभिगीयते ॥ ३५ ॥ श्रीवसिष्ठ उवाच ॥ दिनानुदिनमित्येषा स्वात्मारामतया तया । नित्यमन्तर्मुखतया बभूव प्राकृतस्थितिः ॥ ३६ ॥ निरागा निरुपासङ्गा निर्द्वंद्वा निःसमीहिता । न जहाति न चादत्ते प्रकृताचारचारिणी ॥ ३७ ॥ परमात्ममहालाभपरिपूर्णान्तरान्तरा । सर्वोपमातीततया जगामाव्यपदेशताम् ॥ ३८ ॥ स्वविवेकघनाभ्यासवशादात्मोदयेन सा । शुशुभे शोभना पुष्पलतेवाभिनवोद्गता ॥ ३९ ॥ अथ तामनवद्याङ्गीं कदाचित्स शिखिध्वजः । अपूर्वशोभामालोक्य स्मयमान उवाच ह ॥ ४० ॥ भूयो यौवनयुक्तेव मण्डितेव पुनः पुनः । अधिकं राजसे तन्वि कान्त्या विमलया तनोः ॥ ४१ ॥ प्रपीतामृतसारेव लब्धालब्धपदेव च । आनन्दापूरपूर्णेव राजसे नितरां प्रिये ॥ ४२ ॥ अभोगकृपणं शान्तमूर्जितं समतां गतम् । गम्भीरं च प्रसन्नं च चेतः पश्यामि ते प्रिये ॥ ४३ ॥ चूडालोवाच ॥ नकिंचित्किंचिदाकारमिदं त्यक्त्वाहमागता । नकिंचित्किंचिदाकारं तेनाहं श्रीमती स्थिता ॥ ४४ ॥ इदं सर्वं परित्यज्य सर्वमन्यन्मया श्रितम् । यत्तत्सत्यमसत्यं च तेनास्मि श्रीमती स्थिता ॥ ४५ ॥ यत्किंचिद्यन्नकिंचिच्च तज्जानामि यथास्थितम् । यथोदयं यथानाशं तेनास्मि श्रीमती स्थिता ॥ ४६ ॥ भोगैरभोगैस्तुष्यामि भुक्तैरिव सुदूरगैः । न हृष्यामि न कुप्यामि तेनास्मि श्रीमती स्थिता ॥ ४७ ॥ एकैवाकाशसंकाशे केवले हृदये रमे । न रमे राजलीलासु तेनाहं श्रीमती स्थिता ॥ ४८ ॥ जगतां प्रभुरेवास्मि नकिंचिन्मात्ररूपिणी । इत्यात्मन्येव तुष्टास्मि तेनाहं श्रीमती स्थिता ॥ ४९ ॥ तनुविद्वेषरागाभिः तज्ज्ञाभिः शास्त्रदृष्टिभिः । रमे सह वयस्याभिस्तेनाहं श्रीमती स्थिता ॥ ५० ॥ पश्यामि यन्नयनरश्मिभिरिन्द्रियैर्वा चित्तेन चेह हि तदङ्ग नकिंचिदेव । पश्यामि तद्विरहितं तु न किंचिदन्तः पश्यामि सम्यगिति नाथ चिरोदयास्मि ॥ ५१ ॥ श्रीवसिष्ठ उवाच ॥ एवमात्मनि विश्रान्तां वदन्तीं तां वराङ्गनाम् । अबुद्ध्वा तद्गिरामर्थं विहस्योवाच भूपतिः ॥ ५२ ॥ असंबद्धप्रलापासि बालासि वरवर्णिनि । रमसे राज्यलीलाभी रमस्वावनिपात्मजे ॥ ५३ ॥ किंचित्त्यक्त्वा नकिंचिद्यो गतोऽप्रत्यक्षसंस्थितम् । त्यक्तप्रत्यक्षसद्रूपः स कथं किल

31A: इदानीमहमीक्षेऽहं केनैषा चित्प्रचेत्यते ॥ – 33 d: विनोत्थिताः – 34 b: महासत्तेति – 35 a/b fehlt bei LN, statt dessen (vgl. BN 6.78.34ab): सकृद्विभाति [lies ०भाता*] विमला नित्योदयवती समा । c: सा ब्रह्म० d: ०नामभिः परिगीयते – 36 Ohne श्री० b: तथा d: प्रकृतिस्थिता – 37 a: नीरागा – 38 c: सर्वोत्तमातीत० d: ०व्यपदेश्यताम् – 39 d: Hs. ०वातिनवो० – 41 a/b: Hs. entstellt. – 42 c: आनंदामृतपूर्णेव – 44 d: तेनास्मि – 45 b: Hs. सर्वं सत्यं मया – 47 a: भोगैरभुक्तैस्तु० d: तेनाहं – 49 c: तुष्यामि – 50 b: प्रज्ञाभिः शास्त्रदृष्टिषु – 51 (Vasantatilakā) b: वेह d: विनोदयामि – 52 Ohne श्री० a: Hs. परमात्मनि – 53 c/d: राजलीलाभिरहमेवं नृपात्मजे – 54 b: गतः प्रत्यक्ष०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

शोभते ॥ ५४ ॥ भोगैरभुक्तैस्तुष्टोऽहमिति भोगाञ्जहाति यः । रुषेवासनशय्याद्यान्स कथं किल शोभते ॥ ५५ ॥ यत्पश्यामि न पश्यामि तत्पश्याम्यसदेव यत् । प्रलाप इत्यसंबद्धः स कथं किल शोभते ॥ ५६ ॥ तस्माद्बालासि मुग्धासि चपलासि विलासिनी । नानालापविलासेन क्रीडसि क्रीड सुन्दरि ॥ ५७ ॥ प्रविहस्याट्टहासेन शिखिध्वज इति प्रियाम् । मध्याह्ने स्नातुमुत्थाय निर्जगामाङ्गनागृहात् ॥ ५८ ॥ कष्टं नात्मनि विश्रान्तो मद्वचांसि न बुद्धवान् । राजेति खिन्ना चूडाला स्वव्यापारपराभवत् ॥ ५९ ॥ तदा तथाङ्ग तत्राथ तादृशाशययोस्तयोः । ताभिः पार्थिवलीलाभिः कालो बहुतिथो ययौ ॥ ६० ॥ एकदा नित्यतृप्ताया निरिच्छाया अपि स्वयम् । चूडालाया बभूवेच्छा लीलया खगमागमैः ॥ ६१ ॥ खगमागमसिद्ध्यर्थमथ सा नृपकन्यका । सर्वभोगाननादृत्य समागत्य च निर्जनम् ॥ ६२ ॥ एकैवैकान्तनिरता स्वासनावस्थिताङ्गिका । ऊर्ध्वगप्राणपवनचिराभ्यासं चकार ह ॥ ६३ ॥ श्रीराम उवाच ॥ कस्य स्पन्दविलासस्यचिराभ्यासस्य मे वद । ब्रह्मन्खगमनाद्येतत्फलं यत्नैकशालिनः ॥ ६४ ॥ श्रीवसिष्ठ उवाच ॥ श्रीमच्छिखिध्वजकथाप्रसङ्गपतितामिमाम् । प्राणादिपवनाभ्यासक्रियां सिद्धिफलां शृणु ॥ ६५ ॥ अन्तस्थामखिलां त्यक्त्वा साध्यार्थेतरवासनाम् । गुदादिद्वारसंकोचात्स्थानकादिक्रियाक्रमैः ॥ ६६ ॥ भोजनासनशुद्ध्या च साधुशास्त्रार्थभावनात् । स्वाचारात्सुजनासङ्गात्सर्वत्यागात्सुखासनात् ॥ ६७ ॥ प्राणायामघनाभ्यासाद्राम कालेन केनचित् । कोपलोभादिसंत्यागाद्भोगत्यागाच्च सुव्रत ॥ ६८ ॥ त्यागादाननिरोधेषु भृशं यान्ति विधेयताम् । प्राणाः प्रभूततज्ज्ञस्य पुंसो भृत्या इवाखिलाः ॥ ६९ ॥ राज्यान्ता मोक्षपर्यन्ताः समस्ता एव संपदः । देहानिलविधेयत्वसाध्याः सर्वस्य राघव ॥ ७० ॥ परिमण्डलिताकारा कूर्मस्थानसमाश्रिता । अत्र वेष्टनिका नाम नाडी नाडीशतान्विता ॥ ७१ ॥ वीणाग्रावर्तसदृशी सलिलावर्तसंनिभा । कीटादिष्वब्जजातेषु सर्वेषु प्राणिपूदिता । शीतार्तसुप्तभोगीन्द्रभोगवद्बद्धमण्डला ॥ ७२ ॥ तस्यास्त्वभ्यन्तरे तस्मिन्कदलीकोशकोमले । पावनी परमा शक्तिः सर्वशक्तिजवप्रदा ॥ ७३ ॥ अनिशं निःश्वसद्रूपा कुपितेव भुजंगमी । संस्थितोर्ध्वीकृतमुखी स्पन्दानां हेतुतां गता ॥ ७४ ॥ अस्यां समस्ताः संबद्धा नाड्यो हृदयकोशगाः । सान्तः कुण्डलिनी स्पन्दस्पर्शसंवित्कलामला ॥ ७५ ॥ कलोक्ता कलनेनाशु कथिता चेतनेन चित् । जीवनाज्जीवतां याता मननाच्च मनः स्थिता ॥ ७६ ॥ संकल्पात्सैव संकल्पो बोधाद्बुद्धि

55 c/d: **दरिद्रवद्दुर्भगः सन्स** – 56 b: **तत्पश्याम्यन्यदेव तु** c: **इत्यसत्यस्य** – 57 b: **विलासिनि** d: **क्रीडसे** – 62 a: Lies **खगमागमे*** – 63 c: **०पवनं**; lies **०पवने*** – 64 Ohne **श्री०** (2. Aufl.) b: Hs. **चिराभ्यस्तस्य** – Textfolge: 66, 65 – 65 Ohne **श्री०** b: **०प्रसंगात्पतिता०** – 66 a/b: **अंतस्था अखिलास्त्यक्त्वा स्वसाध्येतरवासनाः** c: **गुदादिस्थान०** – 67 b: Hs. entstellt (**साधुनाशास्त्रभायनात्**) d: **०त्सर्वत्यागसु०** – 69 c: **प्रभुत्वात्तज्ज्ञस्य** – 70 a: **राज्यादिमोक्ष०** c: Lies **०विधेयत्वे*** – 71 b: **मर्मस्थानं समाश्रिता** c: **अत्र चेष्टनिका** (2. Aufl.: **आन्त्रवेष्टनिका**) d: Hs. **नाडीसमाश्रिता** – 72A: **अनारतं सा सस्पंदा पवमानेन तिष्ठति ॥** – 74 d: **स्पंदनाहेतुतां** – 75 b: Hs. **नाम्ना हृदयो०** c: **सातः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

रिति स्थिता । अहंकारात्मतां याता सैषा पुर्यष्टकाभिधा ॥ ७७ ॥ स्थिता कुण्डलिनी
देहे जीवशक्तिरनुत्तमा ॥ ७८ ॥ समस्तैवोर्ध्वमायाति समस्ताधोऽथ सा व्रजेत् । तत्पु
मान्मृतिमायाति सा हि प्राणमयी स्मृता ॥ ७९ ॥ सर्वथात्मनि तिष्ठेच्चेत्त्यक्त्वोर्ध्वाधो
गमागमम् । तज्जन्तोर्जायते व्याधिरन्तर्मारुतरोधतः ॥ ८० ॥ श्रीराम उवाच ॥ किं
विनाशाः किमुत्पादाः शरीरेऽस्मिन्मुनीश्वर । आधयो व्याधयश्चैव यथावत्कथयाशु
मे ॥ ८१ ॥ श्रीवसिष्ठ उवाच ॥ देहदुःखं विदुर्व्याधिमाध्याख्यं वासनामयम् । मौर्ख्य
मूले हि ते द्यात्तत्त्वज्ञानपरिक्षये ॥ ८२ ॥ अतत्त्वज्ञानवशतः स्वेन्द्रियाक्रमणं विना ।
हृदि तानवमुक्तेषु रागद्वेषेष्वनारतम् ॥ ८३ ॥ इदं प्राप्तमिदं नेति जाड्यात्सुघनमोह
दाः । आधयः संप्रवर्तन्ते वर्षासु मिहिका इव ॥ ८४ ॥ भृशं स्फुरन्तीष्विच्छासु मौ
र्ख्ये च घनतां गते । दुरन्नाभ्यवहारेण दुर्देशक्रमणेन च ॥ ८५ ॥ दुःकालव्यवहारेण
दुःक्रियास्फुरणेन च । दुर्जनासङ्गदोषेण दुर्भावोद्भावनेन च ॥ ८६ ॥ क्षीणत्वाच्चाति
पूर्णत्वान्नाडीनां रन्ध्रसंततौ । प्राणे विधुरतां याते काये च विकलीकृते ॥ ८७ ॥ दौः
स्थित्यकारणं दोषाद्व्याधिर्देहे प्रवर्तते ॥ ८८ ॥ प्राक्तनी चैहिकी वापि शुभा वाप्यशु
भा मतिः । यैवाधिका सैव तथा तस्मिन्योजयति क्रमे ॥ ८९ ॥ आधयो व्याधयश्चैवं
जायन्ते भूतपञ्चके । कथं शृणु विनश्यन्ति राघवानां कुलोद्वह ॥ ९० ॥ द्विविधो ह्या
धिरस्तीह सामान्यः सार एव च । व्यवहारस्तु सामान्यः सारो जन्ममयः स्मृतः ॥
९१ ॥ प्राप्तेनाभिमतेनैव नश्यन्ति व्यावहारिकाः । आधिक्षये चाधिभवाः क्षीयन्ते
व्याधयोऽप्यलम् । आत्मज्ञानं विना सारो नाधिर्नश्यति राघव ॥ ९२ ॥ अनाधिजा
व्याधयस्तु द्रव्यमन्त्रशुभक्रमैः । चिकित्सकादिशास्त्रोक्तैर्नश्यन्ति त्वं च वेत्सि तत् ॥
९३ ॥ श्रीराम उवाच ॥ आधिः कथं भवेद्व्याधिः कथं च स विनश्यति । इति मे भग
वन्ब्रूहि प्रसन्नपदया गिरा ॥ ९४ ॥ श्रीवसिष्ठ उवाच ॥ चित्ते विधुरिते देहः संक्षोभ
मनुयात्यलम् । तथा हि रुषितो जन्तुरग्रमेव न पश्यति ॥ ९५ ॥ अनपेक्ष्य यथाप्राप्त
ममार्गमनुधावति । प्रकृतं मार्गमुत्सृज्य शरार्तो हरिणो यथा ॥ ९६ ॥ संक्षोभात्साम्य
मुत्सृज्य वहन्ति प्राणवायवः । असमं वहति प्राणे नाड्यो यान्ति विसंस्थितिम् । अ
सम्यक्संस्थिते भूपे यथा वर्णाश्रमक्रमः ॥ ९७ ॥ कुजीर्णत्वमजीर्णत्वमतिजीर्णत्वमेव
वा । दोषायैव प्रयात्यन्नं नाडीप्राणविपर्ययात् ॥ ९८ ॥ यान्यन्नानि विरोधेन तिष्ठन्त्य

77 a: **संकल्पा** – 78A: **प्राणापानस्वरूपत्वादध ऊर्ध्वं व्रजत्यसौ ॥** – 79 d: **सैव** – 80 b: **गमागमौ** c: Hs. **नजंतो॰; तज्जंतोर्हीयते** – 81 Ohne **श्री॰** (2. Aufl.) – 82 Ohne **श्री॰** – 83 a/b: **॰वशतस्त्विन्द्रिया॰** c: **तानवमुत्सृज्य** – 84 d: **यथा** – 85 c: **दुरंता॰** d: **दुर्देशाक्रमणेन** – 87 a: **क्षीणत्वाद्वाति॰** – 88 a/b: **॰कारणाद्दोषाद्व्याधिर्देहात्प्रवर्तते** – 88A: **नद्याः प्रावृण्निदाघाभ्यामिवाकारविपर्ययः ॥** – 89 b: **गतिः** – 91 a: Hs. **व्याधि॰** c: **व्यवहारश्च** d: **जन्मनि यः** – 92 c: Hs. **व्याधिभावाः** – 92A: **यथा रज्ज्ववबोधेन विना सर्पो न नश्यति ॥** – 93 b: Hs. **॰शुभाक्रमैः** – 94 Ohne **श्री॰** (2. Aufl.) a: Lies **आधेः*** – 95 Ohne **श्री॰** b: **संक्षोभमुपयाति हि** – 96 a: **अनवेक्ष्य पुरोमार्ग॰** – 97 c: **असमे** – 98 c/d: Hs. **दोल यैव प्रयांत्यंतर्ना॰**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

न्तः शरीरके । तान्येव व्याधितां यान्ति परिणामस्वभावतः ॥ ९९ ॥ एवमाधेर्भवेद्व्या
धिराधिनाशाच्च नश्यति । यद्वा मन्त्रैर्विनश्यन्ति व्याधयस्तं क्रमं शृणु ॥ १०० ॥ यथा
विरेकं कुर्वन्ति हरीतक्यः स्वभावतः । भावनावशतः कार्यं तथा यरलवादयः ॥ १०१
॥ शुद्धया पुण्यया साधो क्रियया साधुसेवया । मनः प्रयाति नैर्मल्यं निकषेणेव का
ञ्चनम् ॥ १०२ ॥ आनन्दो वर्धते देहे शुद्धे चेतसि राघव ॥ १०३ ॥ सत्त्वशुद्धौ वहन्त्ये
ते क्रमेण प्राणवायवः । जरयन्ति यथान्नानि व्याधिस्तेन विनश्यति ॥ १०४ ॥ आधि
व्याध्योरिति प्रोक्तो नाशोत्पत्तिक्रमस्त्वयि । कुण्डलिन्यां कथायोगमधुना प्रकृतं शृ
णु ॥ १०५ ॥ पुर्यष्टकापराख्यस्य जीवस्य प्राणनात्मिकाम् । विद्धि कुण्डलिनीमन्तरा
मोदस्येव मञ्जरीम् ॥ १०६ ॥ तां यदा पूरकाभ्यासादापूर्य स्थीयते समम् । तदैति मै
रवं स्थैर्यं कायश्चापीनतां तथा ॥ १०७ ॥ यदा पूरकपूर्णान्तरायतप्राणसंततिम् । नी
यते संविदैवोर्ध्वं सोढघर्मश्रमक्लमम् ॥ १०८ ॥ सर्पीव त्वरितैवोर्ध्वं याति दण्डोपमां
गता । नाडीः सर्वाः समादाय देहबद्धा लतोपमाः ॥ १०९ ॥ तदा समस्तमेवेदं स्वं प्ला
वयति देहकम् । नीरन्ध्रपवनापूर्णा भस्त्रेवाम्बुगता नरम् ॥ ११० ॥ इत्यभ्यासविला
सेन योगेन व्योमगामिताम् । योगिनः प्राप्नुवन्त्युच्चैर्मीना ह्रददशामिव ॥ १११ ॥
ब्रह्मनाडीप्रवाहेण शक्तिः कुण्डलिनी यदा । बहिरूर्ध्वकपाटस्य द्वादशाङ्गुलमूर्धनि ॥
११२ ॥ रेचकेन प्रयोगेण नाड्यन्तरनिरोधिना । मुहूर्तं स्थितिमाप्नोति तदा व्योमग
दर्शनम् ॥ ११३ ॥ विज्ञानादूरसंस्थेन बुद्धिनेत्रेण राघव । दृश्यन्ते व्योमगाः सिद्धाः स्व
प्नवत्स्वार्थदा अपि ॥ ११४ ॥ मुखाद्बहिर्द्वादशान्ते रेचकाभ्यासयुक्तितः । प्राणे चिरं
स्थितिं नीते प्रविशत्यपरां पुरीम् ॥ ११५ ॥ श्रीराम उवाच ॥ सूक्ष्मच्छिद्रादिगत्यर्थं
पूरणार्थं च खस्य च । अणुतां स्थूलतां वापि कायोऽयं नीयते कथम् ॥ ११६ ॥ श्री
वसिष्ठ उवाच ॥ एकं चिन्मात्रमस्तीह शुद्धं सौम्यमलेपकम् । सूक्ष्मात्सूक्ष्मतरं शान्तं
नो जगन्न जगत्क्रिया ॥ ११७ ॥ तच्चिनोत्यात्मनात्मानं संकल्पोन्मुखतां गतम् । यदा
तदा जीव इति प्रोक्तमाविलतां गतम् ॥ ११८ ॥ असत्यमेव संकल्पभ्रमेणेदं शरीर
कम् । जीवः पश्यति मूढात्मा बालो यक्षमिवोद्धतम् ॥ ११९ ॥ एवं हि विदितात्मा
नो भावयन्ति यथैव यत् । तत्तथैवाशु पश्यन्ति दृढभावनया तया ॥ १२० ॥ दृढभा
वानुसंधानाद्विमूढा अपि राघव । विषं नयन्त्यमृतताममृतं विषतामपि ॥ १२१ ॥ एवं
यथा यदेवेह भाव्यते दृढभावतः । भूयते हि तदेवाशु तदित्यालोकितं मुहुः ॥ १२२ ॥
सत्यभावेन दृष्टोऽयं देहो देहो भवत्यलम् । दृष्टस्त्वसत्यभावेन व्योमतां याति देहकः ॥

100 c: यथा – 103A: पूर्णेंदावुदिते सम्यङ्नैर्मल्यं भुवने यथा ॥ – 104 c: तथा० – 105 a: प्रोक्तौ; Hs. आधिव्याधिरिति b: ०क्रमौ त्वयि c: Hs. कुंडलिन्या यथायोग० d: Hs. प्राकृतं – 106 b: ०नामिकाम् – 107 b: Hs. स्थीयते श्रमं d: कायस्य पीनतां – 108 b: ०प्राणमारुतम् c: संविदेवोर्ध्वं d: सोढुं; Hs. ०क्लम श्रमम् – 109 a: Hs. सर्पीव कुरुतेवोर्ध्वं – 110 a: Hs. यदा a/b: ०मेवेदमुत्प्लावयति – 111 c/d: ०च्चैर्दीना इंद्रदशामिव – 112 c: बहिरूर्ध्वं – 116 Ohne श्री० (2. Aufl.) b: खस्य वा – 117 Ohne श्री० b: शुद्ध सौम्य० d: जगद्गताः – 120 c: तत्तथैवानुपश्यंति – 122 a: यथावदेवेह b: ०भावनात् – 123 b: देहोऽदेहो

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

१२३ ॥ अणिमादिपदप्राप्तौ भावनायुक्तिरीदृशी । सुलभेयं महाबुद्धे योगसंसिद्धसंवि
दाम् ॥ १२४ ॥ अणिमादिगुणैश्वर्ययुक्ता सा नृपभाविनी । एवं बभूव चूडाला घना
भ्यासवती सती ॥ १२५ ॥ जगामाकाशमार्गेण विवेशाम्बुधिकोटरम् । चचार वसु
धापीठं गङ्गेवामलशीतला ॥ १२६ ॥ लक्ष्यमप्यागता भर्तुर्वक्षसश्वेतसस्तथा ॥ १२७
॥ यत्नेन तं च भर्तारमात्मज्ञानामृतं प्रति । बहुशो बोधयामास पिता बालमिवात्म
जम् ॥ १२८ ॥ न चासावापतद्भर्ता राजा विश्रान्तिमात्मनि ॥ १२९ ॥ एतावतापि
कालेन तामेवंगुणशालिनीम् । बालो द्यामिव नृपश्चूडालां न विवेद सः ॥ १३० ॥ सा
स्यालब्धात्मविश्रान्तेस्तां सिद्धिश्रियमात्मनः । दर्शयामास नो राज्ञः शूद्रस्येव मख
क्रियाम् ॥ १३१ ॥ श्रीराम उवाच ॥ महत्याः सिद्धयोगिन्यास्तस्या अपि शिखिध्व
जः । यत्नेन प्राप नो बोधं बुध्यतेऽज्ञः कथं प्रभो ॥ १३२ ॥ श्रीवसिष्ठ उवाच ॥ उपदेश
क्रमो राम व्यवस्थामात्रपालनम् । ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव केवलम् ॥ १३३
॥ श्रीराम उवाच ॥ एवं स्थिते वरमुने कथमेतज्जनस्थितौ । क्रमो गुरूपदेशश्च स्वात्म
ज्ञानस्य कारणम् ॥ १३४ ॥ श्रीवसिष्ठ उवाच ॥ अत्यन्तकृपणः कश्चित्किराटो धनधा
न्यवान् । आस्ते विन्ध्याटवीकच्छे कुटुम्बी ब्राह्मणादिवत् ॥ १३५ ॥ तस्यैकदा निप
तिता गच्छतो विन्ध्यजङ्गले । एका वराटिका राम तृणजालसमावृते ॥ १३६ ॥ कार्प
ण्यात्स प्रयत्नेन सर्वं तृणबुसादिकम् । कपर्दिकार्थमभितो दुधाव दिवसत्रयम् ॥ १३७
॥ ततो दिनत्रयस्यान्ते तेन तस्मात्कुजङ्गलात् । पूर्णेन्दुबिम्बप्रतिमो लब्धश्चिन्तामणि
र्महान् ॥ १३८ ॥ एवं यथा किराटेन कपर्दान्वेषणेन तु । रत्नं लब्धं जगन्मूल्यमहोरा
त्रमखेदिना ॥ १३९ ॥ तथा श्रुतोपदेशेन स्वात्मज्ञानमवाप्यते । अन्यदन्विष्यते चा
न्यल्लभ्यते हि गुरुक्रमात् ॥ १४० ॥ तत्त्वस्यास्य महार्थस्य गुरूपकथनं गतम् । अका
रणं कारणतां मणेरिव कपर्दकः ॥ १४१ ॥ इति किराटोपाख्यानम् ॥ श्रीवसिष्ठ उवा
च ॥ ततः शिखिध्वजो राजा तत्त्वज्ञानपदं विना । आजगाम परं मोहं तमोऽन्धत्व
मिव प्रजाः ॥ १४२ ॥ दुःखाग्निदीपितमना मनागपि विभूतिषु । तास्वभीष्टोपनीतासु
न रेमेऽग्निशिखास्विव ॥ १४३ ॥ ददावतितरां दानं तीर्थयात्रां चकार ह । तपः कृच्छ्रा
दिकं चक्रे बभ्राम परितो दिशः ॥ १४४ ॥ सर्वव्यापिविशोकत्वं न मनागपि लब्ध

124 d: ०संसिद्धि० – 125 b: ०भामिनी – 126 d: गंगेवामृत० – 127 a/b: क्षणमप्यागता भर्तुर्वक्षस्युच्चैर्यदा तदा – 127A: भर्तारं बोधयामीति तदुपायमवेक्षते ॥ – 129A: मुक्ताफलं सुसंक्लिष्टं मुक्ताफल इवामलम् [lies ०मले] ॥ – 131 a/b: साप्यलब्धात्मविश्रांतेः स्वां सिद्धिं – 132 Ohne श्री० (2. Aufl.) c: योगं d: ऽन्यः – 133 Ohne श्री० d: केवला – 134 Zwischentitel (2. Aufl.): नवमे किराटोपाख्यानम् Ohne श्री० (2. Aufl.) a: वद मुने b: ०ज्जगत्स्थितौ c: ०देशाख्य, lies ०देशस्य* d: आत्म० – 135 Ohne श्री०; Hs. ohne श्रीवसिष्ठ उवाच ॥ b: Lies ०त्किरातो c: Lies ०कुञ्जे* d: Lies कुटुम्बि० – 136 b: ०जांगले – 138 b: ०जांगलात् – 139 a: यथा तत्र; lies किरातेन b: तत् – 141 a: महार्घस्य b: Hs. मतम् d: कपर्दिकः – 142 Kolophon: Lies किरातो०; इति श्रीयोगवासिष्ठसारे [!] निर्वाणप्रकरणे किराटोपाख्यानं [vgl. Kol. S. 191!] नाम सप्तत्रिंशः सर्गः [!] ॥ ३७ ॥ (2. Aufl.: इति श्रीयोगवासिष्ठसारे निर्वाणप्रकरणे नवमसर्गे किराटोपाख्यानम् ॥) – Ohne श्री० (2. Aufl. ohne वसिष्ठ उवाच ॥) – 145 a: सर्वथापि वि०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

वान् । चिन्तापरवशो दीनो राज्यं पश्यन्विषोपमम् ॥ १४५ ॥ अथैकदैकान्तगतश्चू
डालामङ्कमास्थिताम् । इदं मधुरया वाचा स उवाच शिखिध्वजः ॥ १४६ ॥ भुक्तं रा
ज्यं चिरं कालं दृष्टा विभवभूमयः । अधुनास्मि विरागेण युक्तो गच्छामि काननम् ॥
१४७ ॥ न देशभङ्गसंमोहो नासज्जनसमाश्रयः । राज्यादप्यधिकं मन्ये सुखं वननि
वासिनाम् ॥ १४८ ॥ यथा विविक्त एकान्ते मनो भवति निर्वृतम् । न तथा शशिबि
म्बेषु न च ब्रह्मेन्द्रसद्मसु ॥ १४९ ॥ अस्मिन्मे मन्त्रणे तन्वि न विघ्नं कर्तुमर्हसि । भर्तु
र्विघटयन्तीच्छां न स्वप्नेऽपि कुलाङ्गनाः ॥ १५० ॥ चूडालोवाच ॥ प्राप्तकालं कृतं का
र्यं राजते नाथ नेतरत् ॥ १५१ ॥ जराजरठदेहानां युक्तो वनसमाश्रयः । न यूनां त्वा
दृशामेव तेनैतन्मे न रोचते ॥ १५२ ॥ शिखिध्वज उवाच ॥ अलमुत्पलमालाक्षि वि
घ्नेनाभिमतस्य मे । विद्धि मा गतमेवेतो दूरमेकान्तकाननम् ॥ १५३ ॥ बाला त्वमन
वद्याङ्गी नागन्तव्यं त्वया वनम् ॥ १५४ ॥ भवत्या पालयन्त्येह राज्ये स्थातव्यमुत्त
मे । कुटुम्बभारोद्वहनं पत्यौ याते व्रतं स्त्रियः ॥ १५५ ॥ इत्युक्त्वा दयितां राजा तामि
न्दुवदनां वशी । उत्तस्थौ स्नातुमखिलं दिनकार्यं चकार च ॥ १५६ ॥ अथोज्झितप्रजा
चारो रविरस्ताचलं ययौ । यामिनी यौवनं प्राप सरोजमुकुलस्तनी ॥ १५७ ॥ कृतसं
ध्यासमाचारः सह चूडालयेष्टया । सुष्वाप शयने भूयो मैनाक इव सागरे ॥ १५८ ॥
अथार्धरात्रिसमये देशे निःशब्दतां गते । घननिद्राशिलाकाशनिलीने सकले जने ।
तत्याज दयितां सुप्तामङ्काद्राजाथ निर्ययौ ॥ १५९ ॥ वीरक्रमार्थं यामीति तत्रैव द्वा
रपालकान् । योजयित्वा जगामासौ पुरान्निर्गत्य पूर्णधीः ॥ १६० ॥ जडे लक्ष्मि नम
स्तुभ्यमित्युक्त्वा मण्डलाद्गतः । विवेशोग्रामरण्यानीमेको नद इवार्णवम् ॥ १६१ ॥
पुनः प्रातः पुना रात्रमुषित्वा दश शर्वरीः ॥ १६२ ॥ ततो मन्दरशैलस्य तटस्थं जनदु
र्गमम् । प्राप काननमत्यन्तं दूरस्थं जनतापुरात् ॥ १६३ ॥ रटत्प्रणालसलिलवापीवलि
तपादपम् । शीर्णवेद्यादिविज्ञातभूतपूर्वद्विजाश्रमम् ॥ १६४ ॥ क्षुद्रप्राणिविनिर्मुक्तं सि
द्धसेव्यलतालयम् । तत्रैकस्मिन्सरोदेशे स चकारोटजालयम् ॥ १६५ ॥ मसृणं वैणवं
दण्डं फलभोजनभाजनम् । अर्घपात्रं पुष्पभाण्डमक्षमालां कमण्डलुम् ॥ १६६ ॥ क
न्थां शीतापनोदाय क्षमामथ मृगाजिनम् । आनीयायोजयत्तस्मिन्मठिकामन्दिरे नृपः

146 b: Hs. °मासिताम् d: समुवाच – 147 शिखिध्वज उवाच ॥ (2. Aufl.) – 147A: न सुखानि न दुःखानि नापदो न च संपदः । क्रोडीकुर्वंति तन्वंगि मुनिं वननिवासिनम् ॥ – 148 b: न संग्रामे जनक्षयः – 149 a: विविक्तमेकांते b: निर्मलम् – 150 d: कुलस्त्रियः – 151 a: प्राप्तकालमिदं ; Hs. राज्यं – 151A: वसंते राजते पुष्पं फलं शरदि राजते ॥ – 153 a: °मुत्पलपत्राक्षि c: विद्धि त्वं मां गतमितो – 154 a: त्वमन वद्यांगि – 154A: पुंसामपि हि मृद्वंगि दुर्विगाह्यो वनाश्रयः ॥ – 156 वसिष्ठ उवाच ॥ d: ह – 158 c: Lies भूपो* – 159 a: Hs. entstellt. c: °कोशे, lies °कोश°* – 160 b: तत्रैवानुचरं निजम् – 161 d: Hs. मंद – 162 a/b: रात्रिरुषित्वा – 162A: जवेन लंघयामास मंडलानि गिरीन्नदीः ॥ – 163 c/d: °त्यंतदूरस्थ जनतापुरम् – 164 c: °विज्ञान° – 165 b: °लतागृहम् c: °न्समे देशे – 165A: सर्वं संपादितं तद्वद्योग्यं तापसकर्मणि ॥ – 166 c: अर्घ्य° – 167 b: बृसीमथ c/d: °त्तत्र मठिका°

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ १६७ ॥ संध्यापूर्वं जपं प्रातः प्रहरं स तदाकरोत् । पुष्पोच्चयं द्वितीयं तु स्नानदेवा
र्चनं ततः ॥ १६८ ॥ ततो वन्यफलं भुक्त्वा निनायैको निशां वशी ॥ १६९ ॥ श्रीव
सिष्ठ उवाच ॥ एवं शिखिध्वजः पर्णमठिकायां वने स्थितः । इदानीं शृणु चूडाला सा
किं कृतवती गृहे ॥ १७० ॥ तत्रार्धरात्रसमये दूरं याते शिखिध्वजे । हरिणी ग्रामसुप्तेव
चूडाला बुबुधे भयात् ॥ १७१ ॥ अपश्यत्पतिनिर्हीनं शयनं शून्यतां गतम् । उत्तस्थौ
किंचिदाम्लानवदना खेदशालिनी । कुसिक्तेव महावल्ली निरुत्साहाङ्गपल्लवा ॥ १७२
॥ क्षणं शय्योपविष्टैव चिन्तयामास खिन्नधीः । कष्टं राज्यं प्रभुस्त्यक्त्वा वनं यातो
गृहादिति ॥ १७३ ॥ तन्मयेहाद्य किं कार्यं तत्समीपं व्रजाम्यहम् । भर्तैव गतिरुद्दिष्टा
विधिना प्रकृता स्त्रियाः ॥ १७४ ॥ इति संचिन्त्य भर्तारमनुगन्तुं समुत्थिता । चूडा
ला वातरन्ध्रेण निर्गत्याम्बरमाययौ ॥ १७५ ॥ कुर्वती सिद्धसार्थस्य मुखेनान्येन्दुवि
भ्रमम् । ददर्शाथ यथा यान्तं रात्रौ खड्गकरं पतिम् ॥ १७६ ॥ तादृशं पतिमालोक्य
स्थिता गगनकोशके । भविष्यं चिन्तयामास सर्वं भर्तुरखण्डितम् ॥ १७७ ॥ अवश्यं
भवितव्यं तद्भर्तुर्दृष्ट्वा पुरःस्थितम् ॥ १७८ ॥ आस्तां ममाद्य गमनं कालेनातिचिरेण
हि । मयास्य पार्श्वं गन्तव्यं नियतेरेष निश्चयः ॥ १७९ ॥ इति संचिन्त्य चूडाला प्रवि
श्यान्तःपुरं पुनः ॥ १८० ॥ केनचित्कारणेनासौ गतः संप्रति भूपतिः । इति पौरजनं
सर्वमाश्वास्यातिष्ठदङ्ग सा ॥ १८१ ॥ राज्यं ररक्ष भर्तुस्तत्क्रमेण समदर्शिनी ॥ १८२ ॥
बहुनात्र किमुक्तेन वर्षाण्यष्टादशाङ्गना । चूडालोवास सदने वनगते शिखिध्वजः ॥
१८३ ॥ भर्तुः समीपगमने मम कालोऽयमित्यथ । संचिन्त्य मन्दरोपान्तं गन्तुं बुद्धिं
चकार सा ॥ १८४ ॥ चचालान्तःपुराद्रात्रौ ततार नभसः पथम् । जगाम वातस्क
न्धेन प्राप मन्दरकन्दरम् ॥ १८५ ॥ अदृश्यैव नभःस्थैव प्रविवेश वानान्तरम् ॥ १८६
॥ तत्र योगेन बुबुधे देहान्तरमिवास्थितम् । कृशाङ्गं कृष्णवर्णं च पतिं जर्जरतां गतम्
॥ १८७ ॥ तमालोक्यानवद्याङ्गी चूडाला पीवरस्तनी । किंचिज्ज्ञातविषादैवमुवाचा
त्मनि चेतसा ॥ १८८ ॥ अहो नु विषमं मौर्ख्यं सर्वशास्त्रार्थदर्शिनः । एवंविधाः समा
यान्ति दुर्दशा यत्प्रमादतः ॥ १८९ ॥ तदवश्यमिहाद्यैव नाथं विदितवेद्यताम् । नया
म्येनं न संदेहो भोगमोक्षश्रियं तथा ॥ १९० ॥ इदं रूपं परित्यज्य रूपेणान्येन केन
चित् । सकाशमस्य गच्छामि बोधं दातुमनुत्तमम् ॥ १९१ ॥ बालेयं मम कान्तेति म

168 a: Hs. संख्यापूर्वं b: प्रहरे c: द्वितीये d: स्नानं – 169 पश्चाद्वन्यं फलं किंचिद्वनकंदबिसादि च । भुक्त्वा जप्यपरो भूत्वा निनायैकां [lies ०को*] निशां वशी ॥ – 170 Ohne श्री० (2. Aufl. ohne वसिष्ठ उवाच ॥) d: किंवृत्तवती – 172 a: ०निर्हीना e: कुमित्रेव f: Hs. ०हारपल्लवा – 176 a: चकार d: खड्गधरं – 177 b: स्थित्वा गगनकोटरे – 178 a/b: तद्दृष्ट्वा भर्तुः – 178A: तदेव संपादयितुं गगनात्सा न्यवर्तत ॥ – 180A: सुष्वाप शयने कांता नभसीवैंदवी कला ॥ – 181 d: ०तिष्ठदंगना – 182A: जगामाथ दिनं पक्षो मासः संवत्सरस्तथा ॥ – 183 d: वनं गते [2. Aufl.: याते] शिखिध्वजे – 184 c: मंदरप्रातं – 187 a: नृपं योगेन b: Hs. ०रमवस्थि[?]तम् Nach a/b zusätzlich: हारकेयूरकटककुंडलादिविवर्जितम् । (187A) – 188 c/d: Hs. ०विषादेव बभूवात्मनि – 189 d: Hs. दुर्द्दिशा यत्प्रसादतः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

दुक्तं न करोत्ययम् ॥ १९२ ॥ भर्ता कषायपाकेन परिपक्वमतिः स्थितः । चेतस्यस्याद्य
विमले स्वं तत्त्वं प्रतिबिम्बति ॥ १९३ ॥ इति संचिन्त्य चूडाला बभूव द्विजदारकः ।
ईषद्ध्यानाद्गतान्यत्वं भर्तुरग्रे पपात ह ॥ १९४ ॥ ददर्श द्विजपुत्रं तं पुरो यातं शिखि
ध्वजः । द्रवत्कनकगौराङ्गं मुक्ताहारविभूषतिम् ॥ १९५ ॥ शुक्लयज्ञोपवीताङ्गं शुक्लाम्ब
रसमावृतम् । भूमावलग्नचरणं किष्कुमात्रोपरि स्थितम् ॥ १९६ ॥ तमालोक्य द्विजसुतं
समुत्तस्थौ शिखिध्वजः । देवपुत्रागमधिया संपरित्यक्तपादुकः ॥ १९७ ॥ देवपुत्र नम
स्कार इदमासनमास्यताम् । इत्यस्य दार्शयामास पाणिना पत्रविष्टरम् ॥ १९८ ॥ हे
राजर्षे नमस्तुभ्यमित्युक्त्वा स उपाविशत् ॥ १९९ ॥ शिखिध्वज उवाच ॥ देवपुत्र
महाभाग कुत आगमनं कृतम् । दिवसं सफलं मन्ये यत्त्वामद्यास्मि दृष्टवान् ॥ २०० ॥
इत्युक्त्वा पाद्यमर्घं च मालापुष्पाणि चानघ । शिखिध्वजस्तदिष्टायै देवतायै ददौ क्र
मात् ॥ २०१ ॥ चूडालोवाच ॥ पेशलेनानुरूपेण प्रश्रयेणामुनानघ । मन्येऽहं नूनमत्य
न्तं चिरजीवी भविष्यसि ॥ २०२ ॥ शान्तेन मनसोदारमारादुन्मुक्तकल्पनम् । निर्वा
णार्थं तपः साधो कच्चित्संभृतवानसि ॥ २०३ ॥ असिधारासमं सौम्य शान्तव्रतमिदं
तव । स्फीतं यद्राज्यमुत्सृज्य महावननिषेवणम् ॥ २०४ ॥ शिखिध्वज उवाच ॥ जा
नासि भगवन्सर्वं देवस्त्वं कोऽत्र विस्मयः । श्रियैव लोकोत्तरया ज्ञायसे चिह्नभूतया
॥ २०५ ॥ तत्कस्त्वं कस्य पुत्रस्त्वं किमायातोऽस्यनुग्रहात् । एवं मे संशयं छिन्द्धि वि
मलेन्दुसमानन ॥ २०६ ॥ चूडालोवाच ॥ राजन्मे शृणु वक्ष्यामि यथा पृष्टमखण्डि
तम् ॥ २०७ ॥ अस्त्यस्मिञ्जगतः कोशे शुद्धात्मा नारदो मुनिः । पुण्यलक्ष्म्या मुखे का
न्ते कर्पूरतिलकोपमः ॥ २०८ ॥ स कदाचिन्मुनिर्देवो गुहायां ध्यानमास्थितः । तत्र
हेमतटे गङ्गा वहत्युरुतरङ्गिणी ॥ २०९ ॥ एकदा नारदमुनिर्ध्यानान्ते सरितस्तटे । ध्व
नद्वलयमश्रौषीह्लीलाकलकलारवम् ॥ २१० ॥ हेलयालोकयन्नद्यामपश्यल्ललनागणम् ।
रम्भातिलोत्तमाप्रायं निर्यन्त्रजललीलया । क्रीडन्तं त्यक्तवसनं देशे पुरुषवर्जिते ॥
२११ ॥ सर्वत्र दृष्टसर्वाङ्गं विश्वरूपमिव स्थितम् । प्रतिबिम्बितसर्वाङ्गमन्योन्यादर्शतां
गतम् ॥ २१२ ॥ स्त्रैणमालोक्य तत्कान्तं सहसैव मनो मुनेः । अनाश्रितविवेकांशं ब
भूवानन्दितं स्फुरत् ॥ २१३ ॥ आनन्दवलिते चित्ते क्षुब्धे प्राणानिले स्थिते । बभूव
तस्य दृष्टस्य मदनस्खलितस्तथा ॥ २१४ ॥ क्षिखिध्वज उवाच ॥ तादृशोऽपि बहुज्ञोऽ

192 b: **न करिष्यति** – 192A: **तस्मात्तापसवेषेण बोधयामि पतिं क्षणात् ॥** – 193 d: **स्वतत्त्वं** – 195 d: **०विभूषणम्** – 196 a: Lies **०वीतांसं*** b: **०युगावृतम्** – 199A: **तदर्पितां पुष्पवृष्टिं गृह्णन्नुपविवेश ह ॥** – 201 a: **पाद्यमर्घ्यं** – 202 **ब्राह्मण उवाच ॥** (2. Aufl.) – 203 b: Hs. **निर्वाणार्हं** c: Hs. **किंचित्संप्रतिवानसि** – 205 c: **सर्वोत्तमया** – 206 a: Hs. **तत्कथं कस्य** – 207 **ब्राह्मण उवाच ॥** (2. Aufl.) – 207A: **को नाम परिपृच्छंतं विनीतं वंचयेत्पुमान् ॥** – 210A: **किमेतदित्यसौ किंचित्कौतूहलमवाप्तवान् ॥** – 211 d: **नितांतं जल०** – 212 b: Hs. **विरूपमिव संस्थितम्** – 213 c/d: **अनश्रितविवेकं तद्बभूवानंदितं स्फुरन्** – 214 a: Hs. **आनन्दचरिते** c: **तुष्टस्य** , lies **हृष्टस्य** d: Lies **मदनः***; **०स्खलितं तदा** – 215 2. Aufl. ohne **क्षिखिध्वज उवाच ॥** c: **०विधां** d: **प्राप्तो मदन०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

पि जीवन्मुक्तोप्यसौ मुनिः । कथमेवंविधं ब्रूहि प्रापन्मदनवश्यताम् ॥ २१५ ॥ चूडालोवाच ॥ स्वरूपे निर्मले सत्ये निमेषमपि विस्मृते । दृश्यमुल्लासमाप्नोति प्रावृषीव पयोधरः ॥ २१६ ॥ अनारतानुसंधानादप्युन्मेषमविस्मृते । स्वरूपे नोल्लसत्येष चिति दृश्यपिशाचकः ॥ २१७ ॥ सुखदुःखफलास्वादो बन्धो जीवस्य नेतरः । तदभावो हि मोक्षः स्यादिति द्वेधा व्यवस्थितिः ॥ २१८ ॥ शुद्धेन बोध्यबोधेन आत्मज्ञानमयात्मना । सुखदुःखादि नास्तीति ज्ञाते ज्ञो याति सौम्यताम् ॥ २१९ ॥ सर्वमेव चिदाकाशं ब्रह्मेति घननिश्चये । स्थितिं याते शमं याति जीवो निःस्नेहदीपवत् ॥ २२० ॥ आत्मस्वभाववशतो जातं जगदिदं महत् । स्थितिं वासनयाभ्येत्य धर्माधर्मवशे स्थितम् ॥ २२१ ॥ वासनां शममानीय धर्माधर्मैर्न गृह्यते । ततो न जायते जन्तुरिति नो दर्शनं मुने ॥ २२२ ॥ शिखिध्वज उवाच ॥ अत्युदारं महार्घं च वक्षि त्वं वदतां वर । अनुभूतिमुपारूढं गूढं च परमार्थवित् ॥ २२३ ॥ तद्वाक्यविभवेनाद्य श्रुतेनानेन सुन्दर । पीतेनेवामृतेनाहमन्तर्यातोऽस्मि शीतताम् ॥ २२४ ॥ तत्समासेन तां तावदात्मोत्पत्तिं वदाशु मे । ततः श्रोष्यामि यत्नेन ज्ञानगर्भां गिरं तव ॥ २२५ ॥ तेन पद्मजपुत्रेण मुनिना नारदेन तत् । क्व कृतं वीर्यमार्येण कथयाद्य यथातथम् ॥ २२६ ॥ चूडालोवाच ॥ ततो निबध्नता तेन मनोमत्तमतङ्गजम् । विवेकविपुलालाने शुद्धबुद्धिवरत्रया ॥ २२७ ॥ मुनिना पार्श्वगे कुम्भे स्फाटिके वीर्यमर्पितम् । संकल्पितेन क्षीरेण स कम्भस्तेन पूरितः ॥ २२८ ॥ अवर्धत ततो मासाद्गिरिगर्भादिवोडुराट् । परिपूर्णः समस्ताङ्गः कुम्भाद्गर्भः स निर्ययौ ॥ २२९ ॥ सर्वसंस्कारसंपन्ने स तस्मिन्नारदो मुनिः । भाण्डाद्भाण्ड इवाशेषं विद्याधनमयोजयत् ॥ २३० ॥ अथैनं पुत्रमादाय जगाम ब्रह्मणोऽन्तिकम् । पौत्रं तं भगवान्वेधाश्चकार ज्ञानपारगम् ॥ २३१ ॥ साधो सोऽयमहं नाम कुम्भनामास्मि कुम्भजः । चत्वारः सुहृदो वेदा मम लीलाविलासिनः ॥ २३२ ॥ मातृष्वसा मे गायत्री माता मम सरस्वती । यथाकाममशेषेण जगन्ति विहराम्यहम् ॥ २३३ ॥ शिखिध्वज उवाच ॥ अद्य तिष्ठाम्यहं साधो धन्यानां धुरि धर्मतः । अमृतस्पन्दिवचसा यत्त्वयास्मि समागतः ॥ २३४ ॥ न केचन तथा भावाश्चेतः शीतलयन्ति मे । राज्यलाभादयोऽप्येते यथा साधुसमागमः ॥ २३५ ॥ चूडालोवाच ॥ आस्तामेषा कथा तावत्सर्वं ते वर्णितं मया । त्वं मे कथय हे साधो कस्त्वमद्रौ करोषि किम् ॥ २३६ ॥ शिखिध्वज उवाच ॥ देवपुत्रोऽसि जानासि पृष्टश्चेद्वच्मि संशृणु । संसारभयभीतत्वान्निवसामि वनान्तरे ॥ २३७ ॥ शिखिध्वजोऽहं भूपालस्त्यक्त्वा राज्यमिह स्थितः ।

216 **ब्राह्मण उवाच ॥** (2. Aufl.) c: **०मायाति** – 217 a/b: Hs. **अनारतानुबंधानादप्युन्मेषं तु विस्मृते** c: Hs. **स्वरूपेणो०** – 218 a: **सुखदुःखकलास्पंदो** d: Hs. **व्यवस्थितः** – 219 b: **स्वात्मज्ञान०** – 220 c: **समं** – 222 a: **वासनांशमपानीय** – 223 a: **महाश्चर्यं** d: **रूढं च परमार्थवत्** – 226 d: **यथास्थितम्** – 227 **ब्राह्मण उवाच ॥** (2. Aufl.) – 229 c: **परिपूर्णस०** d: **कुंभाद्गर्भो विनिर्ययौ** – 232 c: Hs. **चत्वारः हृदये** d: **०विवासिनः** – 233 d: **विचराम्यहम्** – 234 c: Lies **०तस्यन्दि०*** – 236 **कुम्भ उवाच ॥** (2. Aufl.) b: **कथितं** – 237 b: **पृष्टश्चेद्वच्म्यहं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

भृशं भीतोऽस्मि तत्त्वज्ञ संसृतौ जन्मनः पुनः ॥ २३८ ॥ इमामखण्डितां सम्यक् क्रि
यां संपादयन्नपि । दुःखाद्गच्छामि दुःखौघममृतं मे विषं स्थितम् ॥ २३९ ॥ चूडालो
वाच ॥ ज्ञानं हि परमं श्रेयः क्षितिपालगुरूदितम् । कालातिवाहनायैव विनोदाय क्रि
योदिता ॥ २४० ॥ अलब्धज्ञानदृष्टीनां क्रिया नृप परायणम् ॥ २४१ ॥ वासनामात्र
सारत्वादज्ञस्य सफलाः क्रियाः । सर्वा एवाफला ज्ञस्य वासनामात्रसंक्षयात् ॥ २४२
॥ न स्वभावेन फलति यथा शरलता फलम् । क्रिया निर्वासनामुत्र फलं फलति नो
तथा ॥ २४३ ॥ यस्य मौर्ख्यं क्षयं जातं सर्वं ब्रह्मेति भावनात् । नोदति वासना तस्य
प्राज्ञस्येवाम्बुधिर्मरौ ॥ २४४ ॥ वासनामात्रसंत्यागाज्जरामरणवर्जितम् । पदं भवति
जीवोऽन्तर्भूयोजन्मविर्जिम् ॥ २४५ ॥ सवासनं मनोऽज्ञानं ज्ञेयं निर्वासनं मनः । ज्ञा
नेन ज्ञेयतामेत्य पुनर्जीवो न जायते ॥ २४६ ॥ संसारोत्तारणं ज्ञानं त्वं किमज्ञानवा
न्स्थितः ॥ २४७ ॥ कोऽहं कथमिदं जातं कथं शाम्यति वेति भोः । राजन्नावेक्षसे क
स्मात्किमज्ञ इव तिष्ठसि ॥ २४८ ॥ कथं बन्धः कथं मोक्ष इति प्रश्नानुदाहरन् । पारा
वारविदां पादान्कस्माद्राजन्न सेवसे ॥ २४९ ॥ साधूनां समदृष्टीनां परिप्रश्नेन सेव
या । संगमेन च सा युक्तिर्लभ्यते मुच्यते यया ॥ २५० ॥ श्रीवसिष्ठ उवाच ॥ कान्त
या देवरूपिण्या तयैवं प्रतिबोधितः । अश्रुपूर्णमुखो वाक्यं शिखिध्वज उवाच ह ॥
२५१ ॥ अहो नु बोधितोऽस्म्यद्य चिरात्सुरसुत त्वया ॥ २५२ ॥ गुरुस्त्वं मे पिता त्वं
मे मित्रं त्वं मे वरानन । शिष्यो नमस्करोम्यग्रे पादौ तव कृपां कुरु ॥ २५३ ॥ यदु
दारतमं वेत्सि यस्मिञ्ज्ञाते न शोच्यते । भवामि निर्वृतो येन तद्ब्रह्मोपदिशाशु मे ॥
२५४ ॥ चूडालोवाच ॥ यद्युपादेयवाक्योऽहं राजर्षे तद्वदामि ते ॥ २५५ ॥ अनुपादे
यवाक्यस्य वक्तुः पृष्टस्य लीलया । व्रजन्त्यफलतां वाचस्तमसीवाक्षसंविदः ॥ २५६ ॥
शिखिध्वज उवाच ॥ यद्वक्षि तदनुष्ठेयं मया विधिरिव श्रुतेः । अविचारितमेवाशु स
त्यमेतन्मयोदितम् ॥ २५७ ॥ चूडालोवाच ॥ यथा बालः पितुर्वाक्यं मुक्तहेतूपपाद
नम् । आदत्ते हि तथैव त्वं गृहाणेदं वचो मम ॥ २५८ ॥ प्रथमं शृणु भो राजन्वृत्ता
न्तं किंचिदद्भुतम् । पश्चात्ते वर्णयिष्यामि प्रकृतार्थव्यवस्थितिम् ॥ २५९ ॥ अस्ति क
श्चित्पुमाञ्छ्रीमान्स्थानं सर्वगुणश्रियाम् । सर्वशास्त्रार्थतत्त्वज्ञो न तु जानात्यजं पदम्

240 कुम्भ उवाच ॥ (2. Aufl.) b: कैवल्यं तेन वेत्त्यलम् – 241 b: क्रियामृतपरायणम् – 242A: ऋत्वंतरे यथा याति विलयं पूर्वमार्तवम् । तथैव वासनानाशे नाशमेति क्रियाफलम् ॥ – 243 b: Hs. यथारपिलता – 244 a: याति; lies यातं* d: Hs. प्राज्ञस्यैवाबुंधीमरौ – 246A: ज्ञानमेव परं श्रेय इति ब्रह्मादयोऽपि ते ॥ – 247 a: संसारतारणं – 251 Ohne श्री० b: Hs. तथैवं – 252 शिखिध्वज उवाच ॥ – 252A: मौर्ख्या दार्यसमासंगं मुक्त्वाहमवसं वने ॥ B: अहो नु मे क्षयं यातं मन्ये पापमशष्टषतः । स त्वं मे वनमागत्य संप्रबोधयसीह माम् ॥ – 253 c: नमस्करोम्यद्य – 255 कुम्भ उवाच ॥ (2. Aufl.) – 255A: अन्यथानेकधा प्रोक्तमपि स्याद्विफलं वचः ॥ – 257 b: Hs. महाविधिरिव – 258 Zwischentitel (2. Aufl.): नवमे चिन्तामण्युपाख्यानम् – कुम्भ उवाच ॥ (2. Aufl.) b: मुक्तिहेतूप० d: गृहाण वचनं मम – 259 b: कंचिद०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ २६० ॥ अनन्तयत्नसंसाध्ये स चिन्तामणिसाधने । प्रवृत्तः कालवशतस्तस्य निर्बन्ध
शालिनः ॥ २६१ ॥ सिद्धश्चिन्तामणिः किं वा न सिध्यत्युद्यतात्मनाम् । मणिमग्रे स्थि
तं प्राप्तं हस्तप्राप्यं ददर्श सः ॥ २६२ ॥ बभूव मणिराजेन्द्रे न तु निश्चयवानसौ । इदं
संचिन्तयामास मनसा स्मयशालिना ॥ २६३ ॥ अयं मणिर्मणिर्नायं मणिश्चेत्तद्भवेन्न
सः । स्पृशामि न स्पृशाम्येनं कदाचित्स्पर्शतो व्रजेत् । नैतावतैव कालेन मणीन्द्रः
किल सिध्यति ॥ २६४ ॥ कुत एतावती स्फीता भाग्यसंपन्ममागता । अधुनैव यदा
प्नोमि मणीन्द्रं सर्वसिद्धिदम् ॥ २६५ ॥ एवं विकल्पसंकल्पैश्चिरमज्ञः परामृशन् । न
मणिग्रहणे यत्नमकरोन्मौर्ख्यमोहितः ॥ २६६ ॥ इति तस्मिन्स्थिते यातो मणिरुड्डीय
सिद्धिदः । संत्यजन्त्यवमन्तारं शरा गुणमिवोज्झिताः ॥ २६७ ॥ पुमान्भूयः क्रिया
यत्नं चक्रे रत्नेन्द्रसाधने । नोद्विजन्ति हि कार्येषु जना अध्यवसायिनः ॥ २६८ ॥ दद
र्शाथ कचद्रूपं काचखण्डमपण्डितः । अयं चिन्तामणिरिति तस्मिन्निश्चयमाययौ ॥
२६९ ॥ ततस्तं मणिमादाय प्राक्तनीं स श्रियं जहौ । सर्वं चिन्तामणेरस्मात्प्राप्यते किं
धनैरपि ॥ २७० ॥ देशोऽयमसुखो रूक्षो जनैः पापिभिरावृतः । दूरं गत्वा यथाकामं
सुखं तिष्ठामि संपदा ॥ २७१ ॥ इत्यादाय मणिं मूढः दूरदेशान्तरं ययौ । तत्र काच
कणेनासौ महतीमापदं गतः ॥ २७२ ॥ इति चिन्तामण्युपाख्यानम् ॥ चूडालोवाच
॥ अथेममपरं रम्यं वृत्तान्तं शृणु भूमिप ॥ २७३ ॥ अस्ति विन्ध्यवने हस्ती महायूथ
पयूथपः । वज्रासिविषमौ दीर्घौ द्वौ तस्य दशनौ सितौ ॥ २७४ ॥ स बद्धो लोहजा
लेन हस्तिपेन छलादिना । निबद्धो यन्त्रणामाप क्रूरशृङ्खलयार्दितः ॥ २७५ ॥ खेदान्नि
गडनिर्भेदं चकार स मतङ्गजः । दन्ताभ्यां यत्नतस्ताभ्यां मुहूर्तद्वितयेन तु ॥ २७६ ॥
तस्य तं निगडच्छेदं दृष्ट्वा स दृढनिश्चयः । पपाताथ गजेन्द्रस्य मूर्ध्नि तालतरो रिपुः ॥
२७७ ॥ सोऽपतद्दुर्मतिर्भूमावप्राप्य करिणः शिरः । तं पुरः पतितं दृष्ट्वा महेभः करु

261 Nach a/b zusätzlich: **प्रवृत्तो वाडवो वह्निरब्धिसंशोषणे यथा ।** (261A) **तस्य यत्नेन महता कालेनाध्य वसायिनः ।** (261B) cd: **कालस्य वशतस्तस्य मुनेर्निर्बंधशालिनः** – 262 a: **सिद्धिश्चिंत॰** c: **स्थितप्रायं** (2. Aufl.) – 262A: **मेरोरुदयशृंगस्थो मुनिरिंदुमिवोदितम् ॥** – 263 c: **स चिंतयामास** Nach a/b zusätzlich: **राज्ञि द्रागिति संप्राप्ते सुदीन इव पामरः ।** (263A) – 264 c: **पश्यामि न** – 264A: **यत्नेन जीवितांतेन सिद्ध्य तीत्यागमक्रमः ॥** B: **कृपणः कुणितेनाक्ष्णा लोलालातलतोपमम् । रत्नालोकं प्रपश्यामि द्विचंद्रत्वमिव भ्रमात् ॥** – 265 b: **॰संपत्समागता** c: Hs. **यदाप्नोषि** – 265A: **केचिदेव महांतस्ते महाभाग्या भवंति हि । येषामल्पेन कालेन भवंत्यभिमुखाः श्रियः ॥** B: **अहमल्पतपाः साधुर्वराको मानुषः किल । सिद्धयः कथमायांति मामभा ग्यैकभाजनम् ॥** – 267 a: **तस्मिंस्थिते** b: **सिद्धयः** c: **त्यजंति ह्यवमंतारं** – 268 c: **नोद्विजंते स्वकार्येषु** – 269 b: **॰मखंडितम्** Nach a/b zusätzlich: **हसद्भिर्वंचकैः सिद्धैः पुरस्कृतमलक्षितैः ।** (269A) c/d: **अयं चिंतामणिरिति मूढस्तस्मिन्स वस्तुताम् । बुबुधे मोहितो ह्यज्ञो मृदं हेमेव पश्यति ॥** (269B) – 270 d: **धनैरिति** – 271 b: Hs. **प्रापितरावृतः** – 272 b: **शून्यकाननमाययौ** c: **तत्रैष काचमणिना** – 273 Kolophon: **इति श्रीयोगवासिष्ठसारे** [!] **चिंतामण्युपाख्यानं नाम प्रकरणम् ॥** Zwischentitel (2. Aufl.): **नवमे गजेन्द्रोपा ख्यानम् – कुम्भ उवाच ॥** (2. Aufl.) – 273A: **परं प्रबोधनं बुद्धेः साधो सदृशमात्मनः ॥** – 274 c: **वज्रास्थि॰** d: **तस्यास्तां दशनौ** – 275 b: **हस्तिपेन किलाभितः** d: Hs. **॰लयादिति** – 277 a/b: **निगडोच्छेदं दृष्ट्वा तद्बंध निश्चयः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

णां ययौ ॥ २७८ ॥ केऽपि स्फारगुणाः सन्तः सन्ति तिर्यग्गतावपि । पतितं दलया मीति किं नाम मम पौरुषम् ॥ २७९ ॥ वारणोऽपीति कलयन्न जघान स तं रिपुम् । केवलं तं परित्यज्य प्रदेशं स ययौ गजः । गते गजे समुत्तस्थौ हस्तिपः स्वस्थदेहधीः ॥ २८० ॥ सोऽन्वियेष गजं यत्नाद्गुल्मिकान्तरितं वने । चिरेणालभतेभेन्द्रं कस्मिंश्चित्कानने स्थितम् ॥ २८१ ॥ स खातवलयं चक्रे हस्तिपः कानने नतम् । उपर्यस्थगयज्जीर्णलतौघेन स तं शठः ॥ २८२ ॥ दिनैः कतिपयैरेव वारणो विहरन्वने । तस्मिन्निपतितः खाते शुष्काब्धाविव पर्वतः ॥ २८३ ॥ इति भूयो दृढं बद्धस्तेन हस्तिपकेन सः । तिष्ठत्यद्यापि दुःखेन स्वसद्मनि यथा बलिः ॥ २८४ ॥ अहनिष्यत्पुरे चासौ यद्यग्रे पतितं रिपुम् । तन्नालप्स्यत तद्दुःखं गजः खातनिबन्धनम् ॥ २८५ ॥ मौर्ख्यादागामिनं कालं वर्तमानक्रियाक्रमैः । अशोधयन्नरो दुःखं याति विन्ध्यगजो यथा ॥ २८६ ॥ शिखिध्वज उवाच ॥ मणिसाधकविन्ध्येभबन्धनाद्यमरात्मज । सूचितं मे कथाजालं पुनर्मे प्रकटीकुरु ॥ २८७ ॥ चूडालोवाच ॥ योऽसौ शास्त्रार्थकुशलस्तत्त्वज्ञानेत्वपण्डितः । रत्नसंसाधकः प्रोक्तः स त्वमेव महीपते । तज्ज्ञो भवसि शास्त्रेषु तत्त्वज्ञाने त्वशिक्षितः ॥ २८८ ॥ विद्धि चिन्तामणिं साधो सर्वत्यागमकृत्रिमम् । तमन्तं सर्वदुःखानां त्वं साधयितुमुद्यतः ॥ २८९ ॥ संत्यक्तं भवता राज्यं सदारधनबान्धवम् । स्वदेशाच्चातिदूरस्थमागतोऽसीममाश्रमम् ॥ २९० ॥ इति सर्वपरित्यागो यावत्ते याति पूर्णताम् । तावत्त्यागविकल्पस्त्वां खमम्बुद इवावृणोत् ॥ २९१ ॥ नायं स परमानन्दः सर्वत्यागो महोदयः । कोऽप्युच्चैरन्य एवासौ चिरसाध्यो महानिति ॥ २९२ ॥ चिन्तयेति गते बृद्धिं विकल्पे तव चेतसि । वात्ययेव वनस्पन्दे त्यागः प्रोड्डीय ते गतः ॥ २९३ ॥ सर्वत्यागमहारत्ने गते कमललोचन । तपःकाचमणिर्दृष्टस्त्वया संकल्पचक्षुषा ॥ २९४ ॥ अमितानन्दमुत्सृज्य पुमान्वै यः प्रवर्तते । मिते वस्तुनि दुःसाधे स्वात्महा स शठः स्मृतः ॥ २९५ ॥ चिन्तामणिर्मया प्राप्त इत्यलं बुद्धवानसि । न लब्धवान्भवान्साधो स्फुटिकास्यापि खण्डिकाम् ॥ २९६ ॥ इति चिन्तामणिविवरणम् ॥ योऽसौ विन्ध्यवने हस्ती सोऽस्मिन्भूमितले भवान् । यौ वैराग्यविवेकौ ते तौ तस्य दशनौ सितौ ॥ २९७ ॥ यश्चासौ वारणाक्रान्तितत्परो हस्तिपः स्थितः । तदज्ञानं त्व

280 d: **स्वदेशं** – 281 a/b: **यत्नादुल्मुकांतरितं** c: **०लभ्यते०** – 282 b: **काननेऽभितः** d: Hs. **वृतं शठः** – 285 a: **अहनत्पुष्करेणासौ**; lies **अहनिष्यत्पुरैवासौ** * b: Hs. **यदाग्रे** – 286 c: Hs. **असाधयन्नरो** – 287 b: **०बंधनादमरात्मज** c: **यत्कथा०** – 288 **कुम्भ उवाच ॥** (2. Aufl.) a/b: Hs. **शास्त्रेषु कुशलस्तत्र ज्ञानेष्वपण्डितः** d: Hs. **०पतिः** f: Hs. **०ज्ञानेष्वशिक्षितः** – 289 c: **तं मतं** – 290 c: **स्वदेशस्याति०** d: **ऽसि ममाश्रमम्** – 290A: **केवलं सर्वसंत्यागे शेषिताहंमतिस्त्वया ॥** – 291 a: **ततः सर्व०** b: **यावन्नाप्नोति** c: Hs. **०विकल्पांस्त्वं** – 293 c: Hs. **वात्येवपवनस्पन्दे** – 295 b: **सुसाध्यं यः** c: **दुःसाध्ये** – 296 d: **स्फटिकस्यापि** – 297 Kolophon: **इति योगवासिष्ठसारे** [!] **चिंतामणिविवरणं** [2. Aufl.: **चिन्तामण्युपाख्यानविवरणं**] **नाम प्रकरणम् ॥** Zwischentitel (2. Aufl.): **नवमे गजेन्द्रोपाख्यानविवरणम्** – **कुम्भ उवाच ॥** (2. Aufl.) – 298 b: **स्मृतः** c: **त्वदज्ञानं** d: **तेऽतिदुःखदम्** – 298A: **अतिशक्तोऽप्यशक्तेन दुःखाद्दुःखं भयाद्भयम् । हस्ती हस्तिपकेनेव राजन्मौर्ख्येण नीयसे ॥**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

दाक्रान्तितत्परं तव दुःखदम् ॥ २९८ ॥ यल्लोहरज्जुजालेन वारणः परिवेष्टितः । तदा शापाशजालेन भवानपि समावृतः ॥ २९९ ॥ आशा हि लोहरज्जुभ्यो विषमा विपुला दृढा । कालेन क्षीयते लोहं तृष्णा तु परिवर्धते ॥ ३०० ॥ यद्बभञ्ज गजः शत्रुशृङ्खला जालबन्धनम् । तत्तत्याज भवान्भोगान्भूमिराज्यमकण्टकम् ॥ ३०१ ॥ यत्तु तालतरो र्भ्रष्टो भूमौ हस्तिपकोऽपतत् । त्वयि त्यजति तद्राज्यमज्ञानं पतितं क्षितौ ॥ ३०२ ॥ यदा विरक्तः पुरुषो भोगाशां त्यक्तुमिच्छति । तदा प्रकम्पतेऽज्ञानं छेद्यवृक्षपिशाच वत् ॥ ३०३ ॥ यदा वनं प्रयातस्त्वं तदाज्ञानं क्षतं त्वया । पतितं सन्न निहतं सर्वत्या गमहासिना ॥ ३०४ ॥ तेन भूयः समुत्थाय स्मृत्वा परिभवं कृतम् । तपःप्रपञ्चखाते ऽस्मिन्गहने त्वं नियोजितः ॥ ३०५ ॥ तदैवाघातयिष्यस्त्वं यद्यज्ञानं तथागतम् । रा ज्यत्यागविधौ तत्त्वां नाहनिष्यत्क्षयं गतम् ॥ ३०६ ॥ यत्खातवलयस्तेन वैरिणा हस्ति नः कृतः । तत्तपोदुःखमतुलमज्ञानेन तवार्पितम् ॥ ३०७ ॥ या तस्य परिवारश्रीर्गजा रेर्नृपसत्तम । सा त्वदज्ञाननृपतेश्चित्तभूतिर्विसारिणी ॥ ३०८ ॥ यत्खातवलयो बाल लताभिरवगुण्ठितः । आवृतं तत्तपोदुःखमीषत्सज्जनवृत्तिभिः ॥ ३०९ ॥ इति गजवृ त्तान्तविवरणं ॥ शिखिध्वज उवाच ॥ राज्यं त्यक्तं गृहं त्यक्तं देशस्त्यक्तस्तथाविधः । दारास्त्यक्तास्तथा साधो सर्वत्यागो न किं कृतः ॥ ३१० ॥ चुडालोवाच ॥ धनं दारा गृहं राज्यं भूमिश्छत्रं च बन्धवः । इति सर्वं न ते राजन्सर्वत्यागो हि कस्तव ॥ ३११ ॥ तवास्त्येवापरित्यक्तः सर्वस्माद्भाव उत्तमः । तं परित्यज्य निःशेषं परमां यास्यशो कताम् ॥ ३१२ ॥ शिखिध्वज उवाच ॥ राज्यं चेन्मम नो सर्वं तत्सर्वं वनमेव मे । शै लवृक्षादि गुल्माद्यं तदप्येतत्त्यजाम्यहम् ॥ ३१३ ॥ श्रीवसिष्ठ उवाच ॥ इति राम वद न्नेवं कुम्भवाक्यप्रनोदितः । निमेषान्तरमात्रेण वशी धीरः शिखिध्वजः । प्रममार्ज व नास्थां तां हृदा स दृढनिश्चयः ॥ ३१४ ॥ शिखिध्वज उवाच ॥ सवृक्षाद्रिवनश्वभ्रविपि नादपि वासना । परित्यक्ता मया नूनं सर्वत्यागः स्थितो मम ॥ ३१५ ॥ कुम्भ उवाच ॥ अद्रिस्तटं च तं श्वभ्रं सलिलं पादपाः स्थलम् । इत्यादि तव नो सर्वं सर्वत्यागः कथं

299 a: Hs. ०रजसारेन c: Hs. तदाशामयजालेन – 301 a: शत्रोः d: ०न्भूमिं – 302 d: कृतम् – 303 d: छेद्ये वृक्षे पिशाचवत् – 303A: भोगौघे नूनमुन्मुक्ते पतत्यज्ञानसंस्थितिः ॥ B: यदा विवेकी पुरुषो भोगान्संत्यज्य तिष्ठति । तदा पलायतेऽज्ञानं छिन्ने वृक्षे पिशाचवत् ॥ – 305 c: ततः (2. Aufl.) – 307 c: तत्तेन दुःख० – 308 b: Hs. ०र्गजारेरहारनृपः – 309A: इत्यद्यापि तपःखाते दुःखे ह्यस्मिन्सुदारुणे । स्थितोऽसि पातालतले नृप बद्धो यथा बलिः ॥ B: चूडालोवाच [2. Aufl.: कुम्भ उवाच] ॥ यदुक्तं तव [lies नय०*] शालिन्या तया विदित वेद्यया । तदा चूडालया ज्ञानं तत्कस्मान्नोररीकृतम् ॥ C: सा हि तत्त्वविदां मुख्या यद्यद्वक्ति करोति च । तत्सर्वं सत्यमेवांग तदनुष्ठेयमादरात् ॥ D: अथ चेद्वचनं तस्यास्त्वया नानुष्ठितं नृप । एतत्सर्वपरित्यागः कस्मान्न निपुणी कृतः ॥ – 310 Kolophon (nach 309A): इति श्रीयोगवासिष्ठसारे [!] गजवृत्तांतविवरणं [2. Aufl.: गजेन्द्रोपा ख्यानविवरणं] नाम प्रकरणम् ॥ b: Lies ०विधम् c: दारास्त्यक्ताः सुतास्त्यक्ताः – 311 कुंभ उवाच ॥ b: बांध वाः – 312 b: सर्वस्माद्राग – 313 Hs. श्रीवसिष्ठ उवाच ॥ – 314 Ohne श्री०; Hs. ohne श्रीवसिष्ठ उवाच ॥ a: वदन्नेव b: ०वाक्येन नोदितः, lies ०वाक्यप्रचोदितः* d: Hs. वीरः f: Lies हृदः – 314A: प्रावृडोघस्तट गतां रजोरेखामिवात्मनः ॥ – 315 a: Lies ०द्रिजल०*; ०श्वभ्राद्विपि० – 316 a: वनं श्वभ्रं, lies वनश्वभ्रं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तव । तवास्त्येवापरित्यक्तः सर्वस्माद्भाव उत्तमः ॥ ३१६ ॥ शिखिध्वज उवाच ॥ एतच्चे
न्मम नो सर्वं तत्सर्वमाश्रमो मम । वापीस्थलोटजयुतस्तमेवाशु त्यजाम्यहम् ॥ ३१७
॥ कुम्भ उवाच ॥ आश्रमोऽपि न ते तस्मिंस्त्यक्ते त्यागो न सर्वगः । तवास्त्येवापरि
त्यक्तः सर्वस्माद्भाव उत्तमः ॥ ३१८ ॥ शिखिध्वज उवाच ॥ एतच्चेन्मम नो सर्वं तत्स
र्वं भाजनादि मे । वासनां तत्र संत्यज्य सर्वत्यागी स्थितो ह्यहम् ॥ ३१९ ॥ अहो नु
चिरकालेन देवपुत्र प्रबोधितः । संपन्नः केवलः शुद्धः सुखितो बोधवानहम् ॥ ३२०
॥ किं नाम किल वस्त्वेतद्भवेत्संकल्पितक्रमम् । यद्भाण्डोपस्करस्थानसदनाद्यवलम्ब
नम् ॥ ३२१ ॥ यावद्यावत्प्रहीयन्ते विविधा बन्धहेतवः । तावत्तावत्समायाति परमां
निर्वृतिं मनः ॥ ३२२ ॥ शाम्यामि परिनिर्वामि सुखितोऽस्मि जयाम्यहम् । विबन्धाः
प्रक्षयं याताः सर्वत्यागो मया कृतः ॥ ३२३ ॥ कुम्भ उवाच ॥ सर्वमेव न संत्यक्तं त्व
या राजञ्शिखिध्वज । सर्वत्यागपरानन्दं मा मुधाभिनयीकुरु ॥ ३२४ ॥ शिखिध्वज
उवाच ॥ इन्द्रियव्यालसंघातो रक्तमांसमयाकृतिः । शिष्यते सर्वसंत्यागे देहो मे देव
तात्मज ॥ ३२५ ॥ इत्युक्त्वा देहमग्रस्थे श्वभ्रे त्यक्तुमसौ जवात् । करोति यावदुत्थानं
तावत्कुम्भोऽत्युवाच ह ॥ ३२६ ॥ राजन्किमिति देहं त्वं निरागस्कं महावटे । त्यज
स्यज्ञो हि वृषभो रुषितो हन्ति तर्णकम् ॥ ३२७ ॥ त्यक्तेनापि शरीरेण किल तामरसे
क्षण । सर्वत्यागो न ते याति निष्पत्तिं विषमो हि सः ॥ ३२८ ॥ येनायं क्षोभ्यते देहो
यद्बीजं जन्मकर्मणाम् । तत्संत्यजसि चेत्पापं तन्महात्यागवान्भवान् ॥ ३२९ ॥ शि
खिध्वज उवाच ॥ केनायं चाल्यते देहः किं बीजं जन्मकर्मणाम् । कस्मिंस्त्यक्ते परि
त्यक्तं सर्वं भवति सुन्दर ॥ ३३० ॥ कुम्भ उवाचा ॥ साधो सर्वगताधारं जीवप्राणादि
नामकम् । न जडं नाजडं भ्रान्तं चित्तं सर्वमिति स्मृतम् ॥ ३३१ ॥ चित्तं विद्धि जग
ज्जालं बन्धश्चित्तमुदीर्यते । तस्मिन्साधो परित्यक्ते सर्वत्यागो भवेदिति ॥ ३३२ ॥ जन्म
नां कर्मणां वापि चित्तं बीजमुदाहृतम् । पादपः पवनेनैव देहश्चित्तेन चाल्यते ॥ ३३३
॥ चित्तत्यागं विदुः सर्वत्यागं त्यागविदो जनाः । चित्ते त्यक्ते लयं याति द्वैतमैक्यं च
सर्वतः ॥ ३३४ ॥ शिष्यते परमं शान्तमेकमच्छमनामयम् । सर्वत्यागः परानन्दो दुः
खमन्यत्सुदारुणम् । इत्योमित्युररीकृत्य यदिच्छसि तदाचर ॥ ३३५ ॥ कृत्वा सर्वप

f: सर्वस्माद्राग – 317 b: तत्सर्वं भाजनादि मे – 318 a: Lies आश्रमेऽपि च ते* d: सर्वस्माद्राग – 319 Nach a/b zusätzlich: 319A: चर्मकुड्यकुशूलादि तत्तावत्संत्यजाम्यहम् ॥ B: वसिष्ठ उवाच ॥ इत्युक्त्वोत्थाय तत्सर्वमक्षमालाजिनादिकम् । एकत्रैव समानीय ददाह त्यागबुद्धितः ॥ C: भांडजातं दहत्यग्नौ सहशुष्केंधनेन तत् । केवलाकृतिरस्नेहस्तुष्टिमानाह भूपतिः ॥ – 320 a: रुचिर० d: सुखेनोद्बोधवानहम् – 321 b: ०द्भवे संकल्पित० – 323 c: प्रलयं – 323A: दिगंबरो भवाम्येव दिक्समोऽयमहं स्थितः । देवपुत्र महात्यागाद्यदन्य द्वद शिष्यते ॥ – 324 c: ०परानंदे d: ०भिनयं कुरु – 324A: वसिष्ठ उवाच ॥ इत्येवं ब्रुवता [lies इति श्रुत वता*] तेन किंचित्संचिंत्य भूभृता । इदमुक्तं महाबाहो राम राजीवलोचन ॥ – 325 Hs. श्रीवसिष्ठ – 325A: तदुत्थाय पुनर्देहं भृगुपाताद्य[lies द*]विघ्नतः । विनाशात्मकतां नीत्वा सर्वत्यागी भवाम्यहम् ॥ – 326 वसिष्ठ उवाच ॥ d: ऽभ्युवाच – 327 कुंभ उवाच ॥ – 329 c: चेत्त्याज्यं – 331 a: ०गताकारं b: जीवनामादि० d: सर्वमवस्थितम् – 333 c: पवनेनेव

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

रित्यागं शान्तः स्वस्थो वियत्समः । सौम्यो भवसि यद्रूपस्तद्रूपो भव भूपते ॥ ३३६ ॥ शिखिध्वज उवाच ॥ चित्तस्यादौ स्वरूपं मे यथावद्भगवन्वद । ततश्चित्तपरित्यागं वद मे वदतां वर ॥ ३३७ ॥ कुम्भ उवाच ॥ अहमर्थोदयो योऽयं चित्तात्मा वेदनात्मकः । एतच्चित्तद्रुमस्यास्य विद्धि बीजं महामते ॥ ३३८ ॥ एतस्मात्प्रथमोद्भिन्नादङ्कुरोऽनुभवाकृतिः । निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते ॥ ३३९ ॥ अस्य बुद्ध्यभिधानस्य याङ्कुरस्य प्रपीनता । संकल्परूपिणी तस्याश्चित्तचेतोमनोऽभिधा ॥ ३४० ॥ ईदृशस्यास्य चित्तस्य दुर्वृक्षस्य प्रतिक्षणम् । शाखाविलवनं कुर्वन्मूलकाषे भरं कुरु । मूलोद्धरणमेवास्य त्यागं त्यागविदो विदुः ॥ ३४१ ॥ वासना विविधाः शाखाः फलन्त्यो विविधं फलम् । अभाविता भवन्त्यन्तर्लूनाः संविद्बलेन वै ॥ ३४२ ॥ असंसक्तमना मौनी शान्तवादविचारणः । संप्राप्तकारी यः सोऽन्तर्लूनचित्तलतो भवेत् ॥ ३४३ ॥ गौणं शाखाविलवनं मुख्यं मूलविकर्तनम् । चित्तवृक्षस्य तेन त्वं मूलकाषपरो भव ॥ ३४४ ॥ मुख्यत्वेन महाबुद्धे मूलदाहमलं कुरु । चित्तकण्टकिखण्डस्य भवत्येवमचिन्तता ॥ ३४५ ॥ शिखिध्वज उवाच ॥ अहंभावात्मनश्चित्तद्रुमबीजस्य हे मुने । कोऽनलो दहनाख्येऽस्मिन्कर्मण्यर्थकरो भवेत् ॥ ३४६ ॥ कुम्भ उवाच ॥ राजन्स्वात्मविचारोऽयं कोऽहं स्यामितिरूपकः । चित्तदुर्द्रुमबीजस्य दहने दहनः स्मृतः ॥ ३४७ ॥ शिखिध्वज उवाच ॥ मुने मया स्वया बुद्ध्या बहुशः प्रविचारितम् । जडोऽयं नास्मि देहोऽहं न मांसास्थ्यसृगादि वा ॥ ३४८ ॥ कर्मेन्द्रियाण्यपि न च न च बुद्धीन्द्रियाण्यपि । न मनो नापि च मतिर्ज्ञातं चिन्तयता मया ॥ ३४९ ॥ कुम्भ उवाच ॥ एतावन्मात्रकं वृन्दं यदि न त्वं महीपते । जडत्वात्तन्महाबुद्धे योऽसि तद्वद मेऽनघ ॥ ३५० ॥ शिखिध्वज उवाच ॥ चिन्मात्रमहमच्छात्म वेदनं विदुषां वर । यत्र भावाः स्वदन्ते मे निर्मीयन्ते च येन वा ॥ ३५१ ॥ एवंरूपस्य मे लग्नं नूनं मलमकारणम् । चित्तद्रुमस्य यद्बीजमहंभावो महामते ॥ ३५२ ॥ तच्च त्यक्तुं न जानामि त्यक्तं त्यक्तमुपैति माम् । मुने यदा न शक्तोऽस्मि तेन तप्ये सुदारुणम् ॥ ३५३ ॥ कुम्भ उवाच ॥ कारणाज्जायते कार्यमहंभावात्मकस्य तत् । मुने कारणमन्विष्य कथयाशु ममात्मनः ॥ ३५४ ॥ शिखिध्वज उवाच ॥ मुनेऽहमिति दोषस्य वेदनं वेद्मि कारणम् । तद्यथा प्रथमं याति तन्मे वद मुनीश्वर ॥ ३५५ ॥ चितश्चेत्योन्मुखत्वेन दुःखायायमहं स्थितः । चेत्योपशमनं ब्रूहि मुने दुःखोपशान्तये ॥ ३५६ ॥ कुम्भ उवाच ॥ कारणं कारणज्ञोऽसि वेदन

337A: **वासनैव सदा राजन्स्वरूपं विद्धि चेतसः । चित्तशब्दस्तु पर्यायो वासनाया उदाहृतः ॥** – 338 b: **सर्वानर्थैकभाजनम्** – 339 d: **बुद्धिरित्येव सोच्यते** – 340 d: **ऽभिधाः** – 341 c: Hs. **०विलयनं** e: **मूलाद्धरणमेवाशु** – 343 a: Hs. **०विलयनं** – 345 c: **०कंटक०** d: **०मचित्तता** – 346 c: **दहनाख्यो** – 348 c: **नाहं जगत्तदा देहो** d: **०सृगादिमान्** – 349 c/d: **मतिर्नाहंकारश्च जाड्यतः** – 349A: **कटकत्वं यथा हेम्नि तथाहंत्वं चिदात्मनि ॥** – 350 c/d: **०बुद्धेर्योऽसि तं वद** – 351 a: **चिन्मात्रमज०** c: **स्वदंत्येते** d: **निर्णीयंते** – 352 d: **०महंभावात्मकं हृदि** – 353 a: **शक्नोमि** c: **यस्मान्न शक्नोमि** – 354 d: **ममाधुना** – 355 c: **तद्यथोपशमं** – 356 a/b: Hs. **०मुखत्वे तद्दुःखानीयमहं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

स्य वदाशु मे । ततस्त्वां बोधयिष्यामि कारणाकरणक्रमम् ॥ ३५७ ॥ शिखिध्वज उ
वाच ॥ देहादिरूपयोदेति वेदनं वस्तुसत्तया । असत्याभासया स्पन्दो यथा पवनले
खया ॥ ३५८ ॥ असत्यां वस्तुसत्तायां नावगच्छाम्यहं यथा । अहंत्ववेदनं चित्तबीजं
समुपशाम्यति ॥ ३५९ ॥ कुम्भ उवाच ॥ कारणं यस्य कार्यस्य भूमिपाल न विद्यते ।
विद्यते नेह तत्कार्यं तत्संवित्तिस्तु विभ्रमः ॥ ३६० ॥ अविद्यमानमेव त्वं विद्धि सर्गं
भ्रमोदितम् । अकारणं हि यद्वस्तु तन्मिथ्या सर्परज्जुवत् ॥ ३६१ ॥ शिखिध्वज उवाच
॥ आद्यः पितामहो यः स्यात्तेन सृष्टमिदं जगत् । स एवास्य कथं न स्यात्कारणं वद
मे मुने ॥ ३६२ ॥ कुम्भ उवाच ॥ सर्गादौ केवलं शान्तं ब्रह्मैवास्ति महीपते । द्वितीय
कलनाभावाद्वेधसोऽस्ति न कारणम् ॥ ३६३ ॥ शिखिध्वज उवाच ॥ वेधसः परमं ब्रह्म
कारणं किं न हे मुने । अकारणकतां साधो तन्न प्रत्येमि वेधसः ॥ ३६४ ॥ कुम्भ उवा
च ॥ अनन्तमजमव्यक्तमक्षरं शान्तमच्युतम् । अप्रतर्क्यमविज्ञेयं यच्छिवं शुद्धमव्य
यम् ॥ ३६५ ॥ तन्मात्रजनितो ब्रह्मा तदेवेति विनिर्णयः । तन्मात्रजनितः सर्गस्तदा
त्मक इति स्थितिः ॥ ३६६ ॥ अतो नेदं कृतं किंचिज्जगदादि न विद्यते । न कर्तास्ति
न भोक्तास्ति सर्वं शान्तमजं शिवम् । इति निश्चयवानन्तरज्ञानं तनुतां नय ॥ ३६७ ॥
अज्ञानं शिथिलीभूतमेवं नष्टं विदुर्बुधाः । न नाशेन विनोदेति पूर्वसंस्थानविच्युतिः
॥ ३६८ ॥ तानवं दृश्यते यस्य तस्यानुक्रमतः स्वयम् । पूर्वसंस्थानविगमात्प्रशमोऽप्यु
पपद्यते ॥ ३६९ ॥ तस्माच्चिदात्मकतयात्मनि चित्ततोऽयं नित्यं स्वयं कचति भूमिप
देवदेवः । तेनैव पद्मज इति स्वयमात्मनात्मा प्रोक्तः स्वरूपमिति शान्तमिदं समस्तम्
॥ ३७० ॥ शिखिध्वज उवाच ॥ आः प्रबुद्धोऽस्मि भगवन्युक्तमुक्तं त्वयोत्तम । कर्तृभा
वाज्जगन्नास्ति तेन नास्ति पदार्थदृक् । एवं स्थिते विशुद्धोऽस्मि विबुद्धोऽस्मि न चास्मि
च ॥ ३७१ ॥ जगत्पदार्थप्रविभागदृष्टिः सदेशदिक्कालकलाक्रियौघा । अहो नु कालेन
चिरेण शान्ता ब्रह्मैव शान्तं स्थितमव्ययात्मा ॥ ३७२ ॥ श्रीवसिष्ठ उवाच ॥ कुम्भेन
बोधितस्त्वेवं स बभूवावबोधवान् । विनिर्गतो रराजाथ महामोहसमुद्गकात् ॥ ३७३
॥ एवं कुम्भवचो राजा भावयंस्तदकृत्रिमम् । स्व एवात्मपदे तस्मिन्क्षणं परिणतोऽभ
वत् ॥ ३७४ ॥ बभूवामीलितमनोलोचनः शान्तवाग्गतिः । शिलातलादिवोत्कीर्णो

357 c: अतस्त्वां – 359 a: असत्तां वस्तुसत्ताया b: यया d: समनुशाम्यति – 359A: कुंभ उवाच ॥ विद्यते यदि देहादिवस्तुसत्ता तदस्ति ते । अभावाद्देहसत्तादेः किंनिष्ठं तव वेदनम् ॥ B: शिखिध्वज उवाच ॥ हस्तपादादिसंयुक्तक्रियाफलविलासवान् । सदानुभूयमानोऽयं देहो नास्ति कथं मुने ॥ – 360 c: न हि – 361 b: सर्वं d: रज्जुसर्पवत् – 364 c: Lies ०कत्वं * – 365 a/b: ०व्यक्तं यदाद्यमुपलंभनम् c: Hs. अप्रतर्क्यमिति ज्ञेयं c(d: ०विज्ञेयमक्षरं शांतमच्युतम् । अद्वितीयमनाद्यंतं तच्छिवं शांतमव्ययम् – 365A: तत्कथं कस्य केनैव कर्तृ भोक्तृ कदा भवेत् ॥ – 366 a/b: चिन्मात्रकल्पितो वेधाश्चिदेवेति विनिश्चितः – 367 a/b nach 365A. b: ०ज्ञगदेतन्न c: न कर्तास्मि न भोक्तास्मि – 369 d: Lies ऽभ्युपपद्यते – 370 (Vasantatilakā) – 371 a/b: बुद्धोऽस्मि भगवन्युक्तियुक्तमुक्तं c: Lies कर्त्रभावा० * e: विबुद्धो f: प्रबुद्धोऽस्मि शिवोऽस्मि च – 371A: नमो मह्यं परं चेत्यं न किंचिदिति बोधितः ॥ B: पदार्थवेदनादित्थमसदेवावभासते । अहमद्यालमेतेन शांतमासे ख कोशवत् ॥ – 372 (Upajāti) – 373 Ohne श्री० – 375 b: शांतवज्ञ्मुनिः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

निष्पन्दावयवाकृतिः ॥ ३७५ ॥ ततो मुहूर्तमात्रेण प्रबुद्धं स्फुरितेक्षणम् । तमुवाच म
हाबाहो चूडाला कुम्भरूपिणी ॥ ३७६ ॥ कच्चिदस्मिन्पदे स्फारे शुद्धे मृदुनि निर्मले ।
सुतल्पे निर्विकल्पानां सुखं विश्रान्तवानसि ॥ ३७७ ॥ कच्चिदन्तः प्रबुद्धोऽसि कच्चि
द्भ्रान्तिस्त्वयोज्झिता । कच्चिज्ज्ञेयं परिज्ञातं दृष्टं द्रष्टव्यमेव वा ॥ ३७८ ॥ शिखिध्वज
उवाच ॥ भगवंस्त्वत्प्रसादेन महाविभवभूषिता । महती पदवी दृष्टा सर्वस्योर्ध्वं स्थि
ता मया ॥ ३७९ ॥ सतां विदितवेद्यानामहो बत महात्मनाम् । अपूर्वैकामृतमयः स
ङ्गः सारफलप्रदः ॥ ३८० ॥ जन्मनापि मया लब्धं यन्नाम न महामृतम् । तदद्य त्व
त्समासङ्गात्कथमासादितं प्रभो ॥ ३८१ ॥ कुम्भ उवाच ॥ मनस्युपशमं याते त्यक्त
भोगेषणास्थिते । कषायपाके निर्वृत्ते सर्वेन्द्रियगणस्य च । यान्ति चेतसि विश्रान्तिं
विमला देशकोक्तयः ॥ ३८२ ॥ देहान्मलानि सर्वाणि कालेन कमलेक्षण । साधो वृक्षा
त्फलानीव पाकेन विगलन्त्यधः ॥ ३८३ ॥ द्वित्वैकत्वदृशौ चित्तं तदेवाज्ञानमुच्यत ।
एतयोर्यो लयो दृष्ट्योस्तज्ज्ञानं सा परा गतिः ॥ ३८४ ॥ प्रबुद्धोऽसि विमुक्तोऽसि चि
त्तं त्यक्तं त्वया नृप । महोदयो मुनिर्मौनी स्वरूपे तिष्ठ निर्मले ॥ ३८५ ॥ शिखिध्वज
उवाच ॥ न प्रबुद्धस्य तज्ज्ञस्य चित्तमस्ति किल प्रभो । जीवन्मुक्ताः कथं चित्तं विहर
न्ति विना वद ॥ ३८६ ॥ कुम्भ उवाचा ॥ पुनर्जननयोग्या या वासना घनवासना ।
सा प्रोक्ता चित्तशब्देन न सा तज्ज्ञस्य विद्यते ॥ ३८७ ॥ यया वासनया तज्ज्ञा विह
रन्तीह कर्मसु । तां त्वं सत्त्वाभिधां विद्धि पुनर्जननवर्जिताम् ॥ ३८८ ॥ मूढं चित्तं चि
त्तमाहुः प्रबुद्धं सत्त्वमुच्यते । अप्रबुद्धा हि चित्तस्थाः सत्त्वस्थास्तु महाधियः ॥ ३८९
॥ स्वर्गमोक्षादिफलदं यत्किंचित्सर्वमेव तत् । त्यक्त्वा समं समाभ्यासाद्योऽस्यसावेव
वै भव ॥ ३९० ॥ दार्थौघमिमं गृह्ण तिष्ठास्पनिदतचित्तभूः । अपरिस्पन्दचित्तस्य संसृ
तिर्नेह धावति ॥ ३९१ ॥ यानि यानीह दुःखानि प्रस्फुरन्ति जगत्त्रये । चेतश्चापलजा
न्येव तानि तानि महीपते ॥ ३९२ ॥ अद्य चेतसि तत्त्वज्ञ स्पन्दास्पन्दौ तथैकताम् ।
नीत्वा तिष्ठ यथाकाममैक्यमागत्य शाश्वतम् ॥ ३९३ ॥ शिखिध्वज उवाच ॥ कथ
मैक्यं विभो यातः स्पन्दास्पन्दाविमावुभौ । सर्वसंशयविच्छेदकारिन्नेतद्वदाशु मे ॥
३९४ ॥ कुम्भ उवाच ॥ एकं वस्तु जगत्सर्वं चिन्मात्रं वारिवाम्बुधिः ॥ ३९५ ॥ ब्रह्म
चिन्मात्रममलं सत्यमित्यादिनामकम् । यद्गीतं तदिदं मूढाः पश्यन्त्यङ्ग जगत्त्रयम् ॥
३९६ ॥ सर्गश्चित्स्पन्दमात्रात्मा सम्यग्दृष्टौ विलीयते । उदेत्यसम्यग्दृष्टात्मा रज्ज्वां

376 b: प्रबुद्ध० – 377 कुम्भ उवाच ॥ – 381 b: यन्न नाम d: ०त्तेनैवासादितं मया – 381A: अनंतमाद्य ममृतमेतत्कमललोचन । कथं नासदितमभूत्पूर्वमात्मपदं मया ॥ – 382 b: ०भोगैषणे स्थिते e: Lies विश्रान्ते – 382A: यथा सितांशुके शुद्धे बिंदवः कुसुमांभसः [lies कुङ्कुमां०*] ॥ – 385 b: त्यक्तं चित्तं d: निर्मलः – 386 a: प्रबुद्धस्य न b: चित्तं नाम c/d: जीवन्मुक्तास्तदेते हि विहरंति कथं वद – 389 d: सत्त्वस्थाः सु० – 390 c/d: त्यक्त्वा समस्तमाभासो योऽस्यसावेव भवान् – 391 a/b: पदार्थौघमगृह्णानस्तिष्ठा० – 393 a: अथ b: त्वमेकताम् – 394 a: Hs. याति d: ०कारणं तद्व० – 395A: तदेव स्पंदते धीभिः शुद्धवारीव वीचिभिः ॥ – 396 d: जगत्तया

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सर्पभ्रमो यथा ॥ ३९७ ॥ शास्त्रसज्जनसंपर्कसंतताभ्यासयोगतः । कालेनामलतां याते
चेतसीन्दाविवोदिते ॥ ३९८ ॥ एतत्केवलमाभासं स्वानुभूतितया ततम् । उदेत्यन्तर्म
हाबुद्धे स्वयमेव महात्मनाम् ॥ ३९९ ॥ इति ते कथितं सर्वं शिखिध्वज माहीपते ।
स्वर्गं गच्छाम्यहं तत्र कालेऽस्मिन्नारदो मुनिः ॥ ४०० ॥ ब्रह्मलोकात्समायातो भव
त्यमरसंसदम् । न मां पश्यति चेत्तत्र स कोपमुपगच्छति । नोद्वेजनीया भव्येन गुर
वो हि कदाचन ॥ ४०१ ॥ त्यक्तसंकल्पशेषेण न किंचिदभिवाञ्छता । त्वया सदैव
वस्तव्यं दृष्टिरेषा हि पावनी ॥ ४०२ ॥ इत्युक्त्वा भगवान्कुम्भः क्षणादन्तर्धिमाययौ ।
गते कुम्भे महीपालः परं विस्मयमाययौ ॥ ४०३ ॥ अहो नु शीतला शुद्धा समेयं पद
वी निजा । रसायनद्रवाकारा सत्त्वं शान्तयतीह मे ॥ ४०४ ॥ एवं संचिन्तयन्राजा
नूनं निर्वासनाशयः । शैलादिव समुत्कीर्णो मौनमेवावतस्थिवान् ॥ ४०५ ॥ तस्मिन्ने
व ततो मौने निःसंकल्पे निराश्रये । प्रतिष्ठां निश्चलां प्राप्य स तस्थौ गिरिशृङ्गवत् ॥
४०६ ॥ श्रीवसिष्ठ उवाच ॥ निर्विकल्पसमाधानात्काष्ठकुड्योपमः स्थितः । एवं शि
खिध्वजो राजा चूडालामधुना शृणु ॥ ४०७ ॥ शिखिध्वजं तं भर्तारं कुम्भवेषेण तेन
सा । प्रबोध्यान्तर्धिमागत्य ततार तरसा नभः ॥ ४०८ ॥ विदग्धमुग्धमाकारं स्त्रैणं
कृत्वातिसुन्दरम् । स्वपत्तनमतो गत्वा विवेशान्तःपुरं क्षणात् । दृश्या बभूव लोकस्य
नृपकर्म चकार च ॥ ४०९ ॥ वत्सरत्रितयेनाथ पुनरम्बरमेत्य सा । बभूव कुम्भो यो
गेन शिखिध्वजवनं ययौ ॥ ४१० ॥ निर्विकल्पसमाधिस्थं तत्रापश्यन्महीपतिम् । रा
जानं तावदेतस्माद्बोधयामि परात्पदात् ॥ ४११ ॥ इति संचिन्त्य चूडाला सिंहनादं
चकार सा । भूयो भूयः प्रभोरग्रे वनेचरभयप्रदम् ॥ ४१२ ॥ न चचाल शिलेवाद्रौ
यदा नादेन तेन सः । भूयो भूयः कृतेनापि तदा सा तं व्यचालयत् ॥ ४१३ ॥ चालि
तः पातितोऽप्येष यदा न बुबुधे नृपः । तदा संचिन्तयामास चूडाला कुम्भरूपिणी
॥ ४१४ ॥ अहो परिणतः साधुः स्वपदे भगवानयम् । आलोकयामि वै तावदेनं देहं
महीपतेः ॥ ४१५ ॥ यद्यस्य सत्त्वशेषोऽस्ति बोधबीजं हृदन्तरे । तदाहमपि जीवामि
प्रभोर्दांपत्यसिद्धये ॥ ४१६ ॥ अन्यथा त्वङ्गनादेहमिमं त्यक्त्वा परं पदम् । अपुनर्ज
ननायैव गच्छामीह हि किं मम ॥ ४१७ ॥ इति संचिन्त्य चूडाला स्पर्शेन नयनेन
च । वृत्तिमालोक्य साशङ्कमुवाच वरवर्णिनी । अस्त्येव सत्त्वशेषोऽस्य हृदि संबोधका

397 a: **सर्गचित्स्पंद०** c: **०सम्यग्दृष्ट्या तु** – 398 a: **०सज्जनसंपत्तिः** [2. Aufl.: **०त्ति०**] – 399 b: **०भूतिमयं** – 400 Nach a/b zusätzlich: A: **यथेदमुथितं सर्वं यथा च प्रविलीयते ॥** B: **एतत्कृत्वा** [lies **एतच्छ्रुत्वा** *] **च मत्त्वा** [2. Aufl.: **मत्वा**] **च बुद्ध्वा च मुनिनायक । यथेच्छसि तथा तिष्ठ दृष्टस्पष्टपदे पदे** [lies **दृष्टे स्पष्टे परे पदे** *] **॥** – c/d: **पर्वकाले** – 402 a: **०संकल्पलेखेन** – 403 **वसिष्ठ उवाच ॥** – 404 **शिखिध्वज उवाच ॥** b: **शांतेयं** c: **रसायनोद्भवाकारा** d: **०तीव**; lies **शीतयतीह** * – 405 **वसिष्ठ उवाच ॥** b: Hs. **निर्वासनाश्रये** (vgl. 105b) c/d fehlt bei der Hs. – 406 a/b fehlt bei der Hs. – 407 Ohne **श्रीवसिष्ठ उवाच ॥** b: **०कुड्योपमस्थितिः** – 409 b: **जग्राह सुंदरम्** c: **०मथो** – 410A: **ततस्तत्रैव तं भूपमपश्यद्वनभूमिगम् ॥** – 414 c: **सा तदा चिंतयामास** – 415 a: **अहोऽप्युपरतः** – 416 b: **हृदंतरम्** – 418 **वसिष्ठ उवाच ॥** c: **पतिमालोक्य**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

रणम् ॥ ४१८ ॥ श्रीराम उवाच ॥ भृशं संशान्तचित्तस्य काष्ठलोष्टसमस्थितेः । सत्त्व
शेषः कथं ब्रह्मञ्ज्ञायते ध्यानशालिनः ॥ ४१९ ॥ श्रीवसिष्ठ उवाच ॥ प्रबोधकारणं
यस्य सत्त्वशेषो हृदि स्थितः ॥ ४२० ॥ चित्तस्पन्दविमुक्तस्य तस्याचलसमस्थितेः ।
कायः समसमाभोगो न ग्लायति न हृष्यति ॥ ४२१ ॥ नास्तमेति न चोदेति सममे
वावतिष्ठते । पृष्टं ते कथितं राम सांप्रतं प्रकृतं शृणु ॥ ४२२ ॥ इति निर्णीय चूडाला
स्वदेहं तं तथास्थितम् । संत्यज्य प्राप चित्तत्त्वे स्थितिमाद्यन्तवर्जिते ॥ ४२३ ॥ तत्र
सा चेतनास्पन्दं कृत्वा सत्त्ववतः प्रभोः । स्वं विवेश पुनर्देहं खान्नीडमिव पक्षिणी ॥
४२४ ॥ कुम्भाकृतिरथोत्थाय निविष्टा निजविष्टरे । साम गातुं प्रवृत्ता सा भ्रमरीवृन्द
निस्वना ॥ ४२५ ॥ तं सामस्वरमाकर्ण्य चित्सत्त्वगुणशालिनी । बुबुधे भूपतेर्देहे वस
न्त इव पद्मिनी ॥ ४२६ ॥ दृशं विकासयामास तां तदार्क इवाब्जिनीम् । अपश्यत्कु
म्भमग्रस्थं स्वस्थचेताः शिखिध्वजः ॥ ४२७ ॥ अहो बत वयं धन्याः पुनः प्राप्तो मुनी
श्वरः । इत्यथोदाहरद्राजा कुम्भाय कुसुमं ददौ ॥ ४२८ ॥ दिष्ट्या दृष्टोऽसि भगवन्नाग
तोऽसि पुनर्वनम् । अस्मत्पवित्रीकरणं तवागमनकारणम् ॥ ४२९ ॥ कुम्भ उवाच ॥
यतः प्रभृति यातोऽस्मि त्वत्सकाशादरिन्दम । ततः प्रभृति चेतो मे त्वयैवेह समं स्थि
तम् ॥ ४३० ॥ न रमे स्वर्गलीलासु निवत्स्यामि समं त्वया ॥ ४३१ ॥ त्वादृशो बन्धु
राप्तश्च सुहृन्मित्रं तथा सखा । विश्वास्यश्चैव शिष्यश्च मन्ये जगति नास्ति मे ॥ ४३२
॥ शिखिध्वज उवाच ॥ अहो नु फलितं पुण्यपादपैर्नश्चिरार्जितैः । यद्भवानप्यसङ्गो
ऽपि वाञ्छत्यस्मत्समागमम् ॥ ४३३ ॥ भवद्वितीर्णया योगयुक्त्या विश्रान्तवानहम् ।
यथा साधो तथा मन्ये स्वर्गे विश्रमणं कुतः ॥ ४३४ ॥ तामेव स्वां स्थितिं स्वच्छामव
लम्ब्य प्रकाशिनीम् । विहरेऽहं यथाकामं स्वर्गे भूमितलेऽथ वा ॥ ४३५ ॥ कुम्भ उवा
च ॥ परे पदे महानन्दे कच्चिद्विश्रान्तवानसि । इदं भेदमयं दुःखं कच्चित्संत्यक्तवानसि
॥ ४३६ ॥ कच्चिदापातरम्येभ्यः संकल्पेभ्यो रतिर्भृशम् । निर्मूलतां गता राजंस्तव त
त्त्वार्थदर्शिनः ॥ ४३७ ॥ हेयादेयदशातीतं शान्तं सममवस्थितम् । यथाप्राप्तेष्वनुद्वेगं
कच्चित्तव मनः स्थितम् ॥ ४३८ ॥ शिखिध्वज उवाच ॥ त्वत्प्रसादेन भगवन्दृष्टा दृ
श्यातिगा गतिः । प्राप्तः संसारसीमान्तो लब्धो लब्धव्यनिश्चयः ॥ ४३९ ॥ नोपदेष्ट
व्यमस्माकं किंचिदप्युपयुज्यते । सर्वत्रैवातितृप्ताः स्मः स्थिताः स्मो विगतज्वराः ॥

418A: संबोधहेतूदयने सत्त्वशेषं व्यबुध्यत ॥ – 419 Ohne श्री० (2. Aufl.) a: प्रशांत० – 420 वसिष्ठ उवाच ॥ प्रबोधकारणं ज्ञस्य [lies यस्य*] दुर्लक्ष्याणुवपुर्हृदि । विद्यते सत्त्वशेषोंऽतर्बीजे पुष्पफलं यथा ॥ – 424 a: चेतसः स्पंदं – 425 b: प्रविष्टा d: ०निःस्वना – 426 a: ०स्वन० – 428 c: इत्येवोदाहरत्राजा – 430 b: त्वत्सकाशादनिंदितम् d: त्वय्येवेह – 432 c: विश्वास्यो वापि – 433 c: यस्माद्भवानसंगोऽपि – 435 a: तामेवं; Hs. स्वस्था० c: विहरेयं d: ०तले तथा – 438 b: Lies समसमस्थिति*; Hs. शमसमस्थितिः c/d: Hs. यथाप्राप्येप्यनुद्वेगं कच्चित्तत्र

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

४४० ॥ नित्योदितः समसमाशयसर्वसौम्यः सर्वात्मकः सकलसंकलनाविमुक्तः ।
निःसंसृतिर्विगतमोहभयो निराश आकाशकोशविशदः सुसमः स्थितोऽहम् ॥ ४४१
॥ श्रीवसिष्ठ उवाच ॥ इत्यध्यात्मविचित्राभिः कथाभिस्तौ परस्परम् । आसातां वेद्य
वेत्तारौ चरन्तौ विपिने ततः ॥ ४४२ ॥ वनान्यनेकरूपाणि जङ्गलानि तटानि च ।
सरांसि गुल्मजालानि शृङ्गाणि गहनानि च ॥ ४४३ ॥ सममेव समस्नेहौ सममेवो
त्थितावुभौ । समखेदौ समोत्साहौ चरन्तौ तस्थतुः सदा ॥ ४४४ ॥ इदं ग्राह्यमिदं
नेति विकल्पकलना मनः । न जहार तयो राम वात्येव विबुधाचलम् ॥ ४४५ ॥ वि
चेरतुस्तौ सुहृदौ क्वचिद्धूलिविधूसरौ । क्वचिच्चन्दनदिग्धाङ्गौ क्वचिद्भस्मानुरञ्जितौ ॥
४४६ ॥ दिनैः कतिपयैरेव गतचित्ततया तया । सत्त्वोदारतया चैव राजा कुम्भवदा
बभौ ॥ ४४७ ॥ अथ तं सुरगर्भाभं चूडाला सा शिखिध्वजम् । दृष्ट्वा शोभामुपगतं
चिन्तयामास मानिनी ॥ ४४८ ॥ निजः पतिरुदारात्मा निराधित्वं नवं वयः । गृहा
णि पुष्पगुञ्जानि सा हता या न कामिनी ॥ ४४९ ॥ समुज्झता यथाप्राप्तमपि वेद्यवि
दा सदा । अनिन्द्यं स्वमुदारार्थं किं तज्ज्ञेन कृतं भवेत् ॥ ४५० ॥ तत्किंचिद्रचयाम्या
शु प्रपञ्चं प्रज्ञया नवम् । येनायं भूपतिर्भर्ता रमते मयि मानदः ॥ ४५१ ॥ इति संचि
न्त्य चूडाला कुम्भवेषधरा पतिम् । प्राह काननगुल्मस्था कोकिला कोकिलं यथा ॥
४५२ ॥ चैत्रमासस्य शुक्लोऽयं प्रतिपद्दिवसः सुहृत् । अद्यास्थानं महारम्भं स्वर्गे भव
ति वै हरेः ॥ ४५३ ॥ संनिधानं मया तत्र कर्तव्यं पितुरग्रतः । यथास्थिता हि निय
तिर्न संत्याज्या कदाचन ॥ ४५४ ॥ प्रतिपालयितव्यं मे त्वयेहैव वनावनौ । क्रीडता
ध्यानपुष्पाभ्यां समुद्वेगमगच्छता ॥ ४५५ ॥ आगच्छामि दिनान्तेऽद्य निर्विकल्पं
नभस्तलात् । स्वर्गादतितरामेव त्वत्सङ्गो मम तुष्टये ॥ ४५६ ॥ इत्युक्त्वा मञ्जरीं कु
म्भो ददौ मित्राय कौसुमीम् । प्रीतये स्वामिव प्रीतिं कान्तां नन्दनवृक्षजाम् ॥ ४५७
॥ आगन्तव्यं त्वया शीघ्रमेवं वदति भूपतौ । पुप्लुवे तरसा व्योम शरन्मुग्धपयोदवत्
॥ ४५८ ॥ शिखिध्वजदृशामन्ते व्योम्नि कुम्भवपुर्जहौ । शान्तावर्तेव वारिश्रीर्मुग्धा
स्वं रूपमाददे ॥ ४५९ ॥ प्राप्य मञ्जरिताकारकल्पवृक्षोपमं पुरम् । अन्तःपुरमदृश्यैव
विवेश ललनाकुलम् ॥ ४६० ॥ राजकार्यमशेषेण तत्र संपाद्य सत्वरम् । शिखिध्वजस्य

441 (Vasantatilakā) Pāda-Folge: c–a–b–d. a (bzw. b): **शमसमा०** c (bzw.a): **विरागो** d: **सममागतोऽस्मि** – 442 Ohne **श्री०** a: Lies **इत्यध्यात्मे** – 443 d: **मृगादिगहनानि** – 444 b: **समेतौ तौ स्थितावुभौ** c: **समसत्त्वौ समो०** d: **सह** – 444A: **आनर्चतुः पितॄन्देवान्बुभुजाते च राघव ॥** – 445 b: **०कलनां** c: **नाजहार** – 447 a/b: **कतिपयैरेवं सम०** c: Hs. **सच्चोदांततया**, lies **सत्तोदात्ततया** * – 448 d: **भामिनी** – 449 **चूडालोवाच ॥** (1. Aufl.) a: Hs. **निजं पतिमुदारात्मा** b: **निराधिश्च** c: **पुष्पजालानि** – 450 c: **समुदारार्थं** d: **तु ज्ञेन**; Hs. **परं भवेत्** – 451 a: Lies **तत्कंचिद्र०** d: **रमेत** – 452 c: **काननमध्यस्था** d: **कोकिलं कोकिला** – 453 **कुम्भ उवाच ॥** b: **०वसो महान्** – 455 a/b: **प्रतिपालयितव्यं तत्त्वयेह चरतावनौ** d: Hs. **०मरागता** – 456 b: **नभःस्थलात्** – 457 c: **स्वामिवत्प्रीतिं** – 458 d: **शरन्मुख०** – 459 d: **रूपमाययौ** – 460 a: **०ताकारं** c: **०मदृश्येव** – 461 a: **०कार्याण्यशेषाणि**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

पुरतः कुम्भरूपधरापतत् ॥ ४६१ ॥ तत्र म्लानद्युति मुखं चकाराखिन्नमानसा । तं दृष्ट्वा तादृशाकारं समुत्तस्थौ शिखिध्वजः । बभूव खिन्नचेताश्च समुवाचेदमादरात् ॥ ४६२ ॥ देवपुत्र नमस्तेऽस्तु विमना इव लक्ष्यसे । कुम्भ त्वं त्यज संरम्भमिदमासनमास्यताम् ॥ ४६३ ॥ सन्तो विदितवेद्या ये ते हि हर्षविषादजाम् । नाश्रयन्ति स्थितिं स्वस्थाः पद्मा इव जलार्द्रताम् ॥ ४६४ ॥ तेन स्मोपविशेत्युक्ते कुम्भ आहासने विशन् । गिरा विषण्णया शीर्णवंशस्वनसमानया ॥ ४६५ ॥ यावद्देहमवस्थासु समचित्ततयैव ये । कर्मेन्द्रियैर्न तिष्ठन्ति न ते तत्त्वविदः शठाः ॥ ४६६ ॥ ये ह्यतत्त्वविदो मूढा राजन्बालतयैव ते । अवस्थाभ्यः पलायन्ते गृहीताभ्यः स्वभावतः ॥ ४६७ ॥ एष देहदशा दुःखपरित्यागो ह्यनुत्तमः । यत्साम्यं चेतसो योगान्न तु कर्मेन्द्रियस्थितेः ॥ ४६८ ॥ यावद्देहं यथाचारं दशास्वङ्ग विजानता । कर्मेन्द्रियैर्हि स्थातव्यं न तु बुद्धीन्द्रियैः क्वचित् ॥ ४६९ ॥ शिखिध्वज उवाच ॥ एवं स्थिते महाभाग कथमुद्वेगमीदृशम् । लब्धवानसि देवोऽपि वद वेद्यविदां वर ॥ ४७० ॥ कुम्भ उवाच ॥ कथयामि तवाशेषं स्वर्गे यद्वृत्तमद्य मे । सुहृद्यावेदितं दुःखं परमायाति तानवम् ॥ ४७१ ॥ अहं तावदितो यातो भवते पुष्पमञ्जरीम् । दत्त्वा गगनमुल्लङ्घ्य संप्राप्तश्च त्रिविष्टपम् ॥ ४७२ ॥ तत्र पित्रा महेन्द्रस्य सभास्थाने यथाक्रमम् । स्थित्वोत्थाय तथोत्थानकाले पित्रा विसर्जितः ॥ ४७३ ॥ इहागन्तुमहं त्यक्तस्वर्गं साधो प्रवृत्तवान् । दिवाकरहयैः सार्धं वहाम्यनिलवर्त्मनि ॥ ४७४ ॥ अथाग्रे वारिपूर्णानां मेघानां मध्यवर्त्मना । अपश्यं मुनिमायान्तमहं दुर्वाससं जवात् ॥ ४७५ ॥ कृत्वा तस्य नमस्कारमुक्तं खे वहता मया । मुने लीनाभ्रवस्त्रस्त्वमभिसारिकया समः ॥ ४७६ ॥ इत्याकर्ण्य चुकोपासौ मयि मामुक्मानद । स्तनकेशवती कान्ता हावभावविलासिनी । गच्छानेन दुरुक्तेन रात्रौ योषा भविष्यसि ॥ ४७७ ॥ इति श्रुत्वाशुभं वाक्यं सुस्थितं दुर्जरं द्विजात् । विमृशामि मनाग्यावत्तावदन्तर्हितो मुनिः ॥ ४७८ ॥ इत्युद्विग्नमनाः साधो संप्राप्तोऽस्मि नभस्तलात् । अतिवाह्यं दिनान्तेषु स्त्रीत्वमेतन्मया कथम् ॥ ४७९ ॥ गुरुदेवद्विजातीनां लज्जापरव

462 b: Hs. चकारखिन्न° Nach a/b zusätzlich: इंदुं सनीहारमिव श्यामा खिन्नमिवांबुजम् । (462A) – 463 c: संत्यज्य – 465 वसिष्ठ उवाच ॥ a: तेन क्ष्मापतिनेत्युक्ते – 466 कुंभ उवाच ॥ c: Hs. दृष्टंति – 467 c: Hs. कषायंते – 467A: यावत्तिलं यथा तैलं यावद्देहं तथा दशा । यो न देहदशामेति स च्छिनत्त्यसिनां बरम् ॥ – 468 d: Lies °स्थितिः* c/d: Hs. योगाद्यावत्कर्मेंद्रियस्थितः – 469A: परमेष्ठि [2. Aufl.: ष्ठी] प्रभृतयः सर्व एवोदिताशयाः । देहावस्थासु तिष्ठंति नियतेरेष निश्चयः ॥ B: अज्ञतत्त्वज्ञभूतानि [lies दि*] दृश्यजातमिदं हि यत् । तत्सर्वमेव नियतिं धावत्यंबु यथांबुधिम् ॥ C: तज्ज्ञा बुद्ध्यादिसाम्येन पाण्यादिचलनेन च । नियतिं यापयंतीमां यावद्देहमखंडिताम् ॥ D: अज्ञास्तु सर्वक्षोभेन [2. Aufl.: ण] सुखदुःखदशाहताः । नियतिं यापयंत्यंग देहलक्षैर्विखंडिताम् ॥ – 473 a: ततः पित्रा सहेंद्रस्य c: स्थित्वास्थाय तदोत्थान° – 474 a/b: इहागंतुमहं स्वर्गं त्यक्त्वा संप्राप्तवान्नभः c: साकं – 474A: अथैकत्र गतो भानुरेकेनान्येन वर्त्मना । आगच्छाम्यहमाकाश [2. Aufl.: शं] सागरात्पतिताकृतिः [lies सागरपतिता°] ॥ – 475 c: अपश्यन्मुनि° – 476 c: लीलाभ्र°; lies नीलाभ्र°* – 477 b: Lies मयि मुमोच a/b: इत्याकर्ण्य मुमोचासौ मयि मानद शापकम् d: °विकारिणी f: Hs. भविष्यति – 478 a/b: वाक्यमुतित्थं जर्जरद्विजात् – 479 b: प्राप्तोऽहं नभसस्तलात् d: स्त्रीत्वमेकं मया

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

शात्मना । कथमग्रे मया सम्यग्वस्तव्यं यामिनीस्त्रिया ॥ ४८० ॥ परिदेवनया कार्यं
देवपुत्र न विद्यते । यदायाति तदायातु देहस्यात्मा न लिप्यते ॥ ४८१ ॥ यदि त्वमपि
कार्याणामखेदार्होऽपि खिद्यसे । तदन्येषामुपायः स्यात्क इवागमभूषण ॥ ४८२ ॥
श्रीवसिष्ठ उवाच ॥ तावेवमादिभिर्वाक्यैरन्योन्याश्वासनं स्वयम् । कृत्वा स्थितौ वने
स्निग्धौ सुहृदौ खेदिनौ मिथः ॥ ४८३ ॥ अथार्कस्तस्य कुम्भस्य स्त्रीत्वमुत्पादयन्निव ।
जगामास्तं जगद्दीपो दीपः स्नेहक्षयादिव ॥ ४८४ ॥ सुहृदौ तावदुत्थाय संध्यामुद्यन्नि
शाकरम् । वन्दयित्वा तथा कृत्वा जपं गुल्मान्तरे स्थितौ ॥ ४८५ ॥ ततः कुम्भः शनै
स्तत्र स्त्रैणमभ्याहरन्वपुः । शिखिध्वजं पुरःसंस्थं प्रोवाच गलदक्षरम् ॥ ४८६ ॥ पता
मीव स्फुरामीव द्रवामीवाङ्गयष्टिभिः । लज्जयेहं वने राजन्मन्ये स्त्रीत्वं व्रजाम्यहम् ॥
४८७ ॥ पश्येमे परिवर्धन्ते राजन्मम शिरोरुहाः । पश्येमौ मम जायेते प्रोन्मुखावुर
सि स्तनौ ॥ ४८८ ॥ आगुल्फमवलम्बानि संपद्यन्तेऽम्बराणि मे ॥ ४८९ ॥ विपिने कु
म्भ इत्युक्त्वा तूष्णीं खिन्नो बभूव ह । राजापि च तमालोक्य खिन्नचित्तोऽभ्युवच ह
॥ ४९० ॥ साधो विदितवेद्यस्त्वं जानासि नियतेर्गतिम् । अवश्यं भाविन्यर्थेऽस्मिन्मा
खिन्नहृदयो भव ॥ ४९१ ॥ कुम्भ उवाच ॥ एवमस्त्वनुतिष्ठामि नृपते स्त्रीत्वमात्मनः ।
न खेदमनुगच्छामि नियतात्मा न लङ्घ्यते ॥ ४९२ ॥ इति निर्णीय तौ खेदं तं नीत्वा
तनुतामिव । एकतल्पे निशां तूष्णीं तं नीतवन्तौ चिरेण ताम् ॥ ४९३ ॥ अथ प्रभाते
तत्स्त्रैणं वपुरुत्सृज्य यौवनम् । बभूव कुम्भः कुम्भाभः कुचप्रोज्झितमूर्तिमान् ॥ ४९४
॥ इति सा राजमहिषी चूडाला वरवर्णिनी । कुम्भत्वमास्थिता भर्तुः पश्चात्स्त्रीत्वमुपा
गता ॥ ४९५ ॥ विजहार वनान्तेषु कुमारीधर्मिणी निशि । कुम्भरूपधरा चाह्नि भर्त्रा
मित्रेण संयुता ॥ ४९६ ॥ ततः कतिपयेष्वेवं दिवसेषु गतेषु सा । इदं प्रोवाच भर्तारं
कुम्भरूपधरा सती ॥ ४९७ ॥ राजन्राजीवपत्राक्ष ममेदं वचनं शृणु । निशायां प्रत्यहं
तावत्स्थितामेवाहमङ्गना ॥ ४९८ ॥ तदिच्छाम्यङ्गनाधर्मं निपुणीकर्तुमीदृशम् । भर्त्रे
कस्मैचिदात्मानं विवाहेन ददाम्यहम् ॥ ४९९ ॥ तद्भवानेव मे भर्ता रोचते भुवनत्रये ।
गृहाण मां विवाहेन भार्यात्वे निशि सर्वदा ॥ ५०० ॥ शिखिध्वज उवाव ॥ कृतेनानेन
कार्येण न शुभं नाशुभं सखे । पश्यामि तन्महाबुद्धे यदिच्छसि तदाचर ॥ ५०१ ॥
कुम्भ उवाच ॥ यद्येवं तन्महीपाल लग्नमद्यैव शोभनम् । राकेयं श्रावणस्यास्य ह्यः सर्वं
गणितं मया ॥ ५०२ ॥ रात्रावद्योदिते चन्द्रे परिपूर्णकलामले । जन्यत्रो नौ महाबाहो

482 a/b: Lies **कार्पण्यादखेदा०***; **यदि त्वमत्र विद्वान्सन्नखेदा०** c: **तदान्येषा०** d: Hs. **०भूषणं** – 483 Ohne **श्री०** d: **खेदिनौ यथा** – 484 a: **अथार्कोऽप्यस्य** – 485 d: **जप्यं** – 456 b: **०हरद्वपुः** c: Hs. **पुरःस्थितं** d: Hs. **गलदक्षणं** – 487 c: Lies **लज्जयेह*** c/d: **लज्जयैव वने राजन्मध्ये** – 489A: **संविदानुभवाम्येतं** [lies **०भवाम्यन्ते***] **नितंबजघने त्विमे ॥** – 490 **वसिष्ठ उवाच ॥** – 491 **शिखिध्वज उवाच ॥** c: **अवश्य०** – 492 b: Hs. **नियते** d: **नियतिः केन लंघ्यते** – 493 a/b: Hs. **खेदं नीत्वा तनुवतामिव** d: **तौ** – 495 c: **०माश्रिता** – 497 b: **गतेषु दिवसेषु** – 498 c/d: **तावद्भवाम्येवाहमंगना**; lies: **तावत्तिष्ठाम्येवाहमङ्गना** – 499 c: Hs. **कस्मिंश्चिदा०** – 500 d: **भार्या ते** – 501 d: **यथेच्छसि तथा कुरु** – 503 a: **रात्रावुद्द्योतिते** b: Hs. **०करामले**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

द्वयोरेव भविष्यति ॥ ५०३ ॥ तदुत्तिष्ठ विवाहार्थं कुर्वः कमललोचन । राजंश्चन्दनपु
ष्पादिसंभारं रत्नसंयुतम् ॥ ५०४ ॥ इत्युक्त्वा कुम्भ उत्थाय सह तेन महीभृता । कुसु
मावचयं चक्रे तथा रत्नादिसंचयम् ॥ ५०५ ॥ तथा जन्यत्रसंभारं कृत्वा काञ्चनक
न्दरे । ययतुस्तौ महामित्रे स्नातुं मन्दाकिनीं नदीम् ॥ ५०६ ॥ पूजयामासतुः स्नातौ
तत्र देवपितॄन्मुनीन् । यथा क्रियाफलेऽनिच्छौ क्रियात्यागे तथैव तौ ॥ ५०७ ॥ कल्प
वृक्षदुकूलानि परिधाय सितानि तौ । फलानि भुक्त्वा जन्यत्रस्थानमाययतुः क्रमात्
॥ ५०८ ॥ एतावता च कालेन रविरस्ताचलं ययौ । सांध्ये कर्मणि निर्वृत्ते वधूत्वं कु
म्भ आययौ ॥ ५०९ ॥ उवाचेदं च हे नाथ त्वं मां भूषय भूषणैः । क्रमेणाग्निं च सं
ज्वाल्य मत्पाणिग्रहणं कुरु ॥ ५१० ॥ अहं मदनिका नाम भार्या ते पद्मलोचन । एव
मुक्तो महीपालस्तत्सर्वं निरवर्तयत् ॥ ५११ ॥ एवं महेन्द्रदर्यां तावुभौ कुम्भशिखिध्व
जौ । स्वयं विवाहिताविष्टौ संपन्नौ स्निग्धदंपती ॥ ५१२ ॥ विचेरतुर्विचित्रासु प्रत्यहं
वनराजिषु ॥ ५१३ ॥ दिनैस्त्रिभिस्त्रिभिर्गत्वा निद्रां याते शिखिध्वजे । चूडाला राज
कार्याणि कृत्वा त्वभ्याययौ पुनः ॥ ५१४ ॥ ततो यातेषु मासेषु शनैः कतिपयेषु सा ।
चूडाला चिन्तयामास देवपुत्रकरूपिणी ॥ ५१५ ॥ सांप्रतं भोगसारेण परीक्षेऽहं शि
खिध्वजम् । मा कदाचन चेतोऽस्य भोगेषु रतिमेष्यति ॥ ५१६ ॥ इति संचिन्त्य चूडा
ला माययोत्थापितं वने । आगतं दर्शयामास सुरैः परिवृतं हरिम् ॥ ५१७ ॥ इन्द्रम
भ्यागतं दृष्ट्वा परिवारसमन्वितम् । यथावत्पूजयामास वनसंस्थः शिखिध्वजः ॥ ५१८
॥ शिखिध्वज उवाच ॥ आत्मनः किं कृता दूरादभ्यागमकदर्थना । देवराज यथाव
न्मे प्रसादाद्वक्तुमर्हसि ॥ ५१९ ॥ इमे वयमिहानीतास्त्वद्गुणातिशयेन खात् । हृदि
लग्नेन सूत्रेण खगा वनगता इव ॥ ५२० ॥ उत्तिष्ठ स्वर्गमागच्छ तत्र सर्वे त्वदुन्मुखाः ।
त्वद्गुणश्रवणाश्चर्याः स्थिता देवाङ्गनागणाः ॥ ५२१ ॥ आकल्पं विविधा भोगास्त्वया
विबुधसद्मनि । जीवन्मुक्तेन भोक्तव्यास्तेन त्वामहमागतः ॥ ५२२ ॥ शिखिध्वज
उवाच ॥ सर्वं स्वर्गसमाचारं वेद्मि देवाधिनायक । किं तु सर्वत्र मे स्वर्गो नियतो न
तु कुत्रचित् ॥ ५२३ ॥ सर्वत्रैव हि तुष्यामि सर्वत्र च रमे प्रभो । अवाञ्छनत्वान्मन
सः सर्वत्रानन्दवानहम् ॥ ५२४ ॥ नियतं किंचिदेकत्र स्थितं स्वर्गकमीदृशम् । शक्र
गन्तुं न जानामि त्वदाज्ञां न करोम्यहम् ॥ ५२५ ॥ एवमुक्ते क्षितिभृता सुरवृन्दमशे
षतः । कल्याणं तेऽस्तु कुम्भेति वदन्दन्तर्धिमाययौ ॥ ५२६ ॥ श्रीवसिष्ठ उवाच ॥ तां
मायां शममानीय चूडाला समचिन्तयत् । दिष्ट्या भोगेच्छया नायं ह्रियते वसुधाधि

504 a/b: **उत्तिष्ठात्मविवाहार्थे कुर्वन्कमललोचन** – 505 **वसिष्ठ उवाच ॥** – 509 a: **एतावताथ** – 511 d: **समवर्तयत्** – 513 a: **विलेसतु॰** Nach a/b zusätzlich: **प्रपक्कफलभारासु पुष्पपल्लवविनीषु च** (513A) – 514 d: **स्वान्याययौ** – 516 **कुंभ उवाच ॥** a: **॰भारेण** b: **परीक्ष्ये** – 517 **वसिष्ठ उवाच ॥** b: **सा ययौ विपिनावनौ** d: **ससुराप्सरसं हरिम्** – 518 c: **यथा च पूज॰** – 520 b: **॰शयेन च** – 524 a: **सर्वत्रैव तु** b: **सर्वत्रैव** – 525 a: **कंचिदेकत्र** b: **सर्गक॰** (2. Aufl.) – 526 **वसिष्ठ उवाच ॥** – 527 Ohne **श्रीवसिष्ठ उवाच ॥**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

पः ॥ ५२७ ॥ शान्तः समसमाभोग एवं शक्रसमागमे । असंरम्भमहेलं च कृतवान्व्य
वहारणम् ॥ ५२८ ॥ भूय एव प्रपञ्चेन विमृशाम्येवमादरात् । रागद्वेषप्रधानेन केनचि
द्बुद्धिहारिणा ॥ ५२९ ॥ इति संचिन्त्य सा रात्राविन्दावभ्युदिते वने । संध्याजप्यपरे
नद्यास्तीरसंस्थे शिखिध्वजे ॥ ५३० ॥ संतानकलतागेहं नीरन्ध्रं पुष्पगुच्छकैः । शुद्धा
न्तं वनदेवीनां प्रविश्य मदनान्विता ॥ ५३१ ॥ स्वयं संकल्पिते पुष्पशयने माल्यमा
लिता । कण्ठे संकल्पितं कान्तं षिङ्गमादाय संस्थिता ॥ ५३२ ॥ आगत्यान्विष्य कुञ्जा
न्तः संध्यान्ते स शिखिध्वजः । मिथुनं तद्ददर्शाथ मिथः प्रहसिताननम् ॥ ५३३ ॥
तदालोक्याविकारेण चेतसा स तुतोष ह । तिष्ठतोऽङ्ग यथाकामं सुखं षिङ्गौ यथा
स्थिति । विघ्नं मा कुरुतः प्रीतेरित्युक्त्वा निर्जगाम सः ॥ ५३४ ॥ ततो मुहूर्तमात्रैकं
प्रपञ्चमुपदर्श्य सा । निर्ययौ दर्शयन्ती स्वं रतियुद्धाकुलं वपुः ॥ ५३५ ॥ उपविष्टं दद
र्शैनं नृपं हेमशिलातले । समाधिसंस्थमेकान्ते मनाग्विकसितेक्षणम् ॥ ५३६ ॥ तं प्र
देशमुपागत्य लज्जावनमितानना । तूष्णीमासीत्क्षणं खिन्ना म्लाना मदनिकाङ्गना ॥
५३७ ॥ क्षणाच्छिखिध्वजो ध्यानाद्विरतस्तामुवाच ह । प्रसन्नमधुरं वाक्यमिदमक्षुब्ध
या धिया ॥ ५३८ ॥ तन्वि किं शीघ्रमेव त्वं विघ्नितानन्दमागता । भूयस्तोषयितुं गच्छ
कान्तं प्रणयवृत्तिभिः ॥ ५३९ ॥ मदनिकोवाच ॥ एवमेष महाभाग स्त्रीस्वभावो हि
चञ्चलः । कामो ह्यष्टगुणः स्त्रीणां न कोपं कर्तुमर्हसि ॥ ५४० ॥ अबला स्त्री तथा बा
ला मूढाहमपराधिनी । क्षन्तुमर्हसि मे नाथ क्षमावन्तो हि साधवः ॥ ५४१ ॥ शिखि
ध्वज उवाच ॥ मन्युर्मम न बाले हि विद्यते ख इव द्रुमः । केवलं साधुनिन्द्यत्वान्नेच्छा
मि त्वामहं वधूम् ॥ ५४२ ॥ श्रीवसिष्ठ उवाच ॥ एवं समतया तत्र स्थिते तस्मिञ्शि
खिध्वजे । चूडाला चिन्तयामास तत्साम्येनोदिताशया ॥ ५४३ ॥ अहो बत परं सा
म्यं भगवानयमागतः । नैनं हरन्ति भोगाशा न महत्योऽपि सिद्धयः ॥ ५४४ ॥ आ
त्मवृत्तान्तमखिलं तदेनं स्फारयाम्यहम् । इति संचिन्त्य चूडाला चौडालं वपुराददे
॥ ५४५ ॥ तां ददर्शानवद्याङ्गीं पुरः प्रणयपेशलाम् ॥ ५४६ ॥ अथ तां दयितां दृष्ट्वा
विस्मयोत्फुल्ललोचनः । शिखिध्वज उवाचेदमाश्चर्याकुलया गिरा ॥ ५४७ ॥ का त्वमु
त्पलपत्राक्षि कुतः प्राप्तासि सुन्दरि । अङ्गेन व्यवहारेण स्मितेनानुनयेन च । मम जा
या विलासेन चूडालेवोपलक्ष्यसे ॥ ५४८ ॥ चूडालोवाच ॥ एवमेव प्रभो विद्धि चूडा

528 a: Hs. **शमशमाभोग** c: **असंभ्रममहेलं** d: **कृतवान्व्यावहारिकम्** – 529 b: **विमृशाम्येव सादरम्**; lies **विमृशाम्येनमादरात्*** – 531 a/b: **संजातकलना गेहं नीरंध्रा** – 532 a: **तत्र संकल्पिते** b: **०मालिना** d: **स्वाग**[2. Aufl.: **स्वाङ्क०**]**मादाय** – 533 c: Hs. **मिथुनं तं ददर्शाथ** – 534 b: **चेतसालं तुतोष सः** d: **खिंगौ यथासुखम्** e/f: **कुरुतं भीतावित्युक्त्वा** Nach a/b zusätzlich: **अहो स्थितौ सुखं खिंगावित्याह च शिखिध्वजः ।** (534A) – 535 a/b: **मुहूर्तमात्रेण प्रपंचं तमुपेत्य** – 537 a: **तत्प्रदेशमुपागम्य** – 538 c: **प्रसन्नो मधुरं** – 539A: **परस्परेप्सितस्नेहो दुर्लभो हि जगत्त्रये ॥** – 541 c: **क्षंतुमर्हसि नाथ त्वं** – 543 Ohne **श्री०** – 544 d: **संपदः** – 545 b: **स्मारया०** d: **चूडालावपुराददे** Nach a/b zusätzlich: **त्यक्त्वा मदनिकारूपं चूडालैव भवाम्यहम् ॥** (545A) Vor c: **वसिष्ठ उवाव ॥** – 548 Nach a/b zusätzlich: **किमिहासि कियत्कालं किमर्थमिह तिष्ठसि ।** (548A)

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

लास्मि न संशयः । अकृत्रिमेण देहेन लब्धोऽस्यद्य मया स्वयम् ॥ ५४९ ॥ कुम्भादिदेहनिर्माणैस्त्वां बोधयितुमेव मे । प्रपञ्चशतशाखत्वमिहायातो वनान्तरे ॥ ५५० ॥ बुद्धो विदितवेद्यस्त्वं ध्यानेनाश्ववलोकय ॥ ५५१ ॥ अथ चूडालयेत्युक्तो बद्ध्वा परिकरं नृपः । आत्मोदन्तमशेषेण ध्यानेनालमवैक्षत ॥ ५५२ ॥ आस्वराज्यपरित्यागाच्चूडालादर्शनावधि । सर्वमालोक्य भूपालो विरराम समाधितः ॥ ५५३ ॥ विसार्य तरसा बाहू पुलकोज्ज्वलतां गतौ । आलिलिङ्ग चिरं कान्तां समाधिविरतो नृपः । तामथाङ्कं समारोप्य प्रोवाच स क्षिखिध्वजः ॥ ५५४ ॥ प्रिये दुरुत्तरादस्मात्संसारकुहरादहम् । उत्तारितो यया बुद्ध्या सा हि केनोपमीयते ॥ ५५५ ॥ मोहादनादिगहनादनन्तविषमादपि । पतितं व्यवसायिन्यस्तारयन्ति कुलाङ्गनाः ॥ ५५६ ॥ निरिच्छायाः प्रयातायाः पारं संसारवारिधेः । कथमस्योपकारस्य करिष्ये ते प्रतिक्रियाम् ॥ ५५७ ॥ चूडालोवाच ॥ देव शुष्कक्रियाजालपरे त्वय्याकुलात्मनि । तथाभूते भृशमहं दुःखव्यसनकर्शिता ॥ ५५८ ॥ तेन त्वदवबोधेन स्वार्थ एवोपपादितः । मया तदत्र किं देवः करोति मम गौरवम् ॥ ५५९ ॥ तास्तुच्छतृष्णाकलनास्ताः संकल्पकुकल्पनाः । त्वयि नाद्यावलोक्यन्ते देव व्योम्नीव पर्वताः ॥ ५६० ॥ शिखिध्वज उवाच ॥ निरीहोऽस्मि निरंशोऽस्मि नभःस्वच्छोऽस्मि निःस्पृहः । शान्तोऽहमर्घरूपोऽस्मि चिरायाहमवस्थितः ॥ ५६१ ॥ नकिंचिन्मात्रचिन्मात्रनिष्ठोऽस्मि स्वस्थ आस्थितः । न तुष्टोऽस्मि न खिन्नोऽस्मि नायमस्मि न चेतरत् ॥ ५६२ ॥ तेजोबिम्बात्प्रयातेन भित्तावपतितेन च । क्षयातिशयमुक्तेन प्रकाशेनास्म्यहं समः ॥ ५६३ ॥ यत्तदस्मि तदेवास्मि वक्तुं शक्नोमि नैव तत् । तरंगतरलापाङ्गे गुरुस्त्वं मे नमोऽस्तु ते ॥ ५६४ ॥ प्रसादेन विशालाक्ष्यास्तीर्णोऽस्मि भवसागरात् । सर्वातीतः सर्वगश्च खमिवायमहं स्थितः ॥ ५६५ ॥ चूडालोवाच ॥ एवं स्थिते महासत्त्व प्राणेश हृदयप्रिया । किमिदानीं प्रभो ब्रूहि रोचते ते महामते ॥ ५६६ ॥ शिखिध्वज उवाच ॥ प्रतिषेधं न जानामि न जानाम्यभिवाञ्छनम् । यदेव किंचिज्ज्ञानासि तदेव कुरु सुन्दरि । तदेव धारयिष्यामि प्रतिबिम्बं यथा मणिः ॥ ५६७ ॥ चूडालोवाच ॥ यद्येवं तन्महाबाहो समाकर्णय मे मतम् । आकर्ण्य जीवन्मुक्तात्मा तदेवाहर्तुमर्हसि ॥ ५६८ ॥ सर्वत्रैक्यावबोधेन मौर्ख्यक्षयभुवान्विताः । निरिच्छा यावदाकाशविशदाः संस्थिता वयम् ॥ ५६९ ॥ तस्मादाद्यन्तम

550 c/d: ०शाखात्वमिह यातो – 551 a: बुद्धिवि० (2. Aufl.: बुद्ध्यावि०) b: ध्यानेनाथाव० Nach a zusätzlich: ध्यानेनैतदखंडितम् । सर्वं पश्यसि तत्त्वज्ञ (551A) – 552 वसिष्ठ उवाच ॥ – 554 a: विस्तार्य e: तामथाङ्के (2. Aufl.) Nach c/d zusätzlich: घनानंदं क्षणं स्थित्वा तूष्णीं प्रणयपेशलम् । (554A) – 555 a: एवं दुरुत्तरा० c: यया युक्त्या – 556 c: पतित०; lies पतिं तं (Lf: भर्त्तारं) – 558 c/d: भूयो भुयो भृशमहं त्वदतर्थं दुःखिताभवम् – 559 a: ०बोधान्मे c: मया तत्र कथं देवः – 561 c: Lies: ऽहं सर्वरूपो *; शांताहमर्थरूपो d: चिरायाहमहं स्थितः – 562 a: अकिंचि० – 564 a: यदस्ति तत्तदेवास्मि – 566 b: ०प्रियम्; lies ०प्रिय* – 567 b: ०वांछितम् Nach a/b zusätzlich: यदाचरसि तन्वि त्वं कदाचिद्द्वेद्मि तत्तथा । (567A) Nach e/f zusätzlich: न स्तौमि न च निंदामि यथेच्छसि तथा कुरु ॥ (567B) – 568 b: मन्मतम् c/d: जीवन्मुक्तात्मंस्तदेवा० – 569 b: ०भयान्विताः c: निरिच्छास्तावदाकाश०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ध्येषु ये वयं पुरुषोत्तम । मौर्ख्यमेकं परित्यज्य गत्वा तद्रूपतां पुनः ॥ ५७० ॥ राज्येन प्रकृतेनैवं कालं नीत्वा क्रमेण वै । विदेहतां प्रयास्यामः प्रभो कालेन केनचित् ॥ ५७१ ॥ स्व एव नगरे राज्ये भव त्वं स्वासने स्थितः ॥ ५७२ ॥ इदं सुखमिदं नेति मनने क्षयमागते । सममेव पदे शान्ते तिष्ठ त्वं विगतैषणः ॥ ५७३ ॥ शिखिध्वज उवाच ॥ युक्तमुक्तं विशालाक्षि त्वयैतत्समया धिया । को वार्थः किल राज्यस्य ग्रहे त्यागेऽपि वा भवेत् ॥ ५७४ ॥ सुखदुःखदशाचिन्तां त्यक्त्वा विगतमत्सरम् । यथा संस्थानमेवेमौ तिष्ठावः स्वस्थतां गतौ ॥ ५७५ ॥ श्रीवसिष्ठ उवाच ॥ अथोत्थाय तु चूडाला रत्नकुम्भं समर्चित्तम् । कान्तं संकल्पयामास पूर्णं सप्ताब्धिवारिभिः ॥ ५७६ ॥ तेन मङ्गलकुम्भेन तं पूर्वाभिमुखं स्थितम् । कान्ता भर्तारमेकान्ते स्वराज्येऽभिषिषेच सा ॥ ५७७ ॥ अथासने समास्थाप्य माहादेवीं पदे तथा । अभिषिक्तां नृपः कृत्वा चूडालामाह तां प्रियाम् ॥ ५७८ ॥ प्रिये कमलपत्राक्षि क्षणात्संकल्पसंभवम् । महाविभवमुद्दामं सैन्यमाहर्तुमर्हसि ॥ ५७९ ॥ इति कान्तवचः श्रुत्वा चूडाला वरवर्णिनी । सैन्यं संकल्पयामास नीरन्ध्रीकृतकाननम् ॥ ५८० ॥ तत्र गन्धद्विपवरे कृतपार्थिवमन्दिरे । रक्षिते हृष्टसामन्तैरारूढौ नृपदंपती ॥ ५८१ ॥ ततः शिखिध्वजो राजा महिष्या सममिष्टया । पदातिरथसंबाधं कर्षन्नतिबलो बलम् ॥ ५८२ ॥ तस्मान्महेन्द्रशैलेन्द्राच्चलितः स्वां पुरीं प्रति । प्रापाल्पेनैव कालेन स्वां पुरीं स्वर्गशोभनाम् ॥ ५८३ ॥ प्रत्युद्गतेन पूर्वेण ससामन्तो बलेन च । बलद्वयेन तेनासौ विवेश नगरं नृपः ॥ ५८४ ॥ दशवर्षसहस्राणि राज्यं कृत्वाथ भूतले । सह चूडालया राम विरतो देहधारणात् ॥ ५८५ ॥ अपुनर्जन्मने राजा जगामेति महामतिः ॥ ५८६ ॥ इति निर्वाणप्रकरणे शिखिध्वजोपाख्यानम् ॥ [३६] ॥ श्रीवसिष्ठ उवाच ॥ एतत्ते सर्वमाख्यातं शिखिध्वजकथानकम् । अनेन गच्छ मार्गेन न कदाचन खिद्यसे ॥ १ ॥ शिखिध्वज क्रमेणैव यथा बोधमवाप्तवान् । कचो बृहस्पतेः पुत्रस्तथा बुध्यस्व राघव ॥ २ ॥ श्री

570 b: Hs. **पुरुषोत्तमाः** – 571 a: **प्रकृतेनेमं** – 572 a: **नगरे राजा** – 572A: **उत्तमाहं तु कामानां** [lies **कांतानां***] **महिषी ते भवाम्यहम् ॥** – 573 b: **मिथुने क्षय०** d: **विगतेषणः** – 575 d: **स्वच्छमागतौ** – 576 Ohne **श्री०** b: **रत्नकुंभं पुरः स्थितम्** – 577 c: **भार्या** – 578 a: **तथासने** b: Lies **माहादेवीपदे*** – 579 **शिखिध्वज उवाच ॥** – 580 **वसिष्ठ उवाच ॥** – 581 a: **०वरं** b: **०मंडनम्** c: **रक्षितं** – 582 c: **पदातिरप्यसंबाधं** – 583A: **पुरीस्थास्तस्य सामंतास्तदागमनमादृताः । विविदुर्जयशब्देन निर्जग्मुश्चोदिताशयः ॥** – 584 b: **स सामंतेन तेन च** Vor a/b zusätzlich: **एकतां संप्रयातेन तारतूर्यादिना सह ।** (584A) – 585 b: **कृत्वा महीतले** – 586 Vor a/b zusätzlich: **देहमुत्सृज्य निर्वाणमस्नेह इव दीपकः ।** (586A) – 586B: **भुक्त्वा भोगाननंतान् भुवि सकलमहीपालचूडामणित्वे स्थित्वासौ दीर्घकालं परममृतमनंतं गतः शून्यशेषः । एवं रामागतं तं** [lies **त्वं***] **प्रकृतमनुसरन्कार्यजातं विशोकैः** [lies **विशोकः***] **स्थित्वातिष्ठत्स्वयं** [lies **स्थित्वोत्तिष्ठ स्वयं***] **वा प्रसभमनुसरन् भोगमोक्षादिलक्ष्मीम् ॥** (Sragdharā) – Kolophon zu Sarga 36: **इति श्रीमोक्षोपाये** [2. Aufl.: **श्रीवासिष्ठरामायणे मोक्षोपाये**] **निर्वाणप्रकरणे किरात**[2. Aufl.: **किराट**]**चिंतामणिगजोपाख्यान**[2. Aufl.: **गजेन्द्रोपाख्यान**]**त्रयगर्भं शिखिध्वजोपाख्यानं नाम सप्तत्रिंशः सर्गः ॥ ३७ ॥** – 37.1 Ohne **श्री०** – 2 a: **शिखिध्वजः क्रमेणैव**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

राम उवाच ॥ बृहस्पतेर्भगवतः पुत्रोऽसौ भगवान्कचः । यथा प्रबुद्धो भगवन्समासेन
तथा वद ॥ ३ ॥ श्रीवसिष्ठ उवाच ॥ बालभावात्समुत्तीर्णः संसारोत्तरणोन्मुखः । कचः
पदपदार्थज्ञो बृहस्पतिमभाषत ॥ ४ ॥ भगवन्सर्वधर्मज्ञ कथं संसृतिपञ्जरात् । अस्मा
न्निर्गम्यते ब्रूहि जन्तुना जीवतन्तुना ॥ ५ ॥ श्रीभृहस्पतिरुवाच ॥ अनर्थमकरागारा
दस्मात्संसारसागरात् । उत्तीर्यते निरुद्वेगं सर्वत्यागेन पुत्रक ॥ ६ ॥ इत्याकर्ण्य कचो
वाक्यं पितुः परमपावनम् । सर्वमेव परित्यज्य जगामैकोऽथ काननम् ॥ ७ ॥ अथ
वर्षेषु जातेषु त्रिषु पञ्चसु वानघ । पुनः प्राप माहारण्ये कस्मिंश्चित्पितरं कचः ॥ ८ ॥
परिपूज्याभिवाद्यैनं समालिङ्गितपुत्रकम् । अपृच्छद्वाक्पतिं भूयः स कचः क्लान्तया
गिरा ॥ ९ ॥ अद्येदमष्टमं वर्षं सर्वत्यागः कृतो मया । तथापि तात विश्रान्तिं नाधिग
च्छाम्यनिन्दिताम् ॥ १० ॥ एवमार्तमनस्यस्मिन्कचे वदति कानने । सर्वमेव त्यजेत्यु
क्त्वा वाक्पतिर्दिवमुद्ययौ ॥ ११ ॥ गते तस्मिन्कचो देहाद्वल्कलाद्यप्यथात्यजत् ॥ १२
॥ पुनर्वर्षत्रयेणाथ कस्मिंश्चित्काननान्तरे । दूयमानमनाः प्राप तमेव पितरं गुरुम् ॥
१३ ॥ अपृच्छत्तमसौ भूयः खेदगद्गदया गिरा ॥ १४ ॥ तात सर्वं परित्यक्तं कन्थावे
णुलताद्यपि । तथापि नास्ति विश्रान्तिः स्वपदे किं करोम्यहम् ॥ १५ ॥ श्रीबृहस्पति
रुवाच ॥ चित्तं सर्वमिति प्राहुस्तत्त्यक्त्वा पुत्र राजसे । चित्तत्यागं विदुः सर्वत्यागं त्या
गविदो जनाः ॥ १६ ॥ इत्युक्त्वा वाक्पतिः पुत्रं पुप्लुवे तरसा नभः । अन्वियेष कच
श्चित्तं परित्यक्तुमखिन्नधीः ॥ १७ ॥ चिन्तयन्नप्यसौ वित्तं न यदा वेद कानने । तदा
संचिन्तयामास धियैवमविखिन्नयाः ॥ १८ ॥ पदार्थवृन्दं देहादि न तावच्चितमुच्यते ।
तेन तत्किं क्व वा व्यर्थं निरागस्कं त्यजाम्यहम् । पितुः सकाशं गच्छामि ज्ञातुं चित्त
महारिपुम् ॥ १९ ॥ चिन्तयित्वा जगामेति कचः स्वपितरं गुरुम् । पप्रच्छ प्रणतो भू
त्वा चित्तं तावत्किमुच्यते ॥ २० ॥ श्रीबृहस्पतिरुवाचा ॥ चित्तं निजमहंकारं विदु
श्चित्तविदो जनाः । अन्तर्योऽयमहंभावो जन्तोस्तच्चित्तमुच्यते ॥ २१ ॥ कच उवाच ॥
मन्येऽस्य दुष्करस्त्यागो न सिद्धिमुपगच्छति । कथमेष किल त्यक्तुं शक्यते योगिनां
वर ॥ २२ ॥ श्रीबृहस्पतिरुवाच ॥ अपि पुष्पावदलनादपि लोचनमीलनात् । सुकरो
ऽहंकृतेस्त्यागो न क्लेशोऽत्र मनागपि ॥ २३ ॥ एकमाद्यन्तरहितं चिन्मात्रममलं ततम् ।

3 Ohne श्री० (2. Aufl.) c/d: Hs. भगवान्स० – 4 Ohne श्री० c: Lies सर्वपदार्थ०* – 5 कच उवाच ॥ d: Hs. जीवजन्तुना – 7 वसिष्ठ उवाच ॥ d: जगामैकांतकाननम् – 7A: बृहस्पतेस्तद्गमनं नोद्वेगाय बभूव ह । संयोगे च वियोगे च न क्षुभ्यंति महाशयाः ॥ – 8 a: यातेषु – 9d: कांतया – 10a: Hs. अथेदम० – 11 वसिष्ठ उवाच ॥ a: एवमार्तं वचस्तस्मि० d: ०वमाययौ – 12A: ततो व्यभ्रार्कतारेण शरद्व्योम्ना समोऽभवत् ॥ – 14 Vor a/b zusätzlich: कृतपूजानमस्कारं तमालिंगितपुत्रकम् । (14A) (vgl. 9ab) – 15 कच उवाच ॥ a: कंथां चैव लताद्यपि – 16 Ohne श्री० d: सर्वविदो – 17 वसिष्ठ उवाच ॥ – 19 कच उवाच ॥ b: न चित्तमिति कथ्यते c: तदेतत्किं – 20 b: चित्तं महारिपुम् – 19A: ज्ञात्वा तावत्त्यजाम्याशु ततस्तिष्ठामि विज्वरः ॥ – 20 वसिष्ठ उवाच ॥ b: स्वं पितरं c: प्रयतो d: तात किमुच्यते – 21 Ohne श्री० – 23 Auch Hs. ohne श्री०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

खादप्यतितरामच्छं विद्यते सर्ववेदनम् ॥ २४ ॥ तदेव भावयन्साधो शान्तस्तिष्ठ गत
व्यथः । अतः कोऽयमहंभावः कुतो नु कथमुत्थितः ॥ २५ ॥ अयं सोऽहमिति व्यर्थं
प्रत्ययं त्यज पुत्रक । तुच्छं परिमिताकारं दिक्कालविवशीकृतम् ॥ २६ ॥ दिक्कालाद्यन
वच्छिन्नं स्वच्छं नित्योदितं ततम् । सर्वार्थमयमेकार्थं चिन्मात्रममलं भव ॥ २७ ॥ श्री
वसिष्ठ उवाच ॥ इति प्राप्य परं योगमुपदेशमनुत्तमम् । जीवन्मुक्तो बभूवासौ कचो
देवगुरोः सुतः ॥ २८ ॥ निर्ममो निरहंकारश्छिन्नग्रन्थिः प्रशान्तधीः । कचो यथा
स्थितो राम तथा तिष्ठाविकारवान् ॥ २९ ॥ अहंकारमसद्विद्धि मैनमाश्रय मा त्यज ।
असतः शशशृङ्गस्य किल त्यागग्रहौ कुतः ॥ ३० ॥ इति निर्वाणप्रकरणे कचोपाख्या
नम् ॥ [३७] ॥ श्रीवसिष्ठ उवाच ॥ द्वित्वैकत्वमती त्यक्त्वा शेषस्थः सुखितो भव ।
मा दुःखितो भव व्यर्थं त्वं मिथ्यापुरषो यथा ॥ १ ॥ श्रीराम उवाच ॥ परमामागतो
ऽस्म्यन्तस्तृप्तिं ज्ञानामृतेन ते । तृप्तोऽपि भूयः पृच्छामि त्वां प्रश्नमिमीश्वर । किमुच्य
ते मुनिश्रेष्ठ मिथ्यापुरुषनामकम् ॥ २ ॥ श्रीवसिष्ठ उवाच ॥ मिथ्यापुरषबोधाय शृणु
राघव शोभनाम् । इमामाख्यायिकां हासजननीं मदुदीरिताम् ॥ ३ ॥ अस्ति कश्चिन्म
हाबाहो मायायन्त्रमयः पुमान् । बालपेशलधीर्मूढो गूढो मौख्येण केवलम् ॥ ४ ॥ स
एकान्ते क्वविज्ञातः शून्ये तत्रैव तिष्ठति । केशोण्ड्रकमिव व्योम्नि मृगतृष्णेव वा मरौ
॥ ५ ॥ तस्मादन्यन्न तत्रास्ति यदस्ति च स एव तत् । यच्चान्यत्तत्सदाभासं न च पश्य
ति दुर्मतिः ॥ ६ ॥ संकल्पस्तस्य संजातस्तत्र वृद्धिमुपेयुषः । संस्थापयित्वा रक्षामि व
स्त्विष्टं रक्ष्यमादरात् ॥ ७ ॥ इति संचिन्तयन्व्योमरक्षार्थं सोऽकरोद्गृहम् । ततः कोशे
बबन्धास्थां रक्षितं खं मयेति वै । अथ कालेन तत्तस्य गृहं नाशमुपाययौ ॥ ८ ॥ हा गृ
हाकाश नष्टस्त्वं हा क्व यातमसि क्षणम् । गृहे भग्ने गृहाकाशमित्यथैनं शुशोच सः ॥
९ ॥ इति शोकं चिरं कृत्वा पुनस्तत्रैव दुर्मतिः । कूपं चक्रे खरक्षार्थं कूपाकाशपरोऽभ
वत् ॥ १० ॥ ततो नाशं स कालेन नीतः कूपोऽपि तस्य वै । कूपाकाशे गते शोके नि
मग्नोऽसौ ततोऽभवत् ॥ ११ ॥ कूपाकाशप्रलापान्ते कुम्भं शीघ्रमथाकरोत् । कुम्भाका
शपरो भूत्वा स्वयं निर्वृतिमाययौ ॥ १२ ॥ कुम्भोऽपि तस्य कालेन नाशं नीतो रघूद्व
ह । यामेव दशमादत्ते दुर्भगः सास्य नश्यति ॥ १३ ॥ कुम्भाकाशप्रलापान्ते खरक्षार्थं
चकार सः । कुण्डं तत्रैव तेनासौ कुण्दाकाशपरोऽभवत् ॥ १४ ॥ कुण्डमप्यस्य कालेन

25 a: ०न्साधुः c: अंतः (Lf: ततः) Nach a/b zusätzlich: 25A: मिथ्यारूपो ह्यहंभावो लीयते तत्त्वभावनात् ॥ B: चिति कोऽयमहंभावः को वा नु कथमुत्थितः ॥ Nach c/d zusätzlich: C: क्वाप्सु जातो रजोराशिः क्वानलादुत्थिं जलम् ॥ – 27 d: भवान् – 28 Ohne श्री० d: ततो देवगुरोः – Kolophon zu Sarga 37: इति श्रीयोगवासिष्ठसारे [!] निर्वाणप्रकरणे कचोपाख्यानं नाम अष्टत्रिंशः सर्गः ॥ ३८ ॥ – 38.1 Ohne श्री० a: ०कत्वमतो त्यक्त्वा (2. Aufl.: ०कत्वमतस्त्यक्त्वा) – 2 Ohne श्री० (2. Aufl.) – 2A: वस्त्ववस्तुकृतं जगद्वस्तुजातं वदाशु मे ॥ (Lfr.) – 3 Ohne श्री० – 4 c: ०पेलव० d: मानी मौख्येण – 5 d: मृगतृष्णैव – 6 c: यच्चान्यत्तत्तदाभासं – 7 c: स्वं स्था०; lies खं स्था०* d: Hs. रक्षमा० – 8 c: अस्य कोशे च बंधास्थां d: मयेत्यसौ Nach e/f zusätzlich: ऋत्वंतरेणाब्द इव वातेनेव तरंगकः ॥ (8A) – 9 b: क्षणात् – 10 a: शोकशतं कृत्वा c: Hs. सरक्षार्थं – 13 c/d: Lfr. c: दिश० d: सा हि

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

केनचिन्नाशमाययौ । तेजसेव तमस्तेन कुण्डाकाशं शुशोच सः ॥ १५ ॥ कुण्डाकाश
स्य शोकान्ते खरक्षार्थं चकार सः । चतुःशालं महाशालं तदाकाशपरोऽभवत् ॥ १६
॥ तदप्याशु जहाराशु कालः कवलितप्रजः । जीर्णं पर्नं यथा वातः स तच्छोकपरोऽ
भवत् ॥ १७ ॥ चतुःशालकशोकान्ते खरक्षार्थं चकारा ह । कुशूलमम्बुदाकारं तदा
काशपरः स्थितः ॥ १८ ॥ तदप्यस्य जहाराशु कालो वात इवाम्बुदम् । कुशूलाकाश
शोकेन तेनासौ पर्यतप्यत ॥ १९ ॥ एवं गृहचतुःशालकुम्भकुण्डकुशूलकैः । तस्यापर्य
वसानात्मा कालो दुःखमयो गतः ॥ २० ॥ एवं स्थितः स गगनं कुमतिर्गुहायां गृह्ण
न्गृहेण गगनेन किलात्मबुद्ध्या । दुःखान्तराढ्यनतराढ्यनदुःखजातमायाति याति च
गतागतिसङ्गमूढः ॥ २१ ॥ श्रीराम उवाच ॥ मिथ्यानरप्रसङ्गेन किं मायापुरुषः प्र
भो । कथितोऽयं त्वया व्योमरक्षणं च किमुच्यते ॥ २२ ॥ श्रीवसिष्ठ उवाच ॥ माया
यन्त्रमयः प्रोक्तो यः पुमान्रघुनन्दन । एनं तं त्वमहंकारं विद्धि शून्याम्बरोत्थितम् ॥
२३ ॥ यस्मिन्नाकाशकोणेऽस्मिन्साधो जगदिदं स्थितम् । तदनन्तमसच्छून्यं सर्गादौ
तिष्ठति स्वयम् । तस्मादुदेत्यहंकारः पूर्वस्पन्द इवाचलात् ॥ २४ ॥ अनात्मात्मैकरक्षा
र्थं देहान्नानाविधानसौ । भूयो भूयोऽपि निर्नष्टान्सृजत्याकुलतां गतः ॥ २५ ॥ कूपकु
ण्डचतुःशालकुम्भादीन्देहकानसौ । कृत्वा रक्षित आत्मेति याति तद्व्योम्नि भावनाम्
॥ २६ ॥ यथैवं मिथ्यापुरुषो रक्षन्व्योमात्मशङ्कया । घटाकाशादिषु क्लिष्ट एवं मा क्ले
शवान्भव ॥ २७ ॥ आकाशादपि विस्तीर्णः सिद्धः सूक्ष्मः शुभः शिवः । त्वमात्मा स
कथं केन गृह्यते रक्ष्यते तथा ॥ २८ ॥ हृदयाकाशमात्रस्य शरीरक्षयसंक्षये । व्यर्थं भू
तानि शोचन्ति नष्ट आत्मेति शङ्कया ॥ २९ ॥ घटादिषु प्रनष्टेषु यथाकाशो ह्यखण्डि
तः । तथा देहेषु नष्टेषु देही नित्यमलेपकः ॥ ३० ॥ शुद्धचिन्मात्र आत्मायमाकाशा
दप्यसौ ह्यणुः । स्वानुभूत्यंशुमात्रं हि खवद्राम न नश्यति ॥ ३१ ॥ न जायते न म्रिय
ते क्वचित्किंचित्कदाचन । जगद्विवर्तरूपेण केवलं ब्रह्म जृम्भते ॥ ३२ ॥ सर्वमेकमिदं
शान्तमादिमध्यान्तवर्जितम् । भावाभावविनिर्मुक्तमिति मत्वा सुखी भव ॥ ३३ ॥ स
र्वापदां निलयमध्रुवमस्वतन्त्रमासन्नपातमविवेकमसारमङ्गम् । बोधादहंकृतिपदं सकलं
विमुच्य शेषे सुबद्धपद उत्तमतां प्रयाहि ॥ ३४ ॥ इति निर्वाणप्रकरणे मिथ्यापुरुषो
पाख्यानम् ॥ [३८] ॥ श्रीवसिष्ठ उवाच ॥ तस्यादृश्यात्मतत्त्वस्य विस्मृत्यैव गतं स्थि

16 a: **नाशांते** d: Hs. **०मयोऽभवत्** – 17 a: **तदप्यवजहाराशु**; lies **तदप्यस्य ज०*** c/d: **वातस्ततः शोक०** – 18 a: **स चतुःशालशोकांते** – 21 (Vasantatilakā) Lfr. (Hs. z. T. entstellt) b: Hs. **गहनेन** (auch Le, Lf) c: Hs. **०दुःखजाल०** (auch Le, Lf) – 22 Ohne **श्री०** (2. Aufl.) – 23 Ohne **श्री०** c: **एनं च** – 24 a: **०कोशेऽस्मि०** f: **इवानिलात्** – 25 c/d: **भूयो भूयो विनाशेऽपि सृज०** – 27 a: **यथैव** – 28 b: **शुद्धः सूक्ष्मः शिवः शुभः** c: **य आत्मा**, lies **त्वयात्मा*** d: Hs. **रक्षते**; **रक्ष्यतेऽथ वा** – 31 b: **०प्यणोरणुः** c: **स्वानुभूत्यंशमात्रत्वात्** d: Hs. **घटवद्राम** (sic) – 34 (Vasantatilakā) b: **०मविवेकममानमङ्गम्** d: **सुबुद्ध०**; Hs. **०पदमुत्तमतां प्रयासि** – Kolophon zu Sarga 38: **इति श्रीनिर्वाणप्रकरणे** [2. Aufl.: **श्रीयोगवासिष्ठसारे निर्वाणप्रकरणे**] **मिथ्यापुरुषोपाख्यानं नाम एकोनचत्वारिंशः सर्गः ॥ ३९ ॥** – 39.1 Ohne **श्री०**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तिम् । नान्यस्मादागतं राम जगद्रज्जुभुजङ्गवत् ॥ १ ॥ आदित्यव्यतिरेकेण यो भावय
ति राघव । रश्मिजालमिदं ह्येतत्तस्यान्यदिव भास्वतः ॥ २ ॥ कनकव्यतिरेकेण केयू
रं येन भावितम् । केयूरमेव तत्तस्य न तस्य कनकं हि तत् ॥ ३ ॥ आदित्याव्यतिरेकेण
रश्मयो येन भाविताः । आदित्या एव ते तस्य निर्विकल्पः स उच्यते ॥ ४ ॥ कनका
व्यतिरेकेण केयूरं येन भाव्यते । कनकैकमहाबुद्धिर्निर्विकल्पः स उच्यते ॥ ५ ॥ ना
नातामखिलां त्यक्त्वा शुद्धचिनमात्रकोटरे । संवेदनविनिर्मुक्ते संविच्त्यंशे स्थिरो भव
॥ ६ ॥ स्वयमात्मात्मनैवाशु शक्तिं संकल्पनामिकाम् । यदा करोति स्फुरितां स्पन्द
शक्तिमिवानिलः ॥ ७ ॥ तदा पृथगिवाभासं संकल्पकलनामयम् । मनो भवति वि
श्वात्मा भावयन्स्वाकृतिं स्वयम् ॥ ८ ॥ संकल्पमयमेवेदं जगदाभोगि दृश्यताम् ॥ ९
॥ पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्वदन्व्यवहरन्स्वपन् । नापूर्वं विद्यते सर्वं सत्यमित्येव भा
वय ॥ १० ॥ यद्यत्करोषि तत्तद्धि चिन्मात्रममलं ततम् । ब्रह्म प्रबृंहिताकारं तस्माद
न्यन्न विद्यते ॥ ११ ॥ पदार्थजाते सर्वस्मिन्संवित्सारतया स्थिते । संविदेवेदमखिलं ज
गन्नान्यास्ति कल्पना ॥ १२ ॥ संभवादखिलाकारेणैकस्या एव संविदः । संवेद्यमपि
नास्त्येव बन्धमोक्षावतः कुतः ॥ १३ ॥ मोक्षोऽयमेष खलु बन्ध इति प्रसह्य चिन्तां
निरस्य सकलां विकलाभिमानः । मौनी वशी विगतमानमदो महात्मा कुर्वन्स्वकार्य
मनहंकृतिरेव तिष्ठ ॥ १४ ॥ श्रीवसिष्ठ उवाच ॥ एतद्व्रतत्रयं राम पुरा चन्द्रार्धमौलि
ना । भृङ्गीशाय तु संप्रोक्तं येनासौ विज्वरः स्थितः ॥ १५ ॥ सुमेरोरुत्तरे शृङ्गे पूर्वं श
शिकलाधरः । अतिष्ठदग्निसंकाशे समग्रपरिवारवान् ॥ १६ ॥ तमपृच्छन्महातेजास्त
त्त्वजिज्ञासया ततः । भृङ्गीशः प्रणतो राम बद्धाञ्जलिरुमापतिम् ॥ १७ ॥ संसाररचनां
नाथ तरंगतरलामिमाम् । अवलोक्य विमुह्यामि तत्त्वविश्रान्तिवर्जितः ॥ १८ ॥ कम
न्तर्निश्चयं कान्तमुररीकृत्य सुस्थिरम् । अस्मिञ्जगज्जर्णिगृहे विहरामि गतज्वरम् ॥ १९
॥ ईश्वर उवाच ॥ सर्वशङ्कां परित्यज्य धैर्यमालम्ब्य शाश्वतम् । महात्यागी महाकर्ता
महाभोक्ता भवानघ ॥ २० ॥ भृङ्गीश उवाच ॥ किमुच्यते महाकर्ता महाभोक्ता कि
मुच्यते । किमुच्यते महात्यागी सम्यक्कथय मे प्रभो ॥ २१ ॥ ईश्वर उवाच ॥ रागद्वेषौ
सुखं दुःखं धर्माधर्मौ फलाफले । यः करोत्यनपेक्ष्यैतन्महाकर्ता स उच्यते ॥ २२ ॥ मौ
नवान्निरहंभावो निर्ममो मुक्तमत्सरः । यः करोति गतोद्वेगं महाकर्ता स उच्यते ॥ २३

2–3: 2b–3d fehlt bei der Hs. (ebenso bei Lf) – 4 c: Lies आदित्य*; Hs. तत्तस्य – 5 c: Lies कनकैकं – 6 c/d: संवेद्येन विनिर्मुक्ते संवित्तत्त्वे स्थिरो भव – 7 a: Hs. entstellt. b: शुक्तिं d: Hs. ०मिवानलः – 8 b: Lies ०वाभासः – 9 a: संकल्पमात्रमेवेदं – 9A: न सत्यं न च मिथ्यैव स्वप्नजालमिवोत्थितम् ॥ – 10 d: भावयन् – 11 a: यद्यत्करोति तद्विद्धि – 13 d: कथम् – 14 (Vasantatilakā) – 14A: महाकर्ता महाभोक्ता महात्यागी भवानघ । सर्वाः शंकाः परित्यज्य धैर्यमालंब्य शाश्वतम् ॥ B: श्रीराम [2. Aufl. ohne श्री०] उवाच ॥ किमुच्यते महाकर्ता महात्यागी किमुच्यते । किमुच्यते महाभोक्ता सम्यक्कथय मे प्रभो ॥ – 15 Ohne श्री० – 17 b: ०स्तत्त्वं जिज्ञासुरादरात् – 18 भृंगीश उवाच ॥ – 19 d: तिष्ठामि विगतज्वरः – 20 a: सर्वाः शंकाः c/d: महाकर्ता महाभोक्ता महात्यागी – 22 c/d: करोत्यनपेक्षैव महा० – 23 b: निर्मानो

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ सर्वत्र विगतस्नेहो यः साक्षिवदवस्थितः । निरिच्छं वर्तते कार्ये महाकर्ता स उच्य
ते ॥ २४ ॥ उद्वेगानन्दरहितः समया स्वच्छया धिया । न शोचते यो नोदेति महा
कर्ता स उच्यते ॥ २५ ॥ जन्मस्थितिविनाशेषु सोदयास्तमयेष्वलम् । सममेव मनो
यस्य महाकर्ता स उच्यते ॥ २६ ॥ न किंचिद्द्वेष्टि च तथा न किंचिदभिवाञ्छति ।
भुङ्क्ते च प्रकृतं सर्वं महाभोक्ता स उच्यते ॥ २७ ॥ सुखैर्दुःखैः क्रियायोगैर्भावाभावै
र्भ्रमप्रदैः । भुक्तैर्न संक्षुभ्यति यो महाभोक्ता स उच्यते ॥ २८ ॥ जरामरणमापच्च रा
ज्यं दारिद्र्यमेव च । रम्यमित्येव यो भुङ्क्ते महाभोक्ता स उच्यते ॥ २९ ॥ कट्वम्ललवणं
तीक्ष्णममृष्टं मृष्टमेव च । सममेव च यो भुङ्क्ते महाभोक्ता स उच्यते ॥ ३० ॥ क्षारे ख
ण्डप्रकारे च शुभे वाप्यशुभे तथा । समता सुस्थिता यस्य महाभोक्ता स उच्यते ॥ ३१
॥ धर्माधर्मौ सुखं दुःखं तथा मरणजन्मनी । धिया येनेति संत्यक्तं महात्यागी स उ
च्यते ॥ ३२ ॥ सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः । धिया येन परित्यक्ता
महात्यागी स उवयते ॥ ३३ ॥ येन धर्ममधर्मं च मनोमननमीहितम् । सर्वमन्तः परि
त्यक्तं महात्यागी स उवयते ॥ ३४ ॥ यावती दृश्यकलना सकलेयं विलोक्यते । सा
येन सुखसंत्यक्ता महात्यागी स उवयते ॥ ३५ ॥ श्रीवसिष्ठ उवाच ॥ इत्युक्तं देवदेवेन
भृङ्गीशाय पुरानघ । एतां दृष्टिमवष्टभ्य तिष्ठ राम गतज्वरः ॥ ३६ ॥ नित्योदितं विम
लरूपमनन्तमाद्यं ब्रह्मास्ति नेतरकलाकलनं हि किंचित् । इत्येव भावय निरञ्जनता
मुपेतो निर्वाणमेहि सकलामलशान्तवृत्तिः ॥ ३७ ॥ अनामयं ब्रह्म समस्तकल्पकार्यै
कबीजं परमात्मरूपम् । बृहच्च तद्बृंहितसर्वभावं खमस्ति नास्तीव यदङ्ग किंवित् ॥ ३८
॥ अन्यत्क्वचित्किंचिदिदं कदाचिन्न संभवत्येव सदप्यसच्च । इत्येव साधो दृढनिश्च
योऽन्तः स्थित्वा गताशङ्कविलासमास्व ॥ ३९ ॥ अन्तर्मुखः सन्सततं समस्तं कुर्वन्ब
हिःस्थं खलु कार्यजातम् । न खेदमायासि कदाचिदेव निराकृताहंकृतितामुपैषि ॥
४० ॥ इति निर्वाणप्रकरणे व्रतत्रयम् ॥ [३९] ॥ श्रीराम उवाच ॥ भगवन्सर्वतत्त्वज्ञ
चित्तेऽहंकारनामनि । गलिते वा गलद्रूपे लिङ्गं सत्त्वस्य किं भवेत् ॥ १ ॥ श्रीवसिष्ठ
उवाच ॥ बलादपि हि संजाता न लिम्पन्त्याशयं सितम् । लोभमोहादयो दोषाः पयां
सीव सरोरुहम् ॥ २ ॥ मुदिताद्याः श्रियो वक्त्रं न मुञ्चन्ति कदाचन । गलत्यहंकारमये

25 b (vgl. 6.84b): Hs. स्वछयेछया c: न शोचति न चोदेति – 27 a/b: न किंचन द्वेष्टि तथा न किंचिदभि
कांक्षति – 28 a/b: Hs. क्रियाभोगैर्भावाभावैर्भवप्रदैः c: Hs. भुंक्तेन – 30 a/b: तिक्तममृष्टं मृष्टमुत्तमम्
c: अंधः संयाति साम्येन – 30A: सरसं नीरसं चैव सुरतं विरतं तथा । यः पश्यति समं सौम्यो महाभोक्ता स
उच्यते ॥ – 31 a: क्षीरे c: सुस्थिरा – 31A: इदं भोज्यमभोज्यं चेत्येवं त्यक्त्वा विकल्पितम् । गताभिलाषं यो
भुंक्ते महाभोक्ता स उच्यते ॥ B: आपदं संपदं मोहमानन्दमपरं परम् । यो भुंक्ते समया बुद्ध्या महाभोक्ता स
उच्यते ॥ – 32 d: Hs. महाभोक्ता – 35 c: सुष्ठु संत्यक्ता – 36 Ohne श्री० – 37 (Vasantatilakā) –
38 (Upajāti) b: Hs. ०कार्यैकरूपं d: खमस्तिभातीव – 39 (Upajāti) d: Lies ०मास्स्व* – 40 (Upajāti)
b: कुर्वन्बहिष्ठं d: Hs. निराकृतोऽहं० – Kolophon zu Sarga 39: इति श्रीनिर्वाणप्रकरणे [2. Aufl.: श्रीयोग
वासिष्ठसारे निर्वाणप्रकरणे] भृंगीशोपाख्यानं नाम चत्वारिंशः सर्गः ॥ ४० ॥ – 40.1 Ohne श्री० (2. Aufl.)
d: लिङ्गसत्त्वस्य (2. Aufl.) – 2 Ohne श्री० – 2 b: Hs. शितम् – 3 c: चित्रे गलति

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

चित्ते चलति दुष्कृते ॥ ३ ॥ वासनाग्रन्थयश्छिन्ना इव त्रुट्यन्त्यलं शनैः ॥ ४ ॥ कोप
स्तानवमायाति मोहो मान्द्यं हि गच्छति । कामः क्रमं गच्छति च लोभः क्वापि पला
यते ॥ ५ ॥ नोल्लसन्तीन्द्रियाण्युच्चैः खेदः स्फुरति नोच्चकैः । न दुःखान्युपबृंहन्ति न
वल्गन्ति सुखानि च ॥ ६ ॥ सुखदुःखादयस्त्वेते दृश्यन्ते यदि वा मुखे । दृश्यन्त एव
तुच्छत्वान्न तु लिम्पन्ति ते मनः ॥ ७ ॥ चित्ते गलति गीर्वाणगणस्य स्पृहणीयताम् ।
साधुर्गच्छत्युदेत्यस्य समता शीतचन्द्रिका ॥ ८ ॥ उपशान्तं च कान्तं च शीतमप्रति
रोधि च । निभृतं चोर्जितं स्वच्छं भवत्यस्तमलं वपुः ॥ ९ ॥ भावाभावावरुग्णोऽपि वि
चित्रोऽपि महानपि । नानन्दाय न खेदाय सतां संसृतिविभ्रमः ॥ १० ॥ बुद्ध्यालोक
नसाध्येऽस्मिन्वस्तुन्यस्तमितापदि । प्रवर्तते न यो मोहात्तं धिगस्तु नराधमम् ॥ ११
॥ विश्रान्तिमाप्तुमुचितां चिरमङ्गदुःखरत्नाकरं जननसागरमुत्तितीर्षोः । कोऽहं कथं
जगदिदं च परश्च कः स्यात्किं भोगकैरिति मतिः परमोऽभ्युपायः ॥ १२ ॥ श्रीवसिष्ठ
उवाच ॥ भवतामादिपुरुष इक्ष्वाकुर्नाम भूपतिः । इक्ष्वाकुवंशप्रभवो यथा मुक्तस्तथा
शृणु ॥ १३ ॥ इक्ष्वाकुर्नाम भूपालः स्वराज्यं परिपालयन् । कदाचिदेकान्तगतो मन
सा समचिन्तयत् ॥ १४ ॥ जरामरणसंक्षोभसुखदुःखभ्रमस्थितेः । अस्य दृश्यप्रपञ्चस्य
को हेतुः स्यादिति स्वयम् ॥ १५ ॥ जगतो न विवेदासौ कारणं चिन्तयन्नपि । अथैक
दापृच्छदसौ ब्रह्मलोकागतं मनुम् । पूजितं स्वसभासंस्थं भगवन्तं प्रजापतिम् ॥ १६
॥ मां योजयति धाष्ट्र्येन भगवन्करुणानिधे । भवत्प्रसाद एवायं भवन्तं प्रष्टुमञ्जसा ॥
१७ ॥ कुतः सर्गोऽयमायातः स्वरूपं चास्य कीदृशम् । अहं कथं च विषमादस्मात्संसृ
तिविभ्रमात् । विमुच्येऽयं घनास्तीर्णाज्जालादिव विहङ्गमः ॥ १८ ॥ मनुरुवाच ॥ अहो
सुचिरकालेन विवेकसुविकाशिना । विततानर्थविच्छेत्ता सारः प्रश्नस्त्वया कृतः ॥
१९ ॥ यदिदं दृश्यते किंचित्तन्नास्ति नृप किंचन । यथा गन्धर्वनगरं यथा वारि मरु
स्थले ॥ २० ॥ यत्तु नो दृश्यते किंचिद्यन्न किंचिदिव स्थितम् । मनःषष्ठेन्द्रियातीतं प
श्चादपि न किंचन । अविनाशं यदस्तीह तत्सदात्मेति कथ्यते ॥ २१ ॥ इयं तु सर्वदृ
श्याढ्या राजन्सर्गपरंपरा । तस्मिन्नेव महादर्शे प्रतिबिम्बमुपागता ॥ २२ ॥ भाः स्व
भावसमुत्पन्ना ब्राह्म्यः स्फुरणशक्तयः । काश्चिद्ब्रह्माण्डतां यान्ति काश्चिद्गच्छन्ति भूत
ताम् । अन्यास्त्वन्यत्वमायान्ति भवत्येवं जगत्स्थितिः ॥ २३ ॥ न बन्धोऽस्ति न मो
क्षोऽस्ति ब्रह्मैवास्ति निरामयम् । नैक्यमस्ति न च द्वित्वं संवित्स्फारं विजृम्भते ॥ २४

6A: **सर्वत्र समतोदेति हृदि शैत्यप्रदायिनी ॥** – 7 c/d: Hs. **एवतुस्मृत्वानतु** – 9 b: **सेव्यमप्रतिरोधि** d: **भवतीत्य मलं**, lies **भवत्यस्यामलं** – 12 (Vasantatilakā) a: **चिरसंगदुःख॰** – 17 **इक्ष्वाकुरुवाच ॥** – 18 e: Hs. **विमुच्येहं** Nach a/b zusätzlich: **कियदेतज्जगत्कस्य कदा केनेति कथ्यताम् ।** (18A) – 19 a: **अहो नु चिर॰** b: **विवेके सुविकाशिनि** c: **विततार्थपरिच्छेत्ता** – 21 a/b: Fehlt bei LN. d: Lies **यत्स्यादपि***; **यत्तु नो दृश्यते क्वचित्** e: **तदस्तीह** – 22 a: **॰दृश्याद्या** – 23 e/f: Fehlt bei LN. a: Hs. **भावस्यभावमुत्पन्ना** – 24 c: Hs. **नैकमस्ति** d: **संवित्सारं**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ एकं यथा स्फुरति वारि तरंगभङ्गैरेवं परिस्फुरति चिन्न च किंचिदेतत् । त्वं बन्ध
मोक्षकलने प्रविमुच्य दूरे स्वस्थो भवाभवभयोऽभयसार एव ॥ २५ ॥ मनुरुवाच ॥
संकल्पोन्मुखतां याताः सत्यश्चिन्मात्रसंविदः । आपस्तरंगत्वमिव यान्ति भूमिप जी
वताम् ॥ २६ ॥ ते जीवाः संसरन्तीह संसारेऽत्र समुत्थिते । सुखदुःखदशामोहो मन
स्येवास्ति नात्मनि ॥ २७ ॥ अदृश्यो दृश्यते राहुर्गृहीतेन यथेन्दुना । तथानुभवमात्रा
त्मा दृश्येनात्मावलोक्यते ॥ २८ ॥ न शास्त्रेणापि गुरुणा दृश्यते परमेश्वरः । दृश्यते
स्वात्मनैवात्मा स्वया सत्त्वस्थया धिया ॥ २९ ॥ पथिकाः पथि दृश्यन्ते रागद्वेषविमु
क्तया । यथा धिया तथैवैते द्रष्टव्याः स्वेन्द्रियादयः ॥ ३० ॥ एतेषु नादरः कार्यः स
ता नैवावधीरणा । पदार्थमात्रताविष्टास्तिष्ठन्त्वेते यथास्थितम् ॥ ३१ ॥ पदार्थजातं
देहादि धिया संत्यज्य दूरतः । आशीतलान्तःकरणो नित्यमात्ममयो भव ॥ ३२ ॥
देहोऽहमिति या बुद्धिः सा संसारनिबन्धिनी ॥ ३३ ॥ नकिंचिन्मात्रचिन्मात्ररूपोऽ
स्मि गगनादणुः । इति या शाश्वती बुद्धिः सा न संसारबन्धनम् ॥ ३४ ॥ यथा विमल
तोयानां बहिरन्तश्च भानवम् । तेजस्तिष्ठति सर्वत्र तथात्मा सर्ववस्तुषु ॥ ३५ ॥ संनि
वेशांशवैचित्र्यं यथा हेम्नोऽङ्गदादिना । आत्मनस्तदतद्रूपा तथैव जगदादिना ॥ ३६
॥ विनाशवाडवाक्रान्तं भीमं कालमहार्णवम् । जगज्जालतरंगिण्यो यान्ति भूततरंगि
काः ॥ ३७ ॥ तस्य चाद्याप्यपूर्णस्य यः पाता कालवारिधेः । तमात्मानं महागस्त्यं रा
जन्भावय सर्वदा ॥ ३८ ॥ अनात्मन्यात्मतामस्मिन्देहादौ दृश्यजालके । त्यक्त्वा स
त्त्वमुपारूढो गूढस्तिष्ठ यथासुखम् ॥ ३९ ॥ कुचकोटरसंसुप्तं विस्मृत्य जननी सुतम् ।
यथा रोदिति पुत्रार्थे तथात्मार्थमयं जनः ॥ ४० ॥ अजरामरमात्मानमबुद्ध्वा परि रो
दिति । हा हतोऽहमनाथोऽहं नष्टोऽस्मीति वपुर्व्यये ॥ ४१ ॥ यथा वारि परिस्पन्दान्ना
नाकारं विलोक्यते । तथा संकल्पवशतश्चिद्ब्रह्म परिबृंहितम् ॥ ४२ ॥ संस्थाप्य संकल्प
कलङ्कमुक्तं चित्तं त्वमात्मन्युपशान्तशङ्कः । स्पन्देऽप्यविस्पन्द इवेश्वरात्मा स्वस्थः
सुखी राज्यमिदं प्रशाधि ॥ ४३ ॥ सर्गात्मभिर्विभुः स्पन्दैः क्रीडते बालवत्स्वयम् ।
स्वयमस्य तथा शक्तिरुदेत्याबध्यते यया ॥ ४४ ॥ चन्द्रार्कवह्नितप्तायोरत्नादीनां यथा
र्चिषः । यथा पत्रादि वृक्षाणां निर्झराणां यथा कणाः ॥ ४५ ॥ तथेदं ब्रह्मणि स्फारे
जगद्बुद्ध्यादि कल्पितम् । दुःखप्रदमतज्ज्ञानां तदेवातदवस्थितम् ॥ ४६ ॥ अहो नु चि
त्रा मायेयं तात विश्वविमोहिनी । सर्वाङ्गप्रोतमप्यात्मा यदात्मानं न पश्यति ॥ ४७

25 (Vasantatilakā) a: Hs. एवं यथा d: Hs. भवाभयभयो – 26 Ohne मनुरुवाच ॥ (2. Aufl.) – 27 a: Hs. संहरन्तीह b: संसारे पूर्वमुत्थिते – 30 d: द्रष्टव्याश्चेन्द्रियारयः – 31 b: नैवावधीरणम् – 32 c: Lies सशीतलान्तः० (vgl. 24.86) – 33A: न कदाचिदियं बुद्धिरादेया हि मुमुक्षुभिः ॥ – 34 d: ०बंधनी – 35 b: Hs. भाविनां – 36 b und d: Lies ०दादिता* – 37 b: कल्पकाल० – 38 a: तस्याप्यद्याप्य० – 40 c: पुत्रार्थं – 43 (Indravajrā) c: Hs. ०विस्पन्दमिवेश्वरात्मा – 44 Nach a/b zusätzlich: संहारात्मकशक्त्याथ संहृत्यात्मनि तिष्ठति । (44A) – 44B: स्वयमस्य तथा शक्तिरुदेत्युन्मुच्यते यया ॥ – 45 c: Lies पत्त्राणि* – 46 d: तदेतावदवस्थितम्, lies तदेवातदिव स्थितम्*

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ चिदाकाशमयं सर्वं जगदित्येव भावयन् । यस्तिष्ठत्युपशान्तेच्छः स ब्रह्मकवचः सुखी ॥ ४८ ॥ अहमर्थविमुक्तेन भावेनाभावरूपिणा । सर्वं शून्यं निरालम्बं चिच्छान्तमिति भावयेत् ॥ ४९ ॥ इदं रम्यमिदं नेति बीजं ते दुःखसंततेः । तस्मिन्साम्याग्निना दग्धे दुःखस्यावसरः कुतः ॥ ५० ॥ राजन्नभावनास्त्रेण रम्यारम्यविभागिता । पौरुषातिशयेनाशु स्वेनैवान्तर्विलूयताम् ॥ ५१ ॥ अभावनेन भावनं विलूय कर्मकाननम् । परं समेत्य तानवं विशोक इव तिष्ठ भोः ॥ ५२ ॥ भरितभुवनाभोगो भूत्वा विभागबहिष्कृतो गलितकलनाभासोल्लासो विवेकविलासवान् । अधिगतपरानन्दस्पन्दश्चिराय निरामयः शमसमसितस्वच्छाभोगो भवाभयचिद्वपुः ॥ ५३ ॥ मनुरुवाच ॥ शास्त्रसज्जनसंपर्कैः प्रज्ञामादौ विवर्धयेत् । प्रथमा भूमिकैषोक्ता योगस्य नवयोगिनः ॥ ५४ ॥ विचारणा द्वितीया स्यात्तृतीयासङ्गभावना । विलायनी चतुर्थी स्याद्वासनाविलयात्मिका ॥ ५५ ॥ शुद्धसंविन्मयानन्दरूपा भवति पञ्चमी । अर्धसुप्तप्रबुद्धाभो जीवन्मुक्तोऽत्र तिष्ठति ॥ ५६ ॥ असंवेदनरूपा च षष्ठी भवति भूमिका । आनन्दैकघनाकारा सुषुप्तसदृशस्थितिः ॥ ५७ ॥ तुर्यावस्थोपशान्ता च मुक्तिरेव हि केवलम् । समता स्वस्थता सौम्या सप्तमी भूमिका भवेत् ॥ ५८ ॥ तुर्यातीता तु यावस्था परनिर्वाणरूपिणी । सप्तमी सा परा प्रौढा विषयः स्यान्न जीवताम् ॥ ५९ ॥ पूर्वावस्थात्रयं तत्र जाग्रदित्येव संस्थितम् । चतुर्थी स्वप्न इत्युक्ता स्वप्नाभं यत्र वै जगत् ॥ ६० ॥ आनन्दैकघनीभावा सुषुप्ताख्या तु पञ्चमी । असंवेदनरूपाथ षष्ठी तुर्यपदाभिधा ॥ ६१ ॥ तुर्यातीतपदावस्था सप्तमी भूमिकोत्तमा ॥ ६२ ॥ अन्तःप्रत्याहृतिवशाच्चेत्यं चेन्न विभावितम् । मुक्त एवास्यसंदेहं महासमतया तया ॥ ६३ ॥ यद्भोगसुखदुःखांशैरनात्मीकृतपूर्णधीः । आत्मारामो नरस्तिष्ठेत्तन्मुक्तत्वमुदाहृतम् ॥ ६४ ॥ व्यवहार्युपशान्तो वा गृहस्थो वाप्यथैककः । सशरीरोऽशरीरो वा भवत्वेवंमतिः पुमान् ॥ ६५ ॥ न म्रिये न च जीवामि नाहं सन्नाप्यसन्नयम् । अहं न किंचिच्चिदिति मत्वा जीवो न शोचति ॥ ६६ ॥ अलेपकोऽहमजरो नीरागः शान्तवासनः । निर्मलोऽस्मि चिदाकाश इति मत्वा न शोचति ॥ ६७ ॥ अहमन्तादिरहितः शुद्धो बुद्धोऽजरामरः । शान्तः समसमाभास इति मत्वा न शोचति ॥ ६८ ॥ तृणोग्राभ्यन्तरे भानौ नरनागामरेषु च । यच्चिदस्ति तदेवेति मत्वा भूयो न शोचति ॥ ६९ ॥ तिर्यगूर्ध्वमधस्तान्मे व्यापको महिमा चितः । अस्यानन्तविलासस्य ज्ञात्वेति क इव क्षयी ॥ ७० ॥ बद्धवासनमर्थो यः सेव्यते

48 c: ०शांतोंऽतः – 49 d: चिद्रूपमिति – 50 b: तद्दुःख० – 51 b: ०विभागिना – 52 a: Hs. entstellt (अभावेनेनतावंतं); lies भावानां* d: एव तिष्ठ भो – 53 (Hariṇī) b: Hs. गलितकलनालास्योल्लासोविकाशविकाशवान् – 55 c: विलापिनी, lies विलापनी – 56 c: Hs. अपिसुप्त० – 58 c: स्वच्छता – 59 b: परानिर्वाण० c: परिप्रौढा d: विषयः सान्न (2. Aufl.: सा न) – 60 a: त्वत्र – 61 c/d: ०रूपा तु षष्ठी भवति भूमिका – 62A: मनोवचोभिरग्राह्या स्वप्रकाशपदात्मिका ॥ – 63 c: ०संदेहो – 64 b: ०रपरामृष्टपूर्णधीः – 65 b: वाथवा यतिः d: भवत्येवंमतिः – 66 b: ०सन्नहम् d: जीवन्न – 67 c: निरंशोऽस्मि – 68 a: अहंमत्या विरहितः – 69 a: तृणाग्रेष्वंबरे c: यत्तदस्ति – 70 c: तस्यानंत०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सुखयत्यसौ । यत्सुखाय तदेवाशु वस्तु दुःखाय नाशतः । अविनाभावनिष्ठत्वं प्रसिद्धं सुखदुःखयोः ॥ ७१ ॥ तनुवासनमर्थो यः सेव्यते वा विवासनम् । नासौ सुखाय ते नासौ नाशात्काले न दुःखदः ॥ ७२ ॥ क्षीणवासनया बुद्ध्या कर्म यत्क्रियतेऽनघ । तद्दग्धबीजवद्भूयो नाङ्कुरं प्रतिमुञ्चति ॥ ७३ ॥ देहेन्द्रियादिना कर्म करणौघेन कल्प ते । एकः कर्ता च भोक्ता च क इवाङ्गोपपद्यते ॥ ७४ ॥ भावनां सर्वभावेभ्यः समु त्सृज्य समुत्थितः । शशाङ्कशीतलः पूर्णो भाति भासेव भास्करः ॥ ७५ ॥ क्रियमा णा कृता कर्मतूलश्रीर्देहशाल्मलेः । ज्ञानानिलसमुद्भूता प्रोड्डीय क्वापि गच्छति ॥ ७६ ॥ सर्वा बहिः कला जन्तोरनभ्यासेन नश्यति । एषा ज्ञानकला त्वन्तः सकृज्ज्ञाता दि ने दिने । वृद्धिमेति बलादेव सुक्षेत्रव्युप्तबीजवत् ॥ ७७ ॥ एकः स्फुरत्यखिलवस्तुषु विश्वरूप आत्मा सरित्सु जलधिष्विव तोयमच्छम् । संशान्तसंकलनभूरिकलापमेकं सत्तांशमात्रमखिलं जगदङ्ग विद्धि ॥ ७८ ॥ मनुरुवाच ॥ यावद्विषयभोगाशा जीवा ख्या तावदात्मनः ॥ ७९ ॥ विवेकवशतो याता क्षयमाशा यदा तदा । आत्मा जीव त्वमुत्सृज्य ब्रह्मतामेत्यनामयः ॥ ८० ॥ ऊर्ध्वादधस्त्वधस्ताच्च पुनरूर्ध्वं व्रजंश्चिरम् । मा संसारारघट्टस्य चिन्तारज्ज्वां घटीभव ॥ ८१ ॥ इदं ममाहमस्येति व्यवहारं घनभ्र मम् । ये मोहात्परिसेवन्ते तेऽधस्ताद्यान्त्यधः शठाः ॥ ८२ ॥ अस्याहमेष मे सोऽयम हमेवं तु यैः किल । मोहो बुद्ध्या परित्यक्त ऊर्ध्वादूर्ध्वं प्रयान्ति ते ॥ ८३ ॥ प्रकाशं स्व मात्मानमवलम्ब्याविलम्बितम् । आस्व संपूरिताकाशं जगन्ति नृप पश्य हे ॥ ८४ ॥ यदैवैवं चितो रूपं ततं बुद्धमखण्डितम् । तदैव तीर्णः संसारः परमेश्वरतां गतः ॥ ८५ ॥ ब्रह्मेन्द्रविष्णुरुद्राद्या यद्यत्कर्तुं समुद्यताः । तदहं चिद्वपुः सर्वं करोमीत्येव भा वयेत् ॥ ८६ ॥ येषु येषु यदा यद्यद्दर्शनेषु निगद्यते । सर्वमेवाङ्ग तत्सत्यं चिद्विलासो ह्यनेकशः ॥ ८७ ॥ चिन्मात्रत्वं प्रयातस्य तीर्णमृत्योः स्वचेतसः । यो भवेत्परमान न्दः केनासावुपमीयते ॥ ८८ ॥ नाप्यशून्यं न शून्यं च नाचिद्रूपं न चिन्मयम् । ना त्मरूपं नान्यरूपं भुवनं भावयन्भव ॥ ८९ ॥ एतत्स्वरूपमासाद्य प्रकृतिः परिशाम्य ति । न देशो मोक्षनामास्ति न कालो नेतरा स्थितिः ॥ ९० ॥ अहंकृतेर्विमोहस्य क्षये णेयं विलीयते । प्रकृतिर्भावनानाम्नी मोक्षः स्यादेष एव सः ॥ ९१ ॥ प्रशान्तशास्त्रार्थ विचारचापलो निवृत्तनानारसकाव्यकौतुकः । निरस्तनिःशेषविशेषविप्लवः समः सुखं तिष्ठति शाश्वतात्मकः ॥ ९२ ॥ मनुरुवाच ॥ येन केनचिदाच्छन्नो येन केनचि दाशितः । यत्र क्वचन शायी च स सम्राडिव राजते ॥ ९३ ॥ वर्णधर्माश्रमाचारशास्त्र मन्त्रतयोज्झितः । निर्गच्छति जगज्जालात्पञ्जरादिव केसरी ॥ ९४ ॥ वाचामतीतवि

72 d: **नाशकाले** – 73 d: **प्रविमुंचति** – 74 c: **कर्तात्र भोक्ता वा** – 77 a: **सर्वैव हि कला** d: Hs. entstellt (**सकृत्ज्ञानाद्दिनेदिने**) – 78 (Vasantatilakā) b: **आत्मा सरःसु** – 79A: **अविवेकेन संपत्ता** [lies **संपन्ना** (2. Aufl.)] **या साप्याशा न तु स्वतः ॥** – 85 c: **तीर्णसंसारः** – 86 a: **०विष्णुवरुणा** – 87 d: **ह्यनंकुशः** – 88 b: **०मृत्योरचेतसः** – 91 d: Lies **स्यादेक*** – 92 (Vaṃśasthabila) c: **०निःशेषविकल्पविप्लवः** – 94 b: **०शास्त्रयंत्रणयोज्झितः**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

षयो विषयाशादमोज्झितः । कामप्युपगतः शोभां शरदीव नभःस्थलम् ॥ ९५ ॥ ग
म्भीरश्च प्रसन्नश्च गिराविव महाह्रदः । परानन्दरसाक्षुब्धो रमते स्वात्मनात्मनि ॥ ९६
॥ सर्वकर्मफलत्यागी नित्यतृप्तो निराश्रयः । न पुण्येन न पापेन नेतरेण च लिप्यते ॥
९७ ॥ स्फटिकः प्रतिबिम्बेन यथा नायाति रञ्जनम् । तज्ज्ञः कर्मफलेनान्तस्तथा ना
याति रञ्जनम् ॥ ९८ ॥ विहरञ्जनतावृन्दे देहवर्तनपूजनैः । खेदाह्लादौ न जानाति प्र
तिबिम्बगतैरिव ॥ ९९ ॥ निःस्तोत्रो निर्विकारश्च पूज्यपूजाविवर्जितः । संयुक्तश्च वि
युक्तश्च सर्वाचारनयक्रमैः ॥ १०० ॥ तस्मान्नोद्विजते लोको लोकान्नोद्विजते च सः ।
रागद्वेषदयानन्दैस्त्यज्यतेऽपि च युज्यते ॥ १०१ ॥ प्रमेयं कस्यचिदपि न रोहति महा
शयः । प्रमेयीक्रियते चापि बालेनाप्यदुराशयः ॥ १०२ ॥ तनुं त्यजतु वा तीर्थे श्वप
चस्य गृहेऽपि वा । मा कदाचन वा राजन्वर्तमानेऽपि वा क्षणे ॥ १०३ ॥ ज्ञानसंप्राप्ति
समये मुक्तोऽसौ विगतामयः । अहंभ्रान्तिर्हि बन्धाय मोक्षो ज्ञानेन तत्क्षयः ॥ १०४
॥ स पूजनीयः स स्तुत्यो नमस्कार्यः प्रयत्नतः । स निरीहोऽभिवाद्यश्च विभूतिविभवै
षिणा ॥ १०५ ॥ न यज्ञतीर्थैर्न तपःप्रदानैरासाद्यते तत्परमं पवित्रम् । आसाद्यते क्षी
णभवामयानां भक्त्या सतामात्मविदां यदङ्ग ॥ १०६ ॥ श्रीवसिष्ठ उवाच ॥ एवमु
क्त्वा स भगवान्मनुर्ब्रह्मगृहं ययौ । इक्ष्वाकुरपि तां दृष्टिमवष्टभ्य स्थिरोऽभवत् ॥ १०७
॥ इति निर्वाणप्रकरणे इक्ष्वाकुबोधनम् ॥ [४०] ॥ श्रीराम उवाच ॥ एवंस्थितेर्हि भग
वञ्जीवन्मुक्तस्य सन्मतेः । अपूर्वातिशयः कोऽसौ भवत्यात्मविदां वर ॥ १ ॥ श्रीवसि
ष्ठ उवाच ॥ ज्ञस्य कस्मिंश्चिदेवाङ्ग भवत्यतिशयेन धीः । नित्यतृप्तः प्रशान्तात्मा स आ
त्मन्येव तिष्ठति ॥ २ ॥ मन्त्रसिद्धैस्तपःसिद्धैस्तन्त्रसिद्धैश्च भूरिशः । कृतमाकाशयानादि
का तत्र स्यादपूर्वता ॥ ३ ॥ अणिमाद्यपि संप्राप्तं तादृशैरेव भूरिशः ॥ ४ ॥ एष एव वि
शेषोऽस्य न समो मूढबुद्धिभिः । सर्वत्रास्थापरित्यागान्नीरागममलं मनः ॥ ५ ॥ एता
वदेव खलु लिङ्गमलिङ्गमूर्तेः संशान्तसंसृतिचिरभ्रमनिर्वृतस्य । तज्ज्ञस्य यन्मदनको
पविषादमोहलोभापदामनुदिनं निपुणं तनुत्वम् ॥ ६ ॥ श्रीवसिष्ठ उवाच ॥ यथा सत्त्व
मुपेक्ष्य स्वं शनैर्विप्रो दुरीहया । अङ्गीकरोति शूद्रत्वं तथा जीवत्वमीश्वरः ॥ ७ ॥ भू
तानि द्विविधान्येवं प्रति सर्गं स्फुरन्ति वै । आद्यचित्स्पन्दजातानि तानि निष्कार
णानि वै ॥ ८ ॥ ईश्वरांशमुपागत्य पुनर्जन्मान्तराणि तु । भूतान्यनुभवन्त्यङ्ग स्वकृतै
रेव कर्मभिः । कार्यकारणभावोऽयमीदृशो जन्मकर्मणोः ॥ ९ ॥ अकारणमुपायान्ति

95 b: विषयाशादृशोज्झितः – 99 b: देहकर्तन० – 101 c: रागद्वेषभया० – 102 a: प्रमेये b: नारोहति – 103 b: गृहेऽथ वा d: ०न्वर्तमाने च वा – 103 a: त्यजति – 104 a: ज्ञानसंपत्ति० b: विगताशयः – 104A: संपन्नो यस्य सोऽयं तु पूजार्हो मनुजैः सदा ॥ – 105 b: स यत्नतः c: स निरीक्ष्योऽ – 106 (Upajāti) d: ०विदां पदं यत् – 107 Ohne श्री० b: ०न्मनुर्ब्राह्मं गृहं ययौ – Kolophon zu Sarga 40: इति श्रीनिर्वाण प्रकरणे [2. Aufl.: श्रीयोगवासिष्ठसारे निर्वाणप्रकरणे] इक्ष्वाकूपाख्यानं नाम एकचत्वारिंशः सर्गः ॥ ४१ ॥ – 41.1 Ohne श्री० (2. Aufl.) a: एवंस्थिते हि – 2 Ohne श्री० – 4A: यत्नेन साधितत्वात्तैर्नेतरेणात्मदर्शिना ॥ – 6 (Vasantatilakā) – 7 Ohne श्री० – 8 a: ०धान्येव b: प्रतिसर्गे – 9 a: ईश्वरात्समुपागत्य f: ०कर्मभिः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

सर्वे जीवाः परात्पदात् । पश्चात्तेषां स्वकर्माणि कारणं सुखदुःखयोः ॥ १० ॥ संक
ल्पित्वं हि बन्धस्य कारणं तत्परित्यज । मोक्षस्तु निःसंकल्पत्वं तदभ्यासं धिया कुरु
॥ ११ ॥ सावधानो भवानस्तु ग्राह्यग्राहकसंगमे । अजस्रमेव संकल्पदशाः परिहरञ्श
नैः ॥ १२ ॥ मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव । भावनामखिलां त्यक्त्वा
यच्छिष्टं तन्मयो भव ॥ १३ ॥ अजस्रं यं यमेवार्थं पतत्यक्षगणोऽनघ । बध्यते तत्र रा
गेण विरागेण विमुच्यते ॥ १४ ॥ किंचिच्चेद्रोचते तुभ्यं तद्बद्धोऽसि भवस्थितौ । अस्मा
त्पदार्थनिचयात्सह स्थावरजङ्गमात् । तृणादेर्देवपर्यन्तान्न किंचित्तव रोचताम् ॥ १५
॥ अरतिः सन्यदश्नोति यत्करोषि जहासि यत् । न कर्तासि न भोक्तासि तत्र मुक्तम
तिः शमी ॥ १६ ॥ सन्तोऽतीतं न शोचन्ति भविष्यं चिन्तयन्ति नो । वर्तमानं च गृ
ह्णन्ति क्रमप्राप्तं सदानघ ॥ १७ ॥ मनसि ग्रथिताः पाशास्तृष्णामोहमदादयः । मन
सैव मनो राम छेदनीयं विजानता ॥ १८ ॥ विवेकेनातितीक्ष्णेन बलादय इवायसा ।
मनसैव मनश्छिन्धि संसारभ्रमशान्तये ॥ १९ ॥ क्षालयन्ति मलेनैव मलं क्षालनको
विदाः ॥ २० ॥ जीवस्य त्रीणि रूपाणि स्थूलसूक्ष्मपराणि तु । तत्रास्य यत्परं रूपं तद्भ
ज द्वे परित्यज ॥ २१ ॥ पाणिपादमयो योऽयं देहो भोगाय वल्गति । भोगार्थमेतज्जी
वस्य रूपं स्थूलमिह स्थितम् ॥ २२ ॥ स्वसंकल्पमयाकारं यावत्संसारभावि यत् । चि
त्तं तद्विद्धि जीवस्य रूपं रामातिवाहिकम् ॥ २३ ॥ आद्यन्तरहितं सत्यं चिन्मात्रं नि
र्विकल्पकम् । यत्तद्विद्धि परं रूपं जीवस्याद्यं तृतीयकम् ॥ २४ ॥ एतत्तुर्यपदं शुद्धमत्र
बद्धपदो भव ॥ २५ ॥ श्रीराम उवाच ॥ जाग्रत्स्वप्नसुषुप्तेषु स्थितं त्रिष्वप्यलक्षितम् ।
तुर्यं ब्रूहि विशेषेण विविच्य मुनिनायक ॥ २६ ॥ श्रीवसिष्ठ उवाच ॥ अहंभावानहंभा
वौ त्यक्त्वा सदसती तथा । यदसक्तं समं स्वच्छं स्थितं तत्तुर्यमुच्यते ॥ २७ ॥ या स्व
च्छा समता शान्ता जीवन्मुक्तव्यवस्थितिः । साक्ष्यवस्था व्यवहृतौ सा तुर्या कलनो
च्यते ॥ २८ ॥ नैतज्जाग्रन्न च स्वप्नः संकल्पानामसंभवात् । सुषुप्तभावो नाप्येतदभा
वाज्जडतास्थितेः ॥ २९ ॥ शान्तं सम्यक्प्रबुद्धानां यथास्थितमिदं जगत् । विलीनं तुर्य
मित्याहुरबुद्धानां स्थिरं स्थितम् ॥ ३० ॥ अहंकारकलात्यागे समतायाः समुद्गमे । वि
शरारौ कृते चित्ते तुर्यावस्थोपतिष्ठते ॥ ३१ ॥ श्रीवसिष्ठ उवाच ॥ अथेमं शृणु दृष्टान्तं
कथ्यमानं मयाधुना । प्रबुद्धोऽपि यथा बोधमुपैषि विबुधोपम ॥ ३२ ॥ कस्मिंश्चित्का

10 b: परास्पदात् – 10A: आत्माज्ञानात्समुत्पन्नः संकल्पः कर्मकारणम् ॥ – 11 a: Hs. संकल्पत्वं c: निःसं
कल्पित्वं – 12 a: भव त्वं च – 15 a: यत्किंचिद्रोचते चित्ते c/d: तस्मात्पदार्थनिचयाद्राम स्थावर० e/f:
०पर्यंतान्मा किंचित्तव Nach a/b zusätzlich: न किंचिद्रोचते चित्ते तन्मुक्तोऽसि भवस्थितौ [lies ०स्थितेः ?] ।
(15A) – 16 a: ०दश्नासि , lies ०दश्नोषि – 17 b: भविष्यच्चिंतयंति – 18 c: नाम – 19 d: संसारभ्रांति०
– 20A: वारयंत्यस्त्रमस्त्रेण [lies ०स्त्रमस्त्रेण*] विषं प्रतिविषेण च ॥ – 23 a: ०कारे c: Hs. यच्चित्तं तद्धि बीजस्य
– 25A: संपरित्यज्य पूर्वे द्वे मा तत्रात्ममतिर्भव ॥ – 26 Ohne श्री० (2. Aufl.) – 27 Ohne श्री० c: यदसं
सक्तमस्वच्छं d: Hs. यत्तुर्य० – 28 d: तुर्यकलनो० – 30 a: शांतस० – 31 b: Hs. समुद्गके – 32 Ohne
श्री० a: अथेमं

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ननाभोगे महामौनव्यवस्थितम् । दृष्ट्वाद्भुतमिदं किंचिन्मुनिं पप्रच्छ लुब्धकः ॥ ३३ ॥
पश्चादुपगतो बाणभिन्नं मृगमभिद्रुतम् । क्व प्रयातो मृग इति प्रत्युवाच स तं मुनिः
॥ ३४ ॥ समशीला वयं साधो मुनयो वनवासिनः । नास्माकमस्त्यहंकारो व्यवहारेषु
यः क्षमः ॥ ३५ ॥ सर्वाणीन्द्रियकर्माणि करोति हि सखे मनः । अहंकारमयं नूनं त
न्मे प्रगलितं चिरम् ॥ ३६ ॥ जाग्रत्स्वप्नसुषुप्ताख्या दशा वेद्मि न काश्चन । तुर्य एवा
वतिष्ठेऽहं तत्र दृश्यं न विद्यते ॥ ३७ ॥ इति तस्य वचः श्रुत्वा मुनिमुख्यस्य राघव ।
लुब्धकोऽर्थमविज्ञाय जगामाभिमतां दिशम् ॥ ३८ ॥ अतो वच्मि महाबाहो नास्ति
तुर्येतरा दशा । निर्विकल्पा हि चित्तुर्यं तदेवास्तीह नेतरत् ॥ ३९ ॥ जाग्रत्स्वप्नसुषुप्ता
ख्यं त्रयं रूपं हि चेतसः । शान्तं घोरं च मूढं च त्र्यात्म चित्तमिह स्थितम् ॥ ४० ॥
घोरं जाग्रन्मयं चित्तं शान्तं स्वप्नमयं स्थितम् । मूढं सुषुप्तभावस्थं त्रिभिर्हीनं मृतं भ
वेत् ॥ ४१ ॥ यत्र चित्तं मृतं तत्र सत्त्वमेकं स्थितं समम् ॥ ४२ ॥ समस्तसंकल्पविला
समुक्ते तुर्ये पदे तिष्ठ निरामयात्मा । यत्र स्थिताः साधु सदैव मुक्ताः प्रशान्तभेदा
मुनयो महान्तः ॥ ४३ ॥ इति मृगव्याधीयम् ॥ [४१] ॥ वसिष्ठ उवाच ॥ सिद्धान्तो
ऽध्यात्मशास्त्राणां सर्वापह्नव एव हि । नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्रमम्
॥ १ ॥ शान्त एव चिदाभासे स्वच्छे समसमात्मनि । समस्तशक्तिखचिते ब्रह्मेति क
लिताभिधे ॥ २ ॥ निर्णीय केचिच्छून्यत्वं केचिद्विज्ञानमात्रताम् । केचिदीश्वररूपत्वं
विवदन्ते परस्परम् ॥ ३ ॥ सर्वमेव परित्यज्य महामौनी भवानघ । निर्वाणवान्निर्मन
नः क्षीणचित्तः प्रशान्तधीः ॥ ४ ॥ आत्मन्येवास्स्व शान्तात्मा मूकान्धबधिरोपमः ।
नित्यमन्तर्मुखो भूत्वा स्वात्मानान्तः प्रपूर्णधीः ॥ ५ ॥ जाग्रत्येव सुषुप्तस्थः कुरु कर्मा
णि राघव । अन्तः सर्वपरित्यागी बहिः कुरु यथागतम् ॥ ६ ॥ चित्तसत्ता परं दुःखं
चित्तासत्ता परं सुखम् । अतश्चित्तं चिदेकात्मा नय क्षयमवेदनात् ॥ ७ ॥ दृष्ट्वा रम्यम
रम्यं वा स्थेयं पाषाणवत्समम् । एतावतात्मयत्नेन जिता भवति संसृतिः ॥ ८ ॥ संवे
दनीयं न सुखं नासुखं नैव मध्यमम् । एतावतात्मयत्नेन दुःखान्तोऽनन्त आप्यते ॥
९ ॥ आपीनमण्डलशशाङ्कवदन्तरेव श्रीमद्रसायनमयः सुखमेति तज्ज्ञः । विज्ञातस
र्वभुवनत्रयवस्तुसारः सर्वं न नाम कुरुते परमभ्युपेतः ॥ १० ॥ श्रीराम उवाच ॥ स
प्तानां योगभूमीनामभ्यासः क्रियते कथम् । कीदृशानीव चिह्नानि भूमिकां प्रति यो
गिनः ॥ ११ ॥ श्रीवसिष्ठ उवाच ॥ प्रवृत्तश्च निवृत्तश्च भवति द्विविधः पुमान् । स्वर्गा

33 c: Lies कंचिन्मुनिं – 34 a/b: Hs. पश्चादुपागतो बाणभिन्नमृगमभिद्रुतः Nach a/b zusätzlich: मुने मदीयबाणेन विद्धो मृग इहागतः । (34A) – 36 b: करोतीह c/d: तन्मे नूनं – 38 वसिष्ठ उवाच ॥ – 42 a: यच्च चित्तं मृतं यच्च – 42A: तदेव योगिनः सर्वे यत्नात्संपादयंति हि ॥ – 43 (Upajāti) – Kolophon zu Sarga 41: इति श्रीनिर्वाणप्रकरणे [2. Aufl.: श्रीयोगवासिष्ठसारे निर्वाणप्रकरणे] मुनिव्याधोपाख्यनं नाम द्विचत्वारिंशः सर्गः ॥ ४२ ॥ – 42.1 (Auch Hs. ohne श्री०) d: ब्रह्मेदमग्रिमम् – 2 a/b: चिदाकाशे स्वस्थे c: समग्रशक्ति० – 5 a: आत्मन्येव प्रशांतात्मा d: त्वमास्वान्तः, lies: स्वात्मन्यन्तः? – 7 c: अंतश्चित्तं – 10 (Vasantatilakā) c: कुर्वन्न नाम – 11 Ohne श्री० (2. Aufl.) c: कीदृशानि च – 12 Ohne श्री०

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

पवर्गोन्मुखयोः शृणु लक्षणमेतयोः ॥ १२ ॥ कियत्तन्नाम निर्वाणं वरं संसृतिरेव मे ।
इति कर्तव्यकर्ता यः स प्रवृत्त इति स्मृतः ॥ १३ ॥ चलार्णवयुगच्छिद्रकूर्मग्रीवाप्रवेश
वत् । अनेकजन्मान्तरतो विवेकी जायते पुमान् ॥ १४ ॥ असारा बत संसारव्यव
स्थालं ममैतया । किं कर्मभिः पर्युषितैर्दिनं तैरेव नीयते ॥ १५ ॥ क्रियातिशयनिर्मुक्तं
किं स्याद्विश्रमणं परम् । इति निश्चयवान्योऽन्तः स निवृत्त इति स्मृतः ॥ १६ ॥ कथं
विरागवान्भूत्वा संसाराब्धिं तराम्यहम् । एवं विचारणपरो यदा भवति सन्मतिः ॥
१७ ॥ विरागमुपयात्यन्तर्भावनास्वनुवासरम् । क्रियासूदाररूपासु क्रमते मोदतेऽन्व
हम् ॥ १८ ॥ ग्राम्यासु जडचेष्टासु सततं विचिकित्सति । नोदाहरति मर्माणि पुण्य
कर्माणि सेवते ॥ १९ ॥ स्नेहप्रणयगर्भाणि पेशलान्युचितानि च । देशकालोपपन्नानि
वचनान्यभिभाषते । तदासौ प्रथमामेकां प्राप्तो भवति भूमिकाम् ॥ २० ॥ मनसा
कर्मणा वाचा सज्जनानुपसेवते । यतः कुतश्चिदानीय नित्यं शास्त्राण्यवेक्ष्यते ॥ २१ ॥
एवं विचारवान्यः स्यात्संसारोत्तरणं प्रति । स भूमिकावानित्युक्तः शेषस्त्वार्य इति
स्मृतः ॥ २२ ॥ विचारनाम्नीमितरामागतो योगभूमिकाम् । श्रुतिस्मृतिसदाचारधा
रणाध्यानकर्मणाम् । मुख्यया व्याख्यया ख्याताञ्श्रयति श्रेष्ठपण्डितान् ॥ २३ ॥ प
दार्थकृतप्रविभागः कार्याकार्यविनिर्णयम् । जानात्यधिगतश्रव्यो गृहं गृहपतिर्यथा ॥
२४ ॥ मदाभिमानमात्सर्यमोहलोभातिशायिताम् । बहिरप्याश्रितामीषत्त्यजत्यहिरिव
त्वचम् ॥ २५ ॥ इत्थंभूतमतिः शास्त्रे गुरुसज्जनसेवनात् । स रहस्यमशेषेण यथावदधि
गच्छति ॥ २६ ॥ असंसङ्गाभिधामन्यां तृतीयां योगभूमिकाम् । ततः पतत्यसौ का
न्तः पुष्पशय्यामिवामलाम् ॥ २७ ॥ यथावच्छास्त्रवाक्यार्थे मतिमाधाय निश्चलाम् ।
तापसाश्रमविश्रान्तैरध्यात्मकथनक्रमैः ॥ २८ ॥ शिलाशय्यासनासीनो जरयत्यायुरा
ततम् ॥ २९ ॥ वनावनिविहारेण चित्तोपशमशोभिना । असङ्गसुखसौम्येन कालं नय
ति नीतिमान् ॥ ३० ॥ अभ्यासात्साधुशास्त्राणां करणात्पुण्यकर्मणाम् । जन्तोर्यथाव
देवेयं वस्तुदृष्टिः प्रसीदति ॥ ३१ ॥ तृतीयां भूमिकां प्राप्य बुद्धोऽनुभवति स्वयम् । द्वि
प्रकारमसंसङ्गं तस्य भेदमिमं शृणु ॥ ३२ ॥ द्विविधोऽयमसंसङ्गः सामान्यः श्रेष्ठ एव
च । नाहं कर्ता न भोक्ता च न बाध्यो न च बाधकः । इत्यसज्जनमर्थेषु सामान्यास
ङ्गनामकम् ॥ ३३ ॥ प्राक्कर्मनिर्मितं सर्वमीश्वराधीनमेव च । सुखं वा यदि वा दुःखं
कैवात्र मम कर्तृता ॥ ३४ ॥ भोगा भोगा महारोगाः संपदः परमापदः । वियोगायैव
संयोगा आधयो व्याधयो धियः ॥ ३५ ॥ कालः कवलनोद्युक्तः सर्वभावाननारतम् ।

13 c: इति निर्णीय कर्ता d: प्रवृत्त उदाहृतः – 14 c: ०जन्मनामंते – 15 b: Hs. मयैतया – 18 a/b: ०यात्यं तर्वासनास्वनु० – 19A: अनन्योद्वेगकारीणि मृदुकर्माणि सेवते । पापाद्बिभेति सततं न च भोगमपेक्षते ॥ – 21 d: ज्ञानशास्त्राण्यवेक्षते – 23 d: ०कर्मणः – 24 a: पदार्थप्रविभागज्ञः – 25 b: ०दंभमोहातिशायिताम् c: बहिर प्यर्थिता० – 26 a: Hs. शास्त्रं? b: ०सेवया – 28 a/b: Hs. ०वाक्यार्थमितिमाधायनिश्चलम् c/d: Hs. तापसश्रम विश्रामैरध्यानकथनक्रमैः – 28A: संसारनिंदकैस्तद्वद्वैराग्यकथनक्रमैः ॥ – 30 c: ०सौख्येन – 32 a: Hs. द्विः प्रकार० – 33 c: नाहं भोक्ता न कर्ता – 34 b: ०मेव वा

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

अनाख्येयेति भावानां यदाभावनमान्तरम् । वाक्यार्थलग्नमनसः सामान्योऽसावसं
गमः ॥ ३६ ॥ अनेन क्रमयोगेन संयोगेन महात्मनाम् । वियोगेनासतामन्तः प्रयोगे
णात्मसंविदाम् ॥ ३७ ॥ पौरुषेण प्रयत्नेन संतताभ्यासयोगतः । करामलकवद्वस्तुन्या
गते स्फुटतां दृढम् ॥ ३८ ॥ संसाराम्बुनिधेः पारे सारे परमकारणे । नाहं कर्तेश्वरः
कर्ता कर्म वा प्राक्तनं मम ॥ ३९ ॥ कृत्वा दूरतरे नूनमिति शब्दार्थभावनम् । यन्मौ
नमासितं शान्तं तच्छ्रेष्ठासङ्ग उच्यते ॥ ४० ॥ यन्नान्तर्न बहिर्नाधो नोर्ध्वे नाशासु
नाम्बरे । न पदार्थे नापदार्थे न जडे न च चेतने ॥ ४१ ॥ आसितं भावनं शान्तमभा
सनमभावनम् । अनाद्यन्तमजं कान्तं तच्छ्रेष्ठासङ्ग उच्यते ॥ ४२ ॥ संतोषामोदमधुरः
सत्कार्यामलपल्लवः । चित्तनालाग्रसंलीनो विघ्नकण्टकसंकटः ॥ ४३ ॥ विवेकपद्मो
रूढोऽन्तर्विचारार्कविकाशितः । फलं फलत्यसंसङ्गात्तृतीयां भूमिकामिमाम् ॥ ४४ ॥
समवायाद्विशुद्धानां संचयात्पुण्यकर्मणाम् । काकतालीययोगेन प्रथमोदेति भूमिका
॥ ४५ ॥ भूमिः प्रोदितमात्रान्तरमृताङ्कुरिकेव सा । विवेकेनाम्बुसेकेन रक्ष्या पाल्या
प्रयत्नतः ॥ ४६ ॥ येनांशेनोल्लसत्येषा विचारेणोदयं नयेत् । तमेवानुदिनं यत्नात्कृषी
वल इवाङ्कुरम् ॥ ४७ ॥ एषा हि परिमृष्टान्तरन्यासां प्रसवैकभूः ॥ ४८ ॥ श्रेष्ठासंसङ्ग
ता ह्येषा तृतीया भूमिकात्र हि । भवति प्रोज्झिताशेषसंकल्पकलनः पुमान् ॥ ४९ ॥
श्रीराम उवाच ॥ मूढस्यासत्कुलोत्थस्य प्रवृत्तस्याधमस्य च । अप्राप्तयोगसङ्गस्य कथमु
त्तरणं भवेत् ॥ ५० ॥ एकामथ द्वितीयां वा तृतीयां वेतरां च वा । आरूढस्य मृतस्या
थ कीदृशी भगवन्गतिः ॥ ५१ ॥ श्रीवसिष्ठ उवाच ॥ मूढस्य रूढदोषस्य तावत्संसृति
रातता । यावज्जन्मान्तरशतैः काकतालीययोगतः ॥ ५२ ॥ अथ वा साधुसंगत्या वै
राग्यं चाभ्युदेति हि । वैराग्येऽभ्युदिते जन्तोरवश्यं भूमिकोदयः । ततो नश्यति सं
सार इति शास्त्रार्थसंग्रहः ॥ ५३ ॥ योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः । भूमि
कांशानुसारेण क्षीयते पूर्वदुष्कृतम् ॥ ५४ ॥ ततः सुरविमानेषु लोकपालपुरेषु च । मे
रूपवनकुञ्जेषु रमते रमणीसखः ॥ ५५ ॥ ततः सुकृतसंभारे दुष्कृते च पुरा कृते । भो
गक्षयपरिक्षीणे जायन्ते योगिनो भुवि । शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सताम् ॥
५६ ॥ तत्र प्राग्भावनाभ्यस्तं योगभूमिक्रमं बुधाः । दृष्ट्वा परिपतन्त्युच्चैरुत्तरं भूमिका
क्रमम् ॥ ५७ ॥ भूमिकात्रितयं त्वेतद्राम जाग्रदिति स्मृतम् । यथावद्भेदबुद्ध्येदं जग

36 c/d: अनास्थयेति भावानां यद्भावन० (Le/d, B; Lf unleserlich) LN: कालः कवलनोद्युक्तः सर्वभावान्वि नाशयन् । तिष्ठतीति विचारो यः सामान्योऽसावसंगमः ॥ – Textfolge: 38, 40ab/39ab, 39cd/40cd. – 40 b: ०भावनाम् c: यन्मौनमासनं – 41 b: नोर्ध्वं – 42 a: आश्रितं भासनं – 44 a/b: ०पद्मां रूढोऽतर्विवे कार्कविकासितः c/d: ०संसंगां तृतीयां – 48A: द्वितीयां भूमिकां यत्नाच्तृतीयां प्राप्नुयात्ततः ॥ – 50 Ohne श्री० (2. Aufl.) – 51 b: वैतरां – 52 Ohne श्री० a: मूढस्यारूढ० c/d: ०शतैर्नोदिता प्रथमात्र भूः – 53 b: काकतालीययोगतः Nach a/b zusätzlich: संसारस्य परामर्शाद्वैराग्यं समुदेति हि । (53A) – 55 c: मेरुपर्वतकुंजेषु – 56 c: भोगक्षयात्परिक्षीणे, lies भोगजाले परिक्षीणे* – 56A: जनित्वा योगमेवैते सेवंते योगवासिताः ॥ – 57 a: Lies प्राग्भुवना० c: दृष्ट्वोपरि० – 58 c/d: जाग्रतीवात्र विस्पष्टं भेदबुद्ध्यनुवर्तनात्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ज्जाग्रति दृश्यते ॥ ५८ ॥ उदेति योगयुक्तानामत्र केवलमार्यता । कर्तव्यमाचरन्कर्म
मकर्तव्यमनाचरन् । तिष्ठति प्राकृताचारो यः स आर्य इति स्मृतः ॥ ५९ ॥ यथाचारं
यथाशास्त्रं यथाचित्तं यथास्थितम् । व्यवहारमुपादत्ते यः स आर्य इति स्मृतः ॥ ६० ॥
प्रथमायामङ्कुरितं भूमौ विकसितं ततः । फलीभूतं तृतीयायामार्यत्वं योगिनो भवेत्
॥ ६१ ॥ आर्यतायां मृतो योगी शुभसंकल्पसंभृतान् । भोगान्भुक्त्वा चिरं कालं यो
गवाञ्जायते पुमान् ॥ ६२ ॥ भूमिकात्रितयाभ्यासादज्ञाने क्षयमागते । सम्यग्ज्ञानो
दये चित्ते पूर्णचन्द्रोदयोपमे ॥ ६३ ॥ निर्विभागमनाद्यन्ते योगिनो युक्तचेतसः । समं
सर्वं प्रपश्यन्ति चतुर्थीं भूमिकां गताः ॥ ६४ ॥ अद्वैते स्थैर्यमायाते द्वैते प्रशममागते ।
पश्यन्ति स्वप्नवल्लोकं चतुर्थीं भूमिकामिताः ॥ ६५ ॥ भूमिकात्रितयं जाग्रच्चतुर्थी स्वप्न
उच्यते । विच्छिन्नशरदभ्रांशविलायं प्रविलीयते । सत्ताविशेष एवास्ते पञ्चमीं भूमि
कां गतः ॥ ६६ ॥ पञ्चमीं भूमिकामेत्य सुषुप्तपदनामिकाम् । शान्ताशेषविशेषांशस्ति
ष्ठत्यद्वैतमात्रके ॥ ६७ ॥ गलितद्वैतनिर्भासो मुदितोऽन्तः प्रबोधवान् । सुषुप्तघन एवा
स्ते पञ्चमीं भूमिकां गतः ॥ ६८ ॥ अन्तर्मुखतया तिष्ठन्बहिर्वृत्तिपरोऽपि सन् । परि
शान्ततया नित्यं निद्रालुरिव लक्ष्यते ॥ ६९ ॥ कुर्वन्नभ्यासमेतस्यां भूमिकायां विवा
सनः । षष्ठीं तुर्याभिधामन्यां क्रमात्पतति भूमिकाम् ॥ ७० ॥ यत्र नासन्न सद्रूपो
नाहं नाप्यनहंकृतिः । केवलं क्षीणमनन आस्ते द्वैतैक्यनिर्गतः ॥ ७१ ॥ निर्ग्रन्थः शा
न्तसंदेहो जीवन्मुक्तो विभावनः । अनिर्वाणोऽपि निर्वाणश्चित्रदीप इव स्थितः ॥ ७२
॥ अन्तः शून्यो बहिः शून्यः शून्यकुम्भ इवाम्बरे । अन्तः पूर्णो बहिः पूर्णः पूर्णकुम्भ
इवार्णवे ॥ ७३ ॥ किंचिदेवैष संपन्नस्तथैवैष न किंचन ॥ ७४ ॥ विदेहमुक्तता तूक्ता
सप्तमी योगभूमिका । अगम्या वचसां शान्ता सा सीमा भवभूमिषु ॥ ७५ ॥ कैश्चि
त्सा शिवमित्युक्ता कैश्चिद्ब्रह्मेत्युदाहृता । कैश्चिज्ज्ञप्तिरिति प्रोक्ता कैश्चिच्छून्यमिति
स्मृता ॥ ७६ ॥ अर्थ इत्युदिता कैश्चित्कैश्चित्काल इति स्मृता । कैश्चित्प्रकृतिपुंभाववि
भाग इति भाविता ॥ ७७ ॥ अन्यैरप्यन्यथा नानाभेदैरात्मविकल्पितैः । नित्यमव्य
पदेश्यापि कथंचिदपि दिश्यते ॥ ७८ ॥ सप्तैता भूमिकाः प्रोक्ता मया तव रघूद्वह ।
आसामभ्यासयोगेन न दुःखमनुभूयते ॥ ७९ ॥ वसिष्ठ उवाच ॥ अस्त्यनन्तमदोन्म
त्ता मृदुमन्थरचारिणी । करिणी विग्रहव्यग्रा महादशनशङ्खिनी ॥ ८० ॥ सा चेन्निह
न्यते नूनमनन्तानर्थकारिणी । तदेतासु समग्रासु भूमिकासु नरो जयी ॥ ८१ ॥ करि

59 Nach a/b zusätzlich: यां दृष्ट्वा मूढबुद्धीनामप्युदेति मुमुक्षुता । (59A) c/d: ०माचरन्काममकर्तव्य० e: प्रकृता० – 60 a/b: यथाचित्तं यथाशास्त्रं – 61 c/d: द्वितीयायां तृतीयायां फलत्यार्यत्वमुत्तमम् – 62 b: शुद्धसंकल्प० d: पुनः – 64 a: Lies ०मनाद्यन्तं* – 66 c: चित्तं तु शरदभ्रांश० e: सत्तावशेष – 66A: जगद्विकल्पो नोदेति चित्तस्यात्र विलापनात् ॥ – 68 c: Hs. ०घनमेवास्ते – 71 a: यात्रानासन्नसद्रूपो c/d: Hs. ०मननमास्ते – 72 a: निर्ग्रंथिः – 74 a/b: संपन्नस्त्वथ वैष – 74A: षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् ॥ – 76 a: शिव इत्युक्त c: कैश्चिद्विष्णुरिति – 78 d: कथंचिद्व्यपदिश्यते (1. Aufl.), कथंचिद्व्यपदिश्यते (2. Aufl.) – 80 (Auch Hs. ohne श्री०) d: Lies ०शङ्किनी – 81 a: मा c: तदैतासु d: नरोऽजयी

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

णी मदमत्ता सा यावन्न विजितौजसा । को नाम सुभटस्तावत्संपत्समरभूमिषु ॥ ८२
॥ श्रीराम उवाच ॥ कासौ प्रमत्ता करिणी काश्च ता रणभूमयः । कथं निहन्यते
चैषा क्व चैषा रमते चिरम् ॥ ८३ ॥ श्रीवसिष्ठ उवाच ॥ रामेच्छा नाम करिणी इदं
मेऽस्त्विति रूपिणी । शरीरकानने मत्ता विविधोल्लासकारिणी ॥ ८४ ॥ मत्तेन्द्रियो
ग्रकलभा रसनाकलभाषिणी । मनोगहनसंलीना कर्मदन्तद्वयान्विता ॥ ८५ ॥ मदो
ऽस्या वासनाव्यूहः सर्वतः प्रसरद्वपुः । संसारदृष्टयो राम तस्याः समरभूमयः ॥ ८६
॥ भूयो यत्रानुभवति नरो जयपराजयौ । इच्छानागी निहन्त्येषा कृपणाञ्जीवसंच
यान् ॥ ८७ ॥ वासनेहा मनश्चित्तं संकल्पो भावनं स्पृहा । इत्यादिनिवहो नाम्नामस्या
आशयकोशगः ॥ ८८ ॥ यावदस्त्विदमित्येवमियमन्तर्विजृम्भते । तावदुग्रा कुसंसार
महाविषविषूचिका ॥ ८९ ॥ एतावानेव संसार इदमस्त्विति यन्मनः । अस्यास्तूपश
मो मोक्ष इत्येव ज्ञानसंग्रहः ॥ ९० ॥ प्रसादकारिणी स्वच्छा निरिच्छे विमलाकृतौ ।
तैलबिन्दुरिवादर्शे विश्राम्यत्युपदेशवाक् ॥ ९१ ॥ असंवेदनमात्रेण नोदेतीच्छा भवा
ङ्कुरः ॥ ९२ ॥ मनागप्युदितैवेच्छा छेत्तव्यानर्थकारिणी । स्वसंविद्धनशस्त्रेण विषस्येवा
ङ्कुरावली ॥ ९३ ॥ इच्छाविच्छुरितो जीवो विजहाति न दीनताम् ॥ ९४ ॥ स्वसंवेदन
यत्नस्तु तूष्णीमेवान्तरासनम् । अवधानविनिर्मुक्तं भुक्तं शिवशतं यया । तां प्रत्याहा
रबिडिशेनेच्छामत्सीं नियच्छताम् ॥ ९५ ॥ इदमस्त्विति संयोगं तमाहुः कल्पमुत्त
माः । न सर्वभावनं तस्य कल्पनात्याग उच्यते ॥ ९६ ॥ स्मरणं विद्धि संकल्पं शिवम
स्मरणं विदुः । तत्र प्रागनुभूतं च नानुभूतं च भाव्यते ॥ ९७ ॥ अनुभूतां नानुभूतां
स्मृतिं विस्मृत्य काष्ठवत् । सर्वमेवाशु विस्मृत्य मूढस्तिष्ठ महामतिः ॥ ९८ ॥ ऊर्ध्वबाहु
विरौम्येष न च कश्चिच्छृणोति तत् । असंकल्पः परं श्रेयः स किमन्तर्न भायव्ते ॥
९९ ॥ किल तूष्णींस्थितेनैव तत्पदं प्राप्यते परम् । परमं यत्र साम्राज्मपि राम तृणा
यते ॥ १०० ॥ गम्यदेशैकनिष्ठस्य यथा पान्थस्य पादयोः । स्पन्दो विगतसंकल्पस्तथा
स्पन्दः स्वकर्मसु ॥ १०१ ॥ बहुनात्र किमुक्तेन संक्षेपादिदमुच्यते । संकल्पनं परो बन्ध
स्तदभावो विमुक्तता ॥ १०२ ॥ सर्वमेवमजं शान्तमनन्तं ध्रुवमव्ययम् । पश्यन्भूतार्थ
चिद्रूपं शान्तमास्व यथासुखम् ॥ १०३ ॥ अवेदनं विदुर्योगं शान्तमाशितमक्षयम् ।
योगस्थः कुरु कर्मा।णि विकर्माण्यथ मा कुरु ॥ १०४ ॥ अवेदनं विदुर्योगं चित्तक्षय

83 Ohne **श्री०** (2. Aufl.) – 84 Ohne **श्री०** b: **सेदं मे** – Textfolge: 86ab/87ab, 87cd/86cd. – 88 c: **इत्यादिर्निवहो** d: Hs. entstellt. – 88A: **धैर्यनाम्ना वरास्त्रेण प्रसृतामवहेलया । नागीं सर्वात्मिकामेतामिच्छां सर्वात्मना जयेत् ॥** – 90 c: **अस्य तूपशमो** d: **इत्येवं** – 91 a/b: Hs. entstellt. – Textfolge: 91, 93, 94, 92, 95ab/ef (stark verändert, s. u.; 95cd fehlt). – 93 c: Nach Le (Hs. leicht entstellt); **असंवेदनशस्त्रेण** – 94 a: Hs. **इच्छाविदूरतो** – 95 a/b: **असंवेदनशस्त्रं तु तूष्णीं चित्तव्यवस्थितिः** e/f: Nach Ld (Hs. leicht entstellt); **प्रत्याहारः स विज्ञेयस्तेनेच्छा विनिवार्यते** – 96 a/b: **इदं मेस्त्विति विज्ञानमाहुः कल्पनममुत्तमाः** c/d: **अर्थस्याभावनं यत्तत्कल्पनात्याग** – 99a: **ऊर्ध्वबाहुर्वि०** – 103 a: **सर्वं जगदिदं शांत०** d: **शांत आस्व** – 104–107: Hs.-Ende bei | (104c); Fortsetzung bis Sarga-Ende nach LN. 104 b: **शांतमासनमुत्तमम्**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

मकृत्रिमम् । अत्यन्तं तन्मयो भूत्वा तथा तिष्ठ यथासि भोः ॥ १०५ ॥ अहं ममेति सं
विदन्न दुःखतो विमुच्यसे । असंविदन्विमुच्यसे यदीप्सितं तदाचर ॥ १०६ ॥ शिवं
सर्वगतं शान्तं बोधात्मकमजं शुभम् । तदेकभावनं राम कर्मत्याग इति स्मृतः ॥
१०७ ॥ [४२] ॥ [इति] श्रीवाल्मीकीये रामायणे मोक्षोपाये निर्वाणप्रकरणं समा
प्तम् ॥

107 a: सर्गगतं (2. Aufl.) – Kolophon nach Sarga 42 (Lf; kein Sarga-Kol.): इति श्रीवाल्मीकीये मोक्षोपाये वासिष्ठरामायणे निर्वाणप्रकरणे [2. Aufl.: इति श्रीयोगवासिष्ठसारे निर्वाणप्रकरणे] योगसप्तभूमिकोपाख्यानं नाम त्रिचत्वारिंशत्तमः सर्गः ॥ ४३ ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

Die drei zusätzlichen Sarga bei LN*

प्रसह्य वेधसः सृष्टिं यत्कटाख्यरसाञ्जनम् । वादी वाग्मी कविश्चायं रामकीर्तिं सृज
त्यहो ॥ १ ॥ निन्दन्ति ये हरिहरार्यकृपामृताब्धिं स्वच्छन्दसंचरणसंचितवाञ्छिता
र्थाः । निन्दन्ति ते जलनिधिं बहिरुत्क्षिपन्ते स्नातुं समागतवतोऽपि तरंगहस्तैः ॥ २
॥ मज्जन्तमप्यनुदिनं द्विजराजमेकमद्यापि नैव जलधिर्विमलीकरोति । स्पृष्टोऽप्यहो
हरिहरार्यकृपाम्बुधिस्ते प्रक्षालयत्यमतिपङ्कमपि द्विजानाम् ॥ ३ ॥ मन्यामहे हरिहरा
र्यगुरो त्वदीयवाणीसुधाजलधिमेव वरं वरेण्यम् । आनन्दकन्दलितनन्दनपारिजात
निष्यन्दमानमकरन्दमहीनदीनाम् ॥ ४ ॥ वाल्मीकिरुवाच ॥ इत्युक्तवत्यथ मुनौ दि
वसो जगाम स्नातुं सभा कृतमुनिप्रणतिर्जगाम । सायंतनास्तविधयेऽस्तमितो जगाम
श्यामाक्षये रविकरैश्च सभाजगाम ॥ ५ ॥ अष्टादशेति दिवसान्विदधे गरिष्ठां गोष्ठीं
वसिष्ठमुनिना सह रामचन्द्रः । हित्वा भवप्रभवमोहमथावतस्थे निर्वातवारिधिरिवा
चलसत्त्वपूर्णः ॥ ६ ॥ तस्मिन्क्षणे कल्पतरुप्रसूतप्रसूनसंघस्य पपात वृष्टिः । संतुष्टगीर्वा
णगणप्रमुक्ता मुक्ताफलादभ्रमिताभ्रपूर्णा ॥ ७ ॥ अवतीर्य स्वयं विष्णुर्मानुष्यो राम
नामधृक् । खिन्नः संसारजालेऽस्मिन्योगज्ञानेन बोधितः ॥ ८ ॥ प्रबुद्धेनाथ रामेण सं
पूज्याभिष्टुतो मुहुः । पितृभ्रातृसमेतेन प्रणम्याभिहितो मुनिः ॥ ९ ॥ त्वत्प्रसादाद्धो
भगवन्निःसंशयमिदं मनः । विज्वरं शीतलं शान्तं संजातमविकारि मे ॥ १० ॥ सर्वा
र्तिहर्ता सर्वज्ञः सर्वदेवाश्रितो गुरुः । मोहान्धकारविध्वंसः सवितेव भवानिति ॥ ११
॥ ततस्तदानीं मुनिना रामाय गगनस्थिताः । श्रोतुमभ्यागता देवा आहूय प्रकटीकृ
ताः ॥ १२ ॥ यक्षगन्धर्वसिद्धर्षिविद्याधरमहोरगाः । रामेण प्रणतश्चैतमूचुः संतुष्टमा
नसः ॥ १३ ॥ श्रुतमस्माभिरखिलं ज्ञानमेतन्महोदयम् । त्रैलोक्यमोहार्तिहरौ भवन्तौ
प्रणता वयम् ॥ १४ ॥ भवद्गुरोर्वसिष्ठस्य भवतश्च महात्मनः । मिथः संवादमखिलं
ज्ञानमेतन्महोदयम् ॥ १५ ॥ ततः सिद्धैरयोध्यायां स्तुत्वैतदवतारितम् । काश्मीरम
ण्डलस्यान्तर्भूतानामनुकम्पया ॥ १६ ॥ अथ सर्वाणि कार्याणि ज्ञाततत्त्वो गतव्यथः ।
निर्ममो निर्ममे रामो निष्कामो जनको यथा ॥ १७ ॥ यथाम्बु बिसिनीपत्रे सज्जते

* Sarga 43–45 auch bei LVb, jedoch ohne 43.1–4; LVa verfügt nur über die (dem Kolophon des Kommentars angefügten) Verse 43.1–4. – Sarga 43 auch bei Ld/e, jedoch ohne V 1–4. – Sarga 44–45 auch bei BN (Nirv. pūrv. 127–128).

43.1 **वसिष्ठ उवाच ॥** (2. Aufl.) c: **वाग्ग्मी** (2. Aufl.) – 2–6 (Vasantatilakā) – 3 c: Lies **०म्बुधिर्नो**? – 4 d: **०निष्यद०** (1. Aufl.); lies **०महानदीनाम्*** — 5: Vgl. BN 2.5.32 (etc.) b: **समाकृत०** (2. Aufl.) c: Lies **सायंतनाय विधये** (BN)? – 7 (Upajāti) d: **०दभ्रमिवाभ्रपूर्णा** (2. Aufl.) – 12 d: Lies **आहूता**? – 13 c: **०तश्चैनमूचुः** (2. Aufl.) – 15 c/d (vgl. 14 a/b): Lies **मिथः संवादमेतं च लोकोऽयं पूजयिष्यति*** – 16 b: Lies **श्रुत्वैतद०***

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

नाम्बुमज्जनैः । तथास्य राज्यभोगेन न चेतो रज्यतेऽमलम् ॥ १८ ॥ नास्य भूतिमतो
र्भातिर्बभूव भवभोगिनः । यथा जाङ्गलिकस्यादिमुखदत्ताङ्गुलेरपि ॥ १९ ॥ शास्त्रं त्वि
दं विरक्ता ये सत्सङ्गाः सत्क्रियापराः । तेषां धर्मात्मनामेव प्रदातव्यं प्रयत्नतः ॥ २०
॥ सर्वा सर्वोपकाराय मतिश्चेदस्ति वः शुभा । तदिदं सर्वथा देयं विद्यादानं महाफ
लम् ॥ २१ ॥ दुर्ग्रहग्रस्तमनसामसाधूनां प्रमादिनाम् । निन्दकानामिदं शास्त्रं रहस्यं
न प्रकाशयेत् ॥ २२ ॥ पूर्वं नाराधितो येन भगवानिन्दुशेखरः । हरिर्ब्रह्मा रविश्चापि
न लभेदिदमद्भुतम् ॥ २३ ॥ महेश्वरेण यत्प्रोक्तं देव्या यच्चापि विष्णुना । मुनिनां ना
रदादीनां तदिदं ज्ञानमुत्तमम् ॥ २४ ॥ महारामायणाख्यं यन्मोक्षोपायापराभिधम् ।
ततः क्षीरनिधिप्रख्यात्पीयूषमिदिमुद्धृतम् ॥ २५ ॥ सामान्येन विचारेण क्षयमायाति
दुष्कृतम् । सम्यगस्य विचारेण को न याति परं पदम् ॥ २६ ॥ एकवेलमधीतेन शास्त्रे
णानेन किल्बिषम् । प्रणश्यति नृणां सर्वं क्षिप्रं बोधश्च जायते ॥ २७ ॥ अप्रबुद्धोऽपि
यश्चेदं भावयेद्भक्तिभावितः । तस्य निर्मलतासिद्धं चित्तं नास्त्यत्र संशयः ॥ २८ ॥ मू
ढैर्मुमुक्षुभिर्वापि संयतैर्वाप्यसंयतैः । परमार्थमिदं चिन्त्यं दुर्लभं ब्रह्मदर्शनम् ॥ २९ ॥
किंचित्संस्कृतबुद्धीनां श्रुतं शास्त्रमिदं यथा । सौख्यापहं तथा शास्त्रमन्यदस्ति न किं
चन ॥ ३० ॥ भुक्तिमुक्तिप्रदमिदं योगिनां परमं प्रियम् । हस्तस्थं प्राप्य चिद्रूपं प्राक्पु
ण्यैरेव लभ्यते ॥ ३१ ॥ सर्वागमार्थसंवेत्ता वसिष्ठः परमो मतः । मोक्षोपायस्य सारोऽ
यमिति सर्वत्र गीयते ॥ ३२ ॥ प्रियार्थादिवियोगेन जातखेदस्य देहिनः । शास्त्रं विना
किमत्र स्यादन्तः संतापशान्तिदम् ॥ ३३ ॥ चिदम्बरात्प्रोदित एव पूर्णः शास्त्रं नुरा
नन्दनिधिः सुपादः । सान्द्रामृतः काव्यरसोपशोभास्फुरन्प्रकाशः क्षपितोऽन्धकारः
॥ ३४ ॥ स्नातं तेन समस्ततीर्थसलिलैः सर्वापि दत्तावनिर्यज्ञानां च कृतं सहस्रमखि
ला देवाश्च संपूजिताः । संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ यस्य ब्र
ह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥ ३५ ॥ [इति शास्त्रग्रहणफलनिर्देशः ॥
४३ ॥]वाल्मीकिरुवाच ॥ इति वरमुनिनोक्तं ज्ञानसारं पुराणे सकलमनुनिशम्य श्री
रघूणां कुलाग्र्यः । विमलमतिरपृच्छत्किंचिदन्यत्स्वयं वै शमसुखपरिपूर्णः पूर्णबोध
स्थितोऽसौ ॥ १ ॥ स खलु परमयोगी विश्ववन्द्यः सुरेन्द्रो जननमरणहीनः शुद्धबोध
स्वरूपः । सकलगुणनिधानं संनिधानं रमायास्त्रिजगदुदयरक्षानुग्रहाणामधीशम् ॥ २
॥ शक्तिपालवशोन्मेषप्रकटामलचिद्घनः । मुहूर्तमासीदुद्बुद्धश्चैतन्यानन्दसागरः ॥ ३ ॥
प्रश्नोत्तरविभागादिपरिपाटीविवर्जितः । आनन्दामृतपूर्णाश्रुरोमकण्टकिताङ्गकः ॥ ४

19 Fehlt in 2. Aufl. a: Lies भूतिमते० * c: Lies जाङ्गलिकस्याहि० * 27 a: Lies एकवारम० * b: किल्बिलम् (2. Aufl.) – 28 c: Lies निर्मलतामेति* – 30 c: Lies मौर्ख्यापहं* (vgl. 3.126) – 33 c: Lies किमन्यत्* – 34 (Upajāti) – 35 (Śārdūlavikrīḍita) – Kolophon zu Sarga 43: इति श्रीमोक्षोपाये [2. Aufl.: श्रीयोगवासिष्ठसारे] निर्वाणप्रकरणे शास्त्रग्रहणफलनिर्देशो नाम चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ – 44.1 (Mālinī) a: Lies पुराणं* c: Lies नो* (satt वै) – 2 (Mālinī) d: Lies ०मधीशः* – 3 a: Lies शक्तिपात०*? d: Lies ०सागरे – 4 c/d: Lies ०पूर्णास्रू रोम०*

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

॥ महासामान्यरूपत्वचिद्व्यापकतया स्थितः । नित्यमष्टगुणैश्वर्यतृणप्रायमनोरथः ॥ ५ ॥ न किंचिदूचे संपन्नः शिवे परिणतः पदे ॥ ६ ॥ भरद्वाज उवाच ॥ अहो खलु महाश्चर्यं रामः प्राप्तो महत्पदम् । कथमेतादृशी प्राप्तिरस्माकं मुनिनायक ॥ ७ ॥ मूर्खाः शोच्याश्च किंचित्ता मादृशाः क्व च पापिनः । क्व च ब्रह्मादिभिः प्राथ्यर्या दुर्लभा रामसंस्थितिः ॥ ८ ॥ अहो मुनीश्वरगुरो कथं विश्राम्यतां मया । दुष्पारश्च भवाम्भोधिस्तीर्यते तद्वदाशु मे ॥ ९ ॥ वाल्मीकिरुवाच ॥ श्रीरामवृत्तान्तमशेषमादितो वसिष्ठवाक्यानुगतं निरूपितम् । धिया विचार्यानुपरामृश स्वयं मयापि वेद्यं कथनीयमत्र ते ॥ १० ॥ अविद्यया प्रपञ्चोऽयं नास्ति सत्यमिहाण्वपि । विवेचयन्ति विबुधा विवदन्त्यविवेकिनः ॥ ११ ॥ नास्ति भिन्नं चितः किंचित्किं प्रपञ्चेन रुध्यते । अभ्यासेन रहस्यानां वयस्य विशदो भव ॥ १२ ॥ प्रपञ्चविषया वृत्तिर्जाग्रन्निद्रेति कीर्तिता । स प्रबुद्धस्तु यस्यान्तश्चित्प्रदीपो निरञ्जनः ॥ १३ ॥ शून्यमूलप्रपञ्चोऽयं शून्यताशिखरं सखे । सारशून्यतया मध्येऽप्यनास्था सन्मनीषिणा ॥ १४ ॥ अनादिवासनादोषादसन्नेवायमीक्ष्यते । गन्धर्वनगराकारः संसारबहुविभ्रमः ॥ १५ ॥ चित्तेऽनभ्यस्य कल्याणीं चैतन्यामृतकन्दलीम् । संमुह्यसि किमध्यास्य वासनाविषवीरुधः ॥ १६ ॥ जाग्रदेतन्निपतितं ज्ञानालम्बग्रहादधः । वसत्युपरि सर्वेषां ये निरालम्बसंविदः ॥ १७ ॥ तावद्दृढस्फुराकाररसा विद्यामहानदी । न यावदात्मरूपेण निपुणैरवगाह्यते ॥ १८ ॥ प्राङ्नास्ति चरमं नास्ति वस्तु सर्वमिदं सखे । विद्धि मध्येऽपि तन्नास्ति स्वप्नवृत्तमिदं जगत् ॥ १९ ॥ अविद्यायोनयो भेदाः सर्वेऽमी बुद्बुदा इव । क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम् ॥ २० ॥ सुशीतलोदकनदीं विदित्वा प्रविगाह्यताम् । बहिर्भ्रान्तिनिदाघास्ते निर्यान्तु कलिताः शुचा ॥ २१ ॥ एकश्चाज्ञानजलधिर्जगदात्मा व्यतिष्ठति । ज्येष्ठोऽयमहमित्यूर्मिरविद्यावातसंभवः ॥ २२ ॥ चित्तस्खलनभेदाली रागाद्याश्च प्रकल्पिताः । ममतोत्कलितावर्तस्ततः स्वैरं प्रवर्तते ॥ २३ ॥ रागद्वेषावतिग्राहौ गृहीतसमनन्तरम् । ततश्चानर्थपातालप्रवेशः केन वार्यते ॥ २४ ॥ प्रशान्तामृतकल्लोले केवलामृतवारिधौ । मत्त मज्जसि किं द्वैतग्रहक्षाराब्धिवीचिषु ॥ २५ ॥ कस्तिष्ठति गतः को वा कस्य केन किमागतम् । किं निमज्जसि मायायामेतत्तत्त्वमतन्द्रितः ॥ २६ ॥ तत्त्वमेकं यदात्मेति जगदेतत्प्रचक्षते । ततोऽन्यः कस्तवातीतो यस्तात विषयः शुचाम् ॥

5 a/b: Lies **०रूपत्वाच्चिद्व्यापक०***? – 9 b: Lies **विश्रम्यते*** – 10 (Vaṃśasthabila; a unregelm.) 11–57: Vgl. RC 31.99–148 (nicht alle abweichenden Lesarten sind unten verzeichnet). – 11 a: Lies **अविद्यायाः*** 14 a: Lies **शून्यमूलः*** b: Lies **०शिखरः*** d: Lies **सन्मनीषिणाम्*** – 15 d: Lies **संसारो*** – 16 a: Lies **चितमभ्यस्य*** b: Lies **कैवल्यामृत०*** – 17 a: Lies **जगदेतन्निपतति*** c: Lies **ते सन्त्युपरि*** – 18 a/b: RC **तावद्दृढपराकारसारा संविन्महानदी** – 20 a: Lies **भावाः*** – 21 c/d: RC **०निदानास्ते निर्वान्तु ज्वलिताः शुचः** – 22 b: Lies **०र्जगदाप्लाव्य तिष्ठति*** – 23 a/b: RC **स विस्खलति भेदालीरासाद्य स्वप्रकल्पिताः** – 24 a/b: RC **रागद्वेषाविति ग्राहौ गृह्णीतः समनन्तरम्** – 25 b: Lies **कैवल्यामृत०*** c: Lies **मज्ज मज्जसि*** – 26 c/d: Lies **मायायां पश्य तत्तत्त्वम०*** – 27 c: RC **कस्तवानीतो**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

२७ ॥ बालान्प्रति विवर्तोऽयं ब्रह्मणः सकलं जगत् । अविवर्तितमानन्दमास्थिताः कृ
तिनः सदा ॥ २८ ॥ अविविक्तो जनः शोचत्यकस्माच्च प्रहृष्यते । तत्त्ववित्तु हसन्नास्ते
तस्य मोहो विडम्बनम् ॥ २९ ॥ तच्च सूक्ष्ममिदं तत्त्वं तिरोहितमविद्यया । यथा स्थले
षु लोकानां जालेष्वात्मसु संशयः ॥ ३० ॥ पृथिव्यादिमहाभूतपरमाणुमयं जगत् ।
स्थितं यदा तदापीह को गतो योऽनुशोच्यते ॥ ३१ ॥ असतः संभवो नास्ति नास्त्य
भावः सतः सखे । आविर्भावतिरोभावसंस्था नानामयी परे ॥ ३२ ॥ किं त्वनेकपुरो
त्साहाद्विषतामुपगच्छति । भज संचरिताभोगं परमेशं जगद्गुरुम् ॥ ३३ ॥ दुरितानि
समस्तानि पच्यन्तेऽद्यापि न ध्रुवम् । द्रुतमेवास्य देवस्य पाशाः प्रश्रयतां गताः ॥ ३४
॥ साकारं भज तावत्त्वं यावत्सत्त्वं प्रसीदति । निराकारे परे तत्त्वे ततः स्थितिरकृत्रि
मा ॥ ३५ ॥ इममुद्दामतमसं जित्वा शत्रुं बलाद्ध्रुवम् । यमस्यानुसर ध्यानं विश्वस्तेना
न्तरात्मना ॥ ३६ ॥ समाधाय क्षणं पश्य प्रत्यगात्मानमात्मनि । इयं विभातु संव्यक्तं
द्राग्बुद्धिरजनी तव ॥ ३७ ॥ कृतं पुरुषकारेण केवलेन च कर्मणा । महेशानुग्रहादेव
प्राप्तव्यं प्राप्यते नरैः ॥ ३८ ॥ नाभिजात्यं न चारित्र्यं न नयो न च विक्रमः । बलव
न्ति पुराणानि सखे कर्माणि केवलम् ॥ ३९ ॥ अप्रतर्क्यात्प्रतीकारात्किमेवमवसीद
ति । न लुम्पति ललाटस्थामीश्वरोऽप्यक्षमालिकाम् ॥ ४० ॥ क्व चिद्वक्ता क्व वैदग्ध्यं
क्व चेयं मोहवल्लरी । अचिन्तनीया नियतिर्निर्ययेद्द्वन्द्वमोतिम् ॥ ४१ ॥ हे भरद्वाज
मोहं त्वं विवेकेन जहि स्फुटम् । असामान्यमिदानीं ते ज्ञानं प्राप्स्याम्यसंशयम् ॥
४२ ॥ दूरमुत्सहते राजा महासत्त्वो महापदि । अल्पसत्त्वो जनः शोचत्यल्पेऽपि हि
परिक्षये ॥ ४३ ॥ बोधं पुण्यपराधीनं प्राप्यते बहुजन्मभिः । अनुमीयेत धीरेषु जीव
न्मुक्तेषु कार्यतः ॥ ४४ ॥ द्विषद्भूतेन येनैव कर्मणां बन्ध ईदृशः । सुहृद्भूतेन तेनैव मो
क्षमाप्स्यसि पुत्रक ॥ ४५ ॥ सतां सत्कर्मसंवेगः पुराणं प्रणुदन्नयम् । वर्षौघ इव भूता
नां दावानलमसेचयत् ॥ ४६ ॥ सखे संन्यस्य कर्माणि ब्रह्मणः प्रणयी भव । नेष्यते
यदि संसारचक्रावर्तभ्रमभ्रमम् ॥ ४७ ॥ तावदेतद्विकल्पोत्थमिदं यावद्बहिर्ग्रहः । प्र
तिकूलेऽब्धिकल्लोले केवलं निश्चलं पयः ॥ ४८ ॥ अयं किमन्धंकरणस्त्वया शोको

30 c/d: RC यथा स्थूलेषु लोकानां जातः स्वात्मसु संशयः – 31 d: Lies कोऽनुशोच्यते* – 32 c/d: RC ०तिरोभावाः संस्थानानाममी परम् – 33 a/b: RC किं त्वमेकपुरोत्सादाद्विषादमुपगच्छसि d: RC परमेशं पुरान्तरे – 34 a: RC दुरितानि दशास्यास्य d: RC प्रश्लथतां – 35 Fehlt bei RC. – 36 b: Lies सत्त्वबलाद्ध्रुवम्* (तत्त्व०?) c/d: Lies रामस्यानुसराध्वानं विशुद्धेनान्तरात्मना* – 37 c/d: RC सुव्यक्तं प्राग्बुद्धि० – 40 a: RC अनयोरप्रतीकारा० b: RC ०सीदसि d: RC ऽप्यक्षरावलिम् – 41 RC क्वायोध्या क्व च लङ्केयं क्व रामः क्व रावणः । अचिन्तनीया नियतिर्ययेदं द्वन्द्वमाहितम् ॥ – 42 RC हे सुग्रीव दशग्रीवं जहि स्वेनैव मुष्टिना । असामान्यमिदानीं ते यशो यातु परापरम् ॥ – 44 a: Lies बोधः पुण्यपराधीनः* – RC जयः पुण्यपराधीनः प्राप्यते कृपणैरपि । न हि शूरादृतेऽन्येन देहत्यागोद्भवं यशः ॥ – 45 a/b: RC बद्धौ विपक्षभूतेन कर्मणा रामलक्ष्मणौ d: RC मोचनीयाविमौ पुनः – 46 b: Lies प्रणुदत्यघम्* c/d: RC वर्षौघ इव शैलानां दवानलशिखोच्चयम् – 47 d: Lies ०भ्रमभ्रमः* – 48 RC तावदेव विकल्पोऽयं हृदि यावद्बहिर्ग्रहः । सति कूले हि कल्लोलाः केवलं निश्चलं पयः ॥

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

ऽवलोक्यते । निर्वाहयतु सैव त्वां प्रज्ञायष्टिरभङ्गुरा ॥ ४९ ॥ न जातु ते विगण्यन्ते गणनां सुगरीयसीम् । ये तरंगैस्तृणानीव ह्रियन्ते हर्षशोकयोः ॥ ५० ॥ समारूढद शादोलामहोरात्रमिदं जहत् । क्रीड्यते षड्विधैः प्रेक्ष्यैः सखे किमिति खिद्यसे ॥ ५१ ॥ सूते संहरति क्षिप्रं पुनः सृजति हन्ति च । जगन्ति बहुपर्यायैः काल एव कुतूहली ॥ ५२ ॥ न विशेषग्रहः कश्चिन्न कश्चिन्न च कश्चन । जन्तुष्वभ्यवहार्येषु प्रकाम्यं काल भोगिनः ॥ ५३ ॥ का कथा मर्त्यपिण्डानां निमेषान्तरवासिनाम् । अपि देवनिका या ये ते दुःकालस्य गोचराः ॥ ५४ ॥ स्वयं नृत्यसि किं प्रीते विपत्तौ विकलेन्द्रियः । क्षणं निखिन्नमासीनः पश्य संसारनाटकम् ॥ ५५ ॥ अस्यानेकतरङ्गस्य जगतः क्षण भङ्गिनः । न विषीदति मनस्वी भारद्वाज मनागपि ॥ ५६ ॥ त्यज शोकममङ्गल्यं मङ्ग लानि विचिन्तय । चिदानन्दघनस्वच्छमात्मानं च विभावय ॥ ५७ ॥ देवद्विजगुरु प्राज्ञामरसाधुषु चेतसाम् । सदागमप्रमाणानां महेशानुग्रहो भवेत् ॥ ५८ ॥ [इति भरद्वाजानुशासनम् ॥ ४४ ॥] भरद्वाज उवाच ॥ ज्ञातं तव प्रसादेन सर्वमेतदशेषतः । न वैराग्यात्परं भाग्यं न संसारात्परो रिपुः ॥ १ ॥ इदानीं श्रोतुमिच्छामि वसिष्ठेनोप पादितम् । ज्ञानसारमशेषेण ग्रन्थेनोक्तं यदात्मना ॥ २ ॥ वाल्मीकिरुवाच ॥ भरद्वाज शृणुष्वेदं महाज्ञानं विमुक्तिदम् । यस्य श्रवणमात्रेण भवाब्धौ न निमज्जसि ॥ ३ ॥ सं हृतिस्थितिसंभूतभेदैर्योऽनेकधा स्थितः । एकोऽपि सन्नमस्तस्मै सच्चिदानन्दमूर्तये ॥ ४ ॥ कृते प्रपञ्चविलये यथा तत्त्वं प्रकाशते । तदोपायं प्रवक्ष्यामि संक्षेपाच्छ्रुतिशासनात् ॥ ५ ॥ शान्तो दान्तश्चोपरतो निषिद्धात्पापकर्मणः । विषयेन्द्रियसंश्लेषसुखाच्च श्रद्ध यान्वितः ॥ ६ ॥ मृद्वासने समासीनो जितचित्तेन्द्रियक्रियः । ओमित्युच्चारयेत्तावन्म नो यावत्प्रसीदति ॥ ७ ॥ प्राणायामं ततः कुर्यादन्तःकरणशुद्धये । इन्द्रियानाहरेत्प श्चाद्विषयेभ्यः शनैः शनैः ॥ ८ ॥ देहेन्द्रियमनोबुद्धिक्षेत्रज्ञानां च संभवः । पश्चाद्भवति तद्भावात्तेषु पश्चाद्विलयापयेत् ॥ ९ ॥ विराजि प्रथमं स्थित्वा तत्रात्मनि ततः परम् । अव्याकृते स्थितः पश्चात्स्थिते परमकारणे ॥ १० ॥ मांसादिपार्थिवं भागं पृथिव्यां प्र विलापयेत् । आप्यं रक्तादिकं चाप्सु तैजसं तेजसि क्षिपेत् ॥ ११ ॥ वायव्यं च महा वायौ नभस्यं नभसि क्षिपेत् । पृथिव्यादिषु विन्यस्य चेन्द्रियाण्यात्मयोनिषु ॥ १२ ॥ श्रोत्रादिलक्षणोपेताः कर्तुर्भोक्तुः प्रसिद्धये । दिक्षु न्यस्यात्मनः श्रोत्रं त्वचं विद्युति

49 b: Lies ऽवलम्ब्यते* – 50 b: Lies गणनासु गरीयसाम्* – 51 a: RC समारूढं c/d: RC प्रेङ्खैः सखे कस्य विरोदिषि – 53 a/b: RC न विशेषग्रहः कश्चिन्न च कश्चिन्नियामकः d: RC प्राकाम्यं – 54 b: RC ०नाशिनाम् c/d: RC अपि देवनिकायानां कायाः कालस्य गोचराः – 55 a: Lies प्रीतो* c: Lies निश्चलमासीनः* 56 d: Lies भरद्वाज* c/d: RC किं विषङ्गेण मनसि प्लवगेश मनागपि – 57 c: Lies चिदानन्दघनं* – Kolophon zu Sarga 44: इति श्रीवाल्मीकीये [2. Aufl.: इति श्रीयोगवासिष्ठसारे निर्वाणप्रकरणे श्रीवाल्मीकीये] मोक्षोपाये भरद्वाजानुशासनं नाम पंचचत्वारिंशः सर्गः ॥ ४५ ॥ – 45.2 d: Lies पदात्मना* – 4 a: Lies ०संभूति०* – 5 c: Lies तवोपायं* – 8 c (so auch LVb): इन्द्रियाण्या० (2. Aufl.) – 9 c/d: BN, LVb यस्माद्भवति तज्ज्ञात्वा तेषु – 10 c/d: BN पश्चात्स्थितः – 11 a: Lies मांसादिः

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

निक्षिपेत् ॥ १३ ॥ चक्षुरादित्यबिम्बे च जिह्वामप्सु विनिक्षिपेत् । प्राणं वायौ वाचम
ग्नौ पाणिमिन्द्रे विनिक्षिपेत् ॥ १४ ॥ विष्णौ तथात्मनः पादौ पायुं मित्रे तथैव च ।
उपस्थं कश्यपे न्यस्य मनश्चन्द्रे निवेशयेत् ॥ १५ ॥ बुद्धिं ब्रह्मणि संयच्छेदेताः करण
देवताः । इन्द्रियव्यपदेशेन व्यादिश्यन्त्येव देवताः ॥ १६ ॥ श्रुतिवाक्यमनुस्मृत्य न
स्वतः प्रकटीकृताः । एवं न्यस्यात्मनो देहं विराडस्मीति चिन्तयेत् ॥ १७ ॥ ब्रह्माण्डा
न्तः स्थितो योऽसावर्धनारीश्वरः प्रभुः । आधारः सर्वभूतानां कारणं तदुदाहृतम् ॥
१८ ॥ स यज्ञसृष्टिरूपोऽसौ जाग्रद्वृत्तौ व्यवस्थितः । द्विगुणाण्डाद्बहिः पृथ्वी पृथिव्या
द्विगुणं जलम् ॥ १९ ॥ सलिलाद्विगुणं तेजस्तेजसो द्विगुणोऽनिलः । वायोर्द्विगुणमा
काशमूर्ध्वमेकैकशः क्रमात् ॥ २० ॥ व्यस्तेन च समस्तेन महता ग्रथितं जगत् । क्षि
तिं चाप्सु समावेश्य सलिलं चानले क्षिपेत् ॥ २१ ॥ अग्निं वायौ समावेश्य वायुं च
नभसि क्षिपेत् । नभश्च महदाकाशे समस्तोत्पत्तिकारणे ॥ २२ ॥ स्थित्वा तस्मिन्महा
योगी लिङ्गमात्रशरीरधृक् । वासनाभूतसूक्ष्माश्च कर्माविद्ये तथैव च ॥ २३ ॥ दशेन्द्रि
यमनोबुद्धिरेतल्लिङ्गं विदुर्बुधाः । ततश्चाण्डाद्बहिर्वायौ सूत्रात्मास्मीति चिन्तयेत् ॥
२४ ॥ चतुर्मुखोग्रके वायौ भूतसूक्ष्मव्यवस्थितः । लिङ्गमव्याकृते सूक्ष्मे न्यस्याव्यक्ते
च बुद्धिमान् ॥ २५ ॥ नामरूपविनिर्मुक्तं यस्मिन्संतिष्ठते जगत् । तामाहुः प्रकृतिं के
चिन्मायामेके परे त्वणून् ॥ २६ ॥ अविद्यामपरे प्राहुस्तर्कविभ्रान्तचेतसः । तत्र सर्वे
लयं गत्वा तिष्ठन्त्यव्यक्तरूपिणः ॥ २७ ॥ निःसंबोधा निरास्वादाः संभवन्ति ततः
पुनः । तत्स्वरूपेण तिष्ठन्ति यावत्सृष्टिः प्रवर्तते ॥ २८ ॥ आनुलोम्यात्स्मृता सृष्टिः
प्रातिलोम्येन संहृतिः । अतः स्थानत्रयं त्यक्त्वा तुरीयं पदमव्ययम् ॥ २९ ॥ ध्यायेत्त
त्प्राप्तये लिङ्गं प्रविलाप्य परं विशेत् । भूतेन्द्रियमनोबुद्धिवासनाकर्मवायवः ॥ ३० ॥
अज्ञानं च प्रविष्टाः स्युर्लिङ्गमव्याकृते सति । इदानीं लिङ्गनिगडान्मुक्तोऽहं सर्वथा
यतः ॥ ३१ ॥ चिदंशत्वात्प्रविष्टोऽहं चैतन्यानन्दसागरे । अभेदात्परमात्मास्मि सर्वो
पाधिविवर्जितः ॥ ३२ ॥ कूटस्थः केवलो व्यापी चिदचिच्छक्तिमानहम् । घटाभावे
घटाकाशकलशाकाशयोर्यथा ॥ ३३ ॥ तमाहुः श्रुतयो ब्रह्म एवमेवैक्यमादरात् । यथा
ग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत् ॥ ३४ ॥ तदाख्यस्तन्मयो भूत्वा गृह्यते न विशे
षतः । यथा तृणादिकं क्षिप्तं रुमायां लवणं भवेत् ॥ ३५ ॥ अचेतनं जगन्न्यस्तं चैतन्ये
चेतनीभवेत् । यथा वै लवणग्रन्थिः समुद्रे सैन्धवो यथा ॥ ३६ ॥ नामरूपाद्विनिर्मु
क्ताः प्रविश्यापः समुद्रताम् । यथा जले जलं न्यस्तं क्षीरे क्षीरं घृते घृतम् ॥ ३७ ॥
अविनष्टा भवन्त्येते गृह्यन्ते न विशेषतः । तथाहं सर्वभावेन प्रविष्टश्चेतने सति ॥ ३८
॥ नित्यानन्दे समस्तज्ञे परे परमकारणे । नित्यं सर्वगतं शान्तं निरवद्यं निरञ्जनम् ॥
३९ ॥ निष्कलं निष्क्रियं शुद्धं तद्ब्रह्मास्मि परं पदम् । केवलं सत्यसंकल्पं शुद्धं ब्रह्मा
स्म्यहं परम् ॥ ४० ॥ पुण्यपापविनिर्मुक्तं कारणं जगतः परम् । अद्वितीयं परं ज्यो

31 BN vor cd: भरद्वाज उवाच ॥ – 34 a: LVb, BN श्रुतयो बह्वृच – 36 d: Lies सैन्धवो भवेत्

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

तिर्ब्रह्मास्म्यानन्दमद्वयम् ॥ ४१ ॥ एवमादिगुणैर्युक्तं सत्त्वादिगुणवर्जितम् । आविष्टं
सकलं ब्रह्म सदा ध्यायेत्सुकर्मकृत् ॥ ४२ ॥ एवमभ्यसतः पुंसो मनोऽस्तं याति तत्र
वै । मनस्यस्तं गते तस्य स्वयमात्मा प्रकाशते ॥ ४३ ॥ प्रसादे सर्वदुःखानां हानिः स्या
त्सुखमात्मनि । स्वयमात्मात्मनात्मानमानन्दं प्रतिपद्यते ॥ ४४ ॥ इति ते वर्णितं सर्वं
वसिष्ठस्योपदेशितम् । अनेन ज्ञानमार्गेण योगमार्गेण पुत्रक ॥ ४५ ॥ भरद्वाज महा
प्राज्ञ सर्वं ज्ञास्यसि निश्चितम् । परामर्शेन शास्त्रस्य गुरुवाक्यार्थबोधनात् ॥ ४६ ॥ अ
भ्यासात्सर्वसिद्धिः स्यादिति वेदानुशासनम् । तस्मात्त्वं सर्वमुत्सृज्य कुर्वभ्यासे स्थिरं
मनः ॥ ४७ ॥ भरद्वाज उवाच ॥ रामः प्राप्तः परं योगं स्वात्मनात्मनि हे मुने । कथं
वसिष्ठदेवेन व्यवहारः परः कृतः ॥ ४८ ॥ इति ज्ञात्वाहमप्येवमभ्यासार्थं यते यथा ।
तथैव व्यवहारोऽपि व्युत्थाने मे भविष्यति ॥ ४९ ॥ वाल्मीकिरुवाच ॥ यदा परिण
तः साधुः स्वस्वरूपे महामनाः । विश्वामित्रस्तदोवच वसिष्ठमृषिसत्तमम् ॥ ५० ॥ वि
श्वामित्र उवाच ॥ हे वसिष्ठ महाभाग ब्रह्मपुत्र महानसि । गुरुत्वं शक्तिपातेन तत्क्षणा
देव दर्शितम् ॥ ५१ ॥ दर्शनात्स्पर्शनाच्छब्दात्कृपया शिष्यदेहके । जनयेद्यः समावेशं
शांभवं स हि देशिकः ॥ ५२ ॥ रामोऽप्ययं विशुद्धात्मा विरक्तः स्वात्मनैव हि । वि
श्रान्तिमात्राकाङ्क्षी च संवादात्प्राप्तवान्पदम् ॥ ५३ ॥ शिष्यप्रज्ञैव बोधस्य कारणं गुरु
वाक्यतः । मलत्रयमपक्वं चेत्कथं बुध्यति पक्ववत् ॥ ५४ ॥ ज्ञानं प्रत्यक्षमेवेदं गुरुशि
ष्यप्रयोजनम् । उभावपि ततस्तज्ज्ञौ सर्वेषां मादृशामपि ॥ ५५ ॥ इदानीं कृपया राम
व्युत्थानं कर्तुमर्हसि । परेण परतस्त्वं हि कार्याविष्टोऽर्चयं यतः ॥ ५६ ॥ स्मर कार्यं
मम विभो यदुद्दिश्याहमागतः । प्रार्थितश्चातिकष्टेन राजा दशरथः स्वयम् ॥ ५७ ॥
तद्वृथा मा कृथाः सर्वं शुद्धेन मनसा मुने । देवकार्यं च रामान्यदवतारप्रयोजनम् ॥
५८ ॥ सिद्धाश्रमं मयानीतो रामो राक्षसमर्दनः । करिष्यति ततोऽहल्यामुक्तिं च जन
कात्मजाम् ॥ ५९ ॥ परिणेष्यति कोदण्डभङ्गेन कृतनिश्चयः । रामस्य जामदग्न्यस्य
कर्ता नैश्चित्यमात्मनः ॥ ६० ॥ पितृपैतामहं राज्यं त्यक्ष्यतेऽत्रैव निःस्पृहः । वनवास
च्छलेनेव दण्डकारण्यवासिनः ॥ ६१ ॥ उद्धरिष्यति तीर्थानि प्राणिनो दुःखिनो हि
ये । सीताहरणदौर्गत्यच्छलेन भुवि शोच्यताम् ॥ ६२ ॥ दर्शयिष्यति सर्वेषां रावणा
दिवधादपि । स्त्रीसङ्गिनां समासङ्गं वानरादिपरार्थताम् ॥ ६३ ॥ सीताविशुद्धिमन्वि
च्छन् लोकानुगतमात्मनः । जीवन्मुक्तो निःस्पृहोऽपि क्रियाकाण्डपरायनः ॥ ६४ ॥
भविष्यति परिप्रष्टुं ज्ञानकर्मसमुच्चयम् । यैर्दृष्टो यैः स्मृतो वापि यैः श्रुतो बोधितस्तु

41 d: Lies **०स्म्यनन्तम०**? (Vgl. 44d.) – 43 a: Lies **एवमभ्यस्यतः** – 44 a/b: Vgl. BhG 2.65. a: BN **प्रकाशे** d: Lies **०मनन्तं प्रतिपद्यते**? (Vgl. 41d.) – 45 b: Lies **०पदेशनम्*** 47 b: Lies **वेदान्तशासनम्**? – 48 d: Lies **व्यवहारपरः*** – 52 c: 2. Aufl. **समादेशं** – 55 c/d: LVb, BN **उभावपि ततो** [BN **यतो**] **यग्यौ सर्वेषामीदृशामपि** – 56 c/d: BN **पदे परिणतस्त्वं हि कार्याविष्टा वयं यतः** – 60 d: BN **कर्ता नष्टां गतिं ध्रुवम्** – 62 b: BN **प्राणिनो विविधानि हि** – 63 c: 2. Aufl. **समासङ्ग** c/d: BN **स्त्रीसङ्गिनामथास्वास्थ्यं वानरादेः परावृतिम्** – 64 b: BN **लोकानुमतिमात्मनः** – 65 a: BN **गतिं द्रष्टुं** b: BN **०समुच्चयौ**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch

यैः। सर्वावस्थागतानां तु जीवन्मुक्तिं प्रदास्यति ॥ ६५ ॥ इति कार्यमशेषेण त्रैलोक्य
स्य समापि हि। अनेन रामचन्द्रेण पुरुषेण महात्मना ॥ ६६ ॥ नमोऽस्मै जितमेवैते
कोऽप्येवं चिरमेधताम्। वसिष्ठ कृपया त्वं हि व्यवहारं परं कुरु ॥ ६७ ॥ वाल्मीकि
रुवाच ॥ इत्युक्त्वावस्थितस्तूष्णीं विश्वामित्रो महामुनिः। वसिष्ठस्तु महातेजा रामच
न्द्रमभाषत ॥ ६८ ॥ वसिष्ठ उवाच ॥ राम राम महाबाहो महापुरुष चिन्मय। नायं
विश्रान्तिकालो हि लोकानन्दमयो भव ॥ ६९ ॥ यावल्लोकपरामर्शो निरूढो नास्ति
योगिनः। तावद्रूढसमाधित्वं न भवत्येव निर्मलम् ॥ ७० ॥ तस्माद्राज्यादिविषयान्प
र्यालोच्य विनश्वरान्। देवकार्यादिभारांश्च त्यज पुत्र सुखी भव ॥ ७१ ॥ वाल्मीकिरु
वाच ॥ इत्युक्तोऽपि यदा रामः किंचिन्नोचे लयं गतः। तथा सुषुम्नया सोऽपि प्रवि
ष्टो हृदयं शनैः ॥ ७२ ॥ शक्तिप्राणमनःप्रशान्तकरणो जीवप्रकाशात्मको नाडीरन्ध्र
सुषुप्तसर्वकरणः प्रोन्मील्य नेत्रे शनैः। हृष्टोत्कृष्टवसिष्ठमुख्यविदुषो निर्मुक्तसर्वैषणः
कृत्याकृत्यविचारणाद्विरहितः सर्वान्प्रतीक्ष्य स्थितः ॥ ७३ ॥ राम उवाच ॥ न विधि
र्न निषेधश्च त्वत्प्रसादादहं पुनः। तथापि तव वाक्यं तत्करणीयं च सर्वदा ॥ ७४ ॥
वेदागमपुराणेषु स्मृतिष्वपि महामुने। गुरुवाक्यं विधिः प्रोक्तो निषेधस्तद्विपर्ययः ॥
७५ ॥ वाल्मीकिरुवाच ॥ इत्युक्त्वा चरणौ तस्य वसिष्ठस्य महात्मनः। शिरस्याधाय
सर्वात्मा सर्वान्प्राह घृणानिधिः ॥ ७६ ॥ सर्वे शृणुत भद्रं वो निश्चयेन सुनिश्चितम्।
आत्मज्ञानात्परं नास्ति गुरोरपि च तद्विदः ॥ ७७ ॥ सिद्धा ऊचुः ॥ रामैवमेव सर्वेषां
मनसि स्थितिमागतम्। त्वत्प्रसादाच्च सकलं संवादेन दृढीकृतम् ॥ ७८ ॥ सुखी भव
महाराज रामचन्द्र नमोऽस्तु ते। वसिष्ठेनाप्यनुज्ञाता गच्छामोऽद्य यथागतम् ॥ ७९
॥ वाल्मीकिरुवाच ॥ एवमुक्त्वा गताः सर्वे रामसंस्तवने रताः। रामचन्द्रस्य शिरसि
पौष्पी वृष्टिः पपात ह ॥ ८० ॥ एतत्ते सर्वमाख्यातं रामचन्द्रकथानकम्। अनेन क्र
मयोगेन भरद्वाज सुखी भव ॥ ८१ ॥ इति रघुपतिसिद्धिः प्रोदिता या मया ते वरमु
निवचनालीरत्नमाला विचित्रा। निखिलकविकुलानां योगिनां सेव्यरूपा परमगुरु
कटाक्षान्मुक्तिमार्गं ददाति ॥ ८२ ॥ यदिदं शृणुयान्नित्यं विधिं रामवसिष्ठयोः। सर्वा
वस्थोऽपि श्रवणान्मुक्तिमार्गं निगच्छति ॥ ८३ ॥ इह वैराग्यमुमुक्षुव्यवहारोत्पत्तिक
स्थितयः। उपशमनिर्वाणाख्ये वासिष्ठे षट् प्रकरणानि ॥ ८४ ॥ [इति श्रीवसिष्ठरा
मचन्द्रसंवादः ॥ ४५ ॥]

66 b: Lies **ममापि*** – 71 b: BN **०न्पर्यालोक्य** d: BN **भज पुत्र** – 72 d: BN **विवेश** – 73 (Śārdūla-vikrīḍita) a: BN **०मनःप्रसक्तिकरणो जीवः** b: BN **०सुपुष्टसर्वकरणः** c: BN **दृष्ट्वोत्कृष्ट०** d: BN **कृत्याकृत्य विचारणादिरहितः** – 74 a/b: BN **न विधेर्न निषेधस्य त्वत्प्रसादादहं प्रभुः** c: Lies **ममापि** c/d: Lies **तु करणीयं*** – 75 d: Lies **निषिद्धस्तद्विपर्ययः** – 76 c: Lies **महात्मा** – 80 **वाल्मीकिरुवाच** bei LN und LVb nach V 80 – 82 (Mālinī) a: Lies **सा मया** – 83 a: Lies **य इदं** (2. Aufl.) – 84 (Versmass?) Auch bei Ld/e nach 43.35; fehlt bei BN. – Kolophon zu Sarga 45: **इति श्रीतर्कवागीश्वरसाहित्याचार्य गौडमंडलालंकारश्रीमदभिनंदपंडितसमुद्धृते वासिष्ठरामायणे मोक्षोपाये सारोद्धारे भरद्वाजोपाख्याने श्रीवसिष्ठ रामचंद्रसंवादो नामाष्ठचत्वारिंशः** [sic] **सर्गः ॥ ४८ ॥ ॥ समाप्तोऽयं ग्रंथः ॥**

© 2019 by Institut für Indologe Wichtrach (Schweiz)
www.indologiewichtrach.ch